श्रीलक्ष्मणगणिविरचितं

सुपासनाहचरिअं ।

(प्रथमो भागः)

मूल्यं रूप्यकद्वयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jaina Vividha Sàhitya Shâstra Mâlâ No. 4.

SUPĀSANĀHA CHARIA

BY

LAKSHAMAṆA GAṆI

PART I

EDITED WITH SANSKRIT TRANSLATION

BY

PANDIT HARGOVIND DAS T. SHETH, NYĀYA-VYĀKARAṆTEERTHA

Calcutta University Lecturer and Examiner in Sanskrit and Prâkrit;
Author of "Haribhadra Suri Charitra"; Late Editor of
"Yashovijaya Jaina Granthamala" etc., etc.

BENARES

A. D. 1918

Price Two Rupees

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Printed by Pt. Atma Ram Sharma
at the George Printing Works, Kalbhairo, Benares City
AND
Published by V. G. Joshi, Hon, Manager,
Jaina Vividha Sahitya Shastra Mala Office, Benares City.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जैन-विविध-साहित्य-शास्त्रमाला (४)

श्रीलक्ष्मणगणिविरचितं

सुपासनाहचरित्रं ।

(प्रथमो भागः)

गूर्जरदेशान्तर्गतराजधन्यपुरवास्तव्येन श्रेष्ठित्रिकमचन्द्रतनूजेन कलिकाताविश्वविद्यालये
संस्कृत-प्राकृताध्यापक-परीक्षकेण न्याय-व्याकरणतीर्थपदवीकेन पण्डित-

हरगोविन्ददासेन

संशोधितं संस्कृतच्छायया विभूषितं च ।

वीरसंवत् २४४४

[मूल्यं रूप्यकद्वयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org



शेट शामचंद केवळचंद संघवी,
तळेगांव ढमढेरे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

॥ ॐ नमो वीतरागाय ॥

॥ सुपासनाह-चरिअं ॥

जयइ [1]जुयाइजिणिंदो अंतररिउविजयनाडयपबंधे । नवनिउणसुत्तहारोव्व विहियसुहसंघचउपत्तो ॥१॥
सियज्झाणानलपजलिरकम्मकंतारधूमलइउव्व । रेहंति जस्स अंसं सघोलिरा चिहुरकुरलीओ ॥२॥
चरिमं नमिमो सिरिवीरजिणवरं जस्स अज्जवि य तित्थं । जयइ तिलोईकमलाविलासतिलयंव सुपवित्तं ॥३॥
सेसेवि असेसे निक्कलेवि सयलेऽगुणेवि गुणकलिए । नमिमो [2]अणंगराए निहयअणंगेवि अजियाई ॥४॥
पणमह फुरंतपणफणकिरीडवररयणकिरणदीवेहिं । पयडंतं पिव सिवमग्गमग्गिमं सिरिसुपासजिणं ॥५॥
जाणं च तज्जणातज्जणीइ लग्गो ठवेमि मंदपए । कव्वपहे बालो इव ताण गुरूण नमामि कमे ॥६॥
सन्निज्झं मज्झ सया विमलंगोवंगगुणमहग्घविया । तिजयपियामहमुहकमलवासिणी कुणउ [3]सुयदेवी ॥७॥
गंभीरपसन्नपयप्पवाहिणिं विबुहजणमणाणंदं । कविकुलगिरिस्स वंदे सरस्सइं इंदभूइस्स ॥८॥
को न जणो हरिसिज्जइ तरंगवइ-वइयरं [4]सुणेऊण । इयरे पबंध-सिंधूवि पाविया जीए महुरत्तं ॥९॥
भद्दं सिरिहरिभद्दस्स सूरिणो जस्स भुवण-रंगम्मि । वाणी विसट्टरसभावमंथरा नच्चए सुइरं ॥१०॥
मंदारमंजरिं पिव सुरावि सवणावयं सयं [5]णिंति । पागयपबंधकइणो वाणिं सिरिजीवदेवस्स ॥११॥

जयति युगादिजिनेन्द्र आन्तररिपुविजयनाटकप्रबन्धे । नवनिपुणसूत्रधार इव विहितशुभसंघचतुष्पात्रः ॥१॥
सितध्यानानलप्रज्वलनशीलकर्मकान्तारधूमलता इव । राजन्ति यस्यांसे सघूर्णनाश्चिहुरकुरल्यः ॥२॥
चरमं नमामः श्रीवीरजिनवरं यस्याद्यापि च तीर्थम् । जयति त्रिलोकीकमलाविलासतिलकमिव सुपवित्रम् ॥३॥
शेषानप्यशेषान्निष्कलानपि सकलानगुणानपि गुणकलितान् । नमामोऽनङ्गरागान्निहतानङ्गानप्यजितादीन् ॥४॥
प्रणमत स्फुरत्पञ्चफणाकिरीटवररत्नकिरणदीपैः । प्रकटयन्तमिव शिवमार्गमग्रिमं श्रीसुपार्श्वजिनम् ॥५॥
येषां च तर्जनातर्जन्यां लग्नः स्थापयामि मन्दपदानि । काव्यपथे बाल इव तेषां गुरूणां नमामि क्रमान् ॥६॥
सांनिध्यं मम सदा विमलाङ्गोपाङ्गगुणमहर्घिता । त्रिजगत्पितामहमुखकमलवासिनी करोतु श्रुतदेवी ॥७॥
गम्भीरप्रसन्नपद(यः)प्रवाहिनीं विबुधजनमनआनन्दाम् । कविकुलगिरेर्वन्दे सरस्वतीमिन्द्रभूतेः ॥८॥
को न जनो हृष्येत् तरङ्गवतीव्यतिकरं श्रुत्वा । इतरे प्रबन्धसिन्धवोऽपि प्रापिता यया मधुरत्वम् ॥९॥
भद्रं श्रीहरिभद्रस्य सूरेर्यस्य भुवनरङ्गे । वाणी विकसितरसभावमन्थरा नृत्यति सुचिरम् ॥१०॥
मन्दारमञ्जरीमिव सुरा अपि श्रवणपदं स्वयं नयन्ति । प्राकृतप्रबन्धकवयो वाणिं श्रीजीवदेवस्य ॥११॥

---

१ ख. जुगाइ । २ अनङ्गे कामदेवे रागो येषां तानिति विरोधः, नास्त्यङ्गरागो येषां तानिति परिहारः । ३ क. ग. °यपवी । ४ ग. °ऊणं ।
५ ख. निंति । ६ चिहुराणां=केशानां कुरल्यः=वक्रसटाः 'करचली' इति भाषायाम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इह सुयणा कह मह संथवारिहा, जे पबंधगुणलेसं । गिण्हंति दिट्ठमित्तंपि पयडवियडेविय न हु दोसे ॥१२॥
ता इह संथवियव्वा पढमं चिय दुज्जणा गुरुजणव्व । जाण वयणाण भीओ जत्तेण कई कुणइ कव्वं ॥१३॥
अहवा एयम्मि समुज्जयस्स मह किं इमाए चिंताए । को सुरगिरिणो सरणिं पुच्छइ जलहिम्मि गंतुमणो?॥१४॥
ता इह सुपासचरियं विरइउकामस्स मह जहासत्ति । नियनियभावेणुवयारकारिणो हुंतु ते दोवि ॥१५॥
इह पुव्वसुकइविरइयपबंधसवणेण जणियगुरुहरिसो । कह लोओ अम्हारिसरइयपबंधेसु अहिरमउ?॥१६॥
कत्थाहं मंदमई कत्थ सुपासस्स चरियपरिकहणं । गुरुतरुफलखिवियकरो ता हसणिज्जो म्हि कुज्जुव्व॥१७॥
तहवि य जिणवरगुणसंथवेण कम्मं खवंति इह जीवा । एएण कारणेणं मज्झ पवित्ती इमा जाया ॥१८॥
सुकइत्तणकित्तिं पुण महेमि एयाउ न बुहमज्झम्मि । गंधत्थमित्थ न हु गंठिवन्नयं चरइ गंधमओ ॥१९॥
अलमित्थ वित्थरेणं, ता संपइ पत्थुअत्थवित्थारं । कयमंगलोवयारो करेमि भत्तीए जहसत्ति ॥२०॥

अत्थि चउजलहिरसणामणहरमहिमहिलियाए मुहकमले । सुपवित्तमंडणं धाइसंडनामो महादीवो॥२१॥
जो नीसढनीलवंतायलेहिं गयणग्गलग्गसिंगेहिं । रेहइ नहसिरिपरिरंभणत्थमुक्खिवियबाहुव्व ॥२२॥
[2]बहुवन्नधन्नपयपूरपावियं करिसएहिं [3]संकिण्णं । पुव्वविदेहभिधाणं तत्थ य खित्तं सुखित्तंव ॥२३॥
जं नीलवंतगिरिसिंगसरियसीयासरिप्पवाहेण । पयडियकित्तिपडायंव [4]सहइ नियपरमपुरिसाण ॥२४॥

इह सुजनाः कथं मम संस्तवार्हाः, ये प्रबन्धगुणलेशम् । गृह्णन्ति दृष्टमात्रमपि प्रकटविकटानपि न तु दोषान्॥१२॥
तत इह संस्तोतव्याः प्रथममेव दुर्जना गुरुजना इव । येषां वचनेभ्यो भीतो यत्नेन कविः करोति काव्यम्॥१३॥
अथवैतस्मिन् समुद्यतस्य मम किमनया चिन्तया? । कः सुरगिरेः सरणिं पृच्छति जलधौ गन्तुमनाः? ॥१४॥
तस्मादिह सुपार्श्वचरितं विरचयितुकामस्य मम यथाशक्ति। निजनिजभावेनोपकारकारिणौ भवतां तौ द्वावपि॥१५॥
इह पूर्वसुकविविरचितप्रबन्धश्रवणेन जनितगुरुहर्षः । कथं लोकोऽस्मादृशरचितप्रबन्धेष्वभिरमताम्? ॥१६॥
कुत्राहं मन्दमतिः कुत्र सुपार्श्वस्य चरितपरिकथनम्?। गुरुतरुफलक्षिप्तकरस्तस्माद्धसनीयोऽस्मि कुब्ज इव॥१७॥
तथापि च जिनवरगुणसंस्तवेन कर्म क्षपयन्तीह जीवाः । एतेन कारणेन मम प्रवृत्तिरियं जाता ॥१८॥
सुकवित्वकीर्तिं पुनः काङ्क्षाम्येतस्माद् न बुधमध्ये । गन्धार्थमत्र न खलु ग्रन्थिवर्णकं चरति गन्धमृगः॥१९॥
अलमत्र विस्तरेण, तस्मात् संप्रति प्रस्तुतार्थविस्तारम् । कृतमङ्गलोपचारः करोमि भक्त्या यथाशक्ति ॥२०॥

अस्ति चतुर्जलधिरसनामनोहरमहीमहिलाया मुखकमले । सुपवित्रमण्डनं धातकीषण्डनामा महाद्वीपः॥२१॥
यो निषधनीलवदचलाभ्यां गगनाग्रलग्नशृङ्गैः । राजते नभःश्रीपरिरम्भणार्थमुत्क्षिप्तबाहुरिव ॥२२॥
बहुवर्णध(धा)न्यपद(य:)पूरपावितं करिशतैः (कर्षकैः)संकीर्णम् । पूर्वविदेहाभिधानं तत्र च क्षेत्रं सुक्षेत्रमिव॥२३॥
यद् नीलवद्गिरिशृङ्गसृतसीतासरित्प्रवाहेण । प्रकटितकीर्त्तिपताकमिव राजते निजपरमपुरुषाणाम् ॥२४॥

---

१ ग. हुंतु । २ विदेहपक्षे बहुवर्णका भिन्नजातीया ये धन्या भाग्यशालिनः पुरुषास्तेषां पदानां चरणानां पूरैः समूहैः पावितं पवित्रितम्, क्षेत्रपक्षे बहुवर्णानि धान्यानि यस्मात् तादृशेन पयःपूरेण जलप्रवाहेण पावितमित्यर्थः । ३ क. ख. °किन्नं । ४ ख. साहइ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्थि तरुणियणपारद्धवरमंगलो मंगलुग्गारबहिरीकयंबरतलो ।
तलवरप्पमुहनिवलोयरक्खियपुरो पुरजणारद्धसविसेसधम्मुज्जमो ॥२५॥
जमियजोगेहिं साहूहिं सुपवित्तिओ तियससमरूवतरुणयणकयविब्भमो ।
भमरपरिकलणखमकमलभूसियसरो सरसमल्लीणहंसावलीमणहरो ॥२६॥
हरियपरिकवलणापुट्ठगोसंकुलो कुलसमुप्पन्ननरनियरपयडियनओ ।
नय कया कलिनिवोवहयनरमयसुहो सुहयरो पवररमणिज्जविजओ तहिं ॥२७॥

तत्थ य जिणधम्ममहामहिवालनिवासगाढदुग्गंव । नयरी सुहंकरिच्चिय अत्थि जहत्था जयपसिद्धा ॥२८॥
जीए विसालुत्तुंगो मणिमयकविसीसकलियपायारो । गयणसिरीए रसणाकलावलायण्णमुव्वहइ ॥२९॥
जीए जलरासिसच्छहपरिहासंकंतरुइररविबिंबं । जालाकलावपिंगलवडवानललीलमुव्वहइ ॥३०॥
जीए समुन्नयजिणभवणसिहरसंठवियकणयकलसाण । मज्झेण पॅल्लुट्टंतं न मुणिज्जइ मंडलं रविणो ॥३१॥
जीए ससिकंतमणिमंदिराइं निसि ससिकरावपुट्ठाइं । वियलियबाहजलाइं रोयंतिव तरणितवियाइं ॥३२॥
गयदोसावि सदोसव्व जीए पविसंति कहवि रविपाया । कोडीसरघरसच्चवियचिंधसंरुद्धसंचारा ॥३३॥
कमलदलट्ठियजललवतरलावि न जं कयावि कयराया । मुंचइ निवासिजणगुणकलावसंदाणियव्व सिरी॥३४॥
रंगिरतुंगतुरंगमखुरग्गनिग्घायविहुरियं धरणिं । सिंचंति जीए करसीयरेण सदयव्व करिविसरा ॥३५॥

अस्ति तरुणीजनप्रारब्धवरमङ्गलो मङ्गलोद्गारबधिरीकृताम्बरतलः ।
पुररक्षकप्रमुखनृपलोकरक्षितपुरः पुरजनारब्धसविशेषधर्मोद्यमः ॥२५॥
यमितयोगैः साधुभिः सुपवित्रितस्त्रिदशसमरूपतरुणजनकृतविभ्रमः ।
भ्रमरपरिकलनक्षमकमलभूषितसरः सरःसमालीनहंसावलीमनोहरः ॥२६॥
हरितपरिकवलनापुष्टगोसंकुलः कुलसमुत्पन्ननरनिकरप्रकटितनयः ।
नच कदा कलिनृपोपहतनरमृगसुखः सुखकरः प्रवररमणीयविजयस्तस्मिन् ॥२७॥

तत्र च जिनधर्ममहामहीपालनिवासगाढदुर्ग इव । नगरी शुभङ्करी खल्वस्ति यथार्था जगत्प्रसिद्धा ॥२८॥
यस्या विशालोत्तुङ्गो मणिमयकपिशीर्षकलितप्राकारः । गगनश्रियो रसनाकलापलावण्यमुद्वहति ॥२९॥
यस्या जलराशिसदृशपरिखासंक्रान्तरुचिररविबिम्बम् । ज्वालाकलापपिङ्गलवडवानललीलामुद्वहति ॥३०॥
यस्याः समुन्नतजिनभवनशिखरसंस्थापितकनककलशानाम् । मध्येन पर्यस्यमानं न ज्ञायते मण्डलं रवेः ॥३१॥
यस्याः शशिकान्तमणिमन्दिराणि निशि शशिकरावस्पृष्टानि । विगलितबाष्पजलानि रुदन्तीव तरणितप्तानि॥३२॥
गतदोषा अपि सदोषा इव यस्यां प्रविशन्ति कथमपि रविपादाः। कोटीश्वरगृहदृष्टचिह्नसंरुद्धसंचाराः ॥३३॥
कमलदलस्थितजललवतरलापि न यां कदापि कृतरागा । मुञ्चति निवासिजनगुणकलापसंदानितेव श्रीः ॥३४॥
रङ्गनशीलतुङ्गतुरङ्गमखुराग्रनिर्घातविधुरितां धरणिम् । सिञ्चन्ति यस्याः करसीकरेण सदया इव करिविसराः॥३५॥

---

१ ग. °ववरतरुणिक°। २ ख. लावन्न° ग. लावण्ण° । ३ ग. पलोट्टं° ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दढभुयदंडालाणियकमलाकरिणी निवो समरसीहो । चउरंगचमूसंचाररुद्धधरणीयलो तत्थ ॥३६॥
मंडलियचंडकोदंडमुक्ककंडोलिखंडियसिरेहिं । जो रयइ रणे जयसिरि पवेसपउमोवयारंव ॥३७॥
विमलकरवालधाराजलेण चित्ताइं रिउचरित्ताइं । जो फुसइ भुवणभवणंतरालभित्तीनिहित्ताइं ॥३८॥
जस्स य जसजलसित्तं पयावपावयपलुट्ठमवणियलं । नवकंदलकलियं पिव जयथंभमिसा सया सहइ ॥३९॥
तस्स य सारयच्छणससिसमवयणा मयणकंदली दइया । नियनिरुवमसुंदेरिमअहरीकयकुसुमसरघरिणी ॥४०॥
चिरचिन्नपुन्नपब्भारपरिणयं तीए सह निवो निच्चं । भुंजंतो विसयसुहं सुहेण वोलेइ बहुकालं ॥४१॥
अह अन्नया य सेवासमागयासेसमंतिसामंते । कयजहुचियसम्माणे संझावसरे विसज्जेउं ॥४२॥
कयदेवपायपूयापहणियनीसेसविग्घसंघाओ । संभाविऊण सब्भावनिब्भरं किंपि नियदइयं ॥४३॥
विमलच्छवत्थपच्छाइयाए सुरसरियपुलिणपिहुलाए । मिउसुहुमहंसतूलोवहाणकलियाए सेज्जाए ॥४४॥
निद्दामुद्दामिलियच्छिसंपुडो जाव वासभवणम्मि । निविडीकयदारकवाडसंपुडो चिट्ठइ निसीहे ॥४५॥
ताव सहसत्ति निद्दासम्मद्दुवमद्दविहडियच्छिपुडो । पिच्छइ पुरओ रमणिं तणुप्पहापहयतमपडलं ॥४६॥
चरणारविंदभममिलियमुहलभसलावलिंव वहमाणिं । मरगयमणिमयमंजीरजुवलयं मंजुसिंजणयं ॥४७॥
कलयंतिं मणिमयकिरणकिंकिणीकलियमेहलं रमणं । कयतुमुलतलवराउलसालं रइरमणनयरंव ॥४८॥
मुत्तावलिं वहंतिं घडिमालं पिव सतण्हतरुणकए । गुरुनाहिवाविलायन्नरससमाकरिसणत्थंव ॥४९॥

दृढभुजदण्डालानितकमलाकरिणीको नृपः समरसिंहः । चतुरङ्गचमूसंचाररुद्धधरणीतलस्तत्र ॥३६॥
मण्डलितचण्डकोदण्डमुक्तकाण्डालिखण्डितशिरोभिः । यो रचयति रणे जयश्रीप्रवेशपद्मोपचारमिव ॥३७॥
विमलकरवालधाराजलेन चित्राणि रिपुचरित्राणि । यः स्पृशति भुवनभवनान्तरालभित्तिनिहितानि ॥३८॥
यस्य च यशोजलसिक्तं प्रतापपावकपर्यस्तमवनितलम् । नवकन्दलकलितमिव जयस्तम्भमिषात्सदा राजति ॥३९॥
यस्य च शारदक्षणशशिसमवदना मदनकन्दली दयिता । निजनिरुपमसौन्दर्याधरीकृतकुसुमशरगृहिणी ॥४०॥
चिरचीर्णपुण्यप्राग्भारपरिणयं तया सह नृपो नित्यम् । भुञ्जानो विषयसुखं सुखेनातिक्रामति बहुकालम् ॥४१॥
अथान्यदा च सेवासमागताशेषमन्त्रिसामन्तान् । कृतयथोचितसम्मानान् सन्ध्यावसरे विसृज्य ॥४२॥
कृतदेवपादपूजाप्रहतनिःशेषविघ्नसंघातः । संभाव्य सद्भावनिर्भरं किमपि निजदयिताम् ॥४३॥
विमलाच्छवस्त्रप्रच्छादितायां सुरसरित्पुलिनपृथुलायाम् । मृदुसूक्ष्महंसतूलोपधानकलितायां शय्यायाम् ॥४४॥
निद्रामुद्रामिलिताक्षिसंपुटो यावद् वासभवने । निबिडीकृतद्वारकपाटसंपुटस्तिष्ठति निशीथे ॥४५॥
तावत् सहसेति निद्रासंमर्दोपमर्दविघटिताक्षिपुटः । पश्यति पुरतो रमणीं तनुप्रभाप्रहततमःपटलाम् ॥४६॥
चरणारविन्दभ्रममिलितमुखरभ्रमरावलिमिव वहन्तीम् । मरकतमणिमयमञ्जीरयुगलकं मञ्जुसिञ्जनकम् ॥४७॥
कलयन्तीं मणिमयकिरणकिङ्किणीकलितमेखलां रमणम् । कृततुमुलपुररक्षकाकुलसालं रतिरमणनगरमिव ॥४८॥
मुक्तावलीं वहन्तीं घटीमालामिव सतृष्णतरुणकृते । गुरुनाभिवापीलावण्यरससमाकर्षणार्थमिव ॥४९॥

---

१ क. ग. पच्छ । २ क. सिज्जाए । ३ क. किंकणी । ४ क. ख. वहिंतिं ।

सीमंतनिसियवरपउमरायमणिकिरणरंजियं भालं । कंकेल्लिपल्लविल्लं वम्महसयणंव वहमाणि ॥५०॥
अह तं निरुवमरूवोवसोहियं पिच्छिऊण नरनाहो । विम्हयरसरसियंतकरणो स परिचिंतिउं लग्गो॥५१॥
किं काचि कामिणी निसियमयणबाणप्पहारविहुरियया । सविसेसभूसियंगी सरणत्थं मं समल्लीणा?॥५२॥
अहवा ठाणम्मि इमम्मि पबलवायालजामइल्लम्मि । पयचारीण पवेसो कहं नु, ता नूणममरीयं ॥५३॥
अहव किमिमिणा मह संसएण, जा कावि होइ सा होउ । अब्भागयत्ति काउं अब्भुट्ठाणारिहा ताव ॥५४॥
इय चिंतिऊण परिचत्तसिज्जसंगेण तेण धरणियलं । मउलियकरकमलेणं पवित्तियं पायपउमेहिं ॥५५॥
पसरंतदंतकिरणालिदलियतिमिरं पयंपियं तयणु । सुअणु ! तए नियजम्मेण भूसिया कहसु का जाई? ॥५६॥
का य तुह नामवण्णावली विभूसेई लोयवयणाइं ? । केण व कज्जेण गिहं पवित्तियं चरणफुंसेण ? ॥५७॥
इय बहुमाणपुरस्सरणरवइजुत्ताभिभासणपहिट्ठा । सा पभणइ निवपुंगव ! जइ सुस्सूसा तुह इहत्थे ॥५८॥
ता होसु सावहाणो खणमेगं जेण तुज्झ अहुणावि । पयडेमि पुव्वपुट्ठं सवित्थरं, तो इमं कहइ ॥५९॥
अत्थि ससिकंतमणिसालचंगिमासमियसग्गसोहग्गं । असढवियड्ढमहिड्ढियनरकलियं रयणसारपुरं ॥६०॥
तं पालइ पोढपयावजलणजालावलीहिं सयकालं । जलियदरियारिवंसो राया संगामसूरोत्ति ॥६१॥
तस्स य समग्गसोहग्गपमुहगुणगामगामणी दइया । रइरमणगेहिणी इव नामेणं चंदलेहत्ति ॥६२॥
अवरुप्परपीइपरायणंतकरणाण ताण सयकालं । अन्नोन्नअमंदाणंदमंदिरा वासरा जंति ॥६३॥

सीमन्तनिश्रितवरपद्मरागमणिकिरणरञ्जितं भालम् । कङ्केल्लिपल्लववद् मन्मथसदनमिव वहन्तीम् ॥५०॥
अथ तं निरुपमरूपोपशोभितां दृष्ट्वा नरनाथः । विस्मयरसरसितान्तःकरणः स परिचिन्तयितुं लग्नः ॥५१॥
किं काचित् कामिनी निशितमदनबाणप्रहारविधुरिता । सविशेषभूषिताङ्गी शरणार्थं मां समालीना ? ॥५२॥
अथवा स्थानेऽस्मिन् प्रबलवाचालयामिके । पदचारिणां प्रवेशः कथं नु, तस्माद् नूनममरीयम् ॥५३॥
अथवा किमनेन मम संशयेन, या कापि भवति सा भवतु । अभ्यागतेति कृत्वाऽभ्युत्थानार्हा तावत् ॥५४॥
इति चिन्तयित्वा परित्यक्तशय्यासङ्गेन तेन धरणितलम् । मुकुलितकरकमलेन पवित्रितं पादपद्माभ्याम् ॥५५॥
प्रसरद्दन्तकिरणालिदलिततिमिरं प्रजल्पितं तदनु । सुतनु ! त्वया निजजन्मना भूषिता कथय का जातिः ?॥५६॥
का च तव नामवर्णावली विभूषयति लोकवदनानि ?। केन वा कार्येण गृहं पवित्रितं चरणस्पर्शेन ? ॥५७॥
इति बहुमानपुरस्सरनरपतियुक्ताभिभाषणप्रहृष्टा । सा प्रभणति नृपपुङ्गव ! यदि शुश्रूषा तवेहार्थे ॥५८॥
ततो भव सावधानः क्षणमेकं येन तवाधुनापि । प्रकटयामि पूर्वपृष्टं सविस्तरं, तत इदं कथयति ॥५९॥
अस्ति शशिकान्तमणिसालचङ्गिमाश्रमितस्वर्गसौभाग्यम् । अशठविदग्धमहार्द्धिकनरकलितं रत्नसारपुरम् ॥६०॥
तं पालयति प्रौढप्रतापज्वलनज्वालावलीभिः सदाकालम् । ज्वलितदृप्तारिवंशो राजा संग्रामशूर इति ॥६१॥
तस्य समग्रसौभाग्यप्रमुखगुणग्रामणीर्दयिता । रतिरमणगेहिनीव नाम्ना चन्द्रलेखेति ॥६२॥
परस्परप्रीतिपरायणान्तःकरणयोस्तयोः सदाकालम् । अन्योन्यामन्दानन्दमन्दिराणि वासरा यान्ति ॥६३॥

---

१ क. ग. कंकिल्लि । २ क. ग. °हुरद्दिया ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह अन्नया य सह सहयरीहिं पासायसिहरमारूढा । जा चिट्ठइ ता पिच्छइ कयसिंगारं नयरलोयं ॥६४॥
अंकनिवेसियनियनियपुत्तयपडिपुत्तनत्तपुत्तीयं । विविहफलफुल्लपरिकलियपडलियावावडकरग्गं ॥६५॥
कुसुमावयंसगाभिहउज्जाणेऽणंगतेरसिदिणम्मि । गच्छंतं कुसुमाउहपयजुयलसमच्चणनिमित्तं ॥६६॥
तम्मज्झट्ठियबहुविहरयणाहरणेहिं भूसियसरीरं । पिच्छइ कमलायरमंतिपणइणिं लडहलायण्णं ॥६७॥
सोहग्गमडप्फरहेरियकामघरणिं सुहासणासीणं । अंकनिवेसियदुहियं लालिंति[1] विविहभंगीहिं ॥६८॥
तं पिच्छिऊण संगामसूरनरनाहपणइणी सहसा । ससहरकरचुंबियकमलिणिव्व दीणाणणा जाया ॥६९॥
पाउब्भवंतनिम्मेरमन्नुभरभारनीसहा तयणु । कोवभवणम्मि जरजिन्नसिक्कडे पडइ जरियव्व ॥७०॥
चिंतइ नियबालाए विभूसियाणंगतेरसिदिणम्मि । जा एवं विलसइ मंतिपणइणी सच्चिय कयत्था ॥७१॥
विहलो च्चिय मह महिलाजम्मो कंकेल्लितरुलयाएव्व । जीए सुयपसवफलणेण पावियं नेय जम्मफलं ॥७२॥
ता कहणु सलहणिज्जा पियमाणसफुरणरायहंसीवि । होमि अहं जीउच्छंगलंछणं नेय दुहियावि ॥७३॥
इय तीए नियपसवोवलंभचितासमुद्दपडियाए । तद्दुक्खदुक्खिओ इव दिवसवसाणक्खणो पत्तो ॥७४॥
एत्थंतरम्मि रोसारुणच्छिअसईकडक्खलक्खेहिं । विच्छुरियं पिव रविणो बिंबं आयंबिरं जायं ॥७५॥
अच्छोययंव सेवइ खणेण भाणू विलूणकरपसरो । अवरसमुद्दे पुणरवि दिणलच्छीसंगमनिमित्तं ॥७६॥
अत्थं गयम्मि सूरे कमेण अक्कमइ दसदिसाचक्कं । तम्मग्गमग्गणत्थंव पमुइयं तिमिरनिवसिविरं ॥७७॥

अथान्यदा च सह सहचरीभिः प्रासादशिखरमारूढा । यावत् तिष्ठति तावत्पश्यति कृतशृङ्गारं नगरलोकम् ॥६४॥
अङ्कनिवेशितनिजनिजपुत्रकप्रतिपुत्रनप्तृपुत्रीकम् । विविधफलपुष्पपरिकलितपटलिकाव्याप्रतकराग्रम् ॥६५॥
कुसुमावतंसकाभिधोद्यानेऽनङ्गत्रयोदशीदिने । गच्छन्तं कुसुमायुधपदयुगलसमर्चननिमित्तम् ॥६६॥
तन्मध्यस्थितबहुविधरत्नाभरणैर्भूषितशरीराम् । पश्यति कमलाकरमन्त्रिप्रणयिनीं सुन्दरलावण्याम् ॥६७॥
सौभाग्यगर्वाधरितकामगृहिणिकां सुखासनासीनाम् । अङ्कनिवेशितदुहितरं लालयन्तीं विविधभङ्गिभिः ॥६८॥
तां दृष्ट्वा संग्रामशूरनरनाथप्रणयिनी सहसा । शशधरकरचुम्बितकमलिनीव दीनानना जाता ॥६९॥
प्रादुर्भवन्निर्मर्यादमन्युभरभारनिःसहा तदनु । कोपभवने जराजीर्णसीत्कटे पतति ज्वरितेव ॥७०॥
चिन्तयति निजबालया विभूषिताऽनङ्गत्रयोदशीदिने । यैवं विलसति मन्त्रिप्रणयिनी सैव कृतार्था ॥७१॥
विफलमेव मम महिलाजन्म कङ्केल्लितरुलताया इव । यया सुतप्रसवफलनेन प्राप्तं नैव जन्मफलम् ॥७२॥
तस्मात्कथं नु श्लाघनीया प्रियमानसस्फुरणराजहंस्यपि । भवाम्यहं यस्या उत्सङ्गलाञ्छनं नैव दुहितापि ॥७३॥
इति तस्यां निजप्रसवोपलम्भचिन्तासमुद्रपतितायाम् । तद्दुःखदुःखित इव दिवसावसानक्षणः प्राप्तः ॥७४॥
अत्रान्तरे रोषारुणाक्ष्यसतीकटाक्षलक्षैः । विच्छुरितमिव रवेर्बिम्बमाताम्रं जातम् ॥७५॥
अच्छोदकमिव सेवते क्षणेन भानुर्विलूनकरप्रसरः । अपरसमुद्रे पुनरपि दिनलक्ष्मीसङ्गमनिमित्तम् ॥७६॥
अस्तं गते सूरे क्रमेणाक्रामति दशदिक्चक्रम् । तन्मार्गमार्गणार्थमिव प्रमुदितं तिमिरनृपशिबिरम् ॥७७॥

---

१ क. डरिय । २ क. ख. लालंतिं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एत्तो य चंदलेहाए कोवभवणप्पवेसवुत्तंतो । संगामसूररायस्स साहिओ सोवियल्लीए ॥७८॥
सोवि हु नियअवराहासंकासंभंतमाणसो एइ । तीसे पसायणत्थं कयसंझाविहियकायव्वो ॥७९॥
अब्भुट्ठाणाइविहिं काऊणं सावि ठाइ तुण्हिक्का । तयभिमुहं सप्पणयं तो राया भणिउमारद्धो ॥८०॥
किं देवि! मए मणसावि कामिणिं कमवि अहिलसंतेण। तुह अवरद्धं किंचिवि विहियं आहरणखूणंवा॥८१॥
अहवावि विसमदिट्ठीए नियइ तुह पायपंकयं कोवि ?। किंवा परियणमज्झम्मि कोवि अवगन्नए आणं ? ॥८२॥
अहवावि सत्तुसीमंतिणीउ समसीसियं समं तुमए। कम्मिवि अत्थे कुव्वंति कहसु कमलच्छि ! पसिऊणं॥८३॥
सा जंपइ अवरद्धं न तए खूणंपि कत्थविय विहियं। विसमंपि कोवि न नियइ नय आणं खंडए कोवि॥८४॥
सत्तुकामिणीओवि मए समं कह कुणंतु समसीसिं । जयनिहणरक्खणखमा जा तुह पभवंति भुयदंडा॥८५॥
किंपुण पहु ! अवरज्झइ एत्थ विही जेण सव्वसामग्गिं । विहिऊण मंदपुन्नाए दंसियं नेय जायसुहं ॥८६॥
किंच,
पिययम ! तुमंपि वसणासणभोयणमित्तपुन्नपरिभोगो। कस्स कए उप्पायसि विहवभरं संतईए विणा ?॥८७॥
रयणनिहिणेव जणएण जेण महुसूयणस्सव सुयस्स । उप्पाइऊण लच्छी वियरिज्जइ अइविसालावि ॥८८॥
तियसपुरपत्थियस्सवि होही तुह कहणु निव्वुई पच्छा। जइ नो हविस्सइ सुओ कुलधम्मधणाइवुड्ढिकरो॥८९॥
ता किं बहुणा पिय ! जंपिएण तं किंपि कुणसु तं इण्हिं । गब्भाणुभावपंडुरगंडयलं नियसि मं जेणं ॥९०॥

इतश्च चन्द्रलेखायाः कोपभवनप्रवेशवृत्तान्तः । संग्रामशूरराजस्य कथितः सौविदल्ल्या ॥७८॥
सोऽपि खलु निजापराधाशङ्कासंभ्रान्तमानस एति । तस्याः प्रसादनार्थं कृतसन्ध्याविहितकर्तव्यः ॥७९॥
अभ्युत्थानादिविधिं कृत्वा सापि तिष्ठति तूष्णीका । तदभिमुखं सप्रणयं ततो राजा भणितुमारब्धः ॥८०॥
किं देवि ! मया मनसापि कामिनीं कामप्यभिलषमाणेन । तवापराद्धं किञ्चिदपि विहितमाभरणक्षूणं वा ?॥८१॥
अथवापि विषमदृष्ट्या पश्यति तव पादपङ्कजं कोऽपि । किंवा परिजनमध्ये कोप्यवगणयत्याज्ञाम् ? ॥८२॥
अथवापि शत्रुसीमन्तिन्यः स्पर्धां समं त्वया । कस्मिन्नप्यर्थे कुर्वन्ति कथय कमलाक्षि ! प्रसीद ॥८३॥
सा जल्पत्यपराद्धं न त्वया क्षूणमपि कुत्रापिच विहितम्। विषममपि कोऽपि न पश्यति नचाज्ञां खण्डयति कोऽपि ॥
शत्रुकामिन्योऽपि मया समं कथं कुर्वन्तु स्पर्धाम् । जगन्निधनरक्षणक्षमौ यावत् तव प्रभवतो भुजदण्डौ ॥८५॥
किन्तु प्रभो ! अपराध्यत्यत्र विधिर्येन सर्वसामग्रीम् । विधाय मन्दपुण्याया दर्शितं नैव जातसुखम् ॥८६॥
किञ्च,
प्रियतम ! त्वमपि वसनासनभोजनमात्रपूर्णपरिभोगः। कस्य कृते उत्पादयसि विभवभरं सन्तत्या विना ?॥८७॥
रत्ननिधिनेव जनकेन येन मधुसूदनायेव सुताय । उत्पाद्य लक्ष्मीर्वितीर्यतेऽतिविशालापि ॥८८॥
त्रिदशपुरप्रस्थितस्यापि भविष्यति तव कथं नु निर्वृतिः पश्चात्। यदि नो भविष्यति सुतः कुलधर्मधनादिवृद्धिकरः
तस्मात्किं बहुना प्रिय ! जल्पितेन तत्किमपि कुरु त्वमिदानीम्। गर्भानुभावपाण्डुरगण्डतलां पश्यसि मां येन॥९०॥

---

१ ग. भाय° ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह राया भणइ सयावि मज्झ दूमइ मणम्मि एसत्थो । नवरं इहभवसंचिंतणाइसज्झो न होइ फुडं ॥९१॥
किंतु पिए ! पुव्वभवाणुचिन्नेहिं सिज्झए नूणं । ताइं विहियाइं न हु होज्ज, तेण न हु संतई अम्ह ॥९२॥
ता पिययमे ! विसायं मुंचसु इण्हिं कुणेसु सविसेसं । कुलदेवयाइ पूयं इत्थ सुओयैाइयं च तहा ॥९३॥
इय सोऊणं अंतोफुरंतदररोसकंपिरहराए । संगामसूरनरवइसमुहं देवीए भणियमिमं ॥९४॥
पिययम ! पुव्वाइट्ठं सव्वंपि सवित्थरं मए विहियं । भत्तिभरणिब्भराए तहावि न समीहियं सिद्धं ॥९५॥
किंच,
सुहसज्झं चिय कज्जं किज्जइ महिलाहिं नूण लोयम्मि । दुस्सज्झं पुण कज्जं कुणंति पुरिसाण भुयदंडा ॥९६॥
जेणं साहससहिया गणंति ते गिरिवरंपि गिरिकप्पं । भुयगाहिवंपि रज्जुं पायालंपि हु बिलायारं ॥९७॥
ता तुंब्भिच्चिय इह उज्जमंतु इय निसुणिऊण से वयणं । किंकायव्वविमूढो जा चिट्ठइ नरवरो तत्थ ॥९८॥
ताव सहसत्ति पिच्छइ उज्जोयं कोवभवणमज्झम्मि । विम्हयवसेण तो चउदिसिंपि सो पेसए दिट्ठिं ॥९९॥
पेच्छइ य लुलंतमहंतरयणमयकुंडलिल्लगंडयलं । दारेणं पविसंतं सुरजुयलं दिव्वकंतिल्लं ॥१००॥
तं दट्ठूण तहाविहचिंधेहिं जाणिऊण देवत्ति । राया विम्हियहियओ अब्भुट्ठाणाइयं कुणइ ॥१०१॥
भणइ य के तुब्भे एत्थ आगया केण वावि कज्जेण ? । इय तुम्ह चरियपीऊसपाणपउणा इमे सवणा ॥१०२॥
अह तम्मज्झा एगो देवो जंपइ सुणेसु नरनाह ! । सोहम्मे अम्हे दोवि इंदसामाणिया देवा ॥१०३॥

अथ राजा भणति सदापि मम दावयति मन एषोऽर्थः । नवरमिहभवसंचिन्तनादिसाध्यो न भवति स्फुटम् ॥९१॥
किन्तु प्रिये ! पूर्वभवानुचीर्णपुण्यैः सिध्यति नूनम् । तानि विहितानि न खलु भवेयुः, तेन न संततिरावयोः ॥९२॥
तस्मात् प्रियतमे ! विषादं मुञ्चेदानीं कुरुष्व सविशेषम् । कुलदेवतायाः पूजामत्र सुतोपयाचितं च तथा ॥९३॥
इति श्रुत्वाऽन्तःस्फुरदीषद्रोषकम्पनशीलाधरया । संग्रामशूरनरपतिसंमुखं देव्या भणितमिदम् ॥९४॥
प्रियतम ! पूर्वादिष्टं सर्वमपि सविस्तरं मया विहितम् । भक्तिभरनिर्भरया तथापि न समीहितं सिद्धम् ॥९५॥
किञ्च,
सुखसाध्यमेव कार्यं क्रियते महिलाभिर्नूनं लोके । दुःसाधं पुनः कार्यं कुर्वन्ति पुरुषाणां भुजदण्डाः ॥९६॥
येन साहससहिता गणयन्ति ते गिरिवरमपि गिरिकल्पम् । भुजगाधिपमपि रज्जूं पातालमपि हि बिलाकारम् ॥९७॥
तस्माद् यूयमेवेहोद्यच्छतेति श्रुत्वा तस्या वचनम् । किंकर्तव्यविमूढो यावत्तिष्ठति नरवरस्तत्र ॥९८॥
तावत् सहसेति पश्यति उद्द्योतं कोपभवनमध्ये । विस्मयवशेन ततश्चतुर्दिक्ष्वपि स प्रेषयति दृष्टिम् ॥९९॥
पश्यति च लोलन्महारत्नमयकुण्डलितगण्डतलम् । द्वारेण प्रविशत् सुरयुगलं दिव्यकान्तिकम् ॥१००॥
तद् दृष्ट्वा तथाविधचिह्नैर्ज्ञात्वा देवाविति । राजा विस्मितहृदयोऽभ्युत्थानादिकं करोति ॥१०१॥
भणति च कौ युवामत्रागतौ केन वापि कार्येण ? । इति युवयोश्चरितपीयूषपानप्रगुणाविमौ श्रवणौ ॥१०२॥
अथ तन्मध्यादेको देवो जल्पति शृणु नरनाथ ! । सौधर्मे आवां द्वावपीन्द्रसामानिकौ देवौ ॥१०३॥

---

१ ग. °ओआइ° । २ °यारं° । ३ ख. ग. तुब्भेच्चि° ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जेणव कज्जेण पुणो समागया तंपि संपयं सुणसु । खणमिक्कमवहियमणो होह साहिज्जए इत्तो ॥१०४॥
नियविहवमाहमसरिसं चिरकालं तत्थ विसयसुहमणहं । अणुहवियममंदाणंदजलहिपरिमज्जिरंगेहिं॥१०५॥
अह कंइया नेसग्गियसग्गसिरीसंगभोगभंगकरा । जाया अम्हाण इमा दुट्ठारिट्ठाण रिंछोली ॥१०६॥
कंठयलकलियमाला परिमलबहुलावि सया वियासिल्ला। अम्हं भाविरदीहरपवासदुहिया मिलाएइ॥१०७॥
सासणसिरीवि नियपरियणम्मि न तहा फुरेइ अम्हाण। भाविभवनयरगमणे पढमं चिय कयपयाणव्व ॥१०८॥
भाविभवगब्भसंभवसंभावियभूरिसंभमेणंव । अनिमित्तं चिय कंपइ काओ अम्हाण अणुसमयं ॥१०९॥
सहगमणमणो परभवपत्थाणं जाणिऊण अम्हाण । कंपंतो कप्पतरू सिढिलइ नियमूलजालंव ॥११०॥
अणवरयविहियभासुररयणविमाणावलोयपहयव्व। अम्हाण नयणतारा परिचियवत्थुम्मिवि मिलाइ॥१११॥
अणवरयं रयणविमाणगमणसंभग्गगइयमिव देहं । अम्हाण निविडजडिमाडंबरमावहइ चंकमणे ॥११२॥
इय दट्ठुमणिट्ठमरिट्ठमंडलं मुणियचवणखणविहुरा। अवगणियधीरिमगुणा केवलिपासं समल्लीणा॥११३॥
आगामिभवुप्पायं पुच्छेउं जाणिऊण तेण सयं । हिययगयाभिप्पाओ अम्हाणं साहिओ एवं ॥११४॥
जह भो देवाणुपिया ! तुब्भे चविऊण देवलोगाओ । संगामसूररन्नो देवीए चंदलेहाए ॥११५॥
एगो पुत्तत्ताए दुइओ दुहियत्ति होहिही,एयं । सोऊणं अम्हेहिं पयंपियं नाह ! किं स निवो ? ॥११६॥
सम्मद्दिट्ठी अहवा मिच्छदिट्ठित्ति तेण तो भणियं । तुब्भेहिंतो सम्मं पवज्जिही भद्दओ संतो ॥११७॥

येन वा कार्येण पुनः समागतौ तदपि सांप्रतं शृणु । क्षणमेकमवहितमना भव कथ्यत इतः ॥१०४॥
निजविभवमहिमसदृशं चिरकालं तत्र विषयसुखमक्षतम्। अनुभूतममन्दानन्दजलधिपरिमग्नाङ्गाभ्याम्॥१०५॥
अथ कदाचिन्नैसर्गिकस्वर्गश्रीसङ्गभोगभङ्गकरा । जाताऽऽवयोरियं दुष्टारिष्टानां पङ्क्तिः ॥१०६॥
कण्ठतलकलितमाला परिमलबहुलापि सदा विकासवती । आवयोर्भवनशीलदीर्घप्रवासदुःखिता म्लायति॥१०७॥
शासनश्रीरपि निजपरिजने न तथा स्फुरत्यावयोः । भाविभवनगरगमने प्रथममेव कृतप्रयाणेव ॥१०८॥
भाविभवगर्भसंभवसंभावितभूरिसंभ्रमेणेव । अनिमित्तमेव कम्पते काय आवयोरनुसमयम् ॥१०९॥
सहगमनमनाः परभवप्रस्थानं ज्ञात्वाऽऽवयोः । कम्पमानः कल्पतरुः शिथिलयति निजमूलजालमिव ॥११०॥
अनवरतविहितभासुररत्नविमानावलोकप्रहतेव । आवयोर्नयनतारा परिचितवस्तुन्यपि म्लायति ॥१११॥
अनवरतं रत्नविमानगमनसंभग्नगतिक इव देहः । आवयोर्निबिडजडिमाडम्बरमावहति चङ्क्रमणे ॥११२॥
इति दृष्ट्वानिष्टमरिष्टमण्डलं ज्ञातच्यवनक्षणविधुरौ । अवगणितधीरिमगुणौ केवलिपार्श्वं समालीनौ ॥११३॥
आगामिभवोत्पादं प्रष्टुं, ज्ञात्वा तेन स्वयम् । हृदयगताभिप्राय आवयोः कथित एवम् ॥११४॥
यथा भो देवानुप्रियौ ! युवां च्युत्वा देवलोकात् । संग्रामशूरराजस्य देव्याश्चन्द्रलेखायाः ॥११५॥
एकः पुत्रतया द्वितीयो दुहितेति भविष्यथः,एतत् । श्रुत्वाऽऽवाभ्यां प्रजल्पितं नाथ ! किं स नृपः ॥११६॥
सम्यग्दृष्टिरथवा मिथ्यादृष्टिरिति तेन ततो भणितम् । युवाभ्यां सम्यक्त्वं प्रपत्स्यते भद्रकः सन् ॥११७॥

---

१ क. सिढलइ। २ ग. भमेइ। ३ ग. °प्पायं। ४ ग. कहियमिणमेव।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय सोऊणं नमिउं च केवलिं इह समागया अम्हे । तुह सम्मत्तपवत्तणहेउं जेणम्ह तुज्झ कुले ॥११८॥
उप्पन्नाणं न हु होइ दुलहो नरवरिंद ! जिणधम्मो । समयम्मि जं इमस्सवि तं भणियं मूलबीयात ॥११९॥
अपरं च,
अम्हाणं न हु दूमइ इण्हिं चवणंपि देवलोगाओ । अविरइबहुलाओ, तुह कुलम्मि जायाण जं भणियं ॥१२०॥
सावयकुलं कुलाणं निग्गंथं पवयणं पवयणाणं । दाणाणमभयदाणं समाहिमरणं च मरणाणं ॥१२१॥
ता तुम्ह[१]कुलुप्पन्ना सम्मं पडिवज्जिऊण जिणधम्मं । पुव्वं पिव सग्गसिरीए भायणं होम्ह नहु चोज्जं ॥१२२॥
अह सहरिसो नरिंदो तयभिमुहं भणइ कह[२]ह कह पुव्विं । जिणधम्मासेवाए पत्ता देवत्तणं तुब्भे ? ॥१२३॥
ते [३]भणहिं नियचरियं जइवि न जुत्तं कहेउमम्हाण । तहवि तुह पत्थणाए साहिज्जइ, कहइ ताणेगो ॥१२४॥
निम्मलफलिहसिलायलविसालसालग्गभग्गरविमग्गं । आसि इह भरहभूमीए भूसणं कणयकूडपुरं ॥१२५॥
तत्थ निवसेइ सिट्ठी पउरगरिट्ठो विसिट्ठगुणजुत्तो । नामेणं जिणचंदो जणमाणसरायहंसोव्व ॥१२६॥
सीलवई नामेणं सीलालंकारसालिणी तस्स । भज्जा निरुवमविणयप्पमुक्खगुणजणियजणचोज्जा ॥१२७॥
तीसे पुत्तत्तेणं संजाओ हं उवाइयसएहिं । अहिगयकलाकलावो कमेण तारुण्णमणुपत्तो ॥१२८॥
अह जिणचंदो सिट्ठी कुडुंबसामित्तयम्मि मं[४] ठविउं । जिणभणियधम्ममग्गाणुसारओ मरणमावन्नो ॥१२९॥
तव्विरहदूमिओ हं तद्दंसियमग्गमणुचरामि परं । धम्मम्मि पमायंतो घरचिंतावावडत्तेण ॥१३०॥

इति श्रुत्वा नत्वा च केवलिनमिह समागतावावाम् । तव सम्यक्त्वप्रवर्तनहेतोर्येनावयोस्तव कुले ॥११८॥
उत्पन्नयोर्न खलु भवेद् दुर्लभो नरवरेन्द्र ! जिनधर्मः । समये यदस्यापि तद् भणितं मूलबीजमिति ॥११९॥
अपरञ्च,
आवयोर्न खलु दावयतीदानीं च्यवनमपि देवलोकात् । अविरतिबहुलात्, तव कुले जातयोर्यद् भणितम् ॥१२०॥
श्रावककुलं कुलानां नैर्ग्रन्थं प्रवचनं प्रवचनानाम् । दानानामभयदानं समाधिमरणं च मरणानाम् ॥१२१॥
तस्माद्युष्मत्कुलोत्पन्नौ सम्यक् प्रतिपद्य जिनधर्मम् । पूर्वमिव स्वर्गश्रिया भाजनं भविष्यावो न खल्वाश्चर्यम् ॥१२२॥
अथ सहर्षो नरेन्द्रस्तदभिमुखं भणति कथयतं कथं पूर्वम् । जिनधर्मासेवया प्राप्तौ देवत्वं युवाम् ? ॥१२३॥
तौ भणतो निजचरितं यद्यपि न युक्तं कथयितुमावयोः । तथापि तव प्रार्थनया कथ्यते, कथयति तयोरेकः ॥१२४॥
निर्मलस्फटिकशिलातलविशालशालाग्रभग्नरविमार्गम् । आसीदिह भरतभूमेर्भूषणं कनककूटपुरम् ॥१२५॥
तत्र निवसति श्रेष्ठी पौरगरिष्ठो विशिष्टगुणयुक्तः । नाम्ना जिनचन्द्रो जनमानसराजहंस इव ॥१२६॥
शीलवती नाम्ना शीलालङ्कारशालिनी तस्य । भार्या निरुपमविनयप्रमुखगुणजनितजनाश्चर्या ॥१२७॥
तस्याः पुत्रत्वेन संजातोऽहमुपयाचितशतैः । अधिगतकलाकलापः क्रमेण तारुण्यमनुप्राप्तः ॥१२८॥
अथ जिनचन्द्रः श्रेष्ठी कुटुम्बस्वामित्वे मां स्थापयित्वा । जिनभणितधर्ममार्गानुसारतो मरणमापन्नः ॥१२९॥
तद्विरहदावितोऽहं तद्दर्शितमार्गमनुचरामि परम् । धर्मे प्रमाद्यन् गृहचिन्ताव्यापृतत्वेन ॥१३०॥

---

१ क. तुम्ह । २. कह कहं । ३ ख. भणिहिं, ग. भणहि । ४ क. ग. संठ° ।

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अह मह माया हट्टागमणावसरम्मि सिग्घमेव सयं। वरसालिदालिघयघयपूराइयं रसवइं कुणइ॥१३१॥
नवरं परिवेसंती महभिमुहं भणइ पइदिणं एवं। वच्छ! दुहाइं पाविहिसि भुंजिरो वासियं भत्तं॥१३२॥
अहमवि भणामि अंबे! कहमेयं भणसि पइदिणंपि तुमं। सयमवि निव्वत्तियरसवईए मह भोयणं दिंती?॥१३३॥
इय पुट्ठा तुण्हिक्का होउं सा चिट्ठए सयावि तओ। कोऊहलकलिएणं पुणोवि पुट्ठा गुरुवरोहा॥१३४॥
तो तीए संलत्तं एयं तं वच्छ! पुच्छ गंतूणं। समयामयनिहिसूरिं समोसढं अज्ज उज्जाणे॥१३५॥
अह तत्थवि गंतुं तं नमिउं पसिणिस्समहमिमं जाव। ताव सयमेव नाणेण जाणिउं तेणिमं भणियं॥१३६॥
भो तुह एयारूवं पसिणं साहिस्सई सुहागपुरे। चेडयसिद्धो मायंगसड्ढओ थावरो नाम॥१३७॥
अहह अहो! अच्छरियं सव्वं नाणेण जाणमाणोवि। जं मह न इमं साहइ तदवस्सं कारणं किंपि॥१३८॥
एवं विचिंतमाणो कमेण पत्तो सुहागपुरनयरे। जाव रमणीययाए पिच्छामि अहं विवणिमग्गं॥१३९॥
ताव जरजज्जरंगो नियसियआजाणुमलिणसाडिल्लो। पंडुरियरोमकूवो पयडसिराधमणिसंठाणो॥१४०॥
हरिनहकढिणमहाल्लिरपयनहरपरंपराए विकरालो। अद्धघरट्टियघुंटं पूगं गंठीए बंधंतो॥१४१॥
दूरपलंबिरनासाकेसचओ मूलघट्टकररुहओ। बहुसेयसिन्नमलमइलवत्थपणयचिक्कणसरीरो॥१४२॥
गहियकयाणगउव्वरियलब्भदविणंपि पत्थमाणेहिं। सह गाहगेहिं दुव्वयणनिब्भरं कलहमाणो य॥१४३॥
कहकहवि हु सत्तेणं रेणुतुसावणयणत्थमनिलम्मि। उप्पाडिऊण पिडगाइं तंदुले उप्पिणिंतो य॥१४४॥

अथ मम माता हट्टागमनावसरे शीघ्रमेव स्वयम्। वरशालिदालिघृतघृतपूरादिकां रसवतीं करोति॥१३१॥
नवरं परिवेविषाणा मदभिमुखं भणति प्रतिदिनमेवम्। वत्स! दुःखानि प्राप्स्यसि भुञ्जानो वासितं भक्तम्॥१३२॥
अहमपि भणाम्यम्ब! कथमेतद्भणसि प्रतिदिनमपि त्वम्। स्वयमपि निर्वर्तितरसवत्या मम भोजनं ददती?॥१३३॥
इति पृष्टा तूष्णिका भूत्वा सा तिष्ठति सदापि ततः। कौतूहलकलितेन पुनरपि पृष्टा गुर्ववरोधात्॥१३४॥
ततस्तया संलप्तमेतत् त्वं वत्स! पृच्छ गत्वा। समयामृतनिधिसूरिं समवसृतमद्योद्याने॥१३५॥
अथ तत्रापि गत्वा तं नत्वा प्रक्ष्याम्यहमिदं यावत्। तावत् स्वयमेव ज्ञानेन ज्ञात्वा तेनेदं भणितम्॥१३६॥
भोस्तवैतद्रूपं प्रश्नं कथयिष्यति शुभाकपुरे। चेटकसिद्धो मातङ्गश्राद्धकः स्थावरो नाम॥१३७॥
अहह अहो! आश्चर्यं सर्वं ज्ञानेन जानन्नपि। यद् मां नेदं कथयति तदवश्यं कारणं किमपि॥१३८॥
एवं विचिन्तयन् क्रमेण प्राप्तः शुभाकपुरनगरे। यावद् रमणीयतया पश्याम्यहं विपणिमार्गम्॥१३९॥
तावज्जराजर्जराङ्गो निवसिताजानुमलिनशाटकः। पाण्डुरितरोमकूपः प्रकटशिराधमनीसंस्थानः॥१४०॥
हरिनखकठिनमहापदनखरपरम्परया विकरालः। अर्धघरट्टितघुण्टं पूगं ग्रन्थेर्बध्नन्॥१४१॥
दूरप्रलम्बमाननासाकेशचयो मूलघट्टकररुहकः। बहुस्वेदशीर्णमलमलिनवस्त्रचिक्कणशरीरः॥१४२॥
गृहीतक्रयाणकोर्वरितलभ्यद्रविणमपि प्रार्थयद्भिः। सह ग्राहकैर्दुर्वचननिर्भरं कलहयंश्च॥ १४३॥
कथंकथमपि खलु सत्त्वेन रेणुतुषापनयनार्थमनिले। उत्पाट्य पिटकादि तण्डुलानुत्पिणयंश्च॥ १४४॥

---

१ क. संताणो। २ ग. °यधंटं। ३ ग. उप्पणिं°।

एक्कम्मि महाहट्टे दिट्ठो धणसारनामओ सिट्ठी। किविणपियामह इय नयरवासिविहियवरभिहाणो ॥१४५॥
पुट्ठो य सो मए जह थावरनामा इहत्थि मायंगो। जिणवयणभावियमई चेडयसिद्धो य किं कोवि? ॥१४६॥
एयं सम्ममसोऊण तेण भणियं कयाणगं किंपि। हट्टाओ आयड्ढिय दंसेमि तओ मए पुट्ठं ॥१४७॥
महया सद्देण पुणो तं चिय, तो तेण साहियं, अत्थि। दारट्ठियचिंचणिगाए तस्स पयडं चिय गिहंपि॥१४८॥
इय सोऊण गओ हं तस्स गिहे तत्थ सोवि संपत्तो। कहिओ वासियभत्ताइवइयरो तस्स सव्वोवि ॥१४९॥
ता जाव सूरिणा हं तुह पासे पेसिउत्ति तं सोउं। तेण भणियं कहिस्सं नवरं साहम्मिओ तं सि ॥१५०॥
ता काऊण पसायं पाहुणगो होसु अज्ज मज्झ तुमं। भणियं मए कहंपिव जाइविरुद्धं इमं जेण ॥१५१॥
अह महणिच्छंतस्सवि साहम्मियवच्छलच्छपुन्नट्टा। किविणपियामहहट्टे निरूवियं भोयणं तेण ॥१५२॥
भणियं च भोयणाणंतरंपि सिग्घं गिहम्मि महतणए। तुमए आगंतव्वं तुह पुट्ठं जेण साहेमि ॥१५३॥
इय भणिऊण गओ सो एत्तो य मएवि पभणिओ सिट्ठी। जह तंदुले पयावसु कत्थवि भुंजामि जेणाहं॥१५४॥
तेण नियसिट्ठिणिच्चिय आहूया रंधणत्थलोभेण। तीएवि अणुसारेणं जिणचंदसुउत्ति विन्नाओ ॥१५५॥
भणियं भो भो तं मह पिउभायसुउत्ति बंधवो होसि। ता मुंच इमं मायंगदावियं तंदुलाईयं ॥१५६॥
भुंजसु नियगेहिच्चिय आगंतूणंति तो मए भणियं। अहममुगकारणेणं समागओ तस्समीवम्मि ॥१५७॥
तो तद्दावियमेयं भुंजिस्सं भोअणं अहं अज्ज। एत्तो उड्ढं जइ किंपि भणसि तो तुज्झ मह सवहो ॥१५८॥

एकस्मिन् महाहट्टे दृष्टो धनसारनामकः श्रेष्ठी। कृपणपितामह इति नगरवासिविहितवराभिधानः ॥१४५॥
पृष्टश्च स मया यथा स्थावरनामेहास्ति मातङ्गः। जिनवचनभावितमतिश्चेटकसिद्धश्च किं कोऽपि? ॥१४६॥
एतत् सम्यगश्रुत्वा तेन भणितं क्रयाणकं किमपि। हट्टादाकृष्य दर्शयामि ततो मया पृष्टम् ॥ १४७ ॥
महता शब्देन पुनस्तदेव, ततस्तेन कथितं, अस्ति। द्वारस्थितघरट्टिकया तस्य प्रकटमेव गृहमपि ॥ १४८ ॥
इति श्रुत्वा गतोऽहं तस्य गृहे तत्र सोऽपि संप्राप्तः। कथितो वासितभक्तादिव्यतिकरस्तस्य सर्वोऽपि ॥१४९॥
तावद् यावत्सूरिणाऽहं तव पार्श्वे प्रेषित इति श्रुत्वा। तेन भणितं कथयिष्यामि नवरं साधर्मिकस्त्वमसि ॥१५०॥
ततः कृत्वा प्रसादं प्राघुणको भवाद्य मम त्वम्। भणितं मया कथमिव जातिविरुद्धमिदं येन ॥ १५१ ॥
अथ ममानिच्छतोऽपि साधर्मिकवात्सल्याच्छपुण्यार्थम्। कृपणपितामहहट्टे निरूपितं भोजनं तेन ॥ १५२ ॥
भणितं च भोजनानन्तरमपि शीघ्रं गृहे मदीये। त्वया आगन्तव्यं तव पृष्टं येन कथयामि ॥ १५३ ॥
इति भणित्वा गतः स इतश्च मयापि प्रभणितः श्रेष्ठी। यथा तण्डुलान् पाचय कुत्रापि भुञ्जे येनाहम् ॥१५४॥
तेन निजश्रेष्ठिन्येवाहूता रन्धनार्थलोभेन। तयाप्यनुसारेण जिनचन्द्रसुत इति विज्ञातः ॥ १५५ ॥
भणितं च भो भोस्त्वं मम पितृभ्रातृसुत इति बान्धवो भवसि। तस्मान्मुञ्चेदं मातङ्गदापितं तण्डुलादिकम्॥१५६॥
भुङ्क्ष्व निजगेह एवागत्येति ततो मया भणितम्। अहममुककारणेन समागतस्तत्समीपे ॥ १५७ ॥
ततस्तद्दापितमेतद् भोक्ष्ये भोजनमहमद्य। इत ऊर्ध्वं यदि किमपि भणसि ततस्तव मम शपथः ॥ १५८ ॥

---

१ क. मादंग। २ ख. ग. भोयणं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय गुरुनिब्बंधेणं भणिया सा रंधिऊण मुहिगाए । मह देइ भोयणं नियगिहम्मि भुत्तुत्तरेय अहं ॥१५९॥
जा मायंगस्स गिहं वच्चामि सुणेमि ताव अक्कंदं । तो तस्सन्निहियजणा पुट्ठा तक्कारणं तेहिं ॥१६०॥
कहियं, जह मायंगो जस्स समीवम्मि आगओ तं सि । सो संपइ मूढविसूइयाए पंचत्तमणुपत्तो ॥१६१॥
इय सोउं विमणमणो अहयं तं सिट्ठिणीए कहिऊणं। जा नियनयराभिमुहं चलिओ तो तीए इय भणिओ॥१६२॥
जह बीयदिणं चिट्ठसु इहेव काऊण बंधव ! पसायं । चेइहराइं वंदसु तह पाहुणगो य मे होसु ॥१६३॥
इय अइनिब्बंधपरं तीसे वयणं निसामिऊण मए। पडिवज्जियं तहच्चिय एत्तो दुइयम्मि दिवसम्मि॥१६४॥
किविणपियामहसिट्ठी तीए गंतूण हट्टउवविट्ठो । भणिओ जह मह बंधू भुंजिही अज्ज तुह गेहे ॥१६५॥
ता सालिदालिसुसुयंधसप्पिपभीइ समप्पहत्ति तओ। सिट्ठी तयभिमुहं भणइ भुंजिही कह णु तुह बंधू ?॥१६६॥
देसागओवि अइदुत्थिओवि तइया गिहाउ मे मुक्को। निक्कालेउं बंधू सहोयरोवि हु न किं सरसि ?॥१६७॥
अन्नं च, कुणसि वत्तं सालीदालीण तं न किं मुणसि ? । जं देवगिहे जंतीए तुज्झ तुसणी अणुण्णाया ॥१६८॥
किञ्च,
जइ बंधुसिणेहग्गहगहिया चिट्ठसि कहंपि न तुमं ता। भुंजाइयाए मह सोवि जिम्मउ तिल्लेण सह वल्ले॥१६९॥
सा भणइ नियागिहेवि हु घयघेउरभोयणं समाकुणइ। मह भाया, ता सामिय! लज्जिस्समहं इमं दिंती॥१७०॥
अह सो अणक्खभरिओ पभणइ पुव्वागया सिरी जस्स। विलसंतस्स जहिच्छं का पीडा तस्स का निट्ठा?॥१७१॥

इति गुरुनिर्बन्धेन भणिता सा रन्धित्वा मुधा । मम ददाति भोजनं निजगृहे, भुक्त्वा त्वरेयाहम् ॥ १५९ ॥
यावद् मातङ्गस्य गृहं व्रजामि शृणोमि तावदाक्रन्दम् । ततस्तत्संनिहितजनाः पृष्टास्तत्कारणं तैः ॥ १६० ॥
कथितं, यथा मातङ्गो यस्य समीप आगतस्त्वमासि । स संप्रति मूढविसूचिकया पञ्चत्वमनुप्राप्तः ॥ १६१ ॥
इति श्रुत्वा विमनोमना अहकं तत् श्रेष्ठिन्यै कथयित्वा । यावन्निजनगराभिमुखं चलितस्ततस्तयेति भणितः ॥१६२॥
यथा द्वितीयदिनं तिष्ठेहैव कृत्वा बान्धव ! प्रसादम् । चैत्यगृहाणि वन्दस्व तथा प्राघुणकश्च मम भव ॥१६३॥
इत्यतिनिर्बन्धपरं तस्या वचनं निशम्य मया । प्रतिपन्नं तथैवेतो द्वितीयस्मिन् दिवसे ॥ १६४ ॥
कृपणपितामहश्रेष्ठी तया गत्वा हट्टोपविष्टः । भणितो यथा मम बन्धुर्भोक्ष्यतेऽद्य तव गेहे ॥ १६५ ॥
तस्माच्छालिसूपसुसुगन्धसर्पिःप्रभृति समर्पयेति ततः । श्रेष्ठी तदभिमुखं भणति भोक्ष्यते कथं नु तव बन्धुः ? ॥१६६॥
देशागतोऽप्यतिदुःस्थितोऽपि तदा गृहान्मया मुक्तः । निष्काश्य बन्धुः सहोदरोऽपि खलु न किं स्मरसि ? ॥१६७॥
अन्यच्च, करोषि वार्तां शालिसूपयोस्तन्न किं जानासि ? । यद् देवगृहे यान्त्यास्तव तूष्णीमनुज्ञाता ॥ १६८ ॥
किञ्च,
यदि बन्धुस्नेहग्रहगृहीता तिष्ठसि कथमपि न त्वं ततः । भोजिकया मम सोऽपि भोज्यतां तैलेन सह वल्लान् ॥१६९॥
सा भणति निजगृहेऽपि खलु घृतघृतपूरभोजनं सदा करोति । मम भ्राता, तस्मात् स्वामिन् ! लज्जिष्याम्यहमिदं ददती॥
अथ स कोपभरितः प्रभणति पूर्वागता श्रीर्यस्य । विलसतो यथेच्छं का पीडा तस्य का निष्ठा ? ॥१७१॥

---

१ ग. सोऊण । २ ग. °णम्मणो । ३ ग. अहं सि° । ४ क. तुसली ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कट्ठेण इमेण मए लच्छी समुवज्जिया न किं मुणसि । जं सिसिरे हिमपाएवि चरिमजामम्मि रयणीए ॥१७२॥
उत्तरिउं गुरुसरियं परतीरे कट्ठभारयं गहिउं । जह नवि पिच्छइ कोवि हु तह तुह अप्पिंतओ आसि ॥१७३॥
नीरंपि हु रयणीए आणिंतो, मा कहिंपि मह अत्थो । पाणच्चएवि वच्चउ खंडणदलणाइगिहकम्मे ॥१७४॥
जो मे उवज्जिओ इह कररुहघसणेण चरणघासेण । गिम्हुम्हतवियतणुणा तेल्लकणाईण वहणेण ॥१७५॥
धम्मत्थेवि हु जइ कहवि कोवि मग्गइ कवड्डियं काणं । तो बद्धदंतसगडो मउव्व चिट्ठामि निच्चिट्ठो ॥१७६॥
ता तं कह मं पत्थसि सालिप्पभिईणि इय मुणंतीवि । एवं बालालुंबिं काउं सिट्ठी ठिओ मोणी ॥१७७॥
परहट्टाओ अह सिट्ठिणीवि आणेवि सालिमाईयं । जा पयइ ताव सिट्ठीवि भोयणत्थं तहिं पत्तो ॥१७८॥
पुट्ठा य तेण गिहिणी किं वल्ला पगुणिया तए नो वा ? । सा भणइ तुज्झ नियबंधुणो य जोग्गं मए अज्ज॥१७९॥
वरसालिदालिमाई अन्नं पगुणीकयंति सोऊण । दढकोववसा तेणं पयंपियं देह मह तंपि ॥१८०॥
तो भणइ सावि सिट्ठिं खणमेगं एवमेव चिट्ठेह । घेउरघाणदुगं जा पएमि इय निसुणिउं सहसा ॥१८१॥
नीसहकरप्पहारेण पहणिऊणं पुणो पुणो हियर्यं । दुव्वयणाइं तह जंपिऊण गिहिणीए समुहाइं ॥१८२॥
चिंतइ हद्धी अत्थो एमेव मुहाए गलइ मह गेहे । तो खेयमुव्वहंतो सुत्तो गंतूण गिहमज्झे ॥१८३॥
अह दव्वव्वयसंजणियहिययसंघट्टघट्टियविवेओ । परिमुक्को पाणेहिं सो किविणपियामहो सिट्ठी ॥१८४॥
अह सिट्ठिणीवि निप्पाइऊण वररसवइं समग्गंपि । भंरिऊण चउक्कदुगं दाऊणं आसणाइं च ॥१८५॥

कष्टेनानेन मया लक्ष्मीः समुपार्जिता न किं जानासि । यच्छिशिरे हिमप्रायेऽपि चरमयामे रजन्याः ॥१७२॥
उत्तीर्य गुरुसरितं परतीरे काष्ठभारकं गृहीत्वा । यथा नापि पश्यति कोपि खलु तथा तुभ्यमर्पयन्नासम् ॥१७३॥
नीरमपि खलु रजन्यामानयन्, मा कुत्रापि ममार्थः । प्राणत्यागेऽपि व्रजतु खण्डनदलनादिगृहकर्मणि ॥१७४॥
यो मयोपार्जित इह कररुहघर्षणेन चरणघर्षेण । ग्रीष्मोष्मतप्ततनुना तैलकणादीनां वहनेन ॥१७५॥
धर्मार्थेऽपि खलु यदि कथमपि कोपि मार्गयति कपर्दिकां काणाम् । ततो बद्धदन्तशकटो मृत इव तिष्ठामि निश्चेष्टः ॥
तस्मात् त्वं कथं मां प्रार्थयसि शालिप्रभृतीनीति जानत्यपि [1]एवं बालालुम्बीं (?) कृत्वा श्रेष्ठी स्थितो मौनी ॥१७७॥
परहट्टादथ श्रेष्ठिन्यप्यानीय शाल्यादिकम् । यावत् पचाति तावत् श्रेष्ठ्यपि भोजनार्थं तत्र प्राप्तः ॥१७८॥
पृष्टा च तेन गृहिणी किं वल्लाः प्रगुणितास्त्वया नो वा ? । सा भणति तव निजबन्धोश्च योग्यं मयाद्य ॥१७९॥
वरशालिसूपाद्यन्नं प्रगुणीकृतमिति श्रुत्वा । दृढकोपवशात् तेन प्रजल्पितं दत्त मह्यं तदपि ॥१८०॥
ततो भणति सापि श्रेष्ठिनं क्षणमेकमेवमेव तिष्ठत । घृतपूरसंघातद्विकं पचामीति श्रुत्वा सहसा ॥१८१॥
निःसहकरप्रहारेण प्रहत्य पुनः पुनर्हृदयम् । दुर्वचनानि तथा जल्पित्वा गृहिण्याः संमुखानि ॥१८२॥
चिन्तयति हा धिगर्थ एवमेव मुधा गलति मम गेहे । ततः खेदमुद्वहन् सुप्तो गत्वा गृहमध्ये ॥१८३॥
अथ द्रव्यव्ययसंजनितहृदयसंघट्टघट्टितविवेकः । परिमुक्तः प्राणैः स कृपणपितामहः श्रेष्ठी ॥१८४॥
अथ श्रेष्ठिन्यपि निष्पाद्य वररसवतीं समग्रामपि । भृत्वा चतुष्कद्विकं दत्त्वाऽऽसने च ॥१८५॥

---

१ क. तिल्ल । २ ग. °हाइ । ३ क. भणिऊ° ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भोयणहेउं कोमलगिराहिं सिट्ठिं पबोहिउं लग्गा। जाव न तीसे पच्चुत्तरंपि सो देइ सावि तओ ॥१८६॥
रुट्ठोत्ति मन्नमाणी सिणेहसारं पयंपिउं जाव। सच्चवइ संमुहं ताव भग्गं तारायणं नियइ ॥१८७॥
तो एस मउत्ति विणिच्छिऊण पिहिऊण तह घरदुवारे। मह भोयणं विइन्नं सयंच भुत्तं तओ तीए ॥१८८॥
कहियं मह जह भत्ता एसो तिलतुसतिभागमेत्तंपि। कहवि न कस्सवि दिंतो अंतं पंतं च भुंजंतो ॥१८९॥
एत्तियकाला इण्हि उक्खुडियं सालिमाइयं नाउं। तुह जोग्गं तो सहसा पुणो पुणो कुट्टियं हिययं ॥१९०॥
सुत्तोच्चिय सिज्जाए मओ अपुत्तो इमो य इह आसि। चउकोडिसामिओ भाय! ता जहा जाइ नो दव्वं॥१९१॥
रायउले, तमुवायं चिंतेमो किंपि सो इमो चेव। घरमज्झिच्चिय सिट्ठी खिप्पउ उंडाए खड्डाए ॥१९२॥
काऊण किंपि कवडं न मुणिज्जइ जहवहिं इमो अत्थो। इय निच्छिऊण तीए मए य जहचिंतियं विहियं॥१९३॥
अह तीए महभिमुहं भणियं जह अज्ज निसि पसुत्ताए। जं दिट्ठं सुमिणं तयणुसारओ हं मुणेमि इमं ॥१९४॥
जह होही मह पुत्तो ता भाय! तुमं इहेव हट्टम्मि। ववहरमाणो चिट्ठसु जाहं पसवामि, इय सोउं॥१९५॥
तीसे उवरोहेणं तहत्ति पडिवज्जियं मए सव्वं। सावि हु कयसिंगारा सहीण पुरओ इमं कहइ ॥१९६॥
वद्धाविज्जह तुब्मे सिंघलदीवम्मि जाइं वहाणाइं। तुम्हाण भइणिवइणो अवतित्थगयाइं निसुयाइं ॥१९७॥
महपइपुन्नवसेणं वेलाकूलम्मि ताइं पत्ताइं। तो तयभिमुहो सिट्ठी हरिसेण सयं गओ इण्हिं ॥१९८॥
इय पयडंती सव्वं गमेइ दियहाइं सिट्ठिणी हिट्ठा। अहमवि घरवावारं सव्वं चिंतेमि एत्तो य ॥१९९॥

भोजनहेतोः कोमलगीर्भिः श्रेष्ठिनं प्रबोधयितुं लग्ना। यावन्न तस्यै प्रत्युत्तरमपि स ददाति सापि ततः ॥१८६॥
रुष्ट इति मन्यमाना स्नेहसारं प्रजल्प्य यावत्। पश्यति संमुखं तावद् भग्नं ताराकणं पश्यति ॥१८७॥
तत एष मृत इति विनिश्चित्य पिधाय तथा गृहद्वारम्। मह्यं भोजनं वितीर्णं स्वयं च भुक्तं ततस्तया ॥१८८॥
कथितं मम यथा भर्तैष तिलतुषत्रिभागमात्रमपि। कथमपि न कस्यापि ददन्तं प्रान्तं च भुञ्जानः ॥१८९॥
एतावत्कालादिदानीं रन्धितं शाल्यादिकं ज्ञात्वा। तव योग्यं ततः सहसा पुनः पुनः कुट्टितं हृदयम् ॥१९०॥
सुप्त एव शय्यायां मृतोऽपुत्रोऽयं चेहासीत्। चतुष्कोटिस्वामी भ्रातः! तस्माद्यथा याति नो द्रव्यम् ॥१९१॥
राजकुले, तमुपायं चिन्तयामः कमपि सोऽयमेव। गृहमध्य एव श्रेष्ठी क्षिप्यतां गभीरे गर्ते ॥१९२॥
कृत्वा किमपि कपटं न ज्ञायते यथाबध्ययमर्थः। इति निश्चित्य तया मया च यथाचिन्तितं विहितम् ॥१९३॥
अथ तया मदभिमुखं भणितं यथाऽऽर्य! निशि प्रसुप्तया। यो दृष्टः स्वप्नस्तदनुसारतोऽहं जानामीदम् ॥१९४॥
यथा भविष्यति मम पुत्रस्तस्माद् भ्रातस्त्वमिहैव हट्टे। व्यवहरंस्तिष्ठ यावदहं प्रसूये इति श्रुत्वा ॥१९५॥
तस्या उपरोधेन तथेति प्रतिपन्नं मया सर्वम्। सापि खलु कृतशृङ्गारा सखीनां पुरत इदं कथयति ॥१९६॥
वर्धाप्यध्वे यूयं सिंहलद्वीपे यानि यानानि। युष्माकं भगिनीपतेरपतीर्थगतानि श्रुतानि ॥१९७॥
मत्पतिपुण्यवशेन वेलाकूले तानि प्राप्तानि। ततस्तदभिमुखः श्रेष्ठी हर्षेण स्वयं गत इदानीम् ॥१९८॥
इति प्रकटयन्ती सर्वं गमयति दिवसानि श्रेष्ठिनी हृष्टा। अहमपि गृहव्यापारं सर्वं चिन्तयामि, इतश्च ॥१९९॥

---

१ क. जइ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सा समयम्मि पसूया परममुहुत्तम्मि दारयं पवरं । भो माम माम लहु एहि एहि पुणरुत्तमिय भणिरं ॥२००॥
तो तीए सहिज्झीए[1] विम्हियहिययाए लहु समागंतुं । आहूओ हं गेहे गओ य जा तस्स दिट्ठिपहं ॥२०१॥
तो भणिओ तेणाहं भो मामग ! अज्ज दाहिणदिसाए । चिंचणीगाए समीवे मायंगी पसविया अत्थि ॥२०२॥
जाओ य तीए तणओ अहुणा सा ठिव्विऊण तस्स मुहं । पंचत्तं पावेही बहुडिंभदुहेहिं संतत्ता ॥२०३॥
ता तीए दम्मपंचगमप्पसु तं झत्ति तत्थ गंतूण । भणियव्वा य तए सा घयतंदुलमाइयं कुणसु ॥२०४॥
पालसु डिंभं मा मारसुत्ति एयं तहत्ति काऊण । पुणरवि गिहागओ हं सप्पणयं [2]तेणेमं भणियं ॥२०५॥
पच्चभिजाणसि नो वा मामग ! मं सो अहं खु मायंगो । वासियभत्ताईवइयरस्स संपुच्छणनिमित्तं ॥२०६।
समयामयनिहिगुरुणा जस्स समीवम्मि पेसिओ सि तुमं । साहम्मिउत्ति काउं तुह भोयणदाणओ तइया॥२०७।
चिरपुन्नपभावेण यं उम्मूढविसूइयाए मरिऊण । अहमिहमुप्पन्नो बद्धपुव्वमणुयाउयत्तेण ॥२०८॥
जो पुण मारिज्जंतो दव्वपयाणेण रक्खिओ तुमए । सो धणसारो सिट्ठी मरिउं मेइणिसुओ जाओ ॥२०९।
नवपुन्नणज्जणेणं वासियपुन्नक्खएण ता माम ! । धम्मम्मि पमायंतो दिट्ठो तुह अंबयाए तुमं ॥२१०॥
इय कारणेण तइया भणिओ तं तीए पइदिणंपि इमं । 'वच्छ ! दुहाइं पाविहिसि भुंजिरो वासियं भत्तं'॥२११।
तह सूरिणावि धणसारपच्चएण तुज्झ मुणिवि पडिबोहं । तं इह पहिओ मामग ! ता धणसारो दुहं पत्तो॥२१२।
जह वासियपुन्नमुवभुंजणेण तह माम ! तंपि पाविहिसि । जइ धम्मपमायपरो उवभुंजासि वासियं पुन्नं ॥२१३।

सा समये प्रसूता परममुहूर्ते दारकं प्रवरम् । भो मातुल मातुल लघ्वेहि एहि भृशमिति भणितारम् ॥२००॥
ततस्तया प्रातिवेशिमक्या विस्मितहृदयया लघु समागत्य । आहूतोऽहं गेहे गतश्च जातस्य दृष्टिपथम् ॥२०१॥
ततो भणितस्तेनाहं भो मातुल ! अद्य दक्षिणादिशि । घरट्टिकायाः समीपे मातङ्गी प्रसूतास्ति ॥२०२॥
जातश्च तस्यास्तनयोऽधुना सा विघोट्य तस्य मुखम् । पञ्चत्वं प्रापयिष्यति बहुडिम्भदुःखैः संतप्ता ॥२०३॥
तस्मात्तस्यै द्रम्मपञ्चकमर्पय त्वं झटिति तत्र गत्वा । भणितव्या च त्वया सा घृततण्डुलादिकं कुरुष्व ॥२०४।
पालय डिम्भं मा मारयेत्येतत् तथाति कृत्वा । पुनरपि गृहागतोऽहं सप्रणयं तेनेदं भणितम् ॥ २०५ ॥
प्रत्यभिजानासि नो वा मातुल ! मां सोऽहं खलु मातङ्गः । वासितभक्तादिव्यतिकरस्य संप्रश्ननिमित्तम् ॥२०६।
समयामृतनिधिगुरुणा यस्य समीपे प्रेषितोऽसि त्वम् । साधर्मिक इति कृत्वा तुभ्यं भोजनदानतस्तदा ॥२०७॥
चिरपुण्यप्रभावेण चोन्मूढविसूचिकया मृत्वा । अहमिहोत्पन्नो बद्धपूर्वमनुजायुष्कत्वेन ॥ २०८ ॥
यः पुनर्मार्यमाणो द्रव्यप्रदानेन रक्षितस्त्वया । स धनसारः श्रेष्ठी मृत्वा मेदिनीसुतो जातः ॥ २०९ ॥
नवपुण्यानर्जनेन वासितपुण्यक्षयेण तस्मान्मातुल ! । धर्मे प्रमाद्यन् दृष्टस्तवाम्बया त्वम् ॥ २१० ॥
इति कारणेन तदा भणितस्त्वं तया प्रतिदिनमपीदम् । 'वत्स ! दुःखानि प्राप्स्यसि भुञ्जानो वासितं भक्तम्' ॥२११
तथा सूरिणापि धनसारप्रत्ययेन तव ज्ञात्वा प्रतिबोधम् । त्वमिह प्रहितो मातुल ! तस्माद् धनसारो दुःखं प्राप्तः॥२१२
यथा वासितपुण्योपभोगेन तथा मातुल ! त्वमपि प्राप्स्यसि । यदि धर्मप्रमादपर उपभुङ्क्षे वासितं पुण्यम् ॥२१३।

---

१ ख. °हिज्झीए । २ क, तेण भणिओ हं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय सुणिवि विम्हियमणो चिंतेमि अहो इमं महच्छरियं । जं तद्दहजायस्सवि इमस्स इय वयणविन्नासो ॥२१४॥
ता किं सच्चमसच्चं इमंति पुच्छामि किंपि अइसइणं । इय संकप्पपरो हं जा संचिट्ठामि ता तत्थ ॥२१५॥
समयामयनिहिसूरी सो चेव समागउत्ति लोआओ। निसुयं तस्स समीवे गओ तओ ते इमं पुट्ठा ॥२१६॥
पुव्वुत्तवइयरं, तेहिं जंपियं भद्द सव्वमवि सच्चं । जं तुह भइणिसुएणं पयंपियं, तो मए भणियं ॥२१७॥
किं पहु मायंगेणं पुन्नं समुवज्जियं जओ जाओ। चउकोडीणं सामी एसो, तो तेण इय कहियं ॥२१८॥
चउरूवगे वएऊण तेण केणावि सुद्धभावेण । साहम्मिउत्ति काउं दिन्नं तुह भोयणं तइया ॥२१९॥
ते जेण तस्स चउकोडिदविणभावेण परिणया, एत्तो। भणियं मए कहं पहु तस्सिण्हिं वयणसत्तीवि ? ॥२२०॥
तेण भणियं इमंपि हु निसुणसु, तइया गयस्स गेहम्मि। दिवसस्स पढमजामे से मूढविसूइया जाया ॥२२१॥
संखुद्धमाणसेणं सरिओ तो सिद्धचेडओ तेण। तत्थागओ य पुट्ठो किं मह संपइ चरिमसमओ ? ॥२२२॥
जो एवं संजाया विसूइया मज्झ, सो भणइ एवं। तो पुट्ठं मरिऊणं उप्पज्जिस्सं अहं कत्थ ? ॥२२३॥
तेणवि सम्मं अवहिं पउंजिउं साहियं इमं तस्स । जह धणसारसुओ तं होहिसि तो तेणिमं पुट्ठं ॥२२४॥
जह कह जाणंतेणवि नाणेणं सूरिणा मह समीवे । वासियभत्ताईवइयरस्स संपुच्छणनिमित्तं ॥२२५॥
एसो सड्ढो इह पेसिउत्ति सोऊण जंपियं तेण । जह एयस्सवबोहो सूरीहिं इहेव विन्नाओ ॥२२६॥
सो उण धणसारगिहम्मि जायमित्तस्स तुह मुहे होउं । जंपिस्सामि जया हं तइया होहित्ति जंपेउं ॥२२७॥

इति श्रुत्वा विस्मितमनाश्चिन्तयाम्यहो इदं महाश्चर्यम्। यत् तदहर्जातस्याप्यस्येति वचनविन्यासः ॥२१४॥
तस्मात् किं सत्यमसत्यमिदामिति पृच्छामि कमप्यतिशयिनम् । इति संकल्पपरोऽहं यावत्संतिष्ठे तावत्तत्र ॥२१५॥
समयामृतनिधिसूरिः स एव समागत इति लोकात् । श्रुतं तस्य समीपे गतस्ततस्ते इमं पृष्टाः ॥२१६॥
पूर्वोक्तव्यतिकरं, तैर्जल्पितं भद्र सर्वमपि सत्यम् । यत्तव भागिनीसुतेन प्रजल्पितं, ततो मया भणितम् ॥२१७॥
किं प्रभो मातङ्गेन पुण्यं समुपार्जितं यतो जातः । चतुष्कोटीनां स्वाम्येषः, ततस्तेनेति कथितम् ॥२१८॥
चतूरूपकान् वीर्त्ये तेन केनापि शुद्धभावेन । साधर्म्मिक इति कृत्वा दत्तं तुभ्यं भोजनं तदा ॥२१९॥
ते येन तस्य चतुष्कोटिद्रविणभावेन परिणताः, इतः। भणितं मया कथं प्रभो तस्येदानीं वचनशक्तिरपि ? ॥२२०॥
तेन भणितमिदमपि खलु शृणु, तदा गतस्य गृहे । दिवसस्य प्रथमयामे तस्य मूढविसूचिका जाता ॥२२१॥
संक्षुब्धमानसेन स्मृतस्ततः सिद्धचेटकस्तेन । तत्रागतश्च पृष्टः किं मम संप्रति चरमसमयः ? ॥२२२॥
यत एवं संजाता विसूचिका मम, स भणत्येवम् । ततः पृष्टं मृत्वोत्पत्स्येऽहं कुत्र ? ॥२२३ ॥
तेनापि सम्यगवधिं प्रयुज्य कथितमिदं तस्मै । यथा धनसारसुतस्त्वं भविष्यासि ततस्तेनेदं पृष्टम् ॥२२४॥
यथा कथं जानतापि ज्ञानेन सूरिणा मम समीपे । वासितभक्तादिव्यतिकरस्य संप्रश्ननिमित्तम् ॥२२५॥
एष श्राद्ध इह प्रेषित इति श्रुत्वा जल्पितं तेन । यथैतस्यावबोधः सूरिभिरिहैव विज्ञातः ॥ २२६ ॥
स पुनर्धनसारगृहे जातमात्रस्य तव मुखे भूत्वा। जल्पिष्यामि यदाऽहं तदा भविष्यतीति जल्पित्वा ॥२२७॥

---

१ व्ययं कृत्वा । २ अवबोधः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नियठाणम्मि गओ सो तइया इण्हिं तु अवसरं नाउं। अवइन्नो तस्स मुहे सोच्चिय तो जंपइ इमोत्ति ॥२२८।
इय सोउं भववासुव्विग्गेणं तस्स चेव पासम्मि । नवपुन्नज्जणहेउं पडिवन्ना सव्वओ विरई ॥२२९॥
एक्कारस अंगाइं अहिज्जिऊण कमेण संपत्तो । गीयत्थो विहरंतो बहुवरिसेहिं सुहागपुरे ॥२३०॥
तो सो मह भइणिसुओ समागओ मज्झ वंदणनिमित्तं । तप्पुरओ आरद्धा मएवि सदेसणा एवं ॥२३१।
भो सव्वहा असारे संसारे सयलदुक्खनिलयम्मि। तं कीस वससि उज्जमपरम्मुहो धम्मविसयम्मि? ॥२३२।
किं एत्थ चउगईसुवि सुत्थं दिट्ठं तए कहिं, अहवा। मरणम्मि अभयवत्तं पत्तं तुमए कयंताओ? ॥२३३।
किंवाजरामरत्ते देवेणं दाणवेणव विइन्नो । तुज्झ वरो, इह अहवा मणिमंतोसहिबलं किंपि ? ॥२३४॥
किं नो पिच्छसि सयलं जियलोयं विसरिसं पकुव्वंती । जररक्खसी हढेणं सुइवीरियपमुहहरणेण ? ॥२३५।
ता चयसु पमायं सव्वहावि अंगीकरेसु जइधम्मं । जइ सिद्धिवहूपरिरंभविब्भमं महसि भो भद्द ॥२३६॥
इय सोउं पडिवन्नो पढमवए चेव तेण जइधम्मो । परिपालिओ य सुचिरं पज्जंते अणसणं काउं ॥२३७॥
संपत्तो सोहम्मे तत्थाहं पढमओ समुप्पन्नो । इय जह जिणधम्माओ पत्तो सग्गो तहा कहियं ॥२३८॥
इय सोउं विणयपुरस्सरेण संगामसूरराएण । देवीए चंदलेहाए संजुएणं सुरसमीवे ॥२३९॥
सम्मत्तेणं जुत्तो गहिओ बारसविहोवि गिहिधम्मो । सुरजुयलंपि हु एत्तो वच्चइ सोहम्मकप्पम्मि ॥२४०॥
कालक्कमेण तत्तो चविउं देवीए चंदलेहाए । समगं गब्भत्ताए उप्पन्नं पुन्नसमयम्मि ॥२४१॥
सावि पसूया पुत्तं कन्नं च तओ य नरवरिंदेण। बारस दिणाइं विहिअं वद्धावणयं पमोएण ॥२४२॥

निजस्थाने गतः स तदेदानीं त्ववसरं ज्ञात्वा । अवतीर्णस्तस्य मुखे स एव ततो जल्पत्ययमिति ॥२२८॥
इति श्रुत्वा भववासोद्विग्नेन तस्यैव पार्श्वे । नवपुण्यार्जनहेतोः प्रतिपन्ना सर्वतो विरतिः ॥२२९॥
एकादशाङ्गान्यधीत्य क्रमेण संप्राप्तः । गीतार्थो विहरन् बहुवर्षैः शुभाकपुरे ॥२३०॥
ततः स मम भगिनीसुतः समागतो मम वन्दननिमित्तम् । तत्पुरत आरब्धा मयापि सद्देशनैवम् ॥२३१॥
भोः सर्वथाऽसारे संसारे सकलदुःखनिलये । त्वं कस्माद् वसस्युद्यमपराङ्मुखो धर्मविषये ? ॥२३२॥
किमत्र चतुर्गतिष्वपि सौस्थ्यं दृष्टं त्वया क्वाथवा । मरणेऽभयवत्त्वं प्राप्तं त्वया कृतान्तात् ? ॥२३३॥
किंवाऽजरामरत्वे देवेन दानवेन वा वितीर्णः । तुभ्यं वरः, इहाथवा मणिमन्त्रौषधिबलं किमपि ? ॥२३४॥
किं नो पश्यसि सकलं जीवलोकं विसदृशं प्रकुर्वती । जराराक्षसी हठेन स्मृतिवीर्यप्रमुखहरणेन ? ॥२३५॥
तस्मात्त्यज प्रमादं सर्वथाप्यङ्गीकुरु यतिधर्मम् । यदि सिद्धिवधूपरिरम्भविभ्रमं काङ्क्षसि भो भद्र ॥२३६॥
इति श्रुत्वा प्रतिपन्नः प्रथमवयस्येव तेन यतिधर्मः । परिपालितश्च सुचिरं पर्यन्तेऽनशनं कृत्वा ॥२३७॥
संप्राप्तः सौधर्मे तत्राहं प्रथमतः समुत्पन्नः । इति यथा जिनधर्मात् प्राप्तः स्वर्गस्तथा कथितम् ॥२३८॥
इति श्रुत्वा विनयपुरस्सरं संग्रामशूरराजेन । देव्या चन्द्रलेखया संयुतेन सुरसमीपे ॥२३९॥
सम्यक्त्वेन युक्तो गृहीतो द्वादशविधोऽपि गृहिधर्मः । सुरयुगलमपि खल्वितो व्रजति सौधर्मकल्पे ॥२४०॥
कालक्रमेण ततश्च्युत्वा देव्यां चन्द्रलेखायाम् । समकं गर्भतयोत्पन्नं पूर्णसमये ॥२४१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उचियसमयम्मि नामं विहियं जयसुंदरोत्ति पुत्तस्स। दुहियाए पुणो जयसुंदरित्ति एत्तो य ताइंपि ॥२४३॥
बहुविहजहिच्छकीलाविलाससुहगहियविग्गहबलाइं। जायाइं अट्ठवच्छरपरियायाइं कमेण तओ ॥२४४॥
सयलकलाकलणकए लेहायरियस्स ताइं विहिपुव्वं। उवणीयाइं रन्ना गहियाउ कलावि कमेण ॥२४५॥
अह अन्नया य जयसुंदरीवि समवयसहीहिं परियरिया। उज्जाणवणे सिरिवीयरायभवणम्मि गंतूण ॥२४६॥
नमिऊण जिणं पुरओ उवविसिय भत्तिनिब्भरा तयणु। कहवि हु लग्गा वीणावायणवावारमायरिउं॥२४७॥
एत्थंतरे जहिच्छाविहारवावारपरवसं किंपि। किन्नरमिहुणं गयणे वच्चंतं तं निसामेउं ॥२४८॥
वीणारवाणुसारेण जणियगयणयलतरलगइभंगं। जयसुंदरीसमीवे पत्तं कोऊहलाउलियं ॥२४९॥
तीसे सागयवयणप्पमुक्खपडिवत्तिपयडणपहिट्ठं। उचियासणम्मि रम्मे तो तं मिहुणं समासीणं ॥२५०॥
साहियआगमणपओयणस्स पुरओ य तस्स कुमरीए। विहियं वीणावायणकलाए कोसल्लसव्वस्सं ॥२५१॥
तत्तो[1] कीए कलाए तुम्हं कोसल्लसंपया फुरइ ?। इय सबहुमाणवयणाए पसिणियं तीए तं मिहुणं ॥२५२॥
तेणवि गीयकलाकोसल्ले साहियम्मि तयभिमुहं। जयसुंदरीए भणियं तं दंसह मज्झ, तो तेहिं ॥२५३॥
कलकंठकंदलीघोलमाणमिउमहुरमुं[2]दियसरेणं। जयसुंदरिसवणामयपाणसमो थो[3]हिओ विहिओ ॥२५४॥
तालाणुकूलसुललियपयपेसलमुल्लसंतसुं[4]हरायं। सपियाए समं चिय किन्नरेण तो गाइयं गीयं ॥२५५॥

सापि प्रसूता पुत्रं कन्यां च ततश्च नरवेरन्द्रेण। द्वादश दिनानि विहितं वर्धापनकं प्रमोदेन ॥२४२॥
उचितसमये नाम विहितं जयसुन्दर इति पुत्रस्य। दुहितुः पुनर्जयसुन्दरीतीतश्च तावपि ॥२४३॥
बहुविधयथेच्छक्रीडाविलाससुखगृहीतविग्रहबलौ। जातावष्टवत्सरपर्यायौ क्रमेण ततः ॥२४४॥
सकलकलाकलनकृते लेखाचार्यस्य तौ विधिपूर्वम्। उपनीतौ राज्ञा, गृहीताः कला अपि क्रमेण ॥२४५॥
अथान्यदा च जयसुन्दर्यपि समवयःसखीभिः परिकारिता। उद्यानवने श्रीवीतरागभवने गत्वा ॥२४६॥
नत्वा जिनं पुरत उपविश्य भक्तिनिर्भरा तदनु। कथमपि खलु लग्ना वीणावादनव्यापारमाचरितुम् ॥२४७॥
अत्रान्तरे यदृच्छाविहारव्यापारपरवशं किमपि। किन्नरमिथुनं गगने व्रजत् तं निशम्य ॥२४८॥
वीणारवानुसारेण जनितगगनतलतरलगतिभङ्गम्। जयसुन्दरीसमीपे प्राप्तं कौतूहलाकुलितम् ॥२४९॥
तस्याः स्वागतवचनप्रमुख्यप्रतिपत्तिप्रकटनप्रहृष्टम्। उचितासने रम्ये ततस्तन्मिथुनं समासीनम् ॥२५०॥
कथितागमनप्रयोजनस्य पुरतश्च तस्य कुमार्या। विहितं वीणावादनकलायाः कौशलसर्वस्वम् ॥२५१॥
ततः कस्यां कलायां युष्माकं कौशलसंपत् स्फुरति ?। इति सबहुमानवचनया प्रश्नितं (पृष्टं)तया तन्मिथुनम्॥२५२॥
तेनापि गीतकलाकौशले कथिते तदभिमुखम्। जयसुन्दर्या भणितं तद् दर्शय मम ततस्ताभ्याम् ॥२५३॥
कलकण्ठकन्दलीघूर्णमानमृदुमधुरमुद्रितस्वरेण। जयसुन्दरीश्रवणामृतपानसम आलापो (?) विहितः ॥२५४॥
पवरविमाणारूढा चउसामाणियसहस्सपरियरिया । अणिआहिवेहि सत्तहिं सत्तहिं अणिएहिं संजुत्ता॥१३३॥
अमरकरिकुंभविब्भमपओहराभरणभूसियसरीरा । जिणजणणिसमीवं तक्खणेण एयाओ संपत्ता ॥१३४॥
तं जहा;—

भोगंकरा भोगवई सुभोगा भोगमालिणी । तोयधारा विचित्ता य पुप्फमाला अणिंदिया ॥१३५॥
ति पयाहिणीकरेउं जिणवरजणणिं पराए भत्तीए । सव्वाओवि समकालं थुणंति कलकोइलरवेणं॥१३६॥
कहं विय;
नमिमो तिहुयणरमणीसिरभूसणरयणविब्भमे देवि । पयकमलं कोमलललियअंगुलीपवरदलकलियं ॥१३७॥

तं दृष्ट्वा त्रिभुवनदिवाकरं तेजःकान्तिपरिकलितम् । पूर्वदिगिव विकसितमुखकमला राजते देवी ॥१२५॥
अत्रान्तरे सहसाऽऽनन्दितसकलत्रिभुवनाभोगम् । मन्दः शिशिरः सुरभिर्गगने प्रविजृम्भितः पवनः ॥१२६॥
सचराचरजन्तूनामतिसुखदो गुरुविस्मयकरश्च । संभूतो नरकेष्वपि क्षणमात्रेण समुद्योतः ॥१२७॥
प्रमार्जितमिव धरण्या मण्डलं तथा प्रभञ्जनसुरैः । उपशान्तरेणुनिकरं घनैर्गन्धोदकं वृष्टम् ॥१२८॥
ऋतुदेव्यः कुसुमानां पञ्चवर्णानां प्रकरमुपनयन्ति । समकालमग्निदेव्यो दीपकांस्तत्र दीपयन्ति ॥१२९॥
सुप्रतिष्ठनृपतिभवने धनपादेशेन जृम्भकसुरा अपि । वररत्नकनकवसनाभरणसमूहं च वर्षन्ति ॥१३०॥
देवैर्देवीभिरायद्भिः प्रतिनिवर्तमानैः । वाणारस्यपि जाता तद्वेलममरनगरीव ॥१३१॥
इतश्च सूतिकर्मावसरं ज्ञात्वावधिज्ञानेन । अष्ट दिक्कुमार्योऽधोलोकात् तत्रायन्ति ॥१३२॥
प्रवरविमानारूढाश्चतुःसामानिकसहस्रपरिकरिताः । अनीकाधिपैः सप्तभिः सप्तभिरनीकैः संयुक्ताः ॥१३३॥
अमरकरिकुम्भविभ्रमपयोधराभरणभूषितशरीराः । जिनजननीसमीपं तत्क्षणेनैताः संप्राप्ताः ॥१३४॥
तद्यथा;—

भोगङ्करा भोगवती सुभोगा भोगमालिनी । तोयधारा विचित्रा च पुष्पमालाऽनिन्दिता ॥१३५॥
त्रिः प्रदक्षिणीकृत्य जिनवरजननीं परया भक्त्या । सर्वा अपि समकालं स्तुवन्ति कलकोकिलरवेण ॥१३६॥
कथमिव;

---

१ क. इत्थं° ।

आसंसारं दससुवि दिसासु परिभमउ निब्भरं देवि । सरयनिसायरहरहसियहारधवलो जसो तुज्झ ॥१३८॥
तुमएच्चिय संपत्ता रेहा मज्झम्मि पुत्तवंतीण । जीए नियउयरेणं उव्वूढो सत्तमजिणिंदो ॥ १३९ ॥
इय सुइरं जिणजणणिं नमिउं जंपंति गुरुपमोएण । न हु देवि ! भाइयव्वं जं अम्हे दिसिकुमारीओ ॥१४०॥
एयस्स सयलभुवणिक्कसामिणो जिणवरस्स भत्तीए । नियअहिगारणुरूवं जम्मणमहिमं विहिस्सामो ॥१४१॥
इय अणुजाणावेउं जिणजम्मणभवणचउदिसिं विहियं । जोयणमित्तं खित्तं ववगयतणकट्ठरयपत्तं ॥१४२॥
तक्खणविउव्विएणं संवट्टगवाउणा समग्गंपि । दुग्गंधं अवणेउं जिणजणणीए अदूरम्मि ॥ १४३ ॥
गायंतीउ गुरुहरिसवियसियच्छीओ तत्थ चिट्ठंति । एवं उड्ढदिसाओवि देवीओ इंति एयाओ ॥१४४॥
मेहंकरा मेहवई सुमेहा मेहमालिणी । सुवच्छा वच्छमित्ता य वारिसेणा बलाहगा ॥१४५॥
तो वेउव्वियमेहेण महियलं निहयरेणुयं काउं । सोरब्भगुणायड्ढियभमरउलं पुप्फवरिसं च ॥१४६॥
तित्थयरगुणसमूहं अइमहुरसरेण सवणसुहएण । आसन्नम्मि ठियाओ गायंति गुरुप्पमोएणं ॥१४७॥
अह पोरच्छिमरुयगाओ अट्ठ देवीउ दिसिकुमारीओ । नियपरियणसहियाओ एयाओ आगया तत्थ ॥१४८॥
नंदुत्तरा य नंदा आनंदा नंदिवद्धणा । विजया य वेजयंती जयंती चापराजिया ॥१४९॥
दिणहरबिंबसरिच्छं करे करेऊण दप्पणं विमलं । पुव्वदिसि संठियाओ गायंति गुणे जिणिंदस्स ॥१५०॥
अह दाहिणरुयगाओ एवंचिय अट्ठ दिसिकुमारीओ । मुणियजिणजम्मणाओ एयाउ समागयाउ तहिं ॥१५१॥

नमामस्त्रिभुवनरमणीशिरोभूषणरत्नविभ्रमे ! देवि ! । पादकमलं कोमललिताङ्गुलिप्रवरदलकलितम् ॥१३७॥
आसंसारं दशस्वपि दिक्षु परिभ्राम्यतु निर्भरं देवि ! । शरन्निशाकरहरहसितहारधवलं यशस्तव ॥१३८॥
त्वयैव संप्राप्ता रेखा मध्ये पुत्रवतीनाम् । यया निजोदरेणोद्व्यूढः सप्तमजिनेन्द्रः ॥१३९॥
इति सुचिरं जिनजननीं नत्वा जल्पन्ति गुरुप्रमोदेन । न खलु देवि ! भेतव्यं यद् वयं दिक्कुमार्यः ॥१४०॥
एतस्य सकलभुवनैकस्वामिनो जिनवरस्य भक्त्या । निजाधिकारानुरूपं जन्ममहं विधास्यामः ॥१४१॥
इत्यनुज्ञाप्य जिनजन्मभवनचतुर्दिक्षु विहितम् । योजनमात्रं क्षेत्रं व्यपगततृणकाष्ठरजःपत्रम् ॥१४२॥
तत्क्षणविकुर्वितेन संवर्तकवायुना समग्रमपि । दुर्गन्धमपनीय जिनजनन्या अदूरे ॥१४३॥
गायन्त्यो गुरुहर्षविकसिताक्ष्यस्तत्र तिष्ठन्ति । एवमूर्ध्वदिशोऽपि देव्य आयन्त्येताः ॥१४४॥
मेघङ्करा मेघवती सुमेघा मेघमालिनी । सुवत्सा वत्समात्रा च वारिषेणा बलाहका ॥१४५॥
ततो विकुर्वितमेघेन महीतलं निहतरेणुकं कृत्वा । सौरभ्यगुणाकृष्टभ्रमरकुलं पुष्पवर्षं च ॥१४६॥
तीर्थकरगुणसमूहमतिमधुरस्वरेण श्रवणसुखदेन । आसन्ने स्थिता गायन्ति गुरुप्रमोदेन ॥१४७॥
अथ पौरस्त्यरुचकादष्ट देव्यो दिक्कुमार्यः । [1]निजपरिजनसहिता एता आगतास्तत्र ॥१४८॥
नन्दोत्तरा च नन्दाऽऽनन्दा नन्दिवर्धना । विजया च वैजयन्ती जयन्ती चापराजिता ॥१४९॥
दिनकरबिम्बसदृशं करे कृत्वा दर्पणं विमलम् । पूर्वदिशि संस्थिता गायन्ति गुणाञ्जिनेन्द्रस्य ॥१५०॥
अथ दक्षिणरुचकादेवमेवाष्ट दिक्कुमार्यः । ज्ञातजिनजन्मान एताः समागतास्तत्र ॥१५१॥

---

१ ख. उ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समाहारा पइन्ना य सुप्पबुद्धा जसोहरा । लच्छीवई भोगवई चित्तगुत्ता वसुंधरा ॥ १५२ ॥
करकमले कलिऊणं भिंगारं सुरहिसलिलपडिपुन्नं । पहुणो दाहिणपासे ठियाओ गायंति गुणनियरं॥१५३॥
अह पच्छिमरुयगठिया पवरविमाणेण दिसिकुमारीओ। अट्ठेव भत्तिभरनिब्भराओ एया पविसंति ॥१५४॥
ईलादेवी सुरादेवी पुहई पउमावई (तहा ?) । एगनासाऽनवमिया भद्दाऽसोया य अट्ठमा ॥१५५॥
करकमलकलियसुविसालतालियंटाओ दीहरच्छीओ। पच्छिमदिसाठियाओ थुणंति तित्थयरगुणनिवहं१५६
अह उत्तरिल्लरुयगे वत्थव्वाओ दिसाकुमारीओ । अट्ठेव आगयाओ तरुणतरट्टाओ एयाओ ॥१५७॥
वारुणी पुंडरीका य मीसकेसा अलंबुका । आसा सव्वप्पहा चेव [3]हिरिदेवी सिरी तहा ॥१५८॥
करकमलकलियसियचामराओ उत्तरदिसिम्मि देवस्स । नमिऊण पुहइदेविं पुव्वकमेणं च चिट्ठंति ॥१५९॥
अह विदिसिरुयगपरिवासिणीओ चत्तारि दिसिकुमारीओ।चित्ता य चित्तकणया सुंतेरसोयामणीनामा १६०
नमिऊण पुहइदेविं ठाउं विदिसासु चउसुवि कमेण । सुंदरपईवहत्था गायंति जिणस्स गुणनिवहं ॥१६१॥
मज्झिमरुयगट्ठिईओ दिसाकुमारीओ इंति चत्तारि । तं जह रुया रुयंसा सुरुया रुयगावईनामा ॥१६२॥
तत्थागंतुं नाहीनालं कप्पंति जिणवरिंदस्स । चउरंगुलाउ उड्ढं खणंति तत्तो य वरविवरं ॥१६३॥
तं तत्थ नाहिनालं ठविऊणं पंचवण्णरयणेहिं । पूरिंति तदुवरिं तो रयंति हरियालगुरुपीढं ॥१६४॥
तयणंतरं च अइमणहराइं कयलीहराइं तिन्नेव । वेउव्विऊण तेसिं च मज्झभागम्मि रम्माइं ॥१६५॥

समाहारा प्रदत्ता च सुप्रबुद्धा यशोधरा । लक्ष्मीवती भोगवती चित्रगुप्ता वसुन्धरा ॥१५२॥
करकमले कलयित्वा भृङ्गारं सुरभिसलिलपरिपूर्णम् । प्रभोर्दक्षिणपार्श्वे स्थिता गायन्ति गुणनिकरम् ॥१५३॥
अथ पश्चिमरुचकस्थिताः प्रवरविमानेन दिक्कुमार्यः । अष्टैव भक्तिभरनिर्भरा एताः प्रविशन्ति ॥१५४॥
इलादेवी सुरादेवी पृथिवी पद्मावती । एकनासाऽनवमिका भद्राऽशोका चाष्टमी ॥१५५॥
करकमलकलितसुविशालतालवृन्ता दीर्घाक्ष्यः । पश्चिमदिक्स्थिताः स्तुवन्ति तीर्थकरगुणनिवहम् ॥१५६॥
अथौत्तराहरुचके वास्तव्या दिक्कुमार्यः । अष्टैवागतास्तरुणप्रगल्भा एताः ॥१५७॥
वारुणी पुण्डरीका च मिश्रकेशाऽलम्बुका । आशा सर्वप्रभा चैव ह्रीदेवी श्रीस्तथा ॥१५८॥
करकमलकलितसितचामरा उत्तरदिशि देवस्य । नत्वा पृथिवीदेवीं पूर्वक्रमेण च तिष्ठन्ति ॥१५९॥
अथ विदिग्रुचकपरिवासिन्यश्चतस्रो दिक्कुमार्यः । चित्रा च चित्रकनका सुतेरा-सौदामनीनामानौ ॥१६०॥
नत्वा पृथिवीदेवीं स्थित्वा विदिक्षु चतसृष्वपि क्रमेण । सुन्दरप्रदीपहस्ता गायन्ति जिनस्य गुणनिवहम्॥१६१॥
मध्यमरुचकस्थितयो दिक्कुमार्य आयन्ति चतस्रः । तद्यथा रुचा रुचांशा सुरुचा रुचकावतीनामा ॥१६२॥
तत्रागत्य नाभिनालं कल्पयन्ति जिनवरेन्द्रस्य । चतुरङ्गुलादूर्ध्वं खनन्ति ततश्च वरविवरम् ॥१६३॥
तत् तत्र नाभिनालं स्थापयित्वा पञ्चवर्णरत्नैः । पूरयन्ति तदुपरि ततो रचयन्ति हरितालगुरुपीठम् ॥१६४॥
तदनन्तरं चातिमनोहराणि कदलीगृहाणि त्रीण्येव । विकुर्व्य तेषां च मध्यभागे रम्याणि ॥१६५॥

---

१ ग. एला° । २ ग. देहाओ । ३ ख. ग. हरि° । ४ ख. ग. मातर । ५ क. रुया । ६ क. रुयं° । ७ क. सुरुया । ८ क. रुय° ।

पंचप्पयारमणिरयणरइयकुट्टिमतलाइं विउलाइं। दारप्पएससंठवियकणयमयपुन्नकलसाइं ॥१६६॥
उद्दामरूववरसालहंजियारेहिराइं विरयंति। उत्तरदाहिणपुव्वासु तिन्नि चउसालभवणाइं ॥१६७॥
तेसिं च मज्झभागे महग्घमणिखंडमंडियतलाइं। नियकिरणजालविरइयसुरिंदकोदंडदंडाइं ॥१६८॥
वरकणयपव्वयसिलावित्थिन्नाइं ठवंति तिन्नेव। सीहासणाइं तत्तो तित्थयरं गरुयभत्तीए ॥१६९॥
करयलपुडेण घित्तुं जिणवरजणणिं च दाहिणदिसिम्मि। निसियाविंति य वरचाउसालसीहासणे तत्तो॥१७०
अब्भंगंति सरीरं सयपागसहस्सपागतेल्लेहिं। तेसिं पहाणगंधुद्धुरेहिं परमप्पमोएण ॥१७१॥
उव्वट्टिऊण उभयं सुगंधउव्वट्टणेण एमेव। पुव्वाभिमुहे चउसालपवरसीहासणे ठविउं ॥१७२॥
गंधोदएण पुप्फोदएण सुद्धोदएण ण्हाविंति। पवरमणिरयणकणयाभरणेहिं तओ विभूसिंति ॥१७३॥
उत्तरदिसिम्मि चउसालविउलसिंहासणे निवेसेउं। संतिनिमित्तं होमं करंति गोसीसदारूहिं ॥१७४॥
नियपप्पभावपरिरक्खियस्सवि जिणस्स जीयमेयंति। काऊण पवररक्खापुट्टलियं बंधयंति तओ॥१७५॥
ताडिंति सवणमूले रयणुवले एरिसं वयंतीओ। सत्तकुलपव्वयाऊ अप्पडिहयसासणो हवसु ॥१७६॥
पणयजणपूरियासो दूरयरपलीणरोयसोगो य। इय भणिऊणं जम्मणगेहम्मि ठविंति जिणजणणिं ॥१७७॥
तत्तो महुरसरेण गायंति जिणिंदभूरिगुणनिवहं। हरिसेण समल्लियंति पुहइदेवीसमीवम्मि ॥१७८॥
इय जस्स जम्मकिच्चं जिणस्स छप्पन्नदिसिकुमारीहिं। लहुमेव समत्थिज्जइ भत्तीए परमहरिसेणं ॥१७९॥

पञ्चप्रकारमणिरत्नरचितकुट्टिमतलानि विपुलानि। द्वारप्रदेशसंस्थापितकनकमयपुण्यकलशानि ॥१६६॥
उद्दामरूपवरशालभञ्जिकाराजमानानि विरचयन्ति। उत्तरदक्षिणपूर्वासु त्रीणि चतुःशालभवनानि ॥१६७॥
तेषां च मध्यभागे महार्घमणिखण्डमण्डिततलानि। निजकिरणजालविरचितसुरेन्द्रकोदण्डदण्डानि ॥१६८॥
वरकनकपर्वतशिलाविस्तीर्णानि स्थापयन्ति त्रीण्येव। सिंहासनानि ततस्तीर्थकरं गुरुभक्त्या ॥१६९॥
करतलपुटेन गृहीत्वा जिनवरजननीं च दक्षिणदिशि। निषादयन्ति च वरचतुःशालसिंहासने ततः ॥१७०॥
अभ्यञ्जन्ति शरीरं शतपाकसहस्रपाकतैलैः। तयोः प्रधानगन्धोद्धुरैः परमप्रमोदेन ॥१७१॥
उद्वर्त्योभयं सुगन्धोद्वर्तनेनैवमेव। पूर्वाभिमुखं चतुःशालप्रवरसिंहासने स्थापयित्वा ॥१७२॥
गन्धोदकेन पुष्पोदकेन शुद्धोदकेन स्नपयन्ति। प्रवरमणिरत्नकनकाभरणैस्ततो विभूषयन्ति ॥१७३॥
उत्तरदिशि चतुःशालविपुलसिंहासने निवेश्य। शान्तिनिमित्तं होमं कुर्वन्ति गोशीर्षदारुभिः ॥१७४॥
निजकप्रभापरिरक्षितस्यापि जिनस्य जीतमेतदिति। कृत्वा प्रवररक्षापोट्टलिकां बध्नन्ति ततः ॥१७५॥
ताडयन्ति श्रवणमूले रत्नोपलानीदृशं वदन्त्यः। सप्तकुलपर्वतायुरप्रतिहतशासनो भवतात् ॥१७६॥
प्रणतजनपूरिताशो दूरतरप्रलीनरोगशोकश्च। इति भणित्वा जन्मगेहे स्थापयन्ति जिनजननीम् ॥१७७॥
ततो मधुरस्वरेण गायन्ति जिनेन्द्रभूरिगुणनिवहम्। हर्षेण समुपसर्पन्ति पृथिवीदेवीसमीपे ॥१७८॥
इति यस्य जन्मकृत्यं जिनस्य षट्पञ्चाशद्दिक्कुमारीभिः। लघ्वेव समर्थ्यते भक्त्या परमहर्षेण ॥१७९॥

---

१ जीतम् = व्यवहारः।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एत्थंतरम्मि सोहम्मकप्पसामिस्स सुरवरिंदस्स । सीहासणं पकंपइ तक्कंपेणं तओ सहसा ॥१८०॥
अइविम्हिओ सुरिंदो रोसारुणलोयणो विचिंतेइ । नणु कस्स सग्गलच्छी परंमुही संपयं जाया?॥१८१॥
को वा कयंतदुज्जयकडक्खविक्खेवगोयरं पत्तो । गमणमणो वा सलहुव्व[1] वज्जजालासु को मज्झ?॥१८२॥
को वा निमज्जणमणो अगाहवसणोयहिम्मि दुब्बुद्धी । संचालियं थिरंपि हु जेण सीहासणं मज्झ॥१८३॥
इय चिंताकुलियमणो दिसिदसयं जा पलोयमाणोवि । न हु किंपि नियइ पुरओ पुणोवि ता चिंतए सक्को॥१८४॥
किं मज्झ चवणकालो अह सोवि न संपयं घडइ जम्हा । कंपेइ नामरतरू न परिमिलायंति कुसुमाणि१८५
अज्जवि य न हु विरज्जइ सचीजणो नेय फुरइ दीणत्तं । न निमेसिणी य दिट्ठी वत्थाणि य नेय मलिणाणि१८६
इय जा अणप्पकुवियप्पसंकुलो नियइ अवहिनाणेण । ता सीहासणकंपिक्ककारणं मुणइ जिणजम्मं॥१८७॥
ता उट्ठेउं सीहासणाउ गंतुं पयाइं सत्तट्ठ । तत्थ ठिओवि हु सक्कत्थएण हरिसेण थुणइ जिणं ॥१८८॥
सिंहासणे निसण्णो पुणोवि चिंतेइ सुरवई एवं । हद्धी अचिंतणीयं पिच्छसु परिचिंतियं पावं ॥१८९॥
तो आणवेइ हरिसेण सुरचमूसामियं तियसनाहो । भो सोहम्मसभाए गंतूण लहुंपि तिखुत्तो ॥१९०॥
मेहोहगहिरघोसं जोयणवित्तं[2] सुघोसवरघंटं । ताडेऊणं महया रवेण घोसेह तह एवं ॥१९१॥
भारहखित्ते सत्तमतित्थयरो संपयं समुप्पन्नो । वाणारसीए सक्को चलिओ से जम्ममहिमत्थं ॥१९२॥
तो भो देवा ! तुब्भे सव्वालंकारभूसिया सव्वे । सव्वेहिं नाडएहिं सव्वबलेणं च संजुत्ता ॥१९३॥

अत्रान्तरे सौधर्मकल्पस्वामिनः सुरवरेन्द्रस्य । सिंहासनं प्रकम्पते तत्कम्पेन ततः सहसा ॥१८०॥
अतिविस्मितः सुरेन्द्रो रोषारुणलोचनो विचिन्तयति । ननु कस्य स्वर्गलक्ष्मीः पराङ्मुखी सांप्रतं जाता?॥१८१॥
को वा कृतान्तदुर्जयकटाक्षविक्षेपगोचरं प्राप्तः । गमनमना वा शलभ इव वज्रज्वालासु को मम ? ॥१८२॥
को वा निमज्जनमना अगाधव्यसनोदधौ दुर्बुद्धिः । संचालितं स्थिरमपि हि येन सिंहासनं मम ? ॥१८३॥
इति चिन्ताकुलितमना दिग्दशकं यावत् प्रलोकमानोऽपि । न हि किमपि पश्यति पुरतः पुनरपि तताश्चिन्तयति शक्रः॥
किं मम च्यवनकालोऽथ सोऽपि न सांप्रतं घटते यस्मात् । कम्पते नामरतरुर्न परिम्लायन्ति कुसुमानि ॥१८५॥
अद्यापि च न हि विरज्यते शचीजनो नैव स्फुरति दीनत्वम् । न निमेषिणी च दृष्टिर्वस्त्राणि च नैव मलिनानि ॥१८६॥
इति यावदनल्पकुविकल्पसंकुलः पश्यत्यवधिज्ञानेन । तावत्सिंहासनकम्पैककारणं जानाति जिनजन्म ॥१८७॥
तत उत्थाय सिंहासनाद् गत्वा पदानि सप्ताष्ट । तत्र स्थितोऽपि हि शक्रस्तवेन हर्षेण स्तवीति जिनम्॥१८८॥
सिंहासने निषण्णः पुनरपि चिन्तयति सुरपतिरेवम् । हा धिगचिन्तनीयं पश्य परिचिन्तितं पापम् ॥१८९॥
तत आज्ञपयति हर्षेण सुरचमूस्वामिनं त्रिदशनाथः । भोः सौधर्मसभायां गत्वा लघ्वपि त्रिः ॥१९०॥
मेघौघगभीरघोषां योजनवृत्तां सुघोषावरघण्टाम् । ताडयित्वा महता रवेण घोषयत तथैवम् ॥१९१॥
भारतक्षेत्रे सप्तमतीर्थकरः सांप्रतं समुत्पन्नः । वाराणस्यां शक्रश्चलितस्तस्य जन्ममहिमार्थम् ॥१९२॥
ततो भो देवाः ! यूयं सर्वालङ्कारभूषिताः सर्वे । सर्वैर्नाटकैः सर्वबलेन च संयुक्ताः ॥१९३॥

---

१ ख. °लहोव्व । २ ग. °णवयणं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तह सव्वविभूईए आरुहिउं पवरनियविमाणाइं। दिव्वच्छराहिं सहिया सक्कसयासं लहुं एह ॥१९४॥
इय तियसनाहवयणं सोउं विणएण सुरचमूसामी। तुरियगई गंतूणं सोहम्मसभाए तिखुत्तो ॥१९५॥
ताडइ सुघोसघंटं तीसे घणघोसपडिरववसेणं। अन्नाणवि घंटाणं बत्तीसं सयसहस्साइं ॥१९६॥
एगूणगाइं समकालमेव काउं रणज्झणारावं। पारद्धाइं तप्पडिरवोवि समगं समुच्छलिओ ॥१९७॥
एत्थंतरम्मि पंचविहविसयसेवापमत्तचित्तावि। देवा तमेगकालं वज्जिरघंटासरं सोउं ॥१९८॥
चिंतंति किं विफुट्टंतचंडबंभंडभंडयस्स रवो। रयणमयविमाणावलिपडिफलणेणं पवित्थरिओ ॥१९९॥
निसुणिज्जंतो संखुद्धमुद्धहिययाहिं अमररमणीहिं। हा नाह! रक्ख रक्खत्ति जंपिरीहिं भयवसेणं ॥२००॥
दणुयवइवहहरिसियतियससुहडगलगज्जिभीसणो भुवणे। सव्वत्तोवि वियंभइ घंटाणं रणरणारावो॥२०१॥
इय चिंताए सिढिलियमाणिणिगाढावगूढकंठम्मि। संजाए सुरनिवहे सव्वत्तो मूढहिययम्मि ॥२०२॥
उवसंते य खणेणं समग्गगंभीरघंटनिग्घोसे। अवहियसुराण सुररायसासणं कहइ एस तओ ॥२०३॥
इय नाउं हरिणगवेसिवयणओ जम्ममज्जणं पहुणो। विप्फुरियपमोयभरा तो संविहिउं समारद्धा॥२०४॥
गंतूणं मज्जणकेलिदीहियं अह कुणंति मज्जणयं। कप्पूरमीसचंदणरसेण देहं विलिंपंति ॥२०५॥
दूसजुयं निम्मलकोमलं च परिहंति कंतिकमणीयं। कंठपइट्ठियहारा दूरुज्झियकामुयवियारा ॥२०६॥
वरकडयतुडियमणिमउडकिरणविच्छुरियसयलगयणयला। नियरूवमडप्फरहसियकुसुमबाणा तओ चलिया॥

तथा सर्वविभूत्याऽऽरुह्य प्रवरनिजविमानानि। दिव्याप्सरोभिः सहिताः शक्रसकाशं लघ्वेत ॥१९४॥
इति त्रिदशनाथवचनं श्रुत्वा विनयेन सुरचमूस्वामी। त्वरितगतिर्गत्वा सौधर्मसभायां त्रिः ॥१९५॥
ताडयति सुघोषाघण्टां तस्या घनघोषप्रतिरववशेन। अन्यासामपि घण्टानां द्वात्रिंशच्छतसहस्राणि ॥१९६॥
एकोनकानि समकालमेव कृत्वा रणज्झणारावम्। प्रारब्धानि तत्प्रतिरवोऽपि समकं समुच्छलितः ॥१९७॥
अत्रान्तरे पञ्चविधविषयसेवाप्रमत्तचित्ता अपि। देवास्तमेककालं वाद्यमानघण्टास्वरं श्रुत्वा ॥१९८॥
चिन्तयन्ति किं विस्फुटच्चण्डब्रह्माण्डभाण्डकस्य रवः। रत्नमयविमानावलिप्रतिफलनेन प्रविस्तीर्णः ॥१९९॥
श्रूयमाणः संक्षुब्धमुग्धहृदयाभिरमररमणीभिः। हा नाथ! रक्ष रक्षेति जल्पित्रीभिर्भयवशेन ॥२००॥
दनुजपतिवधहर्षितत्रिदशसुभटगलगर्जिभीषणो भुवने। सर्वतोऽपि विजृम्भते घण्टानां रणरणारावः ॥२०१॥
इति चिन्तया शिथिलितमानिनीगाढावगूढकण्ठे। संजाते सुरनिवहे सर्वतो मूढहृदये ॥२०२॥
उपशान्ते च क्षणेन समग्रगम्भीरघण्टानिर्घोषे। अवहितसुरान् सुरराजशासनं कथयत्येष ततः ॥२०३॥
इति ज्ञात्वा हरिणगमेषिवचनतो जन्ममज्जनं प्रभोः। विस्फुरितप्रमोदभरास्ततः संविधातुं समारब्धाः॥२०४॥
गत्वा मज्जनकेलिदीर्घिकामथ कुर्वन्ति मज्जनकम्। कर्पूरमिश्रचन्दनरसेन देहं विलिम्पन्ति ॥२०५॥
दूष्ययुगं निर्मलकोमलं च परिदधति कान्तिकमनीयम्। कण्ठप्रतिष्ठितहारा दूरोज्झितकामुकविकाराः ॥२०६॥
वरकटकत्रुटितमणिमुकुटकिरणविच्छुरितसकलगगनतलाः। निजरूपगर्वहसितकुसुमबाणास्ततश्चलिताः ॥२०७॥

---

१ ख. ग. मज्झ स°। २ अनुकरणशब्द इति तथैवानुद्यमानो युक्तः, एवमुत्तरत्रापि।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उत्तुंगतुरयकुंजरवराहवरहरिणमयरजाणेहिं । आरूढा चीणंसुयचिंधसहस्सोवसोहेहिं ॥२०८॥
केवि विमाणारूढा किंकिणिरणझणियबहिरियदियंता । केवि हु महल्लसद्दूलसरहहरिहंसवसहगया ॥२०९॥
इय सव्वबलसमेया सहिया नियपणइणीहिं वेगेण । सव्वेवि हरिसेण आगया सुरवइसमीवं ॥२१०॥
एत्थंतरम्मि लंबंतविमलमुत्ताहलावचूलिल्लं । फालिहमणिनिम्मियसालभंजियाघडियवरदारं ॥२११॥
खंभसहस्सनिबद्धं रणंतघंटावलीहिं सुइसुहयं । उब्भडपवणपकंपिरजयप्पडागाइअइपयडं ॥२१२॥
सोलसभेयामलरयणनिम्मियं मज्झिमस्स भुवणस्स । सिहरंव पुव्वकयसुकयसिहरिणो निम्मलफलंव॥२१३॥
तिहुयणपहाणपरमाणुनियरनिव्वत्तियंव विच्छड्डे । जोयणलक्खपमाणं जोयणपणसहस्सउस्सेहं ॥२१४॥
सुरवइवयणससंभमपालयसुरसंचियं वरविमाणं । आरुहिऊणं चलिओ सक्को सह देवकोडीहिं[2] ॥२१५॥
तत्तो सिग्घगईए तिरियं दीवाण मज्झयारेण । नन्दीसरवरदीवे दाहिणपोरच्छिमम्मि नगे ॥२१६॥
रइकरनामम्मि समागंतूण तओ कमेण देवड्ढिं । तं दिव्वं देवजुइं दिव्वं देवाणुभावं च ॥२१७॥
तत्तो विमाणमुवसंहरेवि[3] जेणेव भारहं खित्तं । वाराणसी[4] य जेणं जेण य जिणजम्मभवणं च ॥२१८॥
तेणेव य मग्गेणं आगंतूणं कमेण संपत्तो । सुपइट्ठनिवइभवणे सक्को सह देवदेवीहिं ॥२१९॥
आयाहिणापयाहिणमह काउं दिव्ववरविमाणेणं। तिक्खुत्तं जिणजम्मणभुवणस्स तओ नियविमाणं॥२२०॥
संठविऊणं उत्तरपुरच्छिमे सुहदिसाविभागम्मि । अग्गमहिसीहिं अट्ठहिं सामाणियसहस्सचुलसीहिं॥२२१॥

उत्तुङ्गतुरगकुञ्जरवराहवरहरिणमकरयानैः । आरूढाश्चीनांशुकचिह्नसहस्रोपशोभैः ॥२०८॥
केऽपि विमानारूढाः किङ्किणीरणझणितबधिरितादिगन्ताः । केऽपि हि महाशार्दूलशरभहरिहंसवृषभगताः॥२०९॥
इति सर्वबलसमेताः सहिता निजप्रणयिनीभिर्वेगेन । सर्वेऽपि सुरा हर्षेणागताः सुरपतिसमीपम् ॥२१०॥
अत्रान्तरे लम्बमानविमलमुक्ताफलावचूलिकम् । स्फाटिकमणिनिर्मितशालभञ्जिकाघटितवरद्वारम् ॥२११॥
स्तम्भसहस्रनिबद्धं रणद्घण्टावलीभिः श्रुतिसुखदम् । उद्भटपवनप्रकम्पमानजयपताकाद्यतिप्रकटम् ॥२१२॥
षोडशभेदामलरत्ननिर्मितं मध्यमस्य भुवनस्य । शिखरमिव पूर्वकृतसुकृतशिखरिणो निर्मलफलमिव ॥२१३॥
त्रिभुवनप्रधानपरमाणुनिकरनिर्वर्तितमिव विस्तारे । योजनलक्षप्रमाणं योजनपञ्चसहस्रोत्सेधम् ॥२१४॥
सुरपतिवचनससंभ्रमपालकसुरसंचितं वरविमानम् । आरुह्य चलितः शक्रः सह देवकोटिभिः ॥२१५॥
ततः शीघ्रगत्या तिर्यग्द्वीपानां मध्येन । नन्दीश्वरवरद्वीपे दक्षिणपौरस्त्ये नगे ॥२१६॥
रतिकरनाम्नि समागत्य ततः क्रमेण देवर्द्धिम् । तां दिव्यां देवद्युतिं दिव्यं देवानुभावं च ॥२१७॥
ततो विमानमुपसंहृत्य येनैव भारतं क्षेत्रम् । वाराणसी च येन येन च जिनजन्मभवनं च ॥२१८॥
तेनैव च मार्गेणागत्य क्रमेण संप्राप्तः । सुप्रतिष्ठनृपभवने शक्रः सह देवदेवीभिः ॥२१९॥
आदक्षिणप्रदक्षिणामथ कृत्वा दिव्यवरविमानेन । त्रिर्जिनजन्मभवनस्य ततो निजविमानम् ॥२२०॥
संस्थाप्योत्तरपौरस्त्ये शुभदिग्विभागे । अग्रमहिषीभिरष्टाभिः चतुरशीतिसामानिकसहस्रैः ॥२२१॥

---

१ क. ख. 'णयणी' । २ क. कुलयं । ३ ख. °णमवि मं° । ४ क. ख. बाणारसी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संजुत्तो तियसपहू पविसइ तत्थेव जत्थ तित्थयरो । जणणी य, दिट्ठिविसए पुणो पणामं करेमाणो ॥२२२॥
सामिं समायरं चिय तिपयाहिणपुव्वयं नमंसेउं । संथुणइ पुहइदेविं सविसेसं पुलइयसरीरो ॥२२३॥
कहं विय ?
जयसि तुमं नियकुलगयणसयलसंपुन्नचंदवरजुण्हे ! । तिहुयणपहाणसीलाइगुणगणाहारवरधरणि ! ॥२२४॥
वररयणनियरपरिपूरिअंतरो लहुइओ तए जलही । तिहुअणपसंसणिज्जं जिणवररयणं धरंतीए ॥२२५॥
जणिउं जिणिंदमंतरतमपसरनिरुंभणिक्कदिणनाहं । खज्जोयपसविणी इव कया तए संपयं पुव्वा ॥२२६॥
परममुणीणंपि तुमं जाया आसीसभायणं देवि ! । एएणं चिय तुमए भवजलही दुत्तरो तरिओ ॥२२७॥
अहरियतिहुयणचिंतामणिजिणवरकुच्छिधारिणीए धुवं । तुह चेव मणुयजम्मो पसंसणिज्जो बुहाणंपि ॥२२८॥
इय थोउं जिणजणणिं अवसोवणिदाणपुव्वयं सक्को । ठविऊणं वेउव्वियजिणपडिरूवं जणणिपासे ॥२२९॥
सयमवि पंच सरीरे विउव्विउं धरइ छत्तमेगेण । दोहिं च उभयपासेसु ढालए सेयवरचमरे ॥२३०॥
एक्केणं धरइ पुरो सारयरविमंडलंव दिसिवलयं । उज्जोयंतं वज्जं असंखपडिवक्खविक्खवणं ॥२३१॥
एगेण सुरहिगोसीसचंदणुप्पंकपंडुरे सुयंधे । धरइ जिणं करकमले हरिसवसुल्लसियरोमंचो ॥२३२॥
इय पंचहिं रूवेहिं काउं सव्वंपि निययकायव्वं । बहुदेवदेविकोडीहिं परिवुडो भत्तिभरकलिओ ॥२३३॥
अप्पाणं मन्नंतो समत्थसुपसत्थतित्थजलण्हायं । मंदरसेलाभिमुहं चलिओ आखंडलो तत्तो ॥२३४॥

संयुक्तस्त्रिदशप्रभुः प्रविशति तत्रैव यत्र तीर्थकरः । जननी च, दृष्टिविषये पुनः प्रणामं कुर्वन् ॥२२२॥
स्वामिनं समातृकमेव त्रिप्रदक्षिणापूर्वकं नमस्यित्वा । संस्तौति पृथिवीदेवीं सविशेषं पुलकितशरीरः ॥२२३॥
कथमिव ?
जयसि त्वं निजकुलगगनसकलसंपूर्णचन्द्रवरज्योत्स्ने ! । त्रिभुवनप्रधानशीलादिगुणगणाधारवरधरणि ! ॥२२४॥
वररत्ननिकरपरिपूरितान्तरो लघूकृतस्त्वया जलधिः । त्रिभुवनप्रशंसनीयं जिनवररत्नं धरन्त्या ॥२२५॥
जनयित्वा जिनेन्द्रमान्तरतमःप्रसरनिरोधनैकदिननाथम् । खद्योतप्रसविनीव कृता त्वया सांप्रतं पूर्वा ॥२२६॥
परममुनीनामपि त्वं जाताऽऽशीर्भाजनं देवि ! । एतेनैव त्वया भवजलधिर्दुस्तरस्तीर्णः ॥२२७॥
अधरितत्रिभुवनचिन्तामणिजिनवरकुक्षिधारिण्या ध्रुवम् । तवैव मनुजजन्म प्रशंसनीयं बुधानामपि ॥२२८॥
इति स्तुत्वा जिननननीमवस्वापनीदानपूर्वकं शक्रः । स्थापयित्वा विकुर्वितजिनप्रतिरूपं जननीपार्श्वे ॥२२९॥
स्वयमपि पञ्च शरीराणि विकुर्व्य धरति छत्रमेकेन । द्वाभ्यां चोभयपार्श्वयोर्वीजयति श्वेतवरचामरौ ॥२३०॥
एकेन धरति पुरः शारदरविमण्डलमिव दिग्वलयम् । उद्द्योतयद् वज्रमसंख्यप्रतिपक्षविक्षपणम् ॥२३१॥
एकेन सुरभिगोशीर्षचन्दनपङ्कपाण्डुरे सुगन्धे । धरति जिनं करकमले हर्षवशोल्लसितरोमाञ्चः ॥२३२॥
इति पञ्चभी रूपैः कृत्वा सर्वमपि निजककर्त्तव्यम् । बहुदेवदेवीकोटिभिः परिवृतो भक्तिभरकलितः ॥२३३॥
आत्मानं मन्यमानः समस्तसुप्रशस्ततीर्थजलस्नातम् । मन्दरशैलाभिमुखं चलित आखण्डलस्ततः ॥२३४॥

---

१ आ. जोन्हे । २ क. कोमे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

परमेण पमोएणं दिव्वगईए कमेण संपत्तो । तुंगत्तणेण जोयणलक्खपमाणं सुरगिरिंदं ॥२३५॥
जो रेहइ एकपओहरोव्व धरणीए कणयकंतिल्लो । रयणावलीरमणीओ पंडगवणकसिणसिहरो य ॥२३६॥
अमियरमणीयगुणगणसंखारेहव्व सुरवरेहिं कया । रेहंति जत्थ दिसिदंतिदंतउल्लिहणराईओ ॥२३७॥
पिहुलनियंबो संसोहिकणयमयमेहलाइ परिकलिओ। सुपयोहरो विरायइ रुइरो रमणीयणोव्व सया॥२३८॥
उत्तुंगसिहरसंठियसासयजिणभवणधयपडागाए। वियरियपत्तव्व सया जस्स सिरी रेहइ दिवस्स ॥२३९॥
सव्वत्तो गुरुनिब्भरसलिलपयट्टाहिं गहिरसरियाहिं ।निरुवममहिमसमुब्भवकित्तीहिंव सहइ परिकलिओ२४०
इय गरुयगुणनिहाणं तं जाव सुराहिवो समारुहइ । तो पिच्छइ रमणीयं महावणं पंडगभिहाणं ॥२४१॥
कत्थवि उन्नयनवजलयगज्जिपमुइयकलाविकुलकलियं । कत्थवि य किन्नरीगेयसवणतल्लिच्छहरिणकुलं।२४२।
तो तत्थ पंडुकंबलसिलाए नीहाररहारधवलाए । मणिरयणकिरणजलखालियम्मि तवणीयमइयम्मि॥२४३॥
निवसइभिसेयसिंहासणम्मि उच्छंगठवियजिणनाहो। पुव्वाभिमुहो सक्को हरिसवसुप्फुल्लनयणजुओ ॥२४४॥
जिणवरपभावपयलियनियासणा ओहिणा वियाणेउं । जिणजम्ममज्जणमहं ईसाणाईवि सुरवइणो॥२४५॥
सव्वेवि समागंतुं नियसमिद्धीइ तियससेलम्मि। कयजिणपयप्पणामा हरिसेण ठिआ निअट्ठाणे॥२४६॥
तत्तो पढमं भणिया अच्चुयसुरसामिणा निया देवा । भो सिग्घं तित्थयराभिसेयमुवणेह सुपसत्थं॥२४७॥
अट्ठुत्तरं सहस्सं तो ते कलसाण कणयमइयाणं । कलहोयमयाण तहा अट्ठसहस्सं मणिमयाणं ॥२४८॥
कंचणरुप्पमयाणं वरतारयमणिमयाण एमेव । मणिकणयरुप्पमइयाण तह य भोमेयगाणं च ॥२४९॥

परमेण प्रमोदेन दिव्यगत्या क्रमेण संप्राप्तः । तुङ्गत्वेन योजनलक्षप्रमाणं सुरगिरीन्द्रम् ॥२३५॥
यो राजत्येकपयोधर इव धरण्याः कनककान्तिकः । रत्नावलीरमणीयः पाण्डुकवनकृष्णशिखरश्च ॥२३६॥
अमितरमणीयगुणगणसंख्यारेखा इव सुरवरैः कृताः । राजन्ति यत्र दिग्दन्तिदन्तोल्लिखनराजयः ॥२३७॥
पृथुनितम्बः संशोभिकनकमयमेखलया परिकलितः । सुपयोधरो विराजते रुचिरो रमणीजन इव सदा ॥२३८॥
उत्तुङ्गशिखरसंस्थितशाश्वतजिनभवनध्वजपताकया । वितीर्णपत्रेव सदा यस्य श्री राजते दिवः ॥२३९॥
सर्वतः प्रवृत्तगुरुनिर्भरसलिलाभिर्गम्भीरसरिद्भिः । निरुपममहिमसमुद्भवकीर्त्तिभिरिव राजते परिकलितः ॥२४०॥
इति गुरुगुणनिधानं तं यावत् सुराधिपः समारोहति । ततः पश्यति रमणीयं महावनं पाण्डुकाभिधानम्॥२४१॥
कुत्राप्युन्नतनवजलदगर्जिप्रमुदितकलापिकुलकलितम् । कुत्रापि च किन्नरीगेयश्रवणतत्परहारिणकुलम् ॥२४२॥
ततस्तत्र पाण्डुकम्बलशिलायां नीहारहारधवलायाम् । मणिरत्नकिरणजलक्षालिते तपनीयमये ॥२४३॥
निवसत्यभिषेकसिंहासन उत्सङ्गस्थापितजिननाथः । पूर्वाभिमुखः शक्रो हर्षवशोत्फुल्लनयनयुगः ॥२४४॥
जिनवरप्रभावप्रचलितनिजासना अवधिना विज्ञाय । जिनजन्ममज्जनमहमीशानादयोऽपि सुरपतयः ॥२४५॥
सर्वेऽपि समागत्य निजकसमृद्ध्या त्रिदशशैले । कृतजिनपादप्रणामा हर्षेण स्थिता निजस्थाने ॥२४६॥
ततः प्रथमं भणिता अच्युतसुरस्वामिना निजा देवाः । भोः शीघ्रं तीर्थकराभिषेकमुपनयत सुप्रशस्तम् ॥२४७॥
अष्टोत्तरं सहस्रं ततस्ते कलशानां कनकमयानाम् । कलधौतमयानां तथाऽष्टसहस्रं मणिमयानाम् ॥२४८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं रयणमयाणं भिंगाराईण पवरवत्थूणं । पत्तेयं पत्तेयं अट्ठसहस्सं विउव्वित्ता ॥२५०॥
गंतुं खीरसमुद्दं कलसे भरिऊण खीरसलिलेणं । गहियाइं कमलकेरवसयवत्तसहस्सवत्ताइं ॥२५१॥
एवं महंतसुपसत्थतित्थसत्थाण मागहाईणं । पवरनईणं च जलं तहोसहीमट्टियाओ य ॥२५२॥
उत्तरकुरुमाईसुवि कुलगिरिवक्खारनंदणवणेसु । अंतरनईदहेसु य जाणि य कुसुमोसहिफलाइं ॥२५३॥
इय सव्वं चिय तियसा तुरियं संगहिउमागया तत्थ । विणयप्पणया अच्चुयसुराहिवइणो समप्पंति ॥२५४॥
अह सो अच्चुयसक्को दट्ठूणमभिसेयसयलसामग्गिं । जायहरिसो य सिग्घं उट्ठइ नियआसणाउ तओ॥२५५॥
सामाणियसहस्सेहिं दसहिं तहा चउहिं लोगपालेहिं । तिहिं परिसाहिं सत्तहि अणियाहिवईहिं अणिएहिं॥२५६॥
तह तायत्तीसाए तायत्तीसेहिं आयरक्खाण । चत्तालीससहस्सेहिं परिवुडो अच्चुयसुरिंदो ॥२५७॥
तत्तो य विमलतित्थाण खीरजलहीण सलिलपुन्नेहिं । गोसीसचंदणप्पमुहसारवत्थूहिं कलिएहिं ॥२५८॥
विमलकमलपिहाणेहिं पवरसव्वोसहीसणाहेहिं । साहावियवेउव्वियकलसेहिं महप्पमाणेहिं ॥२५९॥
सत्तमजिणस्स तिहुयणनिक्कारणबंधवस्स भत्तीए । जम्माहिसेयमहिमं अच्चुयकप्पाहिवो कुणइ ॥२६०॥
इत्थंतरम्मि जुगवं पलोट्टकलसाण जिणसिरग्गाओ । जलधोरणीओ रेहिंति सिहरिसिहराओ सरियव्व ।२६१।
पहरिसपरवसाहिं दिसिरमणीहिंव अहव खित्ताओ । मुत्तावलीओ सोहंति निम्मलाविरलकंतीओ ॥२६२॥
अहवावि कुगइनिवडिरजणमुद्धरिउंव पुन्नरज्जूओ । अह खुहियजिणजसोजलहिणोव्व कल्लोलमालाओ २६३

काञ्चनरूप्यमयानां वरतारकमणिमयानामेवमेव । मणिकनकरूप्यमयानां तथा च भौमेयकानां च ॥२४९॥
एवं रत्नमयानां भृङ्गारादीनां प्रवरवस्तूनाम् । प्रत्येकं प्रत्येकमष्टसहस्रं विकुर्व्य ॥२५०॥
गत्वा क्षीरसमुद्रं कलशान् भृत्वा क्षीरसलिलेन । गृहीतानि कमलकैरवशतपत्रसहस्रपत्राणि ॥२५१॥
एवं महासुप्रशस्ततीर्थसार्थानां मागधादीनाम् । प्रवरनदीनां च जलं तथौषधिमृत्तिकाश्च ॥२५२॥
उत्तरकुर्वादिष्वपि कुलगिरिवक्षस्कारनन्दनवनेषु । अन्तर्नदीद्रहेषु च यानि च कुसुमौषधिफलानि ॥२५३॥
इति सर्वमेव त्रिदशास्त्वरितं संगृह्यागतास्तत्र । विनयप्रणता अच्युतसुराधिपतये समर्पयन्ति ॥२५४॥
अथ सोऽच्युतशक्रो दृष्ट्वाऽभिषेकसकलसामग्रीम् । जातहर्षश्च शीघ्रमुत्तिष्ठति निजासनात् ततः ॥२५५॥
सामानिकसहस्रैर्दशभिस्तथा चतुर्भिर्लोकपालैः । तिसृभिः पर्षद्भिः सप्तभिरनीकाधिपातिभिरनीकैः ॥२५६॥
तथा त्रयस्त्रिंशता त्रायस्त्रिंशैरात्मरक्षाणाम् । चत्वारिंशत्सहस्र्या परिवृतोऽच्युतसुरेन्द्रः ॥२५७॥
ततश्च विमलतीर्थानां क्षीरजलधीनां सलिलपूर्णैः । गोशीर्षचन्दनप्रमुखसारवस्तुभिः कलितैः ॥२५८॥
विमलकमलापिधानैः प्रवरसर्वौषधिसनाथैः । स्वाभाविकवैक्रयिककलशैर्महाप्रमाणैः ॥२५९॥
सप्तमजिनस्य त्रिभुवननिष्कारणबान्धवस्य भक्त्या । जन्माभिषेकमहिमानमच्युतकल्पाधिपः करोति ॥२६०॥
अत्रान्तरे युगपत् पर्यस्तकलशानां जिनशिरोऽग्रात् । जलधोरण्यो राजन्ति शिखरिशिखरात् सृता इव ॥२६१॥
प्रहर्षपरवशाभिर्दिग्रमणीभिरिवाथवा क्षिप्ताः । मुक्तावल्यः शोभन्ते निर्मलाविरलकान्तयः ॥२६२॥

१ क. विओवित्ता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं जिणाभिसेगे पयट्टिए सुरवईहिं हरिसेण । ताडिज्जंति चउव्विहआउज्जाइं सुरेहिं तओ ॥२६४॥
सघणघणघोसदुंदुहिनिनाउद्धरं करडिरडरडियपडुपडहरवबंधुरं ।
सरससिंजंतढक्काहुडुक्काउलं महुरगंभीरघुमघुमियवरमद्दलं ॥२६५॥
बुक्कतंबुक्कसंबुक्कसद्दुक्कडं तालझणझणियवरतलिमघोसुब्भडं ।
मुहलकंसालछलछलरवाडंबरं भेरिभंभारवारंभभरियंबरं ॥२६६॥
वेणुवीणासमालवणिरवसुंदरं झल्लरिघोससंमीसखरमुहिसरं ।
पलयकालिव्वसजलघणगज्जियं तत्थ वज्जेइ चाउव्विहवज्जयं ॥२६७॥
गरुयभत्तिब्भरुब्भिन्नरोमंचया थुणहिं तित्थेसरं तत्थ नच्चंतया ।
केवि मुंचंति मंदारसुमणोहरं गंधवसमिलियभसलोहसुमणोहरं ॥२६८॥
केवि मल्लव्व सज्जंति कमदद्दुरं अवरि गायंति सुहकंठरवसुंदरं ।
केवि उत्तालतालाउलं रासयं कुणहिं करनच्चियं अवरि वरहासयं ॥२६९॥
केवि हरिसुद्धरा तियसगलदद्दुरं कुणहिं हयहेसियं केवि सुइबंधुरं ।
केवि गयगज्जियं कुणहिं मयभिंभलं अन्नि मुट्ठीहिं पहरंति धरणीयलं ॥२७०॥
केवि फोडिंति वक्करियउक्केरयं केवि कुव्वंति कंठीरवुन्नाययं ।

अथवापि कुगतिनिपतनशीलजनमुद्धर्तुमिव पुण्यरज्ज्वः । अथ क्षुब्धजिनयशोजलधेरिव कल्लोलमालाः ॥२६३॥
एवं जिनाभिषेके प्रवर्तिते सुरपतिभिर्हर्षेण । ताड्यन्ते चतुर्विधातोद्यानि सुरैस्ततः ॥२६४॥
सघनघनघोषदुन्दुभिनिनादोद्धुरं करटिरटरटितपटुपटहरवबन्धुरम् ।
सरससिञ्जड्ढक्काहुडुक्काकुलं मधुरगम्भीरघुमघुमितवरमुरजम् ॥२६५॥
बुक्कतम्बुक्कसम्बुक्कशब्दोत्करं तालझणझणितवरतलिमघोषोद्भटम् ।
मुखरकांसालच्छलच्छलरवाडम्बरं भेरीभम्भारवारम्भभृताम्बरम् ॥२६६॥
वेणुवीणासमालपनीरवसुन्दरं झल्लरीघोषसंमिश्रखरमुखीस्वरम् ।
प्रलयकालिकसजलघनगर्जितं तत्र वाद्यते चतुर्विधवाद्यकम् ॥२६७॥
गुरुभक्तिभरोद्भिन्नरोमाञ्चकाः स्तुवन्ति तीर्थेश्वरं तत्र नृत्यन्तः ।
केपि मुञ्चन्ति मन्दारसुमनोभरं गन्धवशमिलितभ्रमरौघसुमनोहरम् ॥२६८॥
केऽपि मल्ला इव सज्जन्ति क्रमदर्दुरमपरे गायन्ति शुभकण्ठरवसुन्दरम् ।
केऽप्युत्तालतालाकुलं रासकं कुर्वन्ति करनर्तितमपरे वरहासकम् ॥२६९॥
केऽपि हर्षोद्धुरास्त्रिदशगलदर्दुरं कुर्वन्ति हयहेषितं केऽपि श्रुतिबन्धुरम् ।
केऽपि गजगर्जितं कुर्वन्ति मयभिम्भलमन्ये मुष्टिभिः प्रहरन्ति धरणीतलम् ॥२७०॥
केऽपि स्फोटयन्ति दुर्दिनोत्करं केऽपि कुर्वन्ति कण्ठीरवोन्नादकम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

केवि तक्खणिण खीरोयजलसंतियं कलसमुवणिंति तियसा हरियंतियं ॥२७१॥
इय सुरवइसंघिण परिहयविग्घिण जहिं वट्टिज्जइ आयरिण ।
सत्तमजिणमज्जणि तहिं भवभंजणि किं कित्तिज्ज मारिसिण? ॥२७२॥
इय वट्टंते सत्तमतित्थेसरजम्ममज्जणमहम्मि । सव्वेवि सुरिंदा परमहरिसभरपुलइयसरीरा ॥२७३॥
धूवकडुच्छयहत्था सियचमरविसालछत्तसंजुत्ता । सुहपुप्फगंधवावडहत्था य पुरो ठिया तत्तो ॥२७४॥
एवं अच्चुयसक्के विरयम्मि जिणेसरं ण्हवेऊण । नियपरिवाराणुगया आणयपमुहा सुरिंदावि ॥२७५॥
अहिसिंचंति जिणिंदं महाविभूईए अच्चुयवइव्व । तीसंपि नियकमेणं मुत्तुं सोहम्मकप्पपहुं ॥२७६॥
तयणंतरं ठवित्ता ईसाणिंदो जिणं नियंकम्मि । सीहासणे निसीयइ तत्तो सोहम्मसामीवि ॥२७७॥
चउरो चउद्दिसिंपि हु हिमकरहरहाससंखदलधवले । तरुणवसहे विउव्वइ रमणिज्जसरीरकंतिल्ले ॥२७८॥
तेसिंच अट्ठसिंगग्गभायओ अट्ठ सलिलधाराओ । उड्ढंगमाओ धणियं अह पडणे एगिभूयाओ॥२७९॥
काउं जिणुत्तमंगे खिवेइ आणंदवियसियच्छिजुओ । अन्नेहिवि तह खीरोयकलससहस्सेहिं बहुएहिं॥२८०॥
अहिसिंचइ य कमेणं अह विहिए परममज्जणमहम्मि । सोहम्मवई सुकुमालगंधकासायवत्थेहिं ॥२८१॥
तित्थेसरस्स देहं जयणाए लूहिऊण सव्वत्तो । अच्चइ य सुरहिगोसीसचंदणसंमीसघुसिणेणं ॥२८२॥
मंदारसुरहिसियकुसुमदामनिवहेहिं रयइ वरपूयं । सव्वालंकारेहिं विभूसिऊणं तओ पुरओ ॥२८३॥
सारयससिकरधवलेहिं अक्खएहिं इमे समालिहइ । दप्पणभद्दासणवद्धमाणसिरिवच्छमच्छे य ॥२८४॥

केऽपि तत्क्षणेन क्षीरोदजलसत्कं कलशमुपनयन्ति त्रिदशा हर्यन्तिकम् ॥२७१॥
इति सुरपतिसंघेन प्रतिहतविघ्नेन यस्मिन् वृत्यत आदरेण ।
सप्तमजिनमज्जने तस्मिन् भवभञ्जने किं कीर्त्यते मादृशेन ? ॥२७२॥
इति वर्तमाने सप्तमतीर्थेश्वरजन्ममज्जनमहे । सर्वेऽपि सुरेन्द्राः परमहर्षभरपुलकितशरीराः ॥२७३॥
धूपदर्वीहस्ताः सितचामरविशालच्छत्रसंयुक्ताः । शुभपुष्पगन्धव्यापृतहस्ताश्च पुरः स्थितास्ततः ॥२७४॥
एवमच्युतशक्रे विरते जिनेश्वरं स्नपयित्वा । निजपरिवारानुगता आनतप्रमुखाः सुरेन्द्रा अपि ॥२७५॥
अभिषिञ्चन्ति जिनेन्द्रं महाविभूत्याऽच्युतपतिरिव । त्रिंशदपि निजक्रमेण मुक्त्वा सौधर्मकल्पप्रभुम् ॥२७६॥
तदनन्तरं स्थापयित्वेशानेन्द्रो जिनं निजाङ्के । सिंहासने निषीदति ततः सौधर्मस्वाम्यपि ॥२७७॥
चतुरश्चतुर्दिक्ष्वपि हि हिमकरहरहासशङ्खदलधवलान् । तरुणवृषभान् विकुर्वति रमणीयशरीरकान्तिकान् ॥२७८॥
तेषां चाष्टश्रृङ्गाग्रभागतोऽष्ट सलिलधाराः । ऊर्ध्वङ्गमा गाढमथ पतने एकीभूताः ॥२७९॥
कृत्वा जिनोत्तमाङ्गे क्षिपत्यानन्दविकसिताक्षियुगः । अन्यैरपि तथा क्षीरोदकलशसहस्रैर्बहुभिः ॥२८०॥
अभिषिञ्चति च क्रमेणाथ विहिते परममज्जनमहे । सौधर्मपतिः सुकुमालगन्धकाषायवस्त्रैः ॥२८१॥
तीर्थेश्वरस्य देहं यतनया प्रमार्ज्य सर्वतः । अर्चति च सुरभिगोशीर्षचन्दनसंमिश्रघुसृणेन ॥२८२॥
मन्दारसुरभिसितकुसुमदामनिवहै रचयति वरपूजाम् । सर्वालङ्कारैर्विभूष्य ततः पुरतः ॥२८३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तह सत्थियनंदावत्तकलसपज्जंतमंगले अट्ठ । मुयइ तओ बहुविहकुसुमनियरमाजाणुमित्तं च ॥२८५॥
तत्तो नाणामणिभत्तिचित्तदंडेण वइरमइएण । सुकडच्छुएण गंधाभिराममुक्खिवइ वरधूयं ॥२८६॥
पजलंतदीवियाचक्कवालमारत्तियं मणभिरामं । उत्तारइ वरमंगलनिलयं तह मंगलपईवं ॥२८७॥
एवं च सव्वकायव्ववित्थरे वित्तयम्मि तव्वेलं । जय-जय-जयाइयम्मि चारणमुणिपुंगवगणेण ॥२८८॥
हरिसुत्तालनमिरसिरविगलियकुसुमच्चियधरायलं । नच्चिरकरमुणालवलयावलिकलयलरवरमाउलं ॥२८९॥
उब्भडभरहभावभरनच्चणवियलियहारअच्चियं । भत्तिभरेण तयणु जिणमज्जणि सयलसुरेहिं नच्चियं ॥२९०॥
इय नच्चिऊण परमप्पमोयभरनिब्भराए भत्तीए । भयवंतं संथोउं एवं सव्वे समारद्धा ॥२९१॥
जय नीसेसअणोरपारभवसायरतारण ! । तिहुयणपणमियपायकमल ! निरुवमसुहकारण ! ॥२९२॥
मयणहरिणसंहरणतरुणहरिणारिपरक्कम ! । मुणिमाणसपरिसरणहंस ! तइलोयनयक्कम ! ॥२९३॥
सिरिविल्लहलविसट्टकमलकोमलपयकरयल ! । हिमकणहिमकरकिरणसरिसजसधवलियमहीयल ! ॥२९४॥
सरलनयणजुयपसरतुलियवियसियपंकयदल ! । भवभयतावियहिययनवजलहरसीयल ! ॥२९५॥
तमभरपसरनिरुंभणिक्कदिवसयरसमप्पह ! । सरणागयदढगूढवज्जपंजर ! हयकुप्पह ! ॥ २९६ ॥
उज्जोइयभुवणयल ! मोहकरिकुंभवियारण ! । जय जिणनाह ! समत्थवत्थुपरमत्थवियारण ! ॥२९७॥
भारहखित्तु पवित्तु तं जि जहिं तुहुं उप्पन्नउ । सा जणणी सकयत्थ जीए तुहुं उयरुप्पन्नउ ॥२९८॥

शारदशशिकरधवलैरक्षतैरिमान् समालिखति । दर्पणभद्रासनवर्धमानश्रीवत्समत्स्यांश्च ॥२८४॥
तथा स्वस्तिकनन्दावर्तकलशपर्यन्तमङ्गलान्यष्ट । मुञ्चति ततो बहुविधकुसुमनिकरमाजानुमात्रं च ॥२८५॥
ततो नानाविधमणिभक्तिचित्रदण्डया वज्रमय्या । सुदर्व्या गन्धाभिराममुत्क्षिपति वरधूपम् ॥२८६॥
प्रज्वलद्दीपिकाचक्रवालमारात्रिकं मनोऽभिरामम् । उत्तारयति वरमङ्गलनिलयं तथा मङ्गलप्रदीपम् ॥२८७॥
एवं च सर्वकर्तव्यविस्तारे वृत्ते तद्वेलम् । जय-जय-जयादिके चारणमुनिपुङ्गवगणेन ॥२८८॥
हर्षोत्तालनम्रशिरोविगलितकुसुमार्चितधरातलम् । नर्तनशीलकरमृणालवलयावलिकलकलरवरमाकुलम् ॥२८९॥
उद्भटभरतभावभरनर्तनविचलितहारार्चितम् । भक्तिभरेण तदनु जिनमज्जने सकलसुरैर्नर्तितम् ॥२९०॥
इति नर्तित्वा परमप्रमोदभरनिर्भरया भक्त्या । भगवन्तं संस्तोतुमेवं सर्वे समारब्धाः ॥२९१॥
जय निःशेषानादिपारभवसागरतारण ! । त्रिभुवनप्रणतपादकमल ! निरुपमसुखकारण ! ॥२९२॥
मदनहरिणसंहरणतरुणहरिणारिपराक्रम ! । मुनिमानसपरिसरणहंस ! त्रैलोक्यनतक्रम ! ॥२९३॥
श्रीविलासिविकासितकमलकोमलपादकरतल ! । हिमकणहिमकरकिरणसदृशयशोधवलितमहीतल! ॥२९४॥
सरलनयनयुगप्रसरतुलितविकसितपङ्कजदल ! । भवभयतापितभविकहृदयनवजलधरशीतल ! ॥२९५॥
तमोभरप्रसरनिरोधनैकदिवसकरसमप्रभ ! । शरणागतदृढगूढवज्रपञ्जर ! हतकुपथ ! ॥२९६॥
उद्योतितभुवनतल ! मोहकरिकुम्भविदारण ! । जय जिननाथ ! समस्तवस्तुपरमार्थवितारण ! ॥२९७॥
भारतक्षेत्रं पवित्रं तदद्य यस्मिंस्त्वमुत्पन्नः । सा जननी स्वकृतार्था यस्यास्त्वमुदरोत्पन्नः ॥२९८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सच्चउं सोज्जि जहत्थु होइ सुपइट्ठनरेसरु । जसु घरि चिंतामणिसरिच्छु तुहुं जाउ जिणेसरु ॥२९९॥
इय थोऊण जिणिंदं इंदा नंदीसरे जिणे नमिउं । नियनियठाणेसु गया सोहम्मवईवि पुण इत्तो॥३००॥
उत्तत्तकंचणरुइं गहिउं करसंपुडेण जिणनाहं । वच्चइ जिणवरजम्मणघरम्मि परमप्पमोएण ॥३०१॥
तत्थ य पडिरूवं तह अवसोवणिमवणिऊण वेगेण । पुहइजणणीसमीवे सुयरयणं मुयइ नमिऊण ॥३०२॥
एगं कुंडलजुयलं पवरं तह देवदूसजुयलं च । ऊसीसगमूलम्मि ठवेइ पुरओ जिणिंदस्स ॥३०३॥
तिदूसगं च एगं पणवन्नियरयणकिरणरमणिज्जं । लंबंतपवरमुत्ताहलावचूलं कणयमइयं ॥३०४॥
मुंचइ दिट्ठिपहम्मि अभिरमणट्ठाइ जमवलोयंतो । तित्थेसरो सुहेणं सचक्खुविक्खेवणं कुणइ ॥३०५॥
आणवइ तओ सक्को वेसमणं भद्द ! जह लहुं चेव । उवणय जिणजम्महरे बत्तीसं सुवन्नकोडीओ ॥३०६॥
तह चेव हिरन्नस्सवि कोडीओ तह य नंदभद्दाणं । पत्तेयं बत्तीसं अन्नाणि य विविहवत्थूणि ॥३०७॥
सोवि हु तहत्ति सिग्घं जंभगदेवेहिं सव्वमुवणेइ । तत्तो पुणोवि सक्को उग्घोसावेइ सव्वत्थ ॥३०८॥
जह भो देवा सव्वे देवीओवि हु सुणंतु एक्कमणा । जो किर जिणस्स जिणवरजणणीए वावि नियचित्ते॥३०९॥
असिवमणिट्ठं काउं चिंतेही तस्स उत्तमंगं च । फुडिही सहस्सहा चिय अज्जगतरुमंजरिव्व लहुं ॥३१०॥
एवं काऊण विहिं भयवंतं पणमिऊण भत्तीए । उप्पइउं सो नंदीसरम्मि गंतुं गओ सग्गं ॥३११॥
अह उग्गयम्मि सूरे वियलियतिमिरासु सयलआसासु । तह वज्जिएसु मंगलतूरेसु य गहिरसद्देसु ॥३१२॥

सत्यं सोऽद्य यथार्थो भवति सुप्रतिष्ठनरेश्वरः । यस्य गृहे चिन्तामणिसदृक्षस्त्वं जातो जिनेश्वरः ॥२९९॥
इति स्तुत्वा जिनेन्द्रमिन्द्रा नन्दीश्वरे जिनान् नत्वा । निजनिजस्थानेषु गताः सौधर्मपतिरपि पुनरितः ॥३००॥
उत्तप्तकाञ्चनरुचिं गृहीत्वा करसंपुटेन जिननाथम् । व्रजति जिनवरजन्मगृहे परमप्रमोदेन ॥३०१॥
तत्र च प्रतिरूपं तथाऽवस्वापनीमपनीय वेगेन । पृथिवीजननीसमीपे सुतरत्नं मुञ्चति नत्वा ॥३०२॥
एकं कुण्डलयुगलं प्रवरं तथा देवदूष्ययुगलं च । उच्छीर्षकमूले स्थापयाति पुरतो जिनेन्द्रस्य ॥३०३॥
श्रीदामगण्डं चैकं पञ्चवर्णिकरत्नकिरणरमणीयम् । लम्बमानप्रवरमुक्ताफलावचूलं कनकमयम् ॥३०४॥
मुञ्चति दृष्टिपथेऽभिरमणार्थं यदवलोकमानः । तीर्थेश्वरः सुखेन स्वचक्षुर्विक्षेपणं करोति ॥३०५॥
आज्ञपयति ततः शक्रो वैश्रमणं भद्र ! यथा लघ्वेव । उपनय जिनजन्मगृहे द्वात्रिंशतं सुवर्णकोटीः ॥३०६॥
तथैव हिरण्यस्यापि कोटीस्तथा च नन्दभद्राणाम् । प्रत्येकं द्वात्रिंशतमन्यानि च विविधवस्तूनि ॥३०७॥
सोऽपि हि तथेति शीघ्रं जृम्भकदेवैः सर्वमुपनयाति । ततः पुनरपि शक्र उद्घोषयाति सर्वत्र ॥३०८॥
यथा भो देवाः सर्वे देव्योऽपि खलु शृण्वन्त्वेकमनसः । यः किल जिनस्य जिनवरजनन्या वापि निजचित्ते॥३०९॥
अशिवमनिष्टं कर्तुं चिन्तयिष्यति तस्योत्तमाङ्गं च । स्फुटिष्यति सहस्रधैवार्जकतरुमञ्जरीव लघु ॥३१०॥
एवं कृत्वा विधिं भगवन्तं प्रणम्य भक्त्या । उत्पत्य स नन्दीश्वरं गत्वा गतः स्वर्गम् ॥३११॥
अथोद्गते सूरे विगलिततिमिरासु सकलाशासु । तथा वादितेषु मङ्गलतूरेषु च गभीरशब्देषु ॥३१२॥

---

१ क. ख. °ट्ठा य । २ ग. °वणिय ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पिच्छेइ पुहइदेवी पंचनमुक्कारसरणपडिबुद्धा । गोसीससुरहिचंदणविलित्तगत्तं नियं पुत्तं ॥३१३॥
तह पवरसुरहिमंदारमंजरीगंधलुद्धभसलेहिं । सामलियसरीरं देहकंतिकब्बुरियजम्मगिहं ॥३१४॥
इत्तो सुपइट्ठनिवो अहमहमिगधाविरीहिं चेडीहिं । वद्धाविओ सहरिसं देवीए पुत्तजम्मेण ॥३१५॥
तो ताण पमोएणं अवणियदासत्तणाण दाऊणं । इच्छाहियदविणभरं सुयजम्ममहूसवं कुणइ ॥३१६॥
तंहाहि;–
गोउरचउमुहचच्चरचउक्करायंतरायमग्गेसु । संमज्जिएसु कुंकुमविइन्नछडएसु सव्वत्थ ॥३१७॥
उच्छलियबहलपरिमलमिलंतलोलालिमुहलझंकारा । असमकुसुमोवयारा विच्छित्तीए रइज्जंति ॥३१८॥
कणयमयधूवघडियाउ अगरघणसारधूवधूमेणं । अंधारियआसाओ ठाणे ठाणे ठविज्जंति ॥३१९॥
पालंबियमुत्तावलिवलए चमरावचूलसोहिल्ले । उत्तुंगथोरथंभावणद्धवरसालहंजीए ॥३२०॥
पवणवसकणिरकिंकिणिवियडपडायासहस्सरमणीए । सहरिसनच्चिरगाइरतरुणीयणजणियमाहप्पे ॥३२१॥
संचिज्जंति लहुं चिय मंचे तारयरतारियातरले । पडिभवणदुवारं तह मुंचंति य पुन्नकलसे य ॥३२२॥
नच्चंति तरुणिसविलासलासियासेसलोयनयणाइं । मंगलतुमुलदिसाइं वद्धावणयाइं किज्जंति ॥३२३॥
हट्टट्टालयगोउरपासायमुहेसु अइमहल्लाओ । वंदणमालाओ तहा सरसदलाओ निबज्झंति ॥३२४॥
उज्झिज्जंति सलीलं मुसलाइं तह य जुयसहस्साइं । मोयाविज्जंति रिणाहिदायगा दिन्नदेयधणा ॥३२५॥

पश्यति पृथिवीदेवी पञ्चनमस्कारशरणप्रतिबुद्धा । गोशीर्षसुरभिचन्दनविलिप्तगात्रं निजं पुत्रम् ॥३१३॥
तथा प्रवरसुरभिमन्दारमञ्जरीगन्धलुब्धभ्रमरैः । श्यामलितशरीरं देहकान्तिकर्बुरितजन्मगृहम् ॥३१४॥
इतः सुप्रतिष्ठनृपोऽहमहमिकाधाविनीभिश्चेटीभिः । वर्धापितः सहर्षं देव्याः पुत्रजन्मना ॥ ३१५ ॥
ततस्तेभ्यः प्रमोदेनापनीतदासत्वेभ्यो दत्त्वा । इच्छाधिकद्रविणभरं सुतजन्ममहोत्सवं करोति ॥३१६॥
तथाहि;—
गोपुरचतुमुखचत्वरचतुष्कराजद्राजमार्गेषु । संमार्जितेषु कुङ्कुमविकीर्णपथेषु सर्वत्र ॥३१७॥
उच्छालितबहलपरिमलमिलल्लोलालिमुखरझङ्काराः । असमकुसुमोपचारा विच्छित्तौ रच्यन्ते ॥३१८॥
कनकमयधूपघटिका अगुरुघनसारधूपधूमेन । अन्धारिताशाः स्थाने स्थाने स्थाप्यन्ते ॥३१९॥
प्रालम्बितमुक्तावलिवलयाश्चामरावचूलशोभनशीलाः । उत्तुङ्गस्थूलस्तम्भावनद्धवरशालभञ्जिकाः ॥३२०॥
पवनवशक्वणनशीलकिङ्किणीविततपताकासहस्ररमणीयाः । सहर्षनर्तकगाथकतरुणीजनजनितमाहात्म्याः ॥३२१॥
संचीयन्ते लघ्वेव मञ्चास्तारतरतारिकातरलाः । प्रतिभवनद्वारं तथा मुच्यन्ते च पूर्णकलशाश्च ॥३२२॥
नृत्यन्ति तरुणीसविलासलासिताशेषलोकनयनानि । मङ्गलतुमुलदिशि वर्धापनकानि क्रियन्ते ॥३२३॥
हट्टाट्टालकगोपुरप्रासादमुखेष्वतिमहत्यः । वन्दनमालास्तथा सरसदला निबध्यन्ते ॥३२४॥
उज्झ्यन्ते सलीलं मुशलानि तथा च युगसहस्राणि । मोच्यन्ते ऋणाभिदायका दत्तदेयधनाः ॥३२५॥

---

१ क. °रभि । २ क. तत्थाहि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुच्चंति चारगाओ धणियं अवराहकारिणोवि जणा। कीरंति विसंठुलविब्भमाओ तह छणपवित्तीओ॥३२६॥
तहाहि;-
नच्चंतमयाउरतरुणिगलियसारसणल्हसियपरिहाणा। परिहाणल्हसणपहसिरविडजणकोलाहलाउलिया३२७
आउलियधणाकंखिरमग्गणगणदिज्जमाणविउलधणा। धणवियरणरित्तनिहाणखित्तवेसमणतवणीया॥३२८
तवणीयदंडऊसियचीणंसुयधयसहस्सरमणीया। रमणीयरमणिसहरिसपारंभियचच्चरीगीया॥३२९॥
गीयगुणनिउणगायणमहुरस्सरपूरियाखिलदिसोहा। सोहंतपउरबहुयणसायरकीरंतमंगल्ला॥३३०॥
मंगल्लहेउजिणवरपडिमाउवइट्ठअट्ठविहपूया। पूयापिच्छणपमुइयसावयगिज्जंतगुणनिवहा॥३३१॥
इय वाणारसिनयरी सबाहिरब्भंतरा सुरपुरीव। जाया समुचियपडिवत्तीसुंदरा सुइररमणीया॥३३२॥
अह नवरिमणुचियमिणं जमिह करा जणवयाण छिज्जंति। अविसेसियभिच्चनरेसरंव तह हवइ निवभवणं॥
एवं पवट्टमाणे नयरीए महूसवम्मि नरनाहो। सुपइट्ठो कयण्हाणो पवरालंकारलंकरिओ॥३३४॥
नियसियमहग्घवत्थो गंतूणत्थाणभूमिमुवविट्ठो। एत्थंतरम्मि सामंतमंतिपमुहा विसिट्ठजणा॥३३५॥
आगंतूण नमिऊण पायपउमाइं भणिउमारद्धा। देव! सरीरारोगत्तणेण सत्तूण विजएणं॥३३६॥
तह रज्जवित्थरेणं धणागमेणं च सव्वहा तुब्भे। वद्धाविज्जह जेसिं तिहुयणचूडामणिसरिच्छो॥३३७॥
नियकुलनहयलसंपुन्नपुन्निमाचंदमंडलसमाणो। एरिसपुत्तो जाओ इय भणिऊण तओ सव्वे॥३३८॥

मुच्यन्ते चारकाद् बाढमपराधकारिणोऽपि जनाः। क्रियन्ते विसंस्थुलविभ्रमास्तथा क्षणप्रवृत्तयः॥३२६॥
तथाहि;—
नृत्यन्मदातुरतरुणीगलितस्वरसनास्रस्तपरिधाना। परिधानस्रंसनप्रहसमानविटजनकोलाहलाकुलिता॥३२७॥
आकुलितधनाकाङ्क्षनशीलमार्गणगणदीयमानविपुलधना। धनवितरणरिक्तनिधानक्षिप्तवैश्रमणतपनीया॥३२८॥
तपनीयदण्डोच्छ्रितचीनांशुकध्वजसहस्ररमणीया। रमणीयरमणीसहर्षप्रारब्धचर्चरीगीता॥३२९॥
गीतगुणनिपुणगायनमधुरस्वरपूरिताखिलदिगोघा। शोभमानपौरबहुजनसादरक्रियमाणमाङ्गल्या॥३३०॥
माङ्गल्यहेतुजिनवरप्रतिमोपदिष्टाष्टविधपूजा। पूजादर्शनप्रमुदितश्रावकगीयमानगुणनिवहा॥३३१॥
इति वाराणसीनगरी सबहिरभ्यन्तरा सुरपुरीव। जाता समुचितप्रतिपत्तिसुन्दरा सुचिररमणीया॥३३२॥
अथ नवरमनुचितमिदं यदिह करा जनपदानां छिद्यन्ते। अविशेषितभृत्यनरेश्वरमिव तथा भवति नृपभवनम्॥
एवं प्रवर्तमाने नगर्यां महोत्सवे नरनाथः। सुप्रतिष्ठः कृतस्नानः प्रवरालंकारालंकृतः॥३३४॥
निवासितमहार्घवस्त्रो गत्वाऽऽस्थानभूमिमुपविष्टः। अत्रान्तरे सामन्तमन्त्रिप्रमुखा विशिष्टजनाः॥३३५॥
आगत्य नत्वा पादपद्मे भणितुमारब्धाः। देव! शरीरारोगत्वेन शत्रूणां विजयेन॥३३६॥
तथा राज्यविस्तरेण धनागमेन च सर्वथा यूयम्। वर्धाप्यध्वे येषां त्रिभुवनचूडामणिसदृक्षः॥३३७॥
निजकुलनभस्तलसंपूर्णपूर्णिमाचन्द्रमण्डलसमानः। ईदृशपुत्रो जात इति भणित्वा ततः सर्वे॥३३८॥

---

१ ग. °संबल। २ ग. भव°। ३ क. साविय। ४ क. ख. जिण।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पवरकरितुरयभूसणमणिवसणाईणि निवइणो पुरओ । उवढोइंति सहेलं सम्माणेउं निवइणावि ॥३३९॥
तंबोलवत्थकुसुमालंकारपयाणपुव्वयं सव्वे । बहुविहविहियपसाया विसज्जिया नियमठाणेसु ॥३४०॥
तत्तो नियसुयदंसणसमूसुओ समुवलब्भ पत्थावं । सुपइट्ठो अत्थाणा समुट्ठिओ गरुयहरिसेण ॥३४१॥
पत्तो कमेण मणिमयकुट्टिमतललिहियसैत्थियं विउलं । उब्भियहिरण्णमुसलं सुविहियरक्खापरिक्खेवं ॥
दारपएसनिवेसियसियकमलपहाणपुन्नजलकलसं । जिणवरजम्मणभवणं तत्थ य दिट्ठो य जिणनाहो ॥३४३॥
सारयसहस्सकिरणोव्व रयणरासिव्व तेयपुंजोव्व । उज्जोयंतो भवणं देहपहाए समग्गंपि ॥३४४॥
तं दट्ठूण चिंतिउमाढत्तो नरवई अहो अपुव्वा । एयस्स पढमजायस्स कावि कंती सरीरस्स ॥३४५॥
तह य अविभावणिज्जं लायन्नं रूवसंपया असमा । निम्मेरं सुंदेरं तह य अभग्गं च सोहग्गं ॥३४६॥
ता सयलपुन्नपब्भारसायरं मम कुलं, जहिं एयं । संपुन्नलक्खणधरं पाउब्भूयं तणयरयणं ॥३४७॥
इय एवमाइ संचिंतिऊण सुपइट्ठनरवई तत्तो । पढमदिणे ठिइवडियं करेइ तित्थाहिवस्स तओ ॥३४८॥
तइयम्मि दिणे दंसंति उम्मुहं मंडलाइं रविससिणो । संपत्तो य कमेणं परमपमोएण छट्ठदिणो ॥३४९॥
अविणट्ठलट्ठपंचिंदियाहिं जीवंतपाणनाहाहिं । नीरोगअंगुवंगाहिं राया कुलवुड्ढियाहिं च ॥३५०॥
घणकुंकुमपंकलित्तवयणकमलाहिं रूववंतीहिं । कंबुसमकंठकंदलअवलंबियसुरहिमालाहिं ॥३५१॥
अच्चंतजायमाणससंतोसो नरवरिंदसुपइट्ठो । कुलविलयाहिं जागरमहूसवं तो पयट्टेइ ॥३५२॥

प्रवरकरितुरगभूषणमणिवसनादीनि नृपतेः पुरतः । उपढौकन्ते सहेलं, सम्मान्य नृपतिनापि ॥३३९॥
ताम्बूलवस्त्रकुसुमालङ्कारप्रदानपूर्वकं सर्वे । बहुविधविहितप्रसादाः विसर्जिता निजकस्थानेषु ॥३४०॥
ततो निजसुतदर्शनसमुत्सुकः समुपलभ्य प्रस्तावम् । सुप्रतिष्ठ आस्थानात्समुत्थितो गुरुहर्षेण ॥३४१॥
प्राप्तः क्रमेण मणिमयकुट्टिमतललिखितस्वस्तिकं विपुलम् । ऊर्ध्वीकृतहिरण्यमुशलं सुविहितरक्षापरिक्षेपम् ॥
द्वारप्रदेशनिवेशितासितकमलप्रधानपूर्णजलकलशम् । जिनवरजन्मभवनं तत्र च दृष्टश्च जिननाथः ॥३४३॥
शारदसहस्रकिरण इव रत्नराशिरिव तेजःपुञ्ज इव । उद्द्योतयन् भवनं देहप्रभया समग्रमपि ॥३४४॥
तं दृष्ट्वा चिन्तयितुमारब्धो नरपतिरहो ! अपूर्वा । एतस्य प्रथमजातस्य कापि कान्तिः शरीरस्य ॥३४५॥
तथा चाविभावनीयं लावण्यं रूपसंपदसमा । निर्मर्यादं सौन्दर्यं तथा चाभग्नं च सौभाग्यम् ॥३४६॥
तस्मात्सकलपुण्यप्राग्भारसागरो मम कुलं, यस्मिन्नेतत् । संपूर्णलक्षणधरं प्रादुर्भूतं तनयरत्नम् ॥३४७॥
इत्येवमादि संचिन्त्य सुप्रातिष्ठनरपतिस्ततः । प्रथमदिने स्थितिपतिकां करोति तीर्थाधिपस्य ततः ॥३४८॥
तृतीयस्मिन्दिने दर्शयन्त्युन्मुखं मण्डले रविशशिनोः । संप्राप्तश्च क्रमेण परमप्रमोदेन षष्ठदिनः ॥३४९॥
अविनष्टमनोहरपञ्चेन्द्रियाभिर्जीवत्प्राणनाथाभिः । नीरोगाङ्गोपाङ्गाभी राजा·कुलवृद्धिकाभिश्च ॥३५०॥
घनकुङ्कुमपङ्कालिप्तवदनकमलाभी रूपवतीभिः । कम्बुसमकण्ठकन्दलावलम्बितसुरभिमालाभिः ॥३५१॥
अत्यन्तजातमानससंतोषो नरवरेन्द्रसुप्रतिष्ठः । कुलवनिताभिर्जागरमहोत्सवं ततः प्रवर्तयति ॥३५२॥

---

१ ख. °णाउ उट्ठि° । २ क. ग. सुत्थि° ।

एक्कारसम्मि दिवसे समागए सूइकम्ममुवणिंति । जहभणियविहाणेणं, पत्ते बारसमदियहम्मि ॥३५३॥
नाणाविहवंजणखंडखज्जखज्जूरपाणयसमेयं । बहुसालिसूयसहियं निव्वत्तावेइ रसवइयं ॥३५४॥
तयणंतरं च नियखत्तियाण तह पुरपहाणलोयाणं । तं भोयणं पणामइ बहुमाणपुरस्सरं तत्तो ॥३५५॥
आयंताण खणेणं वीसत्थाणं सुहासणगयाणं । सम्माणियाण तेसिं पुरओ सुपइट्ठनरनाहो ॥३५६॥
भणइ य भो भो खत्तियपहाणपुरिसा ! ममेस संकप्पो । आसी पुव्वंपि जहा जद्दिवसं एस गब्भम्मि॥३५७॥
पुहईदेवीए सुओ संकंतो तद्दिणाओ अहिययरं । संजाया सुहपासा तत्तो एयस्स जुत्तमिणं ॥३५८॥
नामं सुपासकुमारो तुम्हाणवि संगइं जइ गमेइ । तो उवलक्खियभावेहिं तेहिं इय नरवई भणिओ ॥३५९॥
एयं चिय खलु जुत्तं, गुणनिप्फन्नम्मि विज्जमाणम्मि । नामम्मि कीस कीरइ अजहट्ठियकप्पणं तत्तो ॥३६०॥
इय जंपिरेहिं तेहिं जयगुरुणो सिरिसुपासनामंति । परितुट्ठेहिं पइट्ठियमह वित्ते नामकरणम्मि ॥३६१॥
सुरसंकामियकामियरसाए निययंगुलीए पाणेण । कयभोयणकायव्वो पंचहिं धाईहिं परियरिओ ॥३६२॥
सारिज्जंतो अंतेउरेण हत्थाउ हत्थकमलम्मि। अम्मापियरेहिं तहा कारिज्जंतो य चंकमणं ॥३६३॥
हासिज्जंतो बहुखुज्जवामणाईहिं कयवियारेहिं। सग्गाहिवाससरिसं तियसेहि य उवयरिज्जंतो॥३६४॥
जोइज्जंतो विहियंजसाहि हरिसाउ पुरपुरंधीहिं। इय सो लालिज्जंतो पढमिल्लुब्भिन्नदसणजुओ॥३६५॥
परिवड्ढिउमारद्धो कुलगिरिकुहरुग्गउव्व कप्पतरू। पडिपुन्नसयलदेहावयवो य कमेण संजाओ ॥३६६॥

एकादशे दिवसे समागते सूतिकर्मोपनयन्ति । यथाभणितविधानेन, प्राप्ते द्वादशदिवसे ॥३५३॥
नानाविधव्यञ्जनखण्डखाद्यखर्जूरपानकसमेताम् । बहुशालिसूपसहितां निर्वर्तयति रसवतिका(ती)म् ॥३५४॥
तदनन्तरं च निजक्षत्रियेभ्यस्तथा पुरप्रधानलोकेभ्यः । तद् भोजनमर्पयति बहुमानपुरस्सरं ततः ॥३५५॥
आगच्छतां क्षणेन विश्वस्तानां सुखासनगतानाम् । संमानितानां तेषां पुरतः सुप्रतिष्ठनरनाथः ॥३५६॥
भणति च भो भोः क्षत्रियप्रधानपुरुषाः ! ममैष संकल्पः । आसीत्पूर्वमपि यथा यद्दिवस एष गर्भे ॥३५७॥
पृथिवीदेव्याः सुतः संक्रान्तस्तद्दिनादधिकतरम् । संजाताः शुभपार्श्वास्तत एतस्य युक्तमिदम् ॥३५८॥
नाम सुपार्श्वकुमारो युष्माकमपि संगतिं यदि गमयति । तत उपलक्षितभावैस्तैरिति नरपतिर्भणितः ॥३५९॥
एतदेव खलु युक्तं गुणनिष्पन्ने विद्यमाने । नाम्नि कस्मात् क्रियतेऽयथास्थितकल्पनं ततः ॥३६०॥
इति जल्पितृभिस्तैर्जगद्गुरोः श्रीसुपार्श्वनामेति । परितुष्टैः प्रतिष्ठितमथ वृत्ते नामकरणे ॥३६१॥
सुरसंक्रामितकामितरसाया निजकाङ्गुल्याः पानेन । कृतभोजनकर्तव्यः पञ्चभिर्धात्रीभिः परिकरितः॥३६२॥
सार्यमाणोऽन्तःपुरेण हस्ताद्धस्तकमले । मातापितृभ्यां तथा कार्यमाणश्च चंक्रमणम् ॥३६३॥
हास्यमानो बहुकुब्जवामनादिभिः कृतविकारैः । स्वर्गाधिवाससदृशं त्रिदशैश्चोपचर्यमाणः ॥३६४॥
दृश्यमानो विहिताञ्जसाभिर्हर्षात् पुरपुरन्ध्रीभिः । इति स लाल्यमानः प्राथमिकोद्भिन्नदशनयुतः ॥३६५॥
परिवर्धितुमारब्धः कुलगिरिकुहरोद्गत इव कल्पतरुः । परिपूर्णसकलदेहावयवश्च क्रमेण संजातः ॥३६६॥

---

१ क. °गयं, ग. गमं । २ ख. नेव करेइ । ३ क. °कमिणं । ४ क. सेहिं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दसूणअट्ठवच्छरपज्जायं जणियजणमणाणंदं । पत्तो य कुमारत्तं रूवसिरीवासतामरसं ।।३६७।।

तथाहि;—

ताविच्छगुच्छसच्छहकुंचियकेसेहिं सहइ तस्स मुहं । वियसियनवारविंदं लीणेहिं व भमरविंदेहिं।।३६८।

जणमणकुरंगसंजमणवागुरापासविब्भममउव्वं । जस्स सवणाण जुअलं सोहग्गमडप्फरं वहइ ।।३६९।।

रेहइ कंठो सुपडिग्गहोव्व पडिपुन्नवयणकलसस्स । आगामियजोव्वणसंपवेसवरमंगलकरस्स ।।३७०।।

जंपंतस्स य लीलाए जस्स सियदसणकिरणरिंछोली। हारावलिव्व रेहइ विग्गहलायन्नलच्छीए ।।३७१।

अह सहइ विसालं सत्थलसमुब्भवं भुयअसोयलयजुयलं। नहकिरणपुप्फियं पाणिपल्लवारुणिमरमणीयं३७२

जस्स य विसालवच्छंत्थलुब्भवो सुहफलो य सिरिवच्छो। सच्चं सिरिवच्छो इव जणमणपवियंभियविलासो।

सो सहइ उरेणं उन्नएण तह कडियलेण पीणेण। परितणुणा उयरेणं कंठीरववरकिसोरोव्व ।।३७४।।

सेविज्जइ कमकमलं नहमणिनियरच्छलेण जस्स सया। सोहग्गमग्गिरीहिं निम्मलनक्खत्तपंतीहिं।।३७५।

किं बहुणा सव्वावयवसुंदरो सयललक्खणजुओ य। कस्स न नयणाणंदं जणेइ सुहओ स दिट्ठोवि।।३७६।

आगब्भाओवि वरनाणरयणदीवत्तई तिहुयणंपि। उज्जोयंती जाया कयकिच्चा जस्स जयगुरुणो।।३७७।

कह चंदो सलहिज्जइ जस्स न विमलाओ हुंति सोलसवि। फुरियाउ इमस्स पुणो कलाओ बावत्तरीओवि

बालोवि हु सुकईणं जो गुरुमणविम्हयं सया जणइ। रसभावसुंदराइं विरयंतो ललियकव्वाइं ।।३७९।।

अत्थकतक्कसंपक्ककक्कसाणं पहाणविउसाण । अक्खिवइ मणं विसमत्थसत्थसुहुमत्थकहणेण ।।३८०।।

देशोनाष्टवत्सरपर्यायं जनितजनमनआनन्दम् । प्राप्तश्च कुमारत्वं रूपश्रीवासतामरसम् ।।३६७।।

तथाहि;—

तापिच्छगुच्छसदृशकुञ्चितकेशै राजते तस्य मुखम् । विकसितनवारविन्दं लीनैरिव भ्रमरवृन्दैः ।।३६८।।

जनमनःकुरङ्गसंयमनवागुरापाशविभ्रममपूर्वम् । यस्य श्रवणयोर्युगलं सौभाग्यगर्वं वहति ।।३६९।।

राजते कण्ठः सुप्रतिग्रह इव परिपूर्णवदनकलशस्य । आगामिकयौवनसंप्रवेशवरमङ्गलकरस्य ।।३७०।।

जल्पतश्च लीलया यस्य सितदशनकिरणपङ्क्तिः । हारावलिरिव राजते विग्रहलावण्यलक्ष्म्याः ।।३७१।।

अथ राजते विशालं सत्स्थलसमुद्भवं भुजाशोकलतायुगलम्। नखकिरणपुष्पितं पाणिपल्लवारुणिमरमणीयम् ।।३७२।।

यस्य च त्रिशालवक्षःस्थलोद्भवः शुभफलश्च श्रीवत्सः । सत्यं श्रीवत्स इव जनमनःप्रविजृम्भितविलासः।।३७३।।

स राजत उरसोन्नतेन तथा कटीतलेन पीनेन । परितनुनोदरेण कण्ठीरववरकिशोर इव ।।३७४।।

सेव्यते क्रमकमलं नखमणिनिकरच्छलेन यस्य सदा । सौभाग्यमार्गयित्रीभिर्निर्मलनक्षत्रपङ्क्तिभिः ।।३७५।।

किं बहुना सर्वावयवसुन्दरः सकललक्षणयुतश्च । कस्य न नयनानन्दं जनयति सुभगः स दृष्टोऽपि ।।३७६।।

आगर्भादपि वरज्ञानरत्नदीपत्रयी त्रिभुवनमपि । उद्द्योतयन्ती जाता कृतकार्या यस्य जगद्गुरोः ।।३७७।।

कथं चन्द्रः श्लाघ्येत यस्य न विमला भवन्ति षोडशापि । स्फुरिता अस्य पुनः कला द्वासप्ततिरपि ।।३७८।।

बालोऽपि खलु सुकवीनां यो गुरुर्मनोविस्मयं सदा जनयति । रसभावसुन्दराणि विरचयल्ललितकाव्यानि।।३७९।

उवणीयतरुणिमणनयणविब्भमं संभवंतनवसोहं। अंतरियकुमारत्तं तत्तो पत्तो स तारुण्णं॥३८१॥
हेलाए कुसुमचावस्स चंगिमं निज्जिऊण धरणियले। वियरंतो अच्चिज्जइ लोएहिं नयणकमलेहिं॥३८२॥
पोढपुरसुंदरीणं गुणगणसंदाणियाणिव मणाणि। तम्मि वयंते अणुधाविराइं वलिराइं वलमाणे॥३८३॥
तद्देहदीहियाए पिज्जंतंपि हु न माइ लायन्नं। तण्हाउरतरुणीहिं वियसियनयणंजलिउडाहिं॥३८४॥
सो समसीलवएहिं संजुत्तो पवररायतणएहिं। कीलेइ लडहजोव्वणविलासवसमंथरं कुमरो॥३८५॥
कइयावि गीयगोट्ठीवियड्ढपरिसासु सरवियारेण। हाहाहूहूपमुहाणमवि इमो जणइ अच्छरियं॥३८६॥
कइयावि किंनरीणं रहम्मि अणुभावमउलियच्छिजुओ। नियसुचरियसंमीसं निसुणइ कलकागलीगीयं॥३८७॥
कइयावि धणुपरिस्समविणिस्सहो दीहियासु मज्जेइ। मज्जिरवारविलासिणिमुहजणियसरोयसंकासु॥३८८॥
कइयावि सहइ रेवंतरेहिरो तुरयवाहियालीसु। नीसंदिरसेयजलाविलोव्व लायन्नकंतीहिं॥३८९॥
कइयावि पायपयडणथिरासणो दुद्दमाण दंतीण। कुंभत्थलसाणनिसाणियंकुसो खलइ मयपसरं॥३९०॥
एमेव कहवि लीलावसेण जं किंपि तस्स गुणनिहिणो। परमत्थं पिव सिक्खइ चरियलवं तंपि विउसजणो॥
इय केलीए कालं गमेइ जसपसरधवलियदिसोहो। निस्सीमथाममइवसविभावियासेसविन्नाणो॥३९२॥
अह तस्स ठिइनिमित्तं सुरेहिं रइओ सिरग्गलिहियनहो। कणयमणिविड्डुरिल्लो मेरुव्व महंतपासाओ॥
भोअणविलासमज्जणमंडवपरिमंडिओ मणभिरामो। जो पयडं आखंडलविमाणमाणंपि खंडेइ॥३९४॥

अनवसरतर्कसंपर्ककर्कशानां प्रधानविदुषाम्। आक्षिपति मनो विषमार्थशास्त्रसूक्ष्मार्थकथनेन॥३८०॥
उपनीततरुणीमनोनयनविभ्रमं संभवन्नवशोभम्। अन्तरितकुमारत्वं ततः प्राप्तः स तारुण्यम्॥३८१॥
हेलया कुसुमचापस्य चङ्गिमानं निर्जित्य धरणीतले। विचरन्नर्च्यते लोकैर्नयनकमलैः॥३८२॥
प्रौढपुरसुन्दरीणां गुणगणसंदानितानीव मनांसि। तस्मिन् व्रजन्त्यनुधावितॄणि वलितॄणि वलति॥३८३॥
तद्देहदीर्घिकायां पीयमानमपि हि न माति लावण्यम्। तृष्णातुरतरुणीभिर्विकसितनयनाञ्जलिपुटाभिः॥३८४॥
स समशीलवयस्कैः संयुक्तः प्रवरराजतनयैः। क्रीडति रम्ययौवनविलासवशमन्थरं कुमारः॥३८५॥
कदापि गीतगोष्ठीविदग्धपर्षत्सु स्वरविचारेण। हाहाहूहूप्रमुखाणामप्ययं जनयत्याश्चर्यम्॥३८६॥
कदापि किन्नरीणां रहस्यनुभावमुकुलिताक्षियुगः। निजसुचरितसंमिश्रं शृणोति कलकाकलीगीतम्॥३८७॥
कदापि धनुःपरिश्रमविनिस्सहो दीर्घिकासु मज्जति। मज्जनशीलवारविलासिनीमुखजनितसरोजशङ्कासु॥३८८॥
कदापि राजते रयवद्राजिता तुरगवाहिकाऽऽलीषु। निःस्यन्दितृस्वेदजलाविल इव लावण्यकान्तिभिः॥३८९॥
कदापि पादप्रकटनस्थिरासनो दुर्दमानां दन्तिनाम्। कुम्भस्थलशाणनिशाणिताङ्कुशः स्खलयति मदप्रसरम्॥
एवमेव कथमपि लीलावशेन यः कोऽपि तस्य गुणनिधेः। परमार्थमिव शिक्षते चरितलवं तमपि विद्वज्जनः॥
इति केल्यां कालं गमयति यशःप्रसरधवलितदिगोघः। निस्सीमस्थाममतिवशविभाविताशेषविज्ञानः॥३९२॥
अथ तस्य स्थितिनिमित्तं सुरै रचितः शिरोऽग्रलिखितनखः। कनकमणिवैडूर्यवान् मेरुरिव महाप्रासादः॥३९३॥

---

१ क. °रुन्नं। २ क. ग. पाड। ३ क. सिरिग्गणिहि°।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्थेव ठिओ जं किंपि सुंदरं सो विभावए हिअए। तं किंकरव्व देवा सव्वंपि हु तस्स उवणिंति ॥३९५॥
अह अन्नया य सुपइट्ठनरवई जाव चिट्ठइ निविट्ठो। अत्थाणे नमिऊणं ता पडिहारीए विण्णत्तो॥३९६॥
देव! दुवारे अमरावईओ रिउमद्दणस्स वरदूओ। नरनाहं दट्ठुमणो ता करणिज्जं समाइससु ॥३९७॥
तो रन्ना भूसन्नाणुमयपवेसेण तेण सहसावि। निग्गंतूणं करवालभासुरा पुणरवि पविट्ठा ॥३९८॥
सोवि महीयलगयमउलिमंडलो पणमिऊण नरनाहं। तक्खणमुवणीए विट्ठरम्मि साणंदमुवविट्ठो ॥३९९॥
अह सरलाए संभूसिऊण दिट्ठीए सायरं पुट्ठो। जह कुसलं तुह पहुणो को वाऽऽगमणम्मि तुह हेऊ?॥४००॥
विणओणएण सिररइयअंजलिं अह नरेण पडिभणियं। देवपसाएण सया कुसलं चिय सामिसालस्स॥४०१॥
आगमणकारणं पुण रणभरसोंडीर! निसुणसु ममेयं। जेणं तुम्ह सयासे नियपहुणा पेसिओ अहयं ॥४०२॥
अत्थि इह अम्ह पहुणो देवी नामेण चंदवयणत्ति। सयलावरोहसिररयणविब्भमा विब्भमब्भहिया ॥४०३॥
तीसे य सुया पवरा सोमा नामेण गुणमहग्घविया। अहिदेवयव्व सोहग्गयाए सव्वंगरमणीया ॥४०४॥
अह जोव्वणं पवन्ना कलाकलावेण सह सरीरेण। ससहरकलव्व पइदिणपवन्नसविसेसलायन्ना ॥४०५॥
जत्तो विलोलपम्हलधवलाइं वलंति तारनयणाइं। तत्तो चिय पंचसरो कुंडलियधणू पहावेइ ॥४०६॥
सा चंदकलाओ चुन्निऊण आलोडिऊण अमएण। मन्ने अणंगसंजीवणोसही निम्मिया विहिणा ॥४०७॥
एयं मणुन्नं एयं च सुंदरं सलहणिज्जमेयंति। इय भाविन्तो तत्तिं न लहइ लोओ तयंगेसु ॥४०८॥

भोजनविलासमज्जनमण्डपपरिमण्डितो मनोऽभिरामः। यः प्रकटमाखण्डलविमानमानमपि खण्डयति ॥३९४॥
तत्रैव स्थितो यत्किमपि सुन्दरं स विभावयति हृदये। तत् किङ्करा इव देवाः सर्वमपि हि तस्योपनयन्ति ॥३९५॥
अथान्यदा च सुप्रतिष्ठनरपतिर्यावत्तिष्ठति निविष्टः। आस्थाने नत्वा तावत्प्रतीहार्या विज्ञप्तः ॥३९६॥
देव! द्वारेऽमरावतीतो रिपुमर्दनस्य वरदूतः। नरनाथं द्रष्टुमनास्तस्मात्करणीयं समादिश ॥३९७॥
ततो राज्ञा भ्रूसंज्ञानुमतप्रवेशेन तेन सहसापि। निर्गत्य करवालभासुरा पुनरपि प्रविष्टा ॥३९८॥
सोऽपि महीतलगतमौलिमण्डलः प्रणम्य नरनाथम्। तत्क्षणमुपनीते विष्टरे सानन्दमुपविष्टः ॥३९९॥
अथ सरलया संभूष्य दृष्ट्या सादरं पृष्टः। यथा कुशलं तव प्रभोः को वाऽऽगमने तव हेतुः? ॥४००॥
विनयावनतेन शिरोरचिताञ्जल्यथ नरेण प्रतिभणितम्। देवप्रसादेन सदा कुशलमेव स्वामिशालस्य(?) ॥४०१॥
आगमनकारणं पुना रणभरशौण्डीर! शृणु ममैतत्। येन युष्माकं सकाशे निजप्रभुणा प्रेषितोऽहकम्॥४०२॥
अस्तीहास्माकं प्रभोर्देवी नाम्ना चन्द्रवदनेति। सकलावरोधशिरोरत्नविभ्रमा विभ्रमाभ्यधिका ॥४०३॥
तस्याश्च सुता प्रवरा सोमा नाम्ना गुणमहार्घिता। अधिदेवतेव सौभाग्यस्य सर्वाङ्गरमणीया ॥४०४॥
अथ यौवनं प्रपन्ना कलाकलापेन सह शरीरेण। शशधरकलेव प्रतिदिनप्रपन्नसविशेषलावण्या ॥४०५॥
यतो विलोलपक्ष्मधवले वलतस्तारनयने। तत एव पञ्चशरः कुण्डलितधनुः प्रधावति ॥४०६॥
सा चन्द्रकलाश्चूर्णयित्वाऽऽलोड्यामृतेन। मन्येऽनङ्गसंजीवनौषधिर्निर्मिता विधिना ॥४०७॥
एतन्मनोज्ञमेतच्च सुन्दरं श्लाघनीयमेतदिति। इति भावयंस्तृप्तिं न लभते लोकस्तदङ्गेषु ॥४०८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कंचीविसयाओ कुंतलम्मि तत्तो य मज्झदेसम्मि। जुवदिट्ठीओ तयंगे पहियव्व चिरं पयट्टंते ॥४०९॥
अह अन्नया य सा सहयरीहिं सहिया गया निउज्जाणं। निसुणइ गिज्जंतं किंनरीहिं गाहाजुयं एयं॥४१०॥
सिरिसुपइट्ठनराहिवविसालकुलगयणभूसणससंको। सयलकलाकलहंसीलीलाकमलायरो कुमरो ॥४११॥
नामेण सुपासो सयलसुहयसिरसेहरो गुणाणुयही। तरुणियणहिययहरणो धन्नाए इमो वरो होही ॥४१२॥
सा एयं निसुणंती कुमारगुणकित्तणं तहिं बाला। ईसाइएण नूणं मयणेण सरेहिं संविद्धा ॥४१३॥
तत्तो य तेहिं सा कीलियव्व सुत्तव्व अहव मत्तव्व। गाढं निमीलियनयणा मुच्छाविहलंघला जाया४१४
गयचेयन्ना न सहीणं उत्तरं देइ किंपि पुट्ठावि। ताओवि संभंताओ चिंतंति अहो किमेयंति ॥४१५॥
अइउसिणूसासेहिं देहे दाहोत्ति मन्नमाणीओ। कमलिणिदलेहिं सेज्जं विरयंति कहंति य पिऊणं॥४१६॥
हा दिव्व! कहमकंडे मह दंडो पाडिओ तए सहसा। इच्चाइ पलवमाणी समागया चंदवयणावि ॥४१७॥
तत्तो य देहदाहस्स कारणं पुच्छिओ सहीवग्गो। सव्वोवि जा न साहइ ता निग्गंतूण एगंते ॥४१८॥
पुट्ठा वियक्खणा नाम सहयरी, तीइ साहियं सव्वं। जह सिरिसुपासकुमरेऽणुरत्तचित्ता इमा नूणं॥४१९॥
जं उज्जाणे एयाए निसुणिओ किंनरीए गिज्जंतो। सो सिरिसुपासकुमरो एयावत्था तओ जाया॥४२०॥
तो देवी गंतूणं साहइ सव्वंपि वइयरं रन्नो। तेणवि पहिट्ठहियएण जंपियं वयणमेयंति ॥४२१॥
जह पुव्वंपि ममेसो संकप्पो आसि जह इमा धूया। देया सुपासकुमरस्स संपयं लट्ठयं विहिणा ॥४२२॥

काञ्चीविषयात्कुन्तले ततश्च मध्यदेशे। युवदृष्टयस्तदङ्गे पथिका इव चिरं प्रवर्तन्ते ॥४०९॥
अथान्यदा च सा सहचरीभिः सहिता गता निजोद्याने। शृणोति गीयमानं किन्नरीभिर्गाथायुगमेतत् ॥४१०॥
श्रीसुप्रतिष्ठनराधिपविशालकुलगगनभूषणशशाङ्कः। सकलकलाकलहंसीलीलाकमलाकरः कुमारः ॥४११॥
नाम्ना सुपार्श्वः सकलसुभगशिरःशेखरो गुणानामुदधिः। तरुणीजनहृदयहरणो धन्याया अयं वरो भविष्यति॥४१२॥
सैतच्छृण्वती कुमारगुणकीर्तनं तस्मिन् बाला। ईर्ष्यायितेन नूनं मदनेन शरैः संविद्धा ॥४१३॥
ततश्च तैः सा कीलितेव सुप्तेवाथवा मत्तेव। गाढनिमीलितनयना मूर्च्छाविशृङ्खला जाता ॥४१४॥
गतचैतन्या न सखीनामुत्तरं ददाति किमपि पृष्टापि। ता अपि संभ्रान्ताश्चिन्तयन्ति अहो किमेतदिति ? ॥४१५॥
अत्युष्णोच्छ्वासैर्देहे दाह इति मन्यमानाः। कमलिनीदलैः शय्यां विरचयन्ति कथयन्ति च पितरौ ॥४१६॥
हा दैव! कथमकाण्डे मम दण्डः पातितस्त्वया सहसा। इत्यादि प्रलपन्ती समागता चन्द्रवदनापि ॥४१७॥
ततश्च देहदाहस्य कारणं पृष्टः सखीवर्गः। सर्वोऽपि यावन्न कथयति तावन्निर्गत्यैकान्ते ॥४१८॥
पृष्टा विचक्षणा नाम सहचरी, तया कथितं सर्वम्। यथा श्रीसुपार्श्वकुमारेऽनुरक्तचित्तेयं नूनम् ॥४१९॥
यदुद्याने एतया श्रुतः किन्नर्या गीयमानः। स श्रीसुपार्श्वकुमार एतदवस्था ततो जाता ॥४२०॥
ततो देवी गत्वा कथयति सर्वमपि व्यतिकरं राज्ञे। तेनापि प्रहृष्टहृदयेन जल्पितं वचनमेतदिति ॥४२१॥
यथा पूर्वमपि ममैष संकल्प आसीद्यथेयं दुहिता। देया सुपार्श्वकुमाराय सांप्रतं मनोहरं विधिना ॥४२२॥

---

१ ख. एईए।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सयमेव कयं, ता एत्थ उज्जमं सिग्घमेव काहामो । इय गंतूणं साहसु दुहियाए देवि ! दुहियाए ॥४२३॥
तत्तो य हरिसियाए आगंतूणं इमम्मि वुत्तंते । कहिए देवीए तओ सा किंचि सचेयणा जाया ॥४२४॥
तं चेव पुणो परमक्खरंव गाहाजुयं विचिंतंती । एगंतठिया चिट्ठइ लज्जइ दिट्ठेवि सहिवग्गे ॥४२५॥
अवरं च;
भुंजइ नय आहारं न कुणइ ण्हाणं नयावि सिंगारं । तंबूलंपि न गिण्हइ न य नियसइ चारुवत्थाणि ॥४२६॥
नो दिट्ठीइवि पिच्छइ रूवाइं महानरिंदकुमराणं । दूयाणीयाइं चित्तपट्टियासुंपि लिहियाइं ॥४२७॥
किं बहुणा;
एवं तणुअंगीए भिन्नाए निसियमयणबाणेहिं । सरणं सुपासकुमरो मरणं वा देव ! न हु अन्नं ॥४२८॥
एयावत्थं तं पासिऊण तह मंतिऊण मंतियणं । रिउमद्दणेण रण्णा मइसायरमंतिणा सहिया ॥४२९॥
सोमा नामेण सुया सयंवरा सिरिसुपासकुमरस्स । संपेसिया तहा हं मइसायरमंतिणा पुरओ ॥४३०॥
कहिउं तुम्ह समीवे वइयरमेवं निरूविओ देव ! । एत्तो तुमं पमाणं इय भणिउं ठाइ तुण्हिक्को ॥४३१॥
तो भणियं नरवइणा सम्मं आलोइऊण साहिस्सं । वच्चसु निययावासे तुमंति सम्माणिओ रण्णा ॥४३२॥
वच्चइ नियआवासे सो, एत्तो नरवईवि साहेइ । पुहवीपियाए सव्वं तो पभणइ सावि परितुट्ठा ॥४३३॥
देव ! मए पत्ताइं सुहाइं सव्वाइं अणणुभूयाइं । तुह पायपसाएणं एत्तियमेत्तेण हीणाइं ॥४३४॥

स्वयमेव कृतं, तस्मादत्रोद्यमं शीघ्रमेव करिष्यामः । इति गत्वा कथय दुःखितां देवि ! दुहितरम् ॥४२३॥
ततश्च हर्षितयाऽऽगत्यास्मिन् वृत्तान्ते । कथिते देव्या ततः सा किञ्चित् सचेतना जाता ॥४२४॥
तदेव पुनः परमाक्षरमिव गाथायुगं विचिन्तयन्ती । एकान्तस्थिता तिष्ठति लज्जति दृष्टेऽपि सखीवर्गे ॥४२५॥
अपरञ्च;
भुङ्क्ते न चाहारं न करोति स्नानं न चापि शृङ्गारम् । ताम्बूलमपि न गृह्णाति न च निवसति चारुवस्त्राणि ॥४२६॥
नो दृष्ट्यापि पश्यति रूपाणि महानरेन्द्रकुमाराणाम् । दूतानीतानि चित्रपट्टिकास्वपि लिखितानि ॥४२७॥
किं बहुना;
एवं तन्वङ्ग्या भिन्नाया निशितमदनबाणैः । शरणं सुपार्श्वकुमारो मरणं वा देव ! न त्वन्यत् ॥४२८॥
एतदवस्थां तां दृष्ट्वा तथा मन्त्रयित्वा मन्त्रिजनेन । रिपुमर्दनेन राज्ञा मतिसागरमन्त्रिणा सहिता ॥४२९॥
सोमा नाम्ना सुता स्वयंवरा श्रीसुपार्श्वकुमाराय । संप्रेषिता तथाऽहं मतिसागरमन्त्रिणा पुरतः ॥४३०॥
कथयितुं युष्माकं समीपे व्यतिकरमेवं निरूपितो देव ! । इतो यूयं प्रमाणमिति भणित्वा तिष्ठति तूष्णीकः ॥४३१॥
ततो भणितं नरपतिना सम्यगालोच्य कथयिष्यामि । व्रज निजकावासे त्वमिति संमानितो राज्ञा ॥४३२॥
व्रजति निजकावासे सः, इतो नरपतिरपि कथयति । पृथिवीप्रियां सर्वं ततः प्रभणति सापि परितुष्टा ॥४३३॥
देव ! मया प्राप्तानि सुखानि सर्वाण्यननुभूतानि । त्वत्पादप्रसादेनैतावन्मात्रेण हीनानि ॥४३४॥
यदि पुनः कथमप्येतं वीवाहमहोत्सवं पश्यामि । संप्रति सुपार्श्वकुमारस्य देव ! ततो भवामि कृतकृत्या ॥४३५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जइ पुण कहंपि एयं वीवाहमहूसवंपि पिच्छामि । संपइ सुपासकुमरस्स देव ! ता होमि कयकिच्चा ॥४३५॥
तो नरवइणा भणियं जइ एवं देवि ! ता तुमं सिग्घं । वच्चसु कुमरसमीवं वीवाहत्थं च पन्नवसु ॥४३६॥
तत्तो य पुहइदेवी वच्चइ कंचुइजणेण परियरिया । पासे सुपासकुमरस्स सोवि दट्ठूण तं इंतिं ॥४३७॥
अणुगमइ अभिमुहं चिय सत्तट्ठ पयाइं तहय कारवइ । आसणदाणप्पमुहं पडिवत्ति तह य नमिऊणं ॥४३८॥
भालयलमिलियकरकमलसंपुडो विन्नवेइ कुमरोवि । संपइ तुम्हागमणे अम्मो ! किं कारणं कहसु? ॥४३९॥
पुहइजणणीए भणियं पुत्ताहं पेसियम्हि देवेण । तुह वीवाहमहूसवदंसणउक्कंठिओ जम्हा ॥४४०॥
देवो इयरजणोवि य, तह मज्झवि एत्तियं च दूमेइ । संपइ अपत्तपुव्वं पत्ताइं सुहाइं अन्नाइं ॥४४१॥
तुज्झ पसाएणन्ने पडिपुन्ना जं मणोरहा सव्वे । ता पडिवज्जउ कुमरो वीवाहमहूसवं काउं ॥४४२॥
तं सुच्चा कुमरोवि हु पभणइ अम्मो ! न मुणह मह चित्तं । नवि याणह विसयसुहं गिहवासंपि हु सदुक्खफलं ॥
जेणं विवाहविसए एवं उल्लवह, तीए तो भणियं । मुणिमो सव्वं किंपुण अलंघणिज्जं च पिउवयणं ॥४४४॥
न हु तुम्हाणं पच्छिमवएवि दुलहो हु गिहपरिच्चाओ । पडिकूलिस्सइ देवो पडिपुन्नमणोरहो न तुमं ॥४४५॥
तो भणियं कुमरेणं पडिवज्जिज्जइ कहं इमं अम्मो ! । पढमं चिय पयडिज्जइ विवाहसमए जहिं एयं ॥४४६॥
चउमंडलगावत्तणच्छलेण संसारचउगइब्भमणं । घयमहुहुणणमिसेणं कारिज्जइ सयलगुणदहणं ॥४४७॥
किणणत्थं कम्म[1]कयाणगस्स पढमंपि हत्थसन्नव्व । कन्नापाणिग्गहकइयवेण दाविज्जए तत्थ ॥४४८॥

ततो नरपतिना भणितं यद्येवं देवि ! ततस्त्वं शीघ्रम् । व्रज कुमारसमीपं वीवाहार्थं च प्रज्ञपय ॥४३६॥
ततश्च पृथिवीदेवी व्रजति कञ्चुकिजनेन परिकरिता । पार्श्वे सुपार्श्वकुमारस्य सोऽपि दृष्ट्वा तामायतीम् ॥४३७॥
अनुगच्छत्यभिमुखमेव सप्ताष्ट पदानि तथा च कारयति । आसनदानप्रमुखां प्रतिपत्तिं तथा च नत्वा ॥४३८॥
भालतलमिलितकरकमलसंपुटो विज्ञपयति कुमारोऽपि । संप्रति तवागमनेऽम्ब ! किं कारणं कथय ॥४३९॥
पृथिवीजनन्या भणितं पुत्राहं प्रेषितास्मि देवेन । तव वीवाहमहोत्सवदर्शनोत्कण्ठितो यस्मात् ॥४४०॥
देव इतरजनोऽपि च, तथा ममाप्येतावच्च दावयति । संप्रत्यप्राप्तपूर्वं प्राप्तानि सुखान्यन्यानि ॥४४१॥
तव प्रसादेनान्ये परिपूर्णा यन्मनोरथाः सर्वे । ततः प्रतिपद्यतां कुमारो वीवाहमहोत्सवं कर्तुम् ॥४४२॥
तत् श्रुत्वा कुमारोऽपि हि प्रभणत्यहो न जानीथ मम चित्तम् । नापि जानीथ विषयसुखं गृहवासमपि च सदुःखफलम् ॥
येन वीवाहविषय एवमुल्लपथ, तया ततो भणितम् । जानीमः सर्वं किंपुनरलङ्घनीयं च पितृवचनम् ॥४४४॥
न खलु युष्माकं पश्चिमवयस्यपि दुर्लभो हि गृहपरित्यागः । प्रतिकूलयिष्यति देवः परिपूर्णमनोरथो न त्वाम् ॥४४५॥
ततो भणितं कुमारेण प्रतिपद्येत कथमिदमम्ब ! । प्रथममेव प्रकट्यते विवाहसमये यस्मिन्नेतत् ॥४४६॥
चतुर्मण्डलकावर्तनच्छलेन संसारचतुर्गतिभ्रमणम् । घृतमधुहवनमिषेण कार्यते सकलगुणदहनम् ॥४४७॥
क्रयार्थं कर्मक्रयाणकस्य प्रथममपि हस्तसंज्ञेव । कन्यापाणिग्रहकैतवेन दाप्यते तत्र ॥४४८॥
चतुर्दिक्ष्वप्ययशस्तरुणीगीयमानमङ्गलच्छलेन । भाव्यते किं बहुना यद्यदिह सूक्ष्मबुद्ध्या ॥४४९॥

---

१ क. दुक्ख ।

चाउदिसिंपि अजसो तरुणीगिज्जंतमंगलच्छलेणं । भाविज्जइ किं बहुणा जं जं इह सुहुमबुद्धीए ॥४४९॥
चिंतिज्जइ तं सव्वं रोमुद्धोसं जणेइ मह अम्मो ! । ता मुंचसु पडिबंधं अणुजाणह मं वयग्गहणे॥४५०॥
एवं भणिए पहुणा जंपइ देवी कुमार ! किं जुत्तो ।तुम्हारिसाण काउं अम्मापिउपत्थणाभंगो ? ॥४५१॥
इय भणिए देवीए महोवरोहेण निरहिलासोवि । पडिवज्जइ कहकहवि हु कुमरो काउं विवाहमहं॥४५२॥
तो परितुट्ठा देवी साहइ गंतूण निययनाहस्स । एत्थंतरम्मि सुपइट्ठरायमत्थाणमुवविट्ठं ॥४५३॥
करकलियकमलदंडा भालयलनिलीणअंजलिपुडा य। पडिहारी सुक्करिसं नमिउं विन्नविउमारद्धा॥४५४॥
रिउमद्दणस्स रन्नो मंती मइसाअरोत्ति विक्खाओ । चिट्ठइ तुम्हाणं दंसणूसुओ दारदेसम्मि ॥४५५॥
तत्थ य को आएसो तो भणियं राइणा पवेसेहिं । सिग्घं चिय जं देवो समाणवेइत्ति भणिऊण॥४५६॥
सो तीएऽणुन्नाओ पविसेउं पणमिऊण नरनाहं । दिन्नासणो निविट्ठो पुट्ठो सो उचियपत्थावे ॥४५७॥
सागयवयणं तेणवि संलत्तं तं तुह पसाएण । तत्तो य सोवि साहइ जह तुह मित्तेण नरवइणा ॥४५८॥
रिउमद्दणेण रन्ना नियकन्ना सिरिसुपासकुमरस्स । सोमा नामेण वराय सयंवरा पेसिया देव ! ॥४५९॥
एत्तो तुमं पमाणंति जंपिए निवइणावि तो तीसे । दावाविओ विसालो निवासहेउं सुपासाओ ॥४६०॥
तह पेसिया रसवई सयला तक्कालउचियपडिवत्ती । कारविया तो मंती विसज्जिओ निययआवासे॥४६१॥
तो तेण समारद्धो काउं वीवाहुवक्कमो तत्थ । बंधाविया य मंचा दिन्नाइं आसणाइं तहिं ॥४६२॥
विविहेसु कम्मेसुं निरूविया किंकरा तओ विहियं । वरवेइगाविमाणं रंभाखंभुब्भियपडायं ॥४६३॥

चिन्त्यते तत् सर्वं रोमोद्धर्षं जनयति ममाम्ब ! । तस्मान्मुञ्च प्रतिबन्धमनुजानीहि मां व्रतग्रहणे ॥४५०॥
एवं भणिते प्रभुणा जल्पति देवी कुमार ! किं युक्तः । युष्मादृशानां कर्तुं मातापितृप्रार्थनाभङ्गः ? ॥४५१॥
इति भणिते देव्या महोपरोधेन निरभिलाषोऽपि । प्रतिपद्यते कथंकथमपि हि कुमारः कर्तुं विवाहमहम् ॥४५२॥
ततः परितुष्टा देवी कथयति गत्वा निजकनाथम् । अत्रान्तरे सुप्रतिष्ठराजमास्थानमुपविष्टम् ॥४५३॥
करकलितकमलदण्डा भालतलनिलीनाञ्जलिपुटा च । प्रतीहारी सोत्कर्षं नत्वा विज्ञपयितुमारब्धा ॥४५४॥
रिपुमर्दनस्य राज्ञो मन्त्री मतिसागर इति विख्यातः । तिष्ठति युष्माकं दर्शनोत्सुको द्वारदेशे ॥४५५॥
तत्र च क आदेशस्ततो भणितं राज्ञा प्रवेशय । शीघ्रमेव यद् देवः समाज्ञपयतीति भणित्वा ॥४५६॥
स तयाऽनुज्ञातः प्रविश्य प्रणम्य नरनाथम् । दत्तासनो निविष्टः पृष्टः स उचितप्रस्तावे ॥४५७॥
स्वागतवचनं तेनापि संलप्तं तत् तव प्रसादेन । ततश्च सोऽपि कथयति यथा तव मित्रेण नरपतिना ॥४५८॥
रिपुमर्दनेन राज्ञा निजकन्या श्रीसुपार्श्वकुमाराय । सोमा नाम्ना वराय स्वयंवरा प्रेषिता देव ! ॥४५९॥
इतो यूयं प्रमाणमिति जल्पिते नृपतिनापि ततस्तस्मै । दापितो विशालो निवासहेतोः सुप्रासादः ॥४६०॥
तथा प्रेषिता रसवती सकला तत्कालोचितप्रतिपत्तिः । कारिता ततो मन्त्री विसर्जितो निजकावासे ॥४६१॥
ततस्तेन समारब्धः कर्तुं वीवाहोपक्रमस्तत्र । बन्धिताश्च मञ्चा दत्तान्यासनानि तत्र ॥४६२॥
विविधेषु कर्मसु निरूपिताः किङ्करास्ततो विहितम् । वरवेदिकाविमानं रम्भास्तम्भोर्ध्वीकृतपताकम् ॥४६३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मरगयमणिपरिमंडियवरकंचणकलसविरयणाकलियं । सव्वत्थ निवेसियरयणकिरणपडिहणियतमपसरं ॥
एवं तक्कालोचियमन्नंपि हु सव्वहावि काऊण । मइसायरेण तत्तो कहाविअं निवइणो एअं ॥४६५॥
जह संपइ सुपसत्थं हत्थग्गहणे मुहुत्तमइनियडं । तो कुमरं चित्तूणं तुब्भे आगच्छह इहंति ॥४६६॥
रन्नावि पुहइदेवी भणिया सिग्घं करेह कुमरस्स । पुंखणगाइविहाणं संपइ सुमुहुत्तमासन्नं ॥४६७॥
तो सव्वाउ देवीउ गुरुप्पमोएण बहुप्पयारेहिं । पुंखेऊणं मंगलपुरस्सरं ण्हवहिं वरकुमरं ॥४६८॥
तत्तो य नियंसावहिं महग्घमुल्लाइं सियदुगुल्लाइं । कायव्वविहिं सव्वं कारावहिं तह य सेसंपि ॥४६९॥
तं जहा;—
गोसीसचंदणुप्पंकलित्तगत्तो विरायए कुमरो । सारयससंकजोण्हाए धवलिओ कणयसेलोव्व ॥४७०॥
मंदारकुसुमगुच्छेहिं छाइओ जस्स कुंतलकलावो । कसिणो रेहइ ताराविराइओ नहविभागोव्व ॥४७१॥
सव्वत्थारोवियरयणरुइरआहरणभूसियसरीरो । देवो रोहणसेलोव्व जंगमत्तं गओ सहइ ॥४७२॥
किं बहुणा;—
सहावियंपि रूवं न जस्स सक्कोवि साहिउं तरइ । किं पुण कणयविभूसणभूसियदेहस्स तस्स तया?॥४७३॥
एवं कयकायव्वे कुमरम्मि निवेइयं नरिंदस्स । तेणवि नियया पुरिसा निरूविया जह लहुं तुब्भे ॥४७४॥
मेलेह नायखत्तियवग्गं सयलंपि तह पयट्टेह । नयरीमहूसवं तह कुमरस्स समप्पह पहाणं ॥४७५॥

मरकतमणिपरिमण्डितवरकाञ्चनकलशविरचनाकलितम् । सर्वत्र निवेशितरत्नकिरणप्रतिहततमःप्रसरम् ॥४६४॥
एवं तत्कालोचितमन्यदपि खलु सर्वथापि कृत्वा । मतिसागरेण ततः कथितं नृपतेरेवम् ॥४६५॥
यथा संप्रति सुप्रशस्तं हस्तग्रहणे मुहूर्तमतिनिकटम् । ततः कुमारं गृहीत्वा यूयमागच्छतेहेति ॥४६६॥
राज्ञापि पृथिवीदेवी भणिता शीघ्रं कुरुत कुमारस्य । प्रुङ्खनकादिविधानं संप्रति सुमुहूर्तमासन्नम् ॥४६७॥
ततः सर्वा देव्यो गुरुप्रमोदेन बहुप्रकारैः । पुङ्खयित्वा मङ्गलपुरस्सरं स्नपयन्ति वरकुमारम् ॥४६८॥
ततश्च निवासयन्ति महार्घमूल्यानि सितदुकूलानि । कर्तव्यविधिं सर्वं कारयन्ति तथा च शेषमपि ॥४६९॥
तद्यथा;—
गोशीर्षचन्दनकर्दमलिप्तगात्रो विराजते कुमारः । शारदशशाङ्कज्योत्स्नया धवलितः कनकशैल इव ॥४७०॥
मन्दारकुसुमगुच्छैश्छादितो यस्य कुन्तलकलापः । कृष्णो राजति ताराविराजितो नभोविभाग इव ॥४७१॥
सर्वत्रारोपितरत्नरुचिराभरणभूषितशरीरः । देवो रोहणशैल इव जङ्गमत्वं गतो राजते ॥४७२॥
किं बहुना;—
स्वाभाविकमपि रूपं न यस्य शक्रोऽपि कथयितुं शक्नोति । किं पुनः कनकविभूषणभूषितदेहस्य तस्य तदा ? ॥
एवं कृतकर्तव्ये कुमारे निवेदितं नरेन्द्राय । तेनापि निजकाः पुरुषा निरूपिता यथा लघु यूयम् ॥४७४॥
मेलयत ज्ञातक्षत्रियवर्गं सकलमपि तथा प्रवर्तयत । नगरीमहोत्सवं तथा कुमाराय समर्पयत प्रधानम् ॥४७५॥

---

१ ग. ण्हावियं तत्तो । २ ख. तं कु° । ३ क. कुमारो ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जयकुंजरं महंतं जेणं गम्मइ विवाहठाणम्मि । जं आणवेइ देवो इय भणिऊणं गया पुरिसा ॥४७६॥
रायाएसो सव्वोवि साविओ तेहिं जह समाइट्ठो । इत्तो धवलपसाहियसिंधुरखंधं समारूढो ॥४७७॥
पवणपणच्चिरधयवडसोहियमणहररहावरूढेण । उब्भडसिंगारेणं परियरिओ रायलोएणं ॥४७८॥
हरिसपरव्वसनच्चंततरुणिविंदावरुद्धरायपहो । वज्जंतसयलमंगलतूररवाऊरियदियंतो ॥४७९॥
सुपइट्ठपयावइणाऽणुगम्ममाणो सुपासवरकुमरो । थुव्वंतो आसीसासएहिं कुलथेरनारीहिं ॥४८०॥
पायारभवणतलसंठिएण लोएण मुद्धलोयस्स । दंसिज्जंतो अंगुलिसहस्सेहिं कमेण संपत्तो ॥४८१॥
वीवाहमंडवे अह पडिहारजणेण दारदेसम्मि । पडिरुद्धे इयरजणे परियरिओ रायलोएण ॥४८२॥
अब्भिंतरे पविट्ठो कुमरो एत्थंतरम्मि लहुमेव । सोमावि तओ विविहं पसाहिया विबिहलोएणं ॥४८३॥
तहाहि;—
मणिमयकुंडलजुयलं तीसे सवणंतरेसु रेहेइ । तक्कालागयवम्महनरवइरहचक्कजुयलंव ॥४८४॥
लोलंतो जीसे कंठकंदले सहइ नवसरो हारो । वयणरयणियरसंकाए आगओ तारयगणोव्व ॥४८५॥
जीसे नियंबबिंबे बद्धा पंचवण्णरयणमयकंची । रेहइ हरिधणुरेहव्व गयणदेसम्मि वित्थिन्ने ॥४८६॥
हियर्यम्मि अमायंतुव्व झरइ जीसे कुमारअणुराओ । जावयरसरंजियचरणजुयलपडिबिंबकवडेणं ॥४८७॥
सा सविसेसपसाहणसाहिया मत्तकुंजरगईए । मंजीरमंजुसिंजणसवणागयहंसखलियगई ॥४८८॥

जयकुञ्जरं महान्तं येन गम्यते विवाहस्थाने । यदाज्ञपयति देव इति भणित्वा गताः पुरुषाः ॥४७६॥
राजादेशः सर्वोऽपि श्रावितस्तैर्यथा समादिष्टः । इतो धवलप्रसाधितसिन्धुरस्कन्धं समारूढः ॥४७७॥
पवनप्रनर्तनशीलध्वजपटशोभितमनोहररथावरूढेन । उद्भटशृङ्गारेण परिकरितो राजलोकेन ॥४७८॥
हर्षपरवशनृत्यत्तरुणीवृन्दावरुद्धराजपथः । वाद्यमानसकलमङ्गलतूररवापूरितदिगन्तः ॥४७९॥
सुप्रतिष्ठप्रजापतिनाऽनुगम्यमानः सुपार्श्ववरकुमारः । स्तूयमान आशीःशतैः कुलस्थविरनारीभिः ॥४८०॥
प्राकारभवनतलसंस्थितेन लोकेन मुग्धलोकस्य । दर्श्यमानोऽङ्गुलिसहस्रैः क्रमेण संप्राप्तः ॥४८१॥
वीवाहमण्डपेऽथ प्रतिहारजनेन द्वारदेशे । प्रतिरुद्धे इतरजने परिकरितो राजलोकेन ॥४८२॥
अभ्यन्तरे प्रविष्टः कुमारोऽत्रान्तरे लघ्वेव । सोमापि ततो विविधं प्रसाधिता विविधलोकेन ॥४८३॥
तथाहि;—
मणिमयकुण्डलयुगलं तस्याः श्रवणान्तरयो राजते । तत्कालागतमन्मथनरपतिरथचक्रयुगलमिव ॥४८४॥
लोलन् यस्याः कण्ठकन्दले राजते नवमालो हारः । वदनरजनिकरशङ्कयाऽऽगतस्तारकागण इव ॥४८५॥
यस्या नितम्बबिम्बे बद्धा पञ्चवर्णरत्नमयकाञ्ची । राजते हरिधनूरेखेव गगनदेशे विस्तीर्णे ॥४८६॥
हृदयेऽमानिव क्षरति यस्याः कुमारानुरागः । यावकरसरञ्जितचरणयुगलप्रतिबिम्बकपटेन ॥४८७॥
सा सविशेषप्रसाधनसाधिता मत्तकुञ्जरगत्या । मञ्जीरमञ्जुसिञ्जनश्रवणागतहंसस्खलितगतिः ॥४८८॥

---

१ ग. रमणीहिं । २ क. °यए अमायय° । ३ ख. तोव्व ।

चलिया चडाचक्कण परिवुडा नरवरिंदतणयावि । पत्ता वंदणमालाकलिए वरवेइगाभवणे ॥४८९॥
तत्तो य तक्खणागयमाहणपारद्धहुणणकम्मम्मि । तत्थेव समारद्धं पाणिग्गहणं महिड्ढीए ॥४९०॥
एत्थंतरम्मि सहरिसतरुणियणारद्धमंगलसणाहो । उवयारो सयणाणं दोहिंवि पक्खेहिं कारविओ ॥४९१॥
दावावियाइं कुंकुमविलेवणाइं सुगंधमीसाइं । तह असमकुसुमदामाइं सपरिमला तह य पडिवासा ॥४९२॥
तह पवरनागवल्लीदलाइं कप्पूरपूरकलियाइं । उल्लयपूगफलाइं वत्थाइं तह य विविहाइं ॥४९३॥
वरतुरयमंदुराओ तह कंबुप्पमुहखित्तजायाओ । तह मंदभद्दजाईउ करिघडाओ महंताओ ॥४९४॥
एत्थंतरम्मि कन्नावराण जलणे हुणिज्जमाणम्मि । चउमंडलपरिभमणं समत्थियं गुरुपमोएण ॥४९५॥
मइसायरेण ताहे कन्नाए पाणिमोयणनिमित्तं । बत्तीसं कोडीओ रुप्पसुवन्नाण दिन्नाओ ॥४९६॥
तह मणितिरीडपमुहं आभरणं तह य कणयरत्थाइं । तह पवरदुकूलाइं दिन्नाइं सुपासकुमरस्स ॥४९७॥
सुपइट्ठणरिंदेणवि हरिसभरुब्भिज्जमाणपुलएण । वहुआए दिन्नाइं वत्थाहरणाइं विविहाइं ॥४९८॥
एवं परितोसकरे वीवाहमहूसवे निवित्तम्मि । कयभोयणसक्कारे चलिए ठाणेसु लोयम्मि ॥४९९॥
मइसायरेवि नियनयरमुवगए सिरिसुपासकुमरोवि । अह सोमाए सहिओ संचलिओ नियगिहाभिमुहं ॥५००॥
मंगलतूररवेहिं बंदियणुग्घुट्ठजयजयरवेणं । बहिरिंतो दिसिवलयं सुपहाणकरेणुयारूढो ॥५०१॥
तद्दंसणूसुओ पुरजणोवि पायारभवणमालेसु । पिंडिज्जइ अन्नोन्नं बाहंतो अंगुवंगाइं ॥५०२॥

चलिता चेटीचक्रेण परिवृता नरवरेन्द्रतनयापि । प्राप्ता वन्दनमालाकलिते वरवेदिकाभवने ॥४८९॥
ततश्च तत्क्षणागतब्राह्मणप्रारब्धहवनकर्मणि । तत्रैव समारब्धं पाणिग्रहणं महद्धर्या ॥४९०॥
अत्रान्तरे सहर्षतरुणीजनारब्धमङ्गलसनाथः । उपचारः स्वजनानां द्वाभ्यामपि पक्षाभ्यां कारितः ॥४९१॥
दापितानि कुङ्कमविलेपनानि सुगन्धमिश्राणि । तथाऽसमकुसुमदामानि सपरिमलास्तथा च पटीवासाः ॥४९२॥
तथा प्रवरनागवल्लीदलानि कर्पूरपूरकलितानि । आर्द्रपूगफलानि वस्त्राणि तथा च विविधानि ॥४९३॥
वरतुरगमन्दुरास्तथा कम्बुप्रमुखक्षेत्रजाताः । तथा मन्दभद्रजातयः करिघटा महत्यः ॥४९४॥
अत्रान्तरे कन्यावरयोर्ज्वलने हूयमाने । चतुर्मण्डलपरिभ्रमणं समर्थितं गुरुप्रमोदेन ॥४९५॥
मतिसागरेण तदा कन्यायाः पाणिमोचननिमित्तम् । द्वात्रिंशत् कोट्यो रूप्यसुवर्णयोर्दत्ताः ॥४९६॥
तथा मणिकिरीटप्रमुखमाभरणं तथा च कनकरथ्यादि । तथा प्रवरदुकूलानि दत्तानि सुपार्श्वकुमाराय ॥४९७॥
सुप्रतिष्ठनरेन्द्रेणापि हर्षभरोद्भिद्यमानपुलकेन । वध्वै दत्तानि वस्त्राभरणानि विविधानि ॥४९८॥
एवं परितोषकरे विवाहमहोत्सवे निर्वृत्ते । कृतभोजनसत्कारे चलिते स्थानेषु लोके ॥४९९॥
मतिसागरेऽपि निजनगरमुपगते श्रीसुपार्श्वकुमारोऽपि । अथ सोमया सहितः संचलितो निजगृहाभिमुखम् ॥५००॥
मङ्गलतूररवैर्बन्दिजनोद्घुष्टजयजयरवेण । बधिरयन् दिग्वलयं सुप्रधानकरेणुकारूढः ॥५०१॥
तद्दर्शनोत्सुकः पुरजनोऽपि प्राकारभवनमालासु । पिण्ड्यतेऽन्योन्यं बाधमानोऽङ्गोपाङ्गानि ॥५०२॥

---

१ ग. पइवा॰ । २ क. ग. वंदु॰ । ३ ग. कंबोजप्प॰ । ४ ग. रुप्पमयभंडं । ५ ग. पीडि॰ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं च कुमरदंसणउक्कंठाचत्तगेहकम्माणं । रेहंति इत्थमालावविब्भमा पुरपुरंधीणं ॥५०३॥
निंदइ नियंबबिंबस्स अत्तणो कावि अइमहंतंपि । तुरियं कुमाररूवस्स दंसणे गंतुमतरंती ॥५०४॥
आकरिसिऊण नियथं कावि हु अद्धप्पसाहियं पायं । सहरिसहियया वच्चइ कुमाररूवं पलोएउं॥५०५॥
पीणघणत्थणभारेण निच्छणंती पए पए कावि । कुणमाणी गइभेअं हसिज्जए तरुणलोएणं ॥५०६॥
कावि हु कुंकुमसंकाए नियमुहं कज्जलेण मंडेउं । उत्तालमणा धावइ जणं हसंतंपि न गणेइ ॥५०७॥
कावि हु पभणइ एसो तिलोयपुज्जो मणोभवो देवो । कह अन्नहा निइज्जइ पट्ठीए इमस्स रइदेवी ? ॥५०८॥
अन्ना पभणइ मुद्धे ! मा जंपह एरिसं जओ तत्थ । अंगं पिईसरेणं दड्ढं कंती पुणो दूरे ॥५०९॥
तो भणइ हले ! सक्को एसो एसा सई य तस्स पिया । इयरावि भणइ बाले ! नूणं मइविब्भमो तुज्झ ॥५१०॥
जं तस्स लोयणेहिं सव्वत्तो दूसियं सरीरंपि । नूणं सुपासकुमरो एसो, सोमा पुणो एसा ॥५११॥
रयणावलीव एयाए बाहुलइया सुपासकुमरस्स । कंठयले विलुलिस्सइ ता एसच्चिय जए धन्ना ॥५१२॥
अन्ना भणइ सउत्तीए दूसिया होउ कह इमा धन्ना? । तइलोईए इमीइवि जं पई एस दुण्हंपि ॥५१३॥
एवं वियड्ढतरुणीयणस्स वयणाइं सो निसामिंतो । पत्तो भवणदुवारे अवयरइ करेणुयाए तओ ॥५१४॥
तत्थ य वारविलासिणिविहियाइं विविहमंगलसयाइं । अणुमन्निउं नमंसइ अम्मापिउपायकमलाइं ॥५१५॥
तत्थवि य पमोएणं दिव्वं विसयसुहमणुहवंतस्स । अणुवमियपुन्नपगरिसपुज्जंतसमीहियत्थस्स ॥५१६॥

एवं च कुमारदर्शनोत्कण्ठात्यक्तगेहकर्मणाम् । राजन्तीत्थमालापविभ्रमाः पुरपुरन्ध्रीणाम् ॥५०३॥
निन्दति नितम्बबिम्बमात्मनः काप्यतिमहान्तमपि । त्वरितं कुमाररूपस्य दर्शने गन्तुमशक्नुवती ॥५०४॥
आकृष्य निजकं कापि खल्वर्धप्रसाधितं पादम् । सहर्षहृदया व्रजति कुमाररूपं प्रलोकितुम् ॥५०५॥
पीनघनस्तनभारेण स्खलन्ती पदे पदे कापि । कुर्वाणा गतिभेदं हस्यते तरुणलोकेन ॥५०६॥
कापि खलु कुङ्कुमशङ्कया निजमुखं कज्जलेन मण्डयित्वा । उत्तानमना धावति जनं हसन्तमपि न गणयति॥५०७॥
कापि खलु प्रभणत्येष त्रिलोकपूज्यो मनोभवो देवः । कथमन्यथा दृश्यते पृष्ठेऽस्य रतिदेवी ? ॥५०८॥
अन्या प्रभणति मुग्धे ! मा जल्पेदृशं यतस्तत्र । अङ्गमपीश्वरेण दग्धं कान्तिः पुनर्दूरे ॥५०९॥
ततो भणति हले ! शक्र एष एषा शची च तस्य प्रिया । इतरापि भणति बाले ! नूनं मतिविभ्रमस्तव ॥५१०॥
यत्तस्य लोचनैः सर्वतो दूषितं शरीरमपि । नूनं सुपार्श्वकुमार एषः, सोमा पुनरेषा ॥५११॥
रत्नावलीवैतस्या बाहुलतिका सुपार्श्वकुमारस्य । कण्ठतले विलोठिष्यति तस्मादेषैव जगति धन्या ॥५१२॥
अन्या भणति सपत्न्या दूषिता भवतु कथमियं धन्या ? । त्रिलोक्या अस्या अपि यत् पतिरेष द्वयोरपि ॥५१३॥
एवं विदग्धतरुणीजनस्य वचनानि स निशाम्यन् । प्राप्तो भवनद्वारेऽवतरति करेणुकायास्ततः ॥५१४॥
तत्र च वारविलासिनीविहितानि विविधमङ्गलशतानि । अनुमन्य नमस्यति मातापितृपादकमलानि ॥५१५॥
तत्रापि च प्रमोदेन दिव्यं विषयसुखमनुभवतः । अनुपमितपुण्यप्रकर्षपूर्यमाणसमीहितार्थस्य ॥५१६॥

---

१ क. दड्ढं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सुरवइनिउत्तसुरगणउवणीयाभरणगंधवत्थस्स । ववगयरोगायंकस्स दलियसयलारिवग्गस्स ॥५१७॥

कइयावि हु सेवागयतुंबुरुपारद्धपंचमुग्गारं । नच्चंतसुरवहुजणं पिच्छणयं पिच्छमाणस्स ॥५१८॥

कइयावि जणयजणणीसमीवगमणेण तह य कइयावि । विसयम्मि जणविवाए निन्नयकरणम्मि निरयस्स ॥

वोलिंति वासरा इय वरिसेसुं कित्तिएसुवि गएसु । अह अन्नया य सुपइट्ठनरवई आउसेसम्मि ॥५२०॥

ठावइ सुपासकुमरं विहीए रज्जे अणिच्छमाणंपि । सयमवि पउमप्पहजिणपणीयधम्माणुसारेणं ॥५२१॥

पज्जंताणसणविहिं काउं ईसाणदेवलोगम्मि । संपत्तो पुहवी पुण पत्ता मोक्खे जओ भणियं ॥५२२॥

नागेसुं उसभपिया सेसाणं सत्त जंति ईसाणे । अट्ठ य सणंकुमारे माहिंदे अट्ठ अणुकमसो ॥५२३॥

आइजिणाणट्ठण्हं गयाओ मोक्खम्मि अट्ठ जणणीओ । अट्ठ य सणंकुमारे माहिंदे अट्ठ वच्चंति ॥५२४॥

[1]एत्तो साहियनीसेसविसमदुग्गं सुपासरायावि । रज्जं परिपालइ दलियसयलदरियारिमाहप्पं ॥५२५॥

इय समइक्कंतेसुं बहुएसुं वच्छरेसुं गब्भवई । सोमादेवी जाया कालक्कमेणं पसूया य ॥५२६॥

सुकुमालपायकरयलनिरुवमरूवोवसोहियसरीरं । तणुकंतिपसरधवलियजम्मणभवणं सुहं पत्तं ॥५२७॥

उचियसमए य सिरिसेहरोत्ति नामं महाविभूईए । तस्स कयं तो सोवि हु पंचहिं धाईहिं परियरिओ ॥५२८॥

परिवड्ढिउमारद्धो सयंवराहिं कलाहिं सयलाहिं । आगंतूणं वरिओ विणा पयत्तंपि, ऍत्तो य ॥५२९॥

जा सिरिसुपासराया चिट्ठइ भवणस्स उवरि उवविट्ठो । ता पिच्छइ विच्छायं गयणे रविमंडलं सहसा ॥५३०॥

सुरपतिनियुक्तसुरगणोपनीताभरणगन्धवस्त्रस्य । व्यपगतरोगातङ्कस्य दलितसकलारिवर्गस्य ॥५१७॥

कदापि खलु सेवागततुम्बुरुप्रारब्धपञ्चमोद्गारम् । नृत्यत्सुरवधूजनं प्रेक्षणकं पश्यतः ॥५१८॥

कदापि जनकजननीसमीपगमनेन तथाच कदापि । विषये जनविवादे निर्णयकरे निरतस्य ॥५१९॥

गच्छन्ति वासरा इति वर्षेषु कियत्स्वपि गतेषु । अथान्यदा च सुप्रतिष्ठनरपतिरायुःशेषे ॥५२०॥

स्थापयति सुपार्श्वकुमारं विधिना राज्येऽनिच्छन्तमपि । स्वयमपि पद्मप्रभजिनप्रणीतधर्मानुसारेण ॥५२१॥

पर्यन्तानशनविधिं कृत्वेशानदेवलोके । संप्राप्तः पृथिवी पुनः प्राप्ता मोक्षं यतो भणितम् ॥५२२॥

नागेषु ऋषभपिता शेषाणां सप्त यान्तीशाने । अष्ट च सनत्कुमारे माहेन्द्रेऽष्टानुक्रमशः ॥५२३॥

आदिजिनानामष्टानां गता मोक्षेऽष्ट जनन्यः । अष्ट च सनत्कुमारे माहेन्द्रेऽष्ट व्रजन्ति ॥५२४॥

इतः साधितनिःशेषविषमदुर्गं सुपार्श्वराजोऽपि । राज्यं परिपालयति दलितसकलदृप्तारिमाहात्म्यम् ॥५२५॥

इति समतिक्रान्तेषु बहुकेषु वत्सरेषु गर्भवती । सोमादेवी जाता कालक्रमेण प्रसूता च ॥५२६॥

सुकुमालपादकरतलनिरुपमरूपोपशोभितशरीरम् । तनुकान्तिप्रसरधवलितजन्मभवनं सुखं प्राप्तम् ॥५२७॥

उचितसमये च श्रीशेखर इति नाम महाविभूत्या । तस्य कृतं ततः सोऽपि हि पञ्चभिर्धात्रीभिः परिकरितः ॥५२८॥

परिवर्धितुमारब्धः स्वयंवराभिः कलाभिः सकलाभिः । आगत्य वृतो विना प्रयत्नमपि, इतश्च ॥५२९॥

यावत् श्रीसुपार्श्वराजास्तिष्ठाति भवनस्योपर्युपविष्टः । तावत् पश्यति विच्छायं गगने रविमण्डलं सहसा॥५३०॥

---

१ ग. इत्तो ।

करवत्तसरिसदाढाकडप्पदुप्पिच्छराहुणा घत्थं । थेरीणवि उड्ढमुहाण काममवलोयणिज्जं च ॥५३१॥
तह सहरिसपरिधाविरतिमिरमहारक्खसेण दुट्ठेण । कवलिज्जंतं पिच्छइ गयणपएसं समग्गंपि ॥५३२॥
एत्थंतरम्मि माहणकुडुंबिणीणं सपुत्तगहियाणं । मुंचसु सूरं राहुत्ति पुक्करंतीण हलबोलं ॥५३३॥
सोऊण खिवइ दिट्ठिं धरणीयले ताव चक्कमिहुणाइं । दोसंधयारसंकाए विहडमाणाइं पिच्छेइ ॥५३४॥
तह य विडंबिज्जंताइं कोसिएहिं वणेसु लीणाइं । संकुइयअंगुवंगाइं वायसीणं सरीराइं ॥५३५॥
तह अग्गिहोत्तिएहिं मंतपवित्तेहिं महुघयाईहिं । तम्मोयणानिमित्तं हुणिज्जमाणस्स जलणस्स ॥५३६॥
धूमपडलेण संछाइयम्मि गयणम्मि मेहसंकाए । धुयपक्खउडं पिच्छइ हंसउलं माणसे चलियं ॥५३७॥
तह मेहागमसंसियआगमणाणं पईण मुद्धाओ । मग्गमवलोयमाणीउ नियइ पाउसियदइयाओ ॥५३८॥
तत्तो खणमेत्तेणं धूमेणं मीणंउव्व उव्वमइ । राहू रविणो बिंबं सभुत्तिछेयम्मि तत्तो य ॥५३९॥
सुत्थावत्थं जायं भुवणं सचराचरंपि जा नियइ । ता खिवइ पुणो दिट्ठिं राया गयणंगणाभिमुहं ॥५४०॥
तत्थ य वियलियतिमिरं दिसाण चक्कं समग्गलपयावं । अच्छीहिं दुप्पिच्छं तेएणं नियइ रविबिंबं ॥५४१॥
तो तक्खणप्पणट्ठं तक्खणदिट्ठं च पासिउं राया । खणिगत्तभावणं चिय भावेउं सो समारद्धो ॥५४२॥
जह एसो सूरोवि हु गसिज्जए राहुणा हठेणावि । तह पाणिणो गसिज्जंति मच्चुणा नूण संसारे॥५४३॥
तह एयम्मिवि सोक्खं जं किंपि हु तंपि दुक्खपरिकलियं। चउसुवि गईसु, लोया तहवि हु एयम्मि वामूढा॥५४४॥

करपत्रसदृशदंष्ट्रानिकरदुर्दर्शराहुणा ग्रस्तम् । स्थविराणामप्यूर्ध्वमुखानां काममवलोकनीयं च ॥५३१॥
तथा सहर्षपरिधावनशीलतिमिरमहाराक्षसेन दुष्टेन । कवल्यमानं पश्यति गगनप्रदेशं समग्रमपि ॥५३२॥
अत्रान्तरे ब्राह्मणकुटुम्बिनीनां स्वपुत्रगृहीतानाम् । मुञ्च सूरं राहो ! इति पूत्कुर्वतीनां तुमुलम् ॥५३३॥
श्रुत्वा क्षिपति दृष्टिं धरणीतले तावच्चक्रमिथुनानि । दोषान्धकारशङ्कया विघटमानानि पश्यति ॥५३४॥
तथा च विडम्ब्यमानानि कौशिकैर्वनेषु लीनानि । संकुचिताङ्गोपाङ्गानि वायसीनां शरीराणि ॥५३५॥
तथाग्निहोत्रिकैर्मन्त्रपवित्रैर्मधुघृतादिभिः । तन्मोचनानिमित्तं हूयमानस्य ज्वलनस्य ॥५३६॥
धूमपटलेन संछादिते गगने मेघशङ्कया । धुतपक्षपुटं पश्यति हंसकुलं मानसे चलितम् ॥५३७॥
तथा मेघागमशंसितागमनानां पतीनां मुग्धाः । मार्गमवलोकमानाः पश्यति प्रातिवेश्मिकदयिताः ॥५३८॥
ततः क्षणमात्रेण धूमेन मीनक इवोद्वमति । राहू रवेर्बिम्बं स्वभुक्तिच्छेदे ततश्च ॥५३९॥
सुस्थावस्थं जातं भुवनं सचराचरमपि यावत् पश्यति । तावत् क्षिपति पुनर्दृष्टिं राजा गगनाङ्गणाभिमुखम्॥५४०॥
तत्र च विगलिततिमिरं दिशां चक्रं समर्गलप्रतापम् । अक्षिभ्यां दुर्दर्शं तेजसा पश्यति रविबिम्बम् ॥५४१॥
ततस्तत्क्षणप्रनष्टं तत्क्षणदृष्टं च दृष्ट्वा राजा । क्षणैकत्वभावनामेव भावयितुं स समारब्धः ॥५४२॥
यथैष सूरोऽपि खलु ग्रस्यते राहुणा हठेनापि । तथा प्राणिनो ग्रस्यन्ते मृत्युना नूनं संसारे ॥५४३॥
तथैतस्मिन्नपि सौख्यं यत् किमपि हि तदपि दुःखपरिकलितम् । चतसृष्वपि गतिषु, लोकास्तथाप्येतस्मिन्व्यामूढाः॥

---

१ ख. धूय, ग. सुय । २ ख. ग. मीणिउ । ३ ग. चउगुण ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुक्खं सहंति पत्ता तरुणीणं नयणवागुराविसयं। मयणमहापारद्धियनिसायबाणावलीविद्धा ॥५४५॥
तत्तो अपारसंसारदुक्खदावानलम्मि ते नूणं। अपरित्ताणा पुणरवि इंधणकप्पच्चिय हवंति ॥५४६॥
ता एयाओ कारागाराओव जुज्जए पलाएउं। भंजेऊणं इण्हिं पुत्तवहूनेहनियडाइं ॥५४७॥

एत्थंतरम्मि कंपियसिंहासणा ओहिनायनियकिच्चा। नरवरसुपासपासं समागया लहु इमे तियसा॥५४८॥
सारस्सयमाइच्चा वण्हिवरुणा य गद्दतोया य। तुसिया अव्वाबाहा अग्गिच्चा चेवरिट्ठा य ॥५४९॥
नमिरुत्तमंगवियलंतसुरहिमंदारकुसुमसंघाया। विणएणं जिणनाहं थोउं एवं समारद्धा ॥५५०॥
जयसि तुमं भुवणावलिसरोजवणसंडचंडमायंड !। वम्महमयंधसिंधुरकुंभयडवियारणमयंद ! ॥५५१॥
मुत्तिवहूकंठग्गहउक्कंठिय ! मलियमोहमाहप्प !। तुज्झ नमो तिहुयणरक्खणक्खणिय ! परमकारुणिय !॥५५२॥
इय थोऊणं पभणंति तुह पुरो देव ! अम्ह का गणणा। खज्जोयाणव सूरस्स दूरुद्धंधयारस्स ? ॥५५३॥
तहवि निययाहिगाराणुरूवमम्हेवि किंपि विन्नविमो। सुमरणमित्तनिमित्तं तुह पुरओ न उण उवएसो ॥५५४॥
पव्वज्जं पडिवज्जसु भवदुहवणदहणजलणजालोलिं। तह य पयट्टसु सिग्घं अणत्थनिम्मंथणं तित्थं ॥५५५॥
तह पहु ! पयंडपासंडिदेसणातिमिरनियरअंतरियं। पयडसु सिवमग्गं विमलनाणरयणप्पईवेण ॥५५६॥
इय लोगंतियदेवोवएसदुगुणप्पवड्ढिउल्लासो। सविसेसं संजाओ सिद्धिवहूसंगमासंसी ॥५५७॥
एवं विन्नविऊणं गएसु तेसुं सुपासनरनाहो। वारसियमहादाणं दाउं परिचिंतए जाव ॥५५८॥

दुःखं सहन्ते प्राप्तास्तरुणीनां नयनवागुराविषयम्। मदनमहाव्याधनिशातबाणावलीविद्धाः ॥५४५॥
ततोऽपारसंसारदुःखदावानले ते नूनम्। अपरित्राणाः पुनरपीन्धनकल्पा एव भवन्ति ॥५४६॥
तस्मादेतस्मात् कारागारादिव युज्यते पलायितुम्। भङ्क्त्वेदानीं पुत्रवधूस्नेहनिगडान् ॥५४७॥

अत्रान्तरे कम्पितसिंहासना अवधिज्ञातनिजकृत्याः। नरवरसुपार्श्वपार्श्वं समागता लघ्विमे त्रिदशाः॥५४८॥
सारस्वतादित्या वह्निवरुणाश्च गर्दतोयाश्च। तुषिता अव्याबाधा आग्नेयाश्चैवारिष्टाश्च ॥५४९॥
नम्रोत्तमाङ्गविगलत्सुरभिमन्दारकुसुमसंघाताः। विनयेन जिननाथं स्तोतुमेवं समारब्धाः ॥५५०॥
जयसि त्वं भुवनावलिसरोजवनषण्डचण्डमार्तण्ड !। मन्मथमदान्धसिन्धुरकुम्भतटविदारणमृगेन्द्र ! ॥५५१॥
मुक्तिवधूकण्ठग्रहोत्कण्ठित ! मर्दितमोहमाहात्म्य !। तुभ्यं नमस्त्रिभुवनरक्षणाक्षणिक ! परमकारुणिक !॥५५२॥
इति स्तुत्वा प्रभणन्ति तव पुरो देव ! अस्माकं का गणना। खद्योतानामिव सूरस्य दूररुद्धान्धकारस्य ? ॥५५३॥
तथापि निजकाधिकारानुरूपं वयमपि किमपि विज्ञपयामः। स्मरणमात्रनिमित्तं तव पुरतो न पुनरुपदेशः ॥५५४॥
प्रव्रज्यां प्रतिपद्यस्व भवदुःखवनदहनज्वलनज्वालालिम्। तथा च प्रवर्तय शीघ्रमनर्थनिर्मन्थनं तीर्थम् ॥५५५॥
तथा प्रभो ! प्रचण्डपाषण्डिदेशनातिमिरनिकरान्तरितम्। प्रकटय शिवमार्गं विमलज्ञानरत्नप्रदीपेन ॥५५६॥
इति लोकान्तिकदेवोपदेशद्विगुणप्रवर्धितोल्लासः। सविशेषं संजातः सिद्धिवधूसंगमाशंसी ॥५५७॥
एवं विज्ञप्य गतेषु तेषु सुपार्श्वनरनाथः। वार्षिकमहादानं दातुं परिचिन्तयति यावत् ॥५५८॥

---

१ क. °हिणाय।

ता तक्खणंपि चलियं सीहासणममलरयणपहपयडं । सोहम्मदेवलोए सुहासणत्थस्स सक्कस्स ॥५५९॥
तच्चलणाणंतर अवहिणा य नाऊण जिणमणवियप्पं । सो सत्तट्ठ पयाइं उट्ठिय गंतूण तयभिमुहं ॥५६०॥
थोऊण जिणं चिंतिउमारद्धो जह सुपासजिणनाहो । इच्छइ दाणं दाउं आवरिसं तस्स तो मज्झ ॥५६१॥
जुज्जइ धणसंपत्तिं काउं, इय तक्खणंपि वेसमणं । आणवइ जहा निक्खमणदाणजोग्गं जिणगिहम्मि ॥५६२॥
खिवसु पभूयं कणगं, इय सोउं सक्कसासणं सोवि । आणवइ जंभगसुरे पडिच्छिउं तेवि विणएण ॥५६३॥
जिणमंदिरम्मि वरिसंति कणयरासिं तओ य भयवंपि । चच्चरचउक्कचउमुहमहापहप्पमुहठाणेसु ॥५६४॥
अणविक्खियमुहमणिवारियं च वरवरियघोसणापुव्वं । सव्वाण विएगत्थं पत्थणउत्ताणियकराणं ॥५६५॥
अणुदियहं दावावइ कणयं, तस्सावि दिज्जमाणस्स । दिवसे दिवसे दिज्जइ अडलक्खहिया कणयकोडी ॥५६६॥
अह नवपरिणयलवलीफलभरधवलाए धवलिया तस्स । अणवरयकणयदाणुब्भवाए कित्तीए दिसिनिवहा ॥
तत्तो य दूरदेसा केसुवि इंतेसु मग्गणगणेसुं । अन्नेसुं च हिरण्णं गहिऊण नियत्तमाणेसु ॥५६८॥
रुंदासुवि रत्थासुं वाणारसिपुरवरीए मज्झम्मि । दुक्खेण भमइ लोओ निद्दयनिद्दलियवच्छयलो ॥५६९॥
एत्थ तवणिज्जपुंजे एत्थ य वत्थे पवित्थरह सिग्घं । एत्थ य रयणुक्केरं मग्गणजोग्गं निवेसेह ॥५७०॥
इह करितुरयरहाई ठवह विरएह एत्थ विउलाओ । भोअणसालाउ तहा आहारत्थं विदेसीणं ॥५७१॥
एवं दाणनिमित्तं निउत्तपुरिसाण वच्छरं जाव । अणिसं समाइसंताण किं करे हवइ उल्लावो ॥५७२॥

तावत् तत्क्षणमपि चलितं सिंहासनममलरत्नप्रभाप्रकटम् । सौधर्मदेवलोके सुखासनस्थस्य शक्रस्य ॥५५९॥
तच्चलनानन्तरमवधिना च ज्ञात्वा जिनमनोविकल्पम् । स सप्ताष्ट पदानि उत्थाय गत्वा तदभिमुखम् ॥५६०॥
स्तुत्वा जिनं चिन्तयितुमारब्धो यथा सुपार्श्वजिननाथः । इच्छति दानं दातुमावर्षं तस्य ततो मम ॥५६१॥
युज्यते धनसंपत्तिं कर्तुमिति तत्क्षणमपि वैश्रमणम् । आज्ञपयति यथा निष्क्रमणदानयोग्यं जिनगृहे ॥५६२॥
क्षिप प्रभूतं कनकम्, इति श्रुत्वा शक्रशासनं सोऽपि । आज्ञपयति जृम्भकसुरान् प्रत्येष्टुं तेऽपि विनयेन ॥५६३॥
जिनमन्दिरे वर्षन्ति कनकराशिं ततश्च भगवानपि । चत्वरचतुष्कचतुर्मुखमहापथप्रमुखस्थानेषु ॥५६४॥
अनवेक्षितमुखमनिवारितं च वरवारिकाघोषणापूर्वम् । सर्वेभ्यो विवेकार्थं प्रार्थनोत्तानितकरेभ्यः ॥५६५॥
अनुदिवसं दाप्यते कनकं, तस्यापि दीयमानस्य । दिवसे दिवसे दीयतेऽष्टलक्षाधिका कनककोटिः ॥५६६॥
अथ नवपरिणयलवलीफलभरधवलया धवलितास्तस्य । अनवरतकनकदानोद्भवया कीर्त्या दिङ्निवहाः ॥५६७॥
ततश्च दूरदेशात् केष्वप्यायत्सु मार्गणगणेषु । अन्येषु च हिरण्यं गृहीत्वा निवर्तमानेषु ॥५६८॥
विशालास्वपि रथ्यासु वाराणसीपुरवराया मध्ये । दुःखेन भ्रमति लोको निर्दयनिर्दलितवक्षस्तलः ॥५६९॥
अत्र तपनीयपुञ्जानत्र च वस्त्राणि प्रविस्तृणीत शीघ्रम् । अत्र च रत्नोत्करं मार्गणयोग्यं निवेशयत ॥५७०॥
इह करितुरगरथादीन् स्थापयत विरचयतात्र विपुलाः । भोजनशालास्तथाऽऽहारार्थं विदेशिनाम् ॥५७१॥
एवं दाननिमित्तं नियुक्तपुरुषाणां वत्सरं यावत् । अनिशं समादिशतां किं कुर्वे भवत्युल्लापः ॥५७२॥

---

१ ग, °क्खाहियक° ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तिन्नेव य कोडिसया अट्ठासीयं च हुंति कोडीओ। असियं च सयसहस्सा सव्वंको वइयकणयस्स॥५७३॥
इय आवरिसं कंचणवरिसेणं तप्पिऊण भवणंपि। निम्मग्गणं विहेउं सद्दावइ मंतिणो राया॥५७४॥
तह तलवरसेणाहिवकोसाहिवमंडलीयसामंते। नयरीपहाणलोएण संजुए, ताण पच्चक्खं॥५७५॥
ठविउं सव्वंगंपि हु कुमारे सिरिसेहरम्मि नियरज्जं। नीइत्ति दंतकंतिं विरयंतो भणइ वयणमिणं॥५७६॥
तुम्हाण एस सामी देवाणुपियाणुमन्नह इयाणिं। मं सव्वविरइग्गहणे, तेवि हु सोऊण विम्हइया॥५७७॥
जंपंति वज्जमइया सवणा अम्हाण नूण जे अज्ज। बहिरत्तणं न पत्ता इमाए वयणासणीए लहुं॥५७८॥
इय एवमाइसकलुणवयणाणि पयंपिरा कहकहंपि। अणुमन्नंति नरिंदं गुरुनिब्बंधेण जंपंतं॥५७९॥
अह सिरिसेहरराया नयणंसुनिवायमइलियकवोलो। चलणेसु निवडिऊणं विन्नवइ कहंपि जयगुरुणो॥५८०॥
जइवि परिक्खीणमोहा तुब्भे विरया य सव्वविरईए। तहवि हु निक्खमणमहं पडिवज्जह मज्झ पसिऊण॥५८१॥
तस्सुवरोहेण इमं पडिसुणइ सुपासजिणवरो तत्तो। सिरिसेहरनिवआणापवत्तिया वेत्तिआ तुरियं॥५८२॥
अट्ठुत्तरं सहस्सं सुवन्नकलसाण तत्थ आणिंति। सुपसत्थतित्थसलिलं दिव्वाओ तहोसहीओ य॥५८३॥
घणसारमीसचंदणपमुहाइं विलेवणाइं सुरहीणि। जिणमज्जणत्थमुवणिंति तत्थ, एत्थन्तरे ताव॥५८४॥
बत्तीसंपि सुरिंदा कंपियसीहासणा मुणेऊण। ओहीए परमत्थं पवरविमाणेसु आरूढा॥५८५॥
वियसियसयवत्तविसाललोयणा जोव्वणुब्भडविलासा। बहुदेवकोडिकोडीहि परिवुडा चारुरूवधरा॥५८६॥

त्रीण्येव च कोटिशतान्यष्टाशीतिश्च भवन्ति कोटयः। अशीतिश्च शतसहस्राणि सर्वाङ्को व्ययितकनकस्य॥५७३॥
इत्यावर्षं काञ्चनवर्षेण तर्पयित्वा भवनमपि। निर्मार्गणं विधाय शब्दाययति मन्त्रिणो राजा॥ ५७४॥
तथा तलवरसेनाधिपकोशाधिपमण्डलिकसामन्तान्। नगरीप्रधानलोकेन संयुतान्, तेषां प्रत्यक्षम्॥ ५७५॥
स्थापयित्वा सर्वाङ्गमपि हि कुमारे श्रीशेखरे निजराज्यम्। नीतिरिति दन्तकान्तिं विरचयन्भणति वचनमिदम्॥
युष्माकमेष स्वामी देवानुप्रियाः! अनुमन्यध्वमिदानीम्। मां सर्वविरतिग्रहणे, तेऽपि खलु श्रुत्वा विस्मिताः॥
जल्पन्ति वज्रमयाः श्रवणा अस्माकं नूनं येऽद्य। बधिरत्वं न प्राप्ता अनेन वचनाशनिना लघु॥५७८॥
इत्येवमादिसकरुणवचनानि प्रजल्पितारः कथंकथमपि। अनुमन्यन्ते नरेन्द्रं गुरुनिर्बन्धेन जल्पन्तम्॥५७९॥
अथ श्रीशेखरराजो नयनाश्रुनिपातमलिनितकपोलः। चरणयोर्निपत्य विज्ञपयति कथमपि जगद्गुरून्॥५८०॥
यद्यपि परिक्षीणमोहा यूयं विरताश्च सर्वविरत्याः। तथापि खलु निष्क्रमणमहं प्रतिपद्यध्वं मम प्रसीद्य॥५८१॥
तस्योपरोधेनेमं प्रतिशृणोति सुपार्श्वजिनवरस्ततः। श्रीशेखरनृपाज्ञाप्रवर्तिता वैत्रिकास्त्वरितम्॥५८२॥
अष्टोत्तरं सहस्रं सुवर्णकलशानां तत्रानयन्ति। सुप्रशस्ततीर्थसलिलं दिव्यास्तथौषधीश्च॥५८३॥
घनसारमिश्रचन्दनप्रमुखानि विलेपनानि सुरभीणि। जिनमज्जनार्थमुपनयन्ति तत्र, अत्रान्तरे तावत्॥५८४॥
द्वात्रिंशदपि सुरेन्द्राः कम्पितसिंहासना ज्ञात्वा। अवधिना परमार्थं प्रवरविमानेष्वारूढाः॥५८५॥
विकसितशतपत्रविशाललोचना यौवनोद्भटविलासाः। बहुदेवकोटिकोटिभिः परिवृताश्चारुरूपधराः॥५८६॥

---

१ ग. सत्तंगं। २ क. ग. मयिल°। ३ ख. ग. °रिक्भीण। ४ क. वरिया, ग. परिया°।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पडुपैडहसंखकाहलमुइंगतलिमाइतूरघोसेण । बहिरियबंभंडा जिणवरिंदपासं समल्लीणा ॥५८७॥
जयपहुणो पयपउमं तिपयाहिणपुव्वगं पणमिऊण । भवणंगणे निसन्ना जिणपयविन्नाससुपइत्ते ॥५८८॥
अह अच्चुयसक्केणं नियदेवा पभणिया जहा सिग्घं । निव्वत्तेह समग्गं निक्खमणभिसेयसामग्गिं ॥५८९॥
जिणवरदिक्खासमउत्ति एयमायन्निउं कयपणामा । पवरकणयाइकलसे खीरोयजलेण पडिपुन्ने ॥५९०॥
सुसुयंधपुप्फपडलाइं तहय अन्नं च जंपि पाउग्गं । सुपहाणवत्थुनिवहं अच्चुयसक्कस्स उवणिंति ॥५९१॥
तत्तो अच्चुयतियसाहिवोवि देवेहिं परिगओ तेहिं । कणयाइमहाकुंभेहिं अट्ठसाहस्ससंखेहिं ॥५९२॥
दिव्वोसहिमीसेहिं मंदिरमंदरट्ठियं जिणवरिंदं । हरिसुल्लसंतदेहो अहिसिंचइ गरुयभत्तीए ॥५९३॥
एवं सुराहिवइणो सेसावि हु चंदसूरपज्जंता । मज्जंति जिणं तो तेसु संठिएसुं सठाणम्मि ॥५९४॥
सिरिसेहरनरनाहो विणयपरो अप्पमत्तचित्तो य । भत्तीए दुकूलंचलनिम्मियमुहकोसविन्नासो ॥५९५॥
पुव्वुवणीएहिं तेहिं कणयाइमएहिं कलससहस्सेहिं । तित्थजलपूरिएहिं मज्जेइ जिणं जएक्कपहुं ॥५९६॥
एवं च वट्टमाणे जिणवरमज्जणमहूसवे तत्थ । केवि सुरिंदा चालिंति उभयपक्खेसु सियचमरे ॥५९७॥
केवि हु धवलिमनिज्जियसियसयवत्ताइं आयवत्ताइं । धारिंति ठवंति पुरो अखंपणं दप्पणं केवि ॥५९८॥
उप्पाडिंति य डज्झंतअगुरुघणसारधूवधूमेण । अंधारियदिसिवलयं वरधूवकडच्छुयं केवि ॥५९९॥
पणवन्नकुसुममालाउ परिमलामिलियभसलमालाओ । केवि पयरंति अन्ने य पज्जुवासिंति भयवंतं ॥६००॥
अह निव्वत्ते मज्जणमहम्मि सिरिसेहरेण नरवइणा । सीहासणमन्नयरं ठावियमह उत्तराभिमुहं ॥६०१॥

पटुपटहशङ्खकाहलमृदङ्गतलिमादितूरघोषेण । बधिरितब्रह्माण्डा जिनवरेन्द्रपार्श्वं समालीनाः ॥५८७॥
जगत्प्रभोः पादपद्मं त्रिप्रदक्षिणापूर्वकं प्रणम्य । भवनाङ्गणे निषण्णा जिनपादविन्याससुपवित्रे ॥५८८॥
अथाच्युतशक्रेण निजदेवाः प्रभणिता यथा शीघ्रम् । निर्वर्तयत समग्रां निष्क्रमणाभिषेकसामग्रीम् ॥५८९॥
जिनवरदीक्षासमय इत्येवमाकर्ण्य कृतप्रणामाः । प्रवरकनकादिकलशान् क्षीरोदजलेन परिपूर्णान् ॥५९०॥
सुसुगन्धपुष्पपटलानि तथान्यं च यदपि प्रायोग्यम् । सुप्रधानवस्तुनिवहमच्युतशक्रमुपनयन्ति ॥५९१॥
ततोऽच्युतत्रिदशाधिपोऽपि देवैः परिगतस्तैः । कनकादिमहाकुम्भैरष्टसहस्रसंख्यैः ॥५९२॥
दिव्यौषधिमिश्रैर्मन्दिरमन्दरस्थितं जिनवरेन्द्रम् । हर्षोल्लसद्देहोऽभिषिञ्चति गुरुभक्त्या ॥५९३॥
एवं सुराधिपतयः शेषा अपि हि चन्द्रसूरपर्यन्ताः । मज्जयन्ति जिनं ततस्तेषु संस्थितेषु स्वस्थाने ॥५९४॥
श्रीशेखरनरनाथो विनयपरोऽप्रमत्तचित्तश्च । भक्त्या दुकूलाञ्चलनिर्मितमुखकोशविन्यासः ॥५९५॥
पूर्वोपनीतैस्तैः कनकादिमयैः कलशसहस्रैः । तीर्थजलपूरितैर्मज्जयति जिनं जगदेकप्रभुम् ॥५९६॥
एवं च वर्तमाने जिनवरमज्जनमहोत्सवे तत्र । केऽपि सुरेन्द्राश्चालयन्त्युभयपक्षयोः सितचामरान् ॥५९७॥
केऽपि हि धवलिमानिर्जितसितशतपत्राण्यातपत्राणि । धारयन्ति स्थापयन्ति पुरोऽमलं दर्पणं केऽपि ॥५९८॥
उत्पादयन्ति च दह्यमानागुरुघनसारधूपधूमेन । अन्धकारितदिग्वलयं वरधूपदर्वीं केऽपि ॥५९९॥
पञ्चवर्णकुसुममालाः परिमलमिलितभ्रमरमालाः । केऽपि प्रकुर्वन्त्यन्ये च पर्युपासते भगवन्तम् ॥६००॥

तत्थ ठियं च जिणिंदं ण्हविऊणं सेयपीयकलसेहिं । पुव्वाभिमुहे सीहासणम्मि निसियावए तत्तो ॥६०२॥
तत्थट्ठियस्स सुउमालगंधकासाइलूहियंगस्स । गोसीससुरहिचंदणचच्चियदेहस्स देवस्स ॥६०३॥
परिहियफलिहुज्जलदेवदूसजुयलस्स वच्छदेसम्मि । घोलंतविमलनिच्चलनवमुत्ताहलकलावस्स ॥६०४॥
मणिमंडियकुंडलजुअलकिरणकब्बुरियगंडभायस्स । रयणमयमउडमंडियमुद्धस्स सुपासनाहस्स ॥६०५॥
नमिऊण चलणजुयलं पुणोवि धरणियलनिहियसिरकमला । आसीसाहिं थुणिउं सुरासुरिंदा समारद्धा ॥
कहं विय ?
विजयसु कुतित्थसत्थं दलसु महामोहमल्लमाहप्पं । उच्छिंदसु मिच्छत्तं मुत्तिपहं पयडसु जणाणं ॥६०७॥
पालसु सुसमणधम्मं सयलंतरसत्तुसिन्ननिम्महणं । कुणसु जयस्सवि अजयं रइप्पियं जयसु तं नाह ! ॥६०८॥
इय थोउं भुवणगुरुं हरिसियहियएहिं सव्वसक्केहिं । ससुरासुरमणुएहिं पुरओ य पयट्टियं नट्टं ॥६०९॥
एत्थंतरम्मि भाविरनियपिउगुरुविरहग्गिदूमियमणेण । सिरिसेहरेण भणिया नियपुरिसा भो जहा सिग्घं ॥
तिजयपहुणो निमित्तं चंदणरसलिहियसत्थियपसत्थं । मज्झनिवेसियमणिमयसपायवीढासणसणाहं ॥६११॥
रंगंतविविहचिंधं मणोरमानामियं महासिवियं । निव्वत्तहत्ति तेवि हु सोऊणं सामिणो वयणं ॥६१२॥
निव्वत्तंति तहच्चिय सव्वं इत्थंतरम्मि सक्केण । हरिसुल्लसंतहियएण नियसुरा एवमाणत्ता ॥६१३॥
भो भो महग्घमणिखंडमंडियं मुक्कसुत्तिओचूलं । तुल्लं मणोरमाए सहस्सनरवाहिणिं सिवियं ॥६१४॥

अथ निर्वृत्ते मज्जनमहे श्रीशेखरेण नरपतिना । सिंहासनमन्यतरत् स्थापितमथोत्तराभिमुखम् ॥६०१॥
तत्र स्थितं च जिनेन्द्रं स्नपयित्वा श्वेतपीतकलशैः । पूर्वाभिमुखे सिंहासने निषादयति ततः ॥६०२॥
तत्र स्थितस्य सुकुमालगन्धकाषायिरूक्षिताङ्गस्य । गोशीर्षसुरभिचन्दनचर्चितदेहस्य देवस्य ॥६०३॥
परिहितस्फटिकोज्वलदेवदूष्ययुगलस्य वक्षोदेशे । घूर्णमानविमलनिश्चलनवमुक्ताफलकलापस्य ॥६०४॥
मणिमण्डितकुण्डलयुगलकिरणकर्बुरितगण्डभागस्य । रत्नमयमुकुटमण्डितमूर्ध्नः सुपार्श्वनाथस्य ॥६०५॥
नत्वा चरणयुगलं पुनरपि धरणीतलनिहितशिरःकमलाः । आशीर्भिः स्तोतुं सुरासुरेन्द्राः समारब्धाः ॥६०६॥
कथमिव ?
विजयस्व कुतीर्थसार्थं दलय महामोहमल्लमाहात्म्यम् । उच्छिन्तस्व मिथ्यात्वं मुक्तिपथं प्रकटय जनानाम् ॥६०७॥
पालय सुश्रमणधर्मं सकलान्तरशत्रुसैन्यनिर्मन्थनम् । कुरुष्व जगतोऽप्यजय्यं रतिप्रियं जय त्वं नाथ ! ॥६०८॥
इति स्तुत्वा भुवनगुरुं हर्षितहृदयैः सर्वशक्रैः । ससुरासुरमनुजैः पुरतश्च प्रवर्तितं नाट्यम् ॥६०९॥
अत्रान्तरे भाविनिजपितृगुरुविरहाग्निदावितमनसा । श्रीशेखरेण भणिता निजपुरुषा भो यथा शीघ्रम् ॥६१०॥
त्रिजगत्प्रभोर्निमित्तं चन्दनरसलिखितस्वस्तिकप्रशस्तम् । मध्यनिवेशितमणिमयसपादपीठासनसनाथम् ॥६११॥
रङ्गद्विविधचिह्नां मनोरमानामिकां महाशिबिकाम् । निर्वर्तयतेति तेऽपि हि श्रुत्वा स्वामिनो वचनम् ॥६१२॥
निर्वर्तयन्ति तथैव सर्वमत्रान्तरे शक्रेण । हर्षोल्लसद्धृदयेन निजसुरा एवमाज्ञप्ताः ॥६१३॥
भो भो महार्घमणिखण्डमण्डितां मुक्ताशुक्तचवचूलाम् । तुल्यां मनोरमया सहस्रनरवाहिनीं शिबिकाम् ॥६१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रइऊणं खिवह लहुं मज्झम्मि मणोरमाए सिवियाए। तेवि हु सक्काएसं तहत्ति कुव्वंति संतुट्ठा ॥६१५॥
अह सिरिसुपासनाहो सयलालंकारलंकियसरीरो। कयछट्ठतवोकम्मो तियसाहिवईहिं विन्नत्तो ॥६१६॥
उट्ठेऊणं सीहासणाओ तमणुप्पयाहिणीकाउं। आरुहइ महासिवियं मणोरमं तीए मज्झम्मि ॥६१७॥
पुव्वाभिमुहे मणिरयणमइयसीहासणम्मि उवविट्ठो। तत्तोवि अम्मधाईवि वामपासं निसण्णा से ॥६१८॥
कुलमयहरियावि तहा सुइभूया गहियपवरनेवत्था। गहिऊण साडयं हंसलक्खणं दाहिणे पासे ॥६१९॥
भद्दासणे निसन्ना तहा य सामिस्स पच्छिमदिसाए। वरतरुणी सियच्छत्तं धरमाणी ठाइ अन्निक्का ॥६२०॥
तह चलिरचवलचामरजुयलं गहिऊण दोसु पासेसुं। वरवारसुंदरीओ हवंति सिंगारपवराओ ॥६२१॥
उत्तरपुरत्थिमम्मि भागम्मि विलासिणी हवइ अन्ना। गहिऊणं भिंगारं सुरकरिकरनालगागारं ॥६२२॥
एवं दाहिणपोरत्थिमम्मि भागम्मि सुंदरी एगा। गहिऊण तालविंटं करकमले ठाइ हरिसेण ॥६२३॥
तह पिट्ठओ य वेरुलियमइयदंडाइं आयवत्ताइं। धारिंति सुरिंदा सरयपुन्नचंदप्पगासाइं ॥६२४॥
तह दोसुवि पासेसुं सिवियाए ठिया सिएहिं चमरेहिं। सोहम्मीसाणिंदा वीयंति सुपासजिणयंदं ॥६२५॥
एत्थंतरम्मि नियसियसियवत्था समवया पवररूवा। निरुवहयंगा बलसालिणो य कयसव्वकायव्वा ॥६२६॥
रोमंचंचियदेहा सहस्ससंखा नरा महासिवियं। तं सिरिसेहरनरवरवयणेणं उक्खिवंति लहुं ॥६२७॥
वच्चंतीए तीए सोहम्मीसाणनायगा दोवि। दाहिणउत्तरबाहुं गिण्हंति गुरुप्पमोएण ॥६२८॥
सिवियाए दाहिणुत्तरहिट्ठिमबाहाओ दोवि असुरिंदा। चमरबलिनामधेया हरिसेण समुव्वहंति तओ ॥६२९॥

रचयित्वा क्षिपत लघु मध्ये मनोरमायाः शिबिकायाः। तेऽपि खलु शक्रादेशं तथेति कुर्वन्ति संतुष्टाः ॥६१५॥
अथ श्रीसुपार्श्वनाथः सकलालंकारालंकृतशरीरः। कृतषष्ठतपःकर्मा त्रिदशाधिपतिभिर्विज्ञप्तः ॥६१६॥
उत्थाय सिंहासनात् तामनुप्रदक्षिणीकृत्य। आरोहति महाशिबिकां मनोरमां तस्या मध्ये ॥६१७॥
पूर्वाभिमुखे मणिरत्नमयसिंहासन उपविष्टः। ततोऽप्यम्बाधात्र्यपि वामपार्श्वे निषण्णा तस्य ॥६१८॥
कुलमहत्तरापि तथा शुचिभूता गृहीतप्रवरनेपथ्या। गृहीत्वा शाटकं हंसलक्षणं दक्षिणे पार्श्वे ॥६१९॥
भद्रासने निषण्णा तथा च स्वामिनः पश्चिमदिशि। वरतरुणी सितच्छत्रं धरमाणा तिष्ठत्यन्यैका ॥६२०॥
तथा चलनशीलचपलचामरयुगलं गृहीत्वा द्वयोः पार्श्वयोः। वरवारसुन्दर्यो भवन्ति शृङ्गारप्रवराः ॥६२१॥
उत्तरपौरस्त्ये भागे विलासिनी भवत्यन्या। गृहीत्वा भृङ्गारं सुरकरिकरनालकाकारम् ॥६२२॥
एवं दक्षिणपौरस्त्ये भागे सुन्दर्येका। गृहीत्वा तालवृन्तं करकमले तिष्ठति हर्षेण ॥६२३॥
तथा पृष्ठतश्च वैडूर्यमयदण्डान्यातपत्राणि। धारयन्ति सुरेन्द्राः शरत्पूर्णचन्द्रप्रकाशानि ॥६२४॥
तथा द्वयोरपि पार्श्वयोः शिबिकायाः स्थिताः सितैश्चामरैः। सौधर्मेशानेन्द्रौ वीजयतः सुपार्श्वजिनचन्द्रम् ॥६२५॥
अत्रान्तरे निवसितसितवस्त्राः समवयसः प्रवररूपाः। निरुपहताङ्गा बलशालिनश्च कृतसर्वकर्तव्याः ॥६२६॥
रोमाञ्चाञ्चितदेहाः सहस्रसंख्या नरा महाशिबिकाम्। तां श्रीशेखरनरवरवचनेनोत्क्षिपन्ति लघु ॥६२७॥
व्रजन्त्यास्तस्याः सौधर्मेशाननायकौ द्वावपि। दक्षिणोत्तरबाहुं गृह्णीतो गुरुप्रमोदेन ॥६२८॥

भवणवइवाणमंतरजोइसवेमाणिया सुरसमूहा। अवसेसावि हु सिवियं जहारिहं उक्खिविंति तहा ॥६३०॥
किं बहुणा ?
पुव्वं उक्खित्ता नरवरेहिं पुलऊससंतगत्तेहिं । पच्छा वहंति सिवियं असुरिंदसुरिंदनागिंदा ॥६३१॥
भवणाओ नीहरंते जिणम्मि चाउव्विहेहिं देवेहिं । इंतेहिं य जंतेहि य कहमिव उब्भासियं गयणं ॥६३२॥
सिद्धत्थचूयचंपयकेसरकणियारकुरुवगवणंव । कुसुमभरेहिंव सोहइ नहंगणं तियसविंदेहिं ॥६३३॥
वरपडहभेरिझल्लरिदुंदुहिसंखाइतूरनिग्घोसो । धरणियले गयणयले पयट्टिओ मणुयदेवेहिं ॥६३४॥
एवं च वच्चमाणस्स तिजयबंधुस्स आणुपुव्वीए । सत्थियपमुहा अट्ठवि मंगलगा पट्ठिया पुरओ ॥६३५॥
तत्तो संपुन्नकलसा भिंगारा तह[1] य वेजयंतीओ । तह दिव्वमायवत्तं पलंबकोरिंटमालिल्लं ॥६३६॥
सीहासणं च निम्मलमणिमयपयपीढसंजुयं विउलं । संचलियं तह पुरओ नरधरियं पाउयाजुयलं ॥६३७॥
रविरहतुरयसमाणं चामीयरमयखलीणजुत्ताणं । नरखित्ताणं पट्ठियमट्ठसयं जच्चतुरयाणं ॥६३८॥
तह य पगिट्ठाण पुरो अट्ठसयं कुंजराण मत्ताणं । आरोहपउत्ताणं सत्तंगपइट्ठियाणं च ॥६३९॥
जुत्तियतुरंगमाणं रहाण करकलियआउहाणं च । सुहडाणं अट्ठसयं पत्तेयं पट्ठियं तत्तो ॥६४०॥
रहगयहयअणियाइं पुरओ संपट्ठियाइं वेगेण । तह पायत्ताणीयं अमुणियसंखं असंखबलं ॥६४१॥
तयणंतरं च गरुयत्तणेण गयणंपि परिमिणंतोव्व । सुरपाणिपरिग्गहिओ माहिंदझओ अइविलोलो॥६४२॥

शिबिकाया दक्षिणोत्तराधस्तनबाहू द्वावप्यसुरेन्द्रौ । चमरबलिनामधेयौ हर्षेण समुद्वहतस्ततः ॥६२९॥
भवनपतिवानव्यन्तरज्यौतिषवैमानिकाः सुरसमूहाः। अवशेषा अपि हि शिबिकां यथार्हमुत्क्षिपन्ति तथा॥६३०॥
किं बहुना ?
पूर्वमुत्क्षिप्ता नरवरैः पुलकोच्छ्वसद्गात्रैः । पश्चाद् वहन्ति शिबिकामसुरेन्द्रसुरेन्द्रनागेन्द्राः ॥६३१॥
भवनाद् निःसरति जिने चतुर्विधैर्देवैः । आयद्भिश्च याद्भिश्च कथमिवोद्भासितं गगनम् ॥६३२॥
सिद्धार्थचूतचम्पककेशरकर्णिकारकुरुबकवनमिव । कुसुमभरैरिव शोभते नभोऽङ्गणं त्रिदशवृन्दैः ॥६३३॥
वरपटहभेरीझल्लरीदुन्दुभिशङ्खादितूरनिर्घोषः । धरणीतले गगनतले प्रवर्तितो मनुजदेवैः ॥६३४॥
एवं च व्रजतस्त्रिजगद्बन्धोरानुपूर्व्या । स्वस्तिकप्रमुखान्यष्टापि मङ्गलकानि प्रस्थितानि पुरतः ॥६३५॥
ततः संपूर्णकलशा भृङ्गारास्तथा च वैजयन्त्यः । तथा दिव्यमातपत्रं प्रलम्बकुरण्टमालावत् ॥६३६॥
सिंहासनं च निर्मलमणिमयपादपीठसंयुतं विपुलम् । संचलितं तथा पुरतो नरधृतं पादुकायुगलम् ॥६३७॥
रविरथतुरगसमानां चामीकरमयखलीनयुक्तानाम् । नरक्षिप्तानां प्रस्थितमष्टशतं जात्यतुरगाणाम् ॥६३८॥
तथा च प्रकृष्टानां पुरोऽष्टशतं कुञ्जराणां मत्तानाम् । आरोहप्रयुक्तानां सप्ताङ्गप्रतिष्ठितानां च ॥६३९॥
यौक्त्रिकतुरङ्गमाणां रथानां करकलितायुधानां च । सुभटानामष्टशतं प्रत्येकं प्रस्थितं ततः ॥६४०॥
रथगजहयानीकानि पुरतः संप्रस्थितानि वेगेन । तथा पादातानीकमज्ञातसंख्यमसंख्यबलम् ॥६४१॥

---

[1] ग. नरवईयं ।

तत्तो य दंडिणो मुंडिणो य हासंकरा य खिड्डकरा । गायंता वायंता नच्चंता तह पसंसंता ॥६४३॥
जय-जयरवं कुणंता पयडंता मंगलीयसहस्साइं । जिणगुणगणं थुणंता सव्वेवि हु पट्ठिया तुरियं ॥६४४॥
सेणावइमंतिमहंतखत्तिणो सिट्ठिणो य सत्थाहा । संपट्ठिया य पुरओ नियनियजाणेसु आरूढा ॥६४५॥
सिरिसेहरनरनाहो सुइभूओ गंधसिंधुरारूढो । धुव्वंतधवलचमरो जिणवरमणुगंतुमारद्धो ॥६४६॥
एवं सुरनरनियराणुगम्ममाणो सुपासजिणनाहो । धणुसयदुगतणुमाणो समाणचउरंससंठाणो ॥६४७॥
अच्चिज्जंतो पम्हलविसालनयणुप्पलेहिं रमणीहिं । आणंदनिब्भरं विबुहविंदगिज्जंतजयसद्दो ॥६४८॥
परिचत्तपाणभोयणपासायारूढपिच्छिरजणेहिं । मुच्चंतकुसुमवरिसो थुव्वंतो बंदिवंदेहिं ॥६४९॥
नूणं एस असारो संसारो एरिसेहिं जं चत्तो । इय चित्ते जणयंतो ससुरासुरमणुयनाहाणं ॥६५०॥
सलहिज्जंतो मंगलमुहलाहिं गलंतअंसुधाराहिं । वारविलयावलीहिं अत्ताणं सोयमाणीहिं ॥६५१॥
एगत्तो सिरिसेहरपमुहेहिं खत्तिएहिं आवरिओ । अन्नत्तो सोमाभिहपमुहंतेउरपुरंधीहिं ॥६५२॥
पत्तो सुपासनाहो सहसंबवणाभिहाणमुज्जाणं । कयसद्दं पिव उच्छलियकोइलाकोमलरवेहिं ॥६५३॥
नच्चंतं पिव पवणंदोलिरकंकेल्लिपल्लवकरेहिं । गायंतं पिव बहुविहविहंगकुलतुमुलसद्देहिं ॥६५४॥
पणमंतं पिव मिउपवणनमिरतरुसिहरउत्तमंगेहिं । हासं पिव पयडंतं वियसियकुसुमट्टहासेहिं ॥६५५॥
सवियासकुसुमवियलियमयरंदाणंदअंसुबिंदूहिं । उक्खित्तबहलधूयंव परिमलुम्मीसपवणेहिं ॥६५६॥

तदनन्तरं च गुरुत्वेन गगनमपि परिमिमाण इव । सुरपाणिपरिगृहीतो माहेन्द्रध्वजोऽतिविलोलः ॥६४२॥
ततश्च दण्डिनो मुण्डिनश्च हास्यकराश्च खिड्डकराः । गायन्तो वादयन्तो नृत्यन्तस्तथा प्रशंसन्तः॥६४३॥
जयजयरवं कुर्वन्तः प्रकटयन्तो मङ्गलिकसहस्राणि । जिनगुणगणं स्तुवन्तः सर्वेऽपि खलु प्रस्थितास्त्वरितम् ॥
सेनापतिमन्त्रिमहाक्षत्रियाः श्रेष्ठिनश्च सार्थवाहाः । संप्रस्थिताश्च पुरतो निजनिजयानेष्वारूढाः ॥६४५॥
श्रीशेखरनरनाथः शुचिभूतो गन्धसिन्धुरारूढः । धूयमानधवलचामरो जिनवरमनुगन्तुमारब्धः ॥६४६॥
एवं सुरनरनिकरानुगम्यमानः सुपार्श्वजिननाथः । धनुःशतद्विकतनुमानः समानचतुरस्रसंस्थानः ॥६४७॥
अर्च्यमानः पक्ष्मलविशालनयनोत्पलै रमणीभिः । आनन्दनिर्भरं विबुधवृन्दगीयमानजयशब्दः ॥६४८॥
परित्यक्तपानभोजनप्रासादारूढद्रष्टृजनैः । मुच्यमानकुसुमवर्षः स्तूयमानो बन्दिवृन्दैः ॥६४९॥
नूनमेषोऽसारः संसार ईदृशैर्यत् त्यक्तः । इति चित्ते जनयन् ससुरासुरमनुजनाथानाम् ॥६५०॥
श्लाघ्यमानो मङ्गलमुखराभिर्गलदश्रुधाराभिः । वारवनितावलीभिरात्मानं शोचयन्तीभिः ॥६५१॥
एकतः श्रीशेखरप्रमुखैः क्षत्रियैरावृतः । अन्यतः सोमाभिधप्रमुखान्तःपुरपुरन्ध्रीभिः ॥६५२ ॥
प्राप्तः सुपार्श्वनाथः सहस्राम्रवणाभिधानमुद्यानम् । कृतशब्दामिवोच्छलितकोकिलाकोमलरवैः ॥६५३॥
नृत्यदिव पवनान्दोलनशीलकङ्केल्लिपल्लवकरैः । गायदिव बहुविधविहंगकुलतुमुलशब्दैः ॥६५४॥
प्रणमदिव मृदुपवननम्रतरुशिखरोत्तमाङ्गैः । हास्यमिव प्रकटयद् विकसितकुसुमाट्टहासैः ॥६५५॥
सविकाशकुसुमविगलितमकरन्दानन्दाश्रुबिन्दुभिः । उत्क्षिप्तबहलधूपमिव परिमलोन्मिश्रपवनैः ॥६५६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिन्नग्घंव मरुद्धयतरुवरनिवडंतकुसुमनियरेहिं । सागयमिव पुच्छंतं कलाविकेकाइयरवेहिं ॥६५७॥
तत्थ य कंकेल्लिमहातरुस्स मूलम्मि सीयलच्छाए । सुरवइकरावलंबी सिवियाए अवयरेऊण ॥६५८॥
सिद्धाण नमोत्ति भणित्तु मुयइ आहरणकुसुमवत्थाइं । ताइं च तियसनाहो गहिऊणं निययकरकमले ॥
सिरिसेहरनरवइणो समप्पए तयणु गरुयहरिसेण । सेणाहिवमाइसिउं रुंभइ सुरतूरनिग्घोसं ॥६६०॥
इत्तो मुत्ताहलविब्भमाइं थूलंसुयाइं मुयमाणी । कुलमयहरिया गग्गयगिराए भणिउं समारद्धा ॥६६१॥
देव! जयत्तयनिम्मलकासवसुपवित्तगोत्तजाओ सि। सुपइट्ठपत्थिवामलकुलजलनिहिपारियाओ सि॥६६२॥
विमलोभयपक्खाए पुहईदेवीए कुच्छिभूओ सि । सारयससंकजोण्हानिम्मलजसधवलियधरो सि॥६६३॥
अमियअणोवमलायन्नरूवसोहग्गकलियदेहो सि। ता तह कहवि पयट्टसु जह सिवसोक्खं लहुं लहसि॥६६४॥
इय कुलमयहरियाए वयणं सोउं सुपासजिणनाहो। उप्पाडिउमारद्धो केसकलावं समुट्ठीहिं ॥६६५॥
जा ताव अंतरच्चिय वज्जेणं छिंदिऊण सुरनाहो । जिणकरयलपल्हत्थियकेसभरं गरुयभत्तीए॥६६६॥
ईसीसिनमियदेहो देवदुकूलंचलेण नियएण । गिण्हइ कमेण इत्तो निव्वत्तिए लोयकम्मम्मि ॥६६७॥
जिणवरमणुन्नवेउं कुडिलं कसिणं च दुज्जणमणंव । केसकलावं खीरोयजलहिमज्झम्मि पक्खिवइ ॥६६८॥
अह जेट्ठसुद्धपक्खम्मि तेरसीएऽवरण्हसमयम्मि । भयवं सुपासनाहो सयमेव समुज्जओ सहसा ॥६६९॥
काऊण नमोक्कारं सिद्धाणमभिग्गहं च गिण्हेइ । सव्वं मेऽकरणिज्जं पावंति चरित्तमारुढो ॥६७०॥

दत्तार्घमिव मरुद्धततरुवरनिपतत्कुसुमनिकरैः । स्वागतमिव पृच्छत् कलापिकेकायितरवैः ॥६५७॥
तत्र च कङ्केल्लिमहातरोर्मूले शीतलच्छाये । सुरपतिकरावलम्बी शिबिकाया अवतीर्य ॥६५८॥
सिद्धेभ्यो नम इति भणित्वा मुञ्चत्याभरणकुसुमवस्त्राणि । तानि च त्रिदशनाथो गृहीत्वा निजकरकमले ॥६५९॥
श्रीशेखरनरपतेः समर्पयति तदनु गुरुहर्षेण । सेनाधिपमादिश्य रुणद्धि सुरतूरनिर्घोषम् ॥६६०॥
इतो मुक्ताफलविभ्रमाणि स्थूलांशुकानि मुञ्चन्ती । कुलमहत्तरा गद्गदगिरा भणितुं समारब्धा ॥६६१॥
देव ! जगत्त्रयनिर्मलकाश्यपसुपवित्रगोत्रजातोऽसि । सुप्रतिष्ठपार्थिवामलकुलजलनिधिपारिजातोऽसि ॥६६२॥
विमलोभयपक्षायाः पृथिवीदेव्याः कुक्षिभूतोऽसि । शारदशशाङ्कज्योत्स्नानिर्मलयशोधवलितधरोऽसि ॥६६३॥
अमितानुपमलावण्यरूपसौभाग्यकलितदेहोऽसि। तस्मात्तथा कथमपि प्रयतस्व यथा शिवसौख्यं लघु लभसे ॥६६४॥
इति कुलमहत्तराया वचनं श्रुत्वा सुपार्श्वजिननाथः । उत्पाटयितुमारब्धः केशकलापं स्वमुष्टिभ्याम् ॥६६५॥
यावत् तावदन्तरैव वज्रेण छित्त्वा सुरनाथः । जिनकरतलपर्यस्तकेशभरं गुरुभक्त्या ॥६६६॥
ईषदीषन्नमितदेहो देवदुकूलाञ्चलेन निजकेन । गृह्णाति क्रमेणेतो निर्वर्तिते लोचकर्मणि ॥६६७॥
जिनवरमनुज्ञाप्य कुटिलं कृष्णं च दुर्जनमन इव । केशकलापं क्षीरोदजलधिमध्ये प्रक्षिपति ॥६६८॥
अथ ज्येष्ठशुद्धपक्षे त्रयोदश्यामपराण्हसमये । भगवान् सुपार्श्वनाथः स्वयमेव समुद्यतः सहसा ॥६६९॥
कृत्वा नमस्कारं सिद्धेभ्योऽभिग्रहं च गृह्णाति । सर्वं मेऽकरणीयं पापमिति चारित्रमारूढः ॥६७०॥
अत्रान्तरे देवेन्द्रवृन्दनरखचरकिन्नरगणेन । अम्बरतलस्थितेन भूमिस्थितेन च जिनेन्द्रस्य ॥६७१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एत्थंतरम्मि देविंदविंदनरखयरकिन्नरगणेणं । अंबरतलट्ठिएणं भूमिट्ठिएण य जिणिंदस्स ॥६७१॥
उवरि विमुक्को सुहगंधलुद्धभसलावलीविलुप्पंतो । सुहगंधवासचुन्नो पिंगलियसमग्गगयणयलो ॥६७२॥
पहयाओ देवदुंदुहिढक्कहुडुक्कामुइंगतलिमाओ । तह बहिरियबंभंडो उच्छलिओ जयजयारावो ॥६७३॥
इत्तो सबाहिरंतरपरिग्गहे जिणवरेण परिचत्ते । खिवइ वरदेवदूसं वामंसतले तियसनाहो ॥६७४॥
अह अट्ठारससीलंगसहस्सभारे जिणेण उक्खित्ते । साहिज्जं पिव काउं मणपज्जवनाणमुप्पन्नं ॥६७५॥
एत्थंतरम्मि सामंतमंतिमंडलियपउरलोएहिं । मित्तेहिं य समकालं सहस्ससंखेहिं नमिऊण ॥६७६॥
भणियमिणं जयपुंगव ! जह इहलोयम्मि तुह पसाएण । असरिससुहमणुभुत्तं अम्हेहिं एत्तियं कालं॥६७७॥
तह पहु ! परलोयम्मिवि तुह पयसेवाए सासयं सुक्खं । इच्छामो अणुभुत्तुं इय भणिउं तेहिं धीरेहिं॥६७८॥
संविग्गमाणसेहिं पंचहिं मुट्ठीहिं कुंतलकलावा । उल्लुंचिया सयं चिय सव्वेहिवि चत्तमोहेहिं ॥६७९॥
अह देवयाए ताणं लिंगाइं समप्पियाइं सव्वेसिं । देवेहिं तप्पसंसाहिं बहिरियं सयलदिसिवलयं॥६८०॥
अह सिरिसेहरराया अमंदआणंदगग्गयगिराए । विम्हइयमणो ताणं अभिमुहमेयं पयंपेइ ॥६८१॥
भो भो महाणुभावा कित्तीए धवलियं तिहुयणंपि । तह भवभमणदुहाणं तुब्भेहिं जलंजली दिन्नो ॥६८२॥
तह दुल्लंघं मयणस्स सासणं लंघियं च हेलाए । तुब्भेहिं मुत्तिकंताकडक्खपत्तं कओ अप्पा ॥६८३॥
जेहिं दुद्धरवयभारधरणधवलेहिं सामिओ एसो । इण्हिंपि हु पडिवन्नो निक्कारणबंधवो भयवं ॥६८४॥
एवं काऊण थुइं विरए सिरिसेहरे निवे इंदा । नमिय जिणिंदं नंदीसरम्मि गंतुं गया सग्गे ॥६८५॥

उपरि विमुक्तं शुभगन्धलुब्धभ्रमरावलीविलुप्यमानम् । शुभगन्धवासचूर्णं पिङ्गलितसमग्रगगनतलम् ॥६७२॥
प्रहता देवदुन्दुभिढक्काहुडुक्कामृदङ्गतलिमाः । तथा बधिरितब्रह्माण्ड उच्छलितो जयजयारावः ॥६७३॥
इतः सबाह्याभ्यन्तरपरिग्रहे जिनवरेण परित्यक्ते । क्षिपति वरदेवदूष्यं वामांशतले त्रिदशनाथः ॥६७४॥
अथाष्टादशशीलाङ्गसहस्रभारे जिनेनोत्क्षिप्ते । साहाय्यमिव कर्तुं मनःपर्यवज्ञानमुत्पन्नम् ॥६७५॥
अत्रान्तरे सामन्तमन्त्रिमण्डलिकपौरलोकैः । मित्रैश्च समकालं सहस्रसंख्यैर्नत्वा ॥६७६॥
भणितमिदं जगत्पुङ्गव ! यथेहलोके तव प्रसादेन । असदृशसुखमनुभुक्तमस्माभिरेतावन्तं कालम् ॥६७७॥
तथा प्रभो ! परलोकेऽपि तव पादसेवया शाश्वतं सौख्यम् । इच्छामोऽनुभोक्तुमिति भणित्वा तैर्धीरैः॥६७८॥
संविग्नमानसैः पञ्चभिर्मुष्टिभिः कुन्तलकलापाः । उल्लुञ्चिताः स्वयमेव सर्वैरपि त्यक्तमोहैः ॥६७९॥
अथ देवतया तेभ्यो लिङ्गानि समर्पितानि सर्वेभ्यः । देवैस्तत्प्रशंसाभिर्बधिरितं सकलदिग्वलयम् ॥६८०॥
अथ श्रीशेखरराजोऽमन्दानन्दगद्गदगिरा । विस्मितमनास्तेषामभिमुखमेवं प्रजल्पति ॥६८१॥
भो भो महानुभावाः ! कीर्त्या धवलितं त्रिभुवनमपि । तथा भवभ्रमणदुःखानां युष्माभिर्जलाञ्जलिर्दत्तः॥६८२॥
तथा दुर्लङ्घ्यं मदनस्य शासनं लङ्घितं च हेलया । युष्माभिर्मुक्तिकान्ताकटाक्षपात्रं कृत आत्मा ॥६८३॥
यैर्दुर्धरव्रतभारधरणधवलैः स्वाम्येषः । इदानीमपि खलु प्रतिपन्नो निष्कारणबान्धवो भगवान् ॥६८४॥
एवं कृत्वा स्तुतिं विरते श्रीशेखरे नृप इन्द्राः । नत्वा जिनेन्द्रं नन्दीश्वरे गत्वा गताः स्वर्गे ॥६८५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिरिसेहरोवि राया सहिओ जणणीए नामीवि भत्तीए। तित्थेसरस्स चलण ताण च समुट्ठिउ सहसा॥६८६॥
पुज्जो सुरासुराणं मज्झ पिया इय पमोयसंजुत्तो। चइऊण रज्जरट्ठे ठिओ अरन्ने इय ससोओ॥६८७॥
नियनयरीए पविट्ठो दूसहपियविरहसोयसंतत्तं। संठावइ कहकहवि हु देविं सोमाभिहं तत्थ॥६८८॥
इय जम्मणनिक्खमणाभिहाणकल्लाणकहणपडिबद्धो। जिणवरसुपासचरिए समत्थिओ दुइयपत्थावो॥६८९॥

श्रीशेखरोऽपि राजा सहितो जनन्या नत्वा भक्त्या। तीर्थेश्वरस्य चरणौ तेषां च समुत्थितः सहसा॥६८६॥
पूज्यः सुरासुराणां मम पितेति प्रमोदसंयुक्तः। त्यक्त्वा राज्यराष्ट्रे स्थितोऽरण्य इति सशोकः॥६८७॥
निजनगर्यां प्रविष्टो दुःसहप्रियविरहशोकसंतप्ताम्। संस्थापयति कथंकथमपि हि देवीं सोमाभिधां तत्र॥६८८॥
इति जन्मनिष्क्रमणाभिधानकल्याणकथनप्रतिबद्धः। जिनवरसुपार्श्वचरिते समर्थितो द्वितीयप्रस्तावः॥६८९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह सिरिसुपासनाहो चउनाणी सव्वसत्तहियनिरओ । काउस्सग्गम्मि ठिओ निक्कंपो मेरुसिहरंव ॥१॥
तं तत्थ गमइ दियहं पसंतमुणिमंडलेण परियरिओ । जणयंतो आणंदं भवियचओराण जिणचंदो ॥२॥
अह दुइयदिणे भयवं मयभिभलतियससिंधुरगईए । पारणगत्थं पत्तो पाडलिसंडम्मि नयरम्मि ॥३॥
तत्थ य महुयरवित्तिं अणुसरमाणो महिंदगेहम्मि । संपत्तो सोवि तओ हरिसभरुल्लसियरोमंचो ॥४॥
जिणनाहस्साभिमुहं वच्चइ निययासणाओ उट्ठेउं । नमिउं च निरुवमाणंदगग्गयं भणिउमारद्धो ॥५॥
केहिंपि अज्ज चिरसंचिएहिं फलियम्ह तवविसेसेहिं । कप्पतरूहिंव नूणं सइमहुरपचेलिमफलेहिं ॥६॥
जेणेयं मह भवणं सुरविसरनमंसणिज्जमज्जेव । जायं जिण ! तुहपयपउमपंतिविच्छित्तिरमणीयं ॥७॥
ते तिहुयणसिरिसिंगारभायणं जे जिणिंदमुहकमले । विप्फारियनयणउडा पियंति लायन्नमयरंदं ॥८॥
कित्तिं कुणेइ उवणेइ संपयं पडिहणेइ मलपडलं । देव ! दुहावि अमोहं साहइ तुह दंसणं किं नो ? ॥९॥
भुवणयलासासकरं तुह पहु ! इणमो अचिंतियागमणं । चत्तघणसमयवुट्ठीए संनिहं हरइ संतावं ॥१०॥
पेक्खंति परमजोईसरावि जं झाणचक्खुणा कहवि । सो परमप्पसरूवो तुमं गओ दिट्ठिविसयम्मि ॥११॥
अहिभोगे विय भोगे निहणंव धणं मलंव कमलंपि । मन्नंता भवविमुहा भवारिसा कस्स इंति गिहं ? १२॥
इय थोऊण सहरिसं बहुमाणपरो भणइ नियं गिहिणिं । कल्लाणाणं पणइणि ! एगच्चिय भायणं तं सि ॥
जीए जएक्कनाहो संपत्तं दाणपत्तमेस तए । जिणनाहो सचराचरजंतूणमकत्तिमो बंधू ॥१४॥
तो पारणयं काराविऊण एयं विसुद्धदव्वेण । गहिरंपि भवसमुद्दं गोपयमित्तंव लंघेसु ॥१५॥

अथ श्रीसुपार्श्वनाथश्चतुर्ज्ञानः सर्वसत्त्वहितनिरतः । कायोत्सर्गे स्थितो निष्कम्पो मेरुशिखरमिव ॥१॥
तं तत्र गमयति दिवसं प्रशान्तमुनिमण्डलेन परिकरितः । जनयन्नानन्दं भविकचकोराणां जिनचन्द्रः ॥२॥
अथ द्वितीयदिने भगवान् मदमत्तत्रिदशसिन्धुरगत्या । पारणकार्थं प्राप्तः पाटलिषण्डे नगरे ॥३॥
तत्र च मधुकरवृत्तिमनुसरन् महेन्द्रगेहे । संप्राप्तः सोऽपि ततो हर्षभरोल्लसितरोमाञ्चः ॥४॥
जिननाथस्याभिमुखं व्रजति निजकासनादुत्थाय । नत्वा च निरुपमानन्दगद्गदं भणितुमारब्धः ॥५॥
कैरप्यद्य चिरसंचितैः फलितं मम तपोविशेषैः । कल्पतरुभिरिव ननं सदामधुरपचेलिमफलैः ॥६॥
येनेदं मम भवनं सुरविसरनमस्यनीयमद्यैव । जातं जिन ! त्वत्पादपद्मपङ्क्तिविच्छित्तिरमणीयम् ॥७॥
ते त्रिभुवनश्रीशृङ्गारभाजनं ये जिनेन्द्रमुखकमले । विस्फारितनयनपुटाः पिबन्ति लावण्यमकरन्दम् ॥८॥
कीर्त्तिं करोत्युपनयाति संपदं प्रतिहन्ति [illegible]पटलम् । देव ! द्विधाप्यमोघं (हं) साधयति तव दर्शनं किं नो ? ॥
भुवनतलाश्वासकरं तव प्रभो ! इदमचिन्तितागमनम् । त्यक्तघनसमयवृष्ट्याः संनिभं हरति संतापम् ॥१०॥
प्रेक्षन्ते परमयोगीश्वरा अपि ध्यानचक्षुषा कथमपि । स परमात्मस्वरूपस्त्वं गतो दृष्टिविषये ॥११॥
अहिभोगानिव भोगान् निधनमिव धनं मलमिव कमलमपि । मन्यमाना भवविमुखा भवादृशाः कस्यायान्ति गृहम् ? ॥
इति स्तुत्वा सहर्षं बहुमानपरो भणति निजां गृहिणीम् । कल्याणानां प्रणयिणि ! एकैव भाजनं त्वमसि ॥१३॥
यया जगदेकनाथः संप्राप्तं दानपात्रमेष त्वया । जिननाथः सचराचरजन्तूनामकृत्रिमो बन्धुः ॥१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय सोउं अविरलपुलयजालकलियाए तीए भत्तीए । अत्ताणं कयकिच्चं मन्नंतीए पमोएणं ॥१६॥
कलहोयमए थाले खिविउं पउरं मणुन्नपरमन्नं । घयसक्करसंमीसं पकप्पियं जिणवरिंदस्स ॥१७॥
दव्वाइसु उवओगं सम्मं दाऊण भयवया ताहे । तं सव्वगुणविसुद्धं पडिच्छियं पाणिपुडएणं ॥१८॥
एत्थंतरम्मि दुंदुहिरवबहिरियदिसिमुहेहिं देवेहिं । उग्घुट्ठमहो ! दाणं पमुइयचित्तेहिं गयणयले ॥१९॥
अद्धत्तेरसकंचणकोडीहिं महिंदमंदिरतलम्मि । वुट्ठं गंधजलेण य कुसुमेहि य पंचवन्नेहिं ॥२०॥
तो भणियमहो सत्ती भत्ती य अहो सुपत्तआगमणं । धन्नो तमेव पुन्नस्स भायणं तं चिय महिंद ! ॥२१
इह ताव माणुसत्तं भवन्नवे दुलहं खु जीवाणं । तत्थवि समत्थपुरिसत्थसाहगं नूण पुरिसत्तं ॥२२॥
तत्थ य विहवो सारो जेण विणा निम्मलावि गुणकुरली । वायाहयसिंभलितूलळीलमुव्वहइ लोयम्मि॥
तं चिय किविणा तत्थ य गिद्धा मुद्धावि कहवि लद्धूण । विहलं कुणंति उच्छूकुसुमं पिव दाणमइरहिया ॥
दाणमईवि जणाणं ऊसरखित्तम्मि मेहवुट्ठिव्व । विहलच्चिय गुणगरुयं विणावि सुहपत्तसंपत्तिं ॥२५॥
पत्तं च तं जहत्थं रक्खइ जं दुग्गईए निवडंतं । अत्ताणं च परं चिय तं पुण तिविहं विणिद्दिट्ठं ॥२६॥
चारित्तनाणदंसणसंजुत्तं हवइ उत्तमं पत्तं । दोहिं च मज्झमं तह जहन्नमेगेण नायव्वं ॥२७॥
ता एत्थ भवसमुद्दे उत्तमपत्तं सुजाणवत्तंव । जिणनाहोच्चिय पुन्नेहिं आणिओ तुज्झ गेहम्मि ॥२८॥
इच्चाइजहत्थेहिं महिंदमहिसलिहिऊण वयणेहिं । नमिऊण य जिणनाहं सट्ठाणं पडिगया देवा ॥२९॥

ततः पारणकं कारयित्वैतं विशुद्धद्रव्येण । गम्भीरमपि भवसमुद्रं गोष्पदमात्रमिव लङ्घस्व ॥१५॥
इति श्रुत्वाऽविरलपुलकजालकलितया तया भक्त्या । आत्मानं कृतकृत्यं मन्यमानया प्रमोदेन ॥१६॥
कलधौतमये स्थाले क्षिप्त्वा प्रचुरं मनोज्ञपरमान्नम् । घृतशर्करासंमिश्रं प्रकल्पितं जिनवरेन्द्राय ॥१७॥
द्रव्यादिषूपयोगं सम्यग् दत्त्वा भगवता तदा । तत् सर्वगुणविशुद्धं प्रतीष्टं पाणिपुटकेन ॥१८॥
अत्रान्तरे दुन्दुभिरवबधिरितदिङ्मुखैर्देवैः । उद्घुष्टमहो ! दानं प्रमुदितचित्तैर्गगनतले ॥१९॥
अर्धत्रयोदशकाञ्चनकोटिभिर्महेन्द्रमन्दिरतले । वृष्टं गन्धजलेन च कुसुमैश्च पञ्चवर्णैः ॥२०॥
ततो भणितमहो ! शक्तिर्भक्तिश्चाहो ! सुपात्रागमनम् । धन्यस्त्वमेव पुण्यस्य भाजनं त्वमेव महेन्द्र ! ॥२१॥
इह तावन्मनुष्यत्वं भवार्णवे दुर्लभं खलु जीवानाम् । तत्रापि समर्थपुरुषार्थसाधकं नूनं पुरुषत्वम् ॥२२॥
तत्र च विभवः सारो येन विना निर्मलापि गुणकुरली । वाताहतशाल्मलीतलळीलामुद्वहति लोके ॥२३॥
तदेव कृपणास्तत्र च गृद्धा मुग्धा अपि कथमपि लब्ध्वा । विफलं कुर्वन्तीक्षुकुसुममिव दानमतिरहिताः ॥२४॥
दानमतिरपि जनानामूषरक्षेत्रे मेघवृष्टिरिव । विफलैव गुणगुरुकां विनापि शुभपात्रसंप्राप्तिम् ॥२५॥
पात्रं च तद् यथार्थं रक्षति यद् दुर्गतौ निपतन्तम् । आत्मानं च परं चैव तत्पुनस्त्रिविधं विनिर्दिष्टम् ॥२६॥
चारित्रज्ञानदर्शनसंयुक्तं भवत्युत्तमं पात्रम् । द्वाभ्यां च मध्यमं तथा जघन्यमेकेन ज्ञातव्यम् ॥२७॥
तस्मादत्र भवसमुद्र उत्तमपात्रं सुयानपात्रमिव । जिननाथ एव पुण्यैरानीतस्तव गेहे ॥२८॥
इत्यादियथार्थैर्महेन्द्रमभिश्लाघ्य वचनैः । नत्वा च जिननाथं स्वस्थानं प्रतिगता देवाः ॥२९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उद्धट्ठिओवि भयवं पारइ तत्थेव पाणितलकलियं । तं सुद्धन्नं पासंति नेय लोयावि जं भणियं ॥३०॥
परमाइसयजुयाणं हवंति तित्थेसराण सयकालं । आहारा नीहारा अदिस्सा चम्मचक्खूणं ॥३१॥
सेसावि मुणिवरिंदा सकम्मनिम्मूलणम्मि उज्जुत्ता । जहविहिणा जं पत्तं कुणंति पारणयमित्तो य॥३२॥
भयवंपि गहियबहुविहअभिग्गहो निप्परिग्गहो धीरो । गामागरनयराइसु विहरइ समसत्तुमित्तमणो॥३३॥
कत्थवि निच्चलचित्तो पडिरुद्धअसेसकरणवावारो । सुद्धज्झाणदवेणं पाववणं दहइ सयलंपि ॥३४॥
कत्थवि य लगंडासणगरुडासणपमुहठाणकरणेण । उवलपडिबिंबसंकं जणइ जणाणं पयासेवि ॥३५॥
कत्थवि नवनीलुप्पलसंडंव हिमेण डज्झमाणोवि । निच्चलतणू मणंपि हु न चलइ नियझाणसरसीओ॥३६॥
तवहुयवहेण अंतो बाहिं च सहस्सकरपयावेण । ओलंबियभुयपरिहो बाढं सोहेइ देहमलं ॥३७॥
छट्टट्ठमदसमदुवालसाइमासद्धमासखमणाई । भद्दमहाभद्दाई कुणमाणो उग्गतवकम्मं ॥३८॥
बावीसपरीसहसहणपच्चलो दलियमोहमाहप्पो[1] । तुडियदढवियडनेहायसनियडो खलियमयपसरो ॥३९॥
नियपयकमलरएणं पवित्तयंतो महीयलं सयलं । निम्मूलं दलमाणो सयलंतरसत्तुसिन्नबलं ॥४०॥
अत्ताणं भावितो मुहुं मुहुं भावणाहिं सुद्धाहिं । कम्ममलेण य मलिणं धोयंतो पसमसलिलेणं ॥४१॥
कलयंतो गहिरंपि हु जाणुपमाणं भवन्नवं देवो । छउमत्थो नव मासे गमेइ परिचत्तसावज्जो ॥४२॥
अह अन्नया य उक्कंठिउव्व देसेसु विहरिउं पत्तो । वाराणसीए ईसाणदिसिट्ठिए सहसअंबवणे ॥४३॥

ऊर्ध्वस्थितोऽपि भगवान्पारयाति तत्रैव पाणितलकलितम् । तच्छुद्धान्नं पश्यन्ति नैव लोका अपि यद्भणितम् ॥३०॥
परमातिशययुतानां भवन्ति तीर्थेश्वराणां सदाकालम् । आहारा नीहारा अदृश्याश्चर्मचक्षुषाम् ॥३१॥
शेषा अपि मुनिवरेन्द्राः स्वकर्मनिर्मूलन उद्युक्ताः । यथाविधि यत् प्राप्तं कुर्वन्ति पारणकमितश्च ॥३२॥
भगवानपि गृहीतबहुविधाभिग्रहो निष्परिग्रहो धीरः । ग्रामाकरनगरादिषु विहरति समशत्रुमित्रमनाः ॥३३॥
कुत्रापि निश्चलचित्तः प्रतिरुद्धाशेषकरणव्यापारः । शुद्धध्यानदवेन पापवनं दहति सकलमपि ॥३४॥
कुत्रापि च लकुटासनगरुडासनप्रमुखस्थानकरणेन । उपलप्रतिबिम्बशङ्कां जनयति जनानां प्रकाशेऽपि ॥३५॥
कुत्रापि नवनीलोत्पलषण्डमिव हिमेन दह्यमानोऽपि । निश्चलतनुर्मनागपि खलु न चलति निजध्यानसरसीतः ॥
तपोहुतवहेनान्तर्बहिश्च सहस्रकरप्रतापेन । अवलम्बितभुजपरिघो बाढं शोधयति देहमलम् ॥३७॥
षष्ठाष्टमदशमद्वादशादिमासार्धमासक्षपणादि । भद्रामहाभद्रादि कुर्वाण उग्रतपःकर्म ॥३८॥
द्वाविंशतिपरीषहसहनप्रत्यलो दलितमोहमाहात्म्यः । त्रुटितदृढविकटस्नेहायसनिगडः स्खलितमदप्रसरः ॥३९॥
निजपादकमलरजसा पवित्रयन् महीतलं सकलम् । निर्मूलं दलयन् सकलान्तरशत्रुसैन्यबलम् ॥४०॥
आत्मानं भावयन् मुहुर्मुहुर्भावनाभिः शुद्धाभिः । कर्ममलेन च मलिनं धावन् प्रशमसलिलेन ॥४१॥
कलयन् गभीरमपि हि जानुप्रमाणं भवार्णवं देवः । छद्मस्थो नव मासान् गमयति परित्यक्तसावद्यः ॥४२॥
अथान्यदा चोत्कण्ठित इव देशेषु विहृत्य प्राप्तः । वाराणस्यामीशानदिक्स्थिते सहस्राम्रवणे ॥४३॥

---

१ ख. स महप्पा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्थ य उम्मिल्लिरपढमपल्लवारुणियसयलसाहस्स । अमरपुरस्सव मणहरसुमणसनियराभिरामस्स ॥४४॥
नरनाहस्सव बहुपत्तनियरपरियरियभूमिभायस्स । सिरिसस्स महातरुणो मूलम्मि अवट्ठिओ भयवं ॥४५॥
तत्थ य चरित्तदंसणनाणेहिं अणुत्तरप्पभावेहिं । आलयविहारमद्दवअज्जवलाहवपहाणेहिं ॥४६॥
आकिंचणसच्चतिगुत्तिमुत्तिखंतिपमुक्खचरिएहिं । सम्मं मुहुं मुहुं चिय भावेमाणस्स अप्पाणं ॥४७॥
जहवट्ठियभावभावणभावियहिययस्स करुणजलनिहिणो । सयलंपि हु जियलोयं अत्तंव पलोयमाणस्स॥४८॥
बाहिरविक्खेवविवज्जिएहिं करणेहिं सह समाहीए । एगीभूयंव मणं काउं तत्तम्मि लीणस्स ॥४९॥
गयलेवस्स नहस्सव मेरुस्सव सुइरनिप्पकंपस्स । पवमाणस्सव कत्थवि पडिबंधं अकुणमाणस्स ॥५०॥
सुक्कज्झाणानलदड्ढसयलघणघाइकम्मगहणस्स । निव्वायथिमियजलरासिविब्भमं निरु वहंतस्स ॥५१॥
सुक्कज्झाणस्सवि चरिमभेयजुयलं अपत्तपुव्वस्स । फग्गुणवइछट्ठीए सुहे मुहुत्तम्मि पुव्वण्हे ॥५२॥
चंदम्मि विसाहत्थे सुपासतित्थेसरस्स जयपहुणो । अव्वाहयं अणंतं पडिपुन्नं तह निरावरणं ॥५३॥
भाविस्सभूयपभवंतभावआलोयलोयणं विमलं । लोयालोयपयासं उप्पन्नं केवलं नाणं ॥५४॥
एत्थंतरम्मि आसणपकंपसंबोहिओ तियसनाहो । अवहीए जाणिऊणं जिणस्स जायं जहा नाणं ॥५५॥
उट्ठिय सत्तट्ठ पए गंतुं भत्तिब्भरोणमियसीसो । पभणइ नमोत्थु तित्थंकरस्स भयवंसुपासस्स ॥५६॥
आणवइ तहा सेणावइं च भो भद्द ! जह लहुं गंतुं । सोहम्मसहाए तुमं अप्फालसु सासयं घंटं ॥५७॥
तह तिक्खुत्तो घोसह जह भरहे सत्तमस्स जिणवइणो । केवलनाणं जायंति तत्थ सक्केण गंतव्वं ॥५८॥

तत्र चोन्मीलनशीलप्रथमपल्लवारुणितसकलशाखस्य । अमरपुरस्येव मनोहरसुमनोनिकराभिरामस्य ॥४४॥
नरनाथस्येव बहुप(पा)त्रनिकरपरिकारितभूमिभागस्य । शिरीषस्य महातरोर्मूलेऽवस्थितो भगवान् ॥४५॥
तत्र च चारित्रदर्शनज्ञानैरनुत्तरप्रभावैः । आलयविहारमार्दवार्जवलाघवप्रधानैः ॥४६॥
आकिञ्चन्यसत्यत्रिगुप्तिमुक्तिक्षान्तिप्रमुख्यचरितैः । सम्यग् मुहुर्मुहुरेव भावयत आत्मानम् ॥४७॥
यथावस्थितभावभावनाभावितहृदयस्य करुणाजलनिधेः । सकलमपि जीवलोकमात्मानमिव प्रलोकमानस्य॥४८॥
बाह्यविक्षेपविवर्जितैः करणैः सह समाधिना । एकीभूतमिव मनः कृत्वा तत्त्वे लीनस्य ॥४९॥
गतलेपस्य नभस इव मेरोरिव सुचिरनिष्प्रकम्पस्य । पवमानस्येव कुत्रापि प्रतिबन्धमकुर्वाणस्य ॥५०॥
शुक्लध्यानानलदग्धसकलघनघातिकर्मगहनस्य । निर्वातस्तिमितजलराशिविभ्रमं निश्चितं वहतः ॥५१॥
शुक्लध्यानस्यापि चरमभेदयुगलमप्राप्तपूर्वस्य । फाल्गुनासितषष्ठ्यां शुभे मुहूर्ते पूर्वाह्णे ॥५२॥
चन्द्रे विशाखास्थे सुपार्श्वतीर्थेश्वरस्य जगत्प्रभोः । अव्याहतमनन्तं परिपूर्णं तथा निरावरणम् ॥५३॥
भविष्यद्भूतप्रभवद्भावालोकलोचनं विमलम् । लोकालोकप्रकाशमुत्पन्नं केवलं ज्ञानम् ॥५४॥
अत्रान्तरे आसनप्रकम्पसंबोधितस्त्रिदशनाथः । अवधिना ज्ञात्वा जिनस्य जातं यथा ज्ञानम् ॥५५॥
उत्थाय सप्ताष्ट पदानि गत्वा भक्तिभरावनतशीर्षः । प्रभणति नमोऽस्तु तीर्थङ्कराय भगवत्सुपार्श्वाय ॥५६॥
आज्ञपयति तथा सेनापतिं च भो भद्र ! यथा लघु गत्वा । सौधर्मसभायां त्वमास्फालय शाश्वतीं घण्टाम् ॥

ता भो देवा तुब्भे आगच्छह परियणेण परियरिया। इय सक्कसासणं सो पडिच्छिउं तं तहा कुणइ ॥५९॥
तत्तो य गहिरघंटाअप्फालणउच्छलंतपडिसद्दं। पडिसद्दपडिप्फलणावज्जिरनीसेससुरघंटं ॥६०॥
सुरघंटरणज्झणारववसवज्जियतियसचउविहाउज्जं। आउज्जसद्दसंसग्गभग्गगंधव्वगीयरवं ॥६१॥
गीयरवभंगपरिगलियताललयचुक्कनच्चिरच्छरसं। अच्छरसकलयलारवअक्कंतसमग्गदिसिचक्कं ॥६२॥
एवं सुरलोएसुं सव्वेसुवि सुरवराण भवणेसु। किंकिंतिसद्दमीसो उच्छलिओ बहलहलबोलो ॥६३॥
उवसंते य खणेणं साहइ सेणावईवि तियसाण। जिणकेवलमहिमत्थं जह सुरवइणा समाइट्ठं ॥६४॥
सोऊण तं च समगं सव्वेवि हु सुरवरा सुरिंदेण। सह संचलिया नियनियजाणविमाणेसु आरूढा ॥६५॥
हरिसुक्करिसमयं किं किंवा जयजयजएक्करवमइयं। रयणुज्जोयमयं किं किं लच्छीविब्भममयं वा? ॥६६॥
एवं गयणयलं पइ हियए लोयाण विम्हयं गरुयं। जणयंता संपत्ता सहसंबवणम्मि उज्जाणे ॥६७॥
तत्थ य सव्वेहिं सुरवईहिं आणंदगग्गयगिराए। चउविहदेवनिकाया वयणमिमं सहरिसं भणिया ॥६८॥
भो भो सुपासनाहस्स समवसरणम्मि जस्स जं किच्चं। तं काऊण कयत्था हवह सुरा, तेवि तं सोउं ॥६९॥
वाउकुमारा अवणिंति रेणुतिणकयवराईयं सव्वं। जोयणमित्ते खित्ते तरुकूवाइयं तिरोहंति ॥७०॥
मेहकुमारा पुण पवणचलियरयनियरनासणं सुरहिं। तम्मि य कुणंति तुट्ठा गंधोदयसीयरक्खेवं ॥७१॥
केवि हु अमंदमयरंदबिंदुनीसंदलुद्धअलिपडलं। हरियंदणमंदारयकुसुमक्केरं च वरिसंति ॥७२॥

तथा त्रिर्घोषय यथा भरते सप्तमस्य जिनपतेः। केवलज्ञानं जातमिति तत्र शक्रेण गन्तव्यम् ॥५८॥
तस्माद् भो देवा यूयमागच्छत परिकरेण परिकरिताः। इति शक्रशासनं स प्रतीष्य तत्तथा करोति ॥५९॥
ततश्च गभीरघण्टास्फालनोच्छलत्प्रतिशब्दम्। प्रतिशब्दप्रतिस्फालनावादनशीलनिःशेषसुरघण्टम् ॥६०॥
सुरघण्टारणज्झणारववशवादितत्रिदशचतुर्विधातोद्यम्। आतोद्यशब्दसंसर्गभग्नगान्धर्वगीतरवम् ॥६१॥
गीतरवभङ्गपरिगलिततालभ्रष्टनर्तनशीलाप्सरसम्। अप्सरःकलकलारवाक्रान्तसमग्रदिक्चक्रम् ॥६२॥
एवं सुरलोकेषु सर्वेष्वपि सुरवराणां भवनेषु। किंकिमितिशब्दमिश्र उच्छलितो बहलकोलाहलः ॥६३॥
उपशान्ते च क्षणेन कथयति सेनापतिरपि त्रिदशान्। जिनकेवलमहिमार्थं यथा सुरपतिना समादिष्टम् ॥६४॥
श्रुत्वा तच्च समकं सर्वेऽपि हि सुरवराः सुरेन्द्रेण। सह संचलिता निजनिजयानाविमानेष्वारूढाः ॥६५॥
हर्षोत्कर्षमयं किं किंवा जयजयजयैकरवमयम्। रत्नोद्द्योतमयं किं किं लक्ष्मीविभ्रममयं वा? ॥६६॥
एवं गगनतलं प्रति हृदये लोकानां विस्मयं गुरुम्। जनयन्तः संप्राप्ताः सहस्राम्रवण उद्याने ॥६७॥
तत्र च सर्वैः सुरपतिभिरानन्दगद्गदगिरा। चतुर्विधदेवनिकाया वचनमिदं सहर्षं भणिताः ॥६८॥
भो भोः सुपार्श्वनाथस्य समवसरणे यस्य यत् कृत्यम्। तत्कृत्वा कृतार्था भवत सुराः, तेऽपि तत् श्रुत्वा ॥६९॥
वायुकुमारा अपनयन्ति रेणुतृणकचरादिकं सर्वम्। योजनमात्रे क्षेत्रे तरुकूपादिकं तिरोदधति ॥७०॥
मेघकुमाराः पुनः पवनचलितरजोनिकरनाशनं सुरभिम्। तस्मिंश्च कुर्वन्ति तुष्टा गन्धोदकसीकराक्षेपम् ॥७१॥
केऽपि ह्यमन्दमकरन्दबिन्दुनिःस्यन्दलुब्धालिपटलम्। हरिचन्दनमन्दारककुसुमोत्करं च वर्षन्ति ॥७२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तो पढमो कप्पोववण्णदेवेहिं रयणपायारो । निम्मविओ जो रेहइ रोहणगिरितुंगसिंगसमो ॥७३॥
दुइओ जोइसिएहिं वरकणयमओ विउव्विओ झत्ति । जो सुरगिरिव्व रेहइ समागओ जिणसिरिं दट्ठुं ॥७४॥
तइओ भवणवईहिं कलहोयमओ विणिम्मिओ सालो । जो चंदकुंदधवलो तुहिणायललीलमुव्वहइ ॥७५॥
एयम्मि ठिओ सामी चउविहसंघस्स चउविहं धम्मं । साहिस्सइ इय तेहिं कयाइं चत्तारि दाराइं ॥७६॥
तह चउसुवि दारेसुं फालिहसोवाणमालकलियाओ । वावीओ रइयाओ विसट्टकंदोट्टवंदाओ ॥७७॥
तह विहियाइं वणाइं चंपयपुन्नायनायविडवीणं । पवणुव्वल्लिरपल्लवकरसण्णियसयललोयाइं ॥७८॥
सीहासणं च मज्झे हेममयं निम्मियं अइविसालं । उदयायलसिहरं पिव तिहुयणरविसंगमीहंतं ॥७९॥
तह उवरि बारसगुणो पवणुव्विल्लंतगुच्छसंछन्नो । कोमलकिसलयकलिओ असोयवरपायवो रइओ ॥८०॥
एसो तिगुत्तिगुत्तो निज्जियदंडत्तओ तिकालविऊ । तिहुयणगुरुत्ति रइयं विमलं छत्तत्तयं उवरिं ॥८१॥
एगोच्चिय जिणनाहो पोओ भवसायरम्मि इइ कहिउं । धरणीए अंगुली विय समुब्भिया धम्मधयमिसओ ॥८२॥
भामंडलं च पट्ठीए निम्मियं रयणकिरणचिंचइयं । वरदुंदुही य तह तत्थ ताडिया सहरिससुरेहिं ॥८३॥
सक्कीसाणिंदावि हु दोसुवि पासेसु चंदकरधवलं । चालंति चामरजुयं तह वुट्ठी हवइ कुसुमाण ॥८४॥
पुरओवि धम्मचक्कं पइट्ठियं घडियममलरयणेहिं । जं सेवागयतरणिव्व सहइ विजिउत्ति जयरविणा ॥८५॥
एत्थंतरे जिणिंदो सुरविरइयकणयपउमपंतीए । ठाविंतो कमजुयलं थुव्वंतो चारणमुणीहिं ॥८६॥
पणमिज्जंतो सायरनरकिन्नरखयरसुरसमूहेहिं । सुरवइदंसियमग्गो पुव्वदुवारेण पविसेइ ॥८७॥

ततः प्रथमः कल्पोपपन्नदेवै रत्नप्राकारः । निर्मापितो यो राजति रोहणगिरितुङ्गशृङ्गसमः ॥७३॥
द्वितीयो ज्यौतिषिकैर्वरकनकमयो विकुर्वितो झटिति । यः सुरगिरिरिव राजति समागतो जिनश्रियं द्रष्टुम् ॥७४॥
तृतीयो भवनपतिभिः कलधौतमयो विनिर्मितः शालः । यश्चन्द्रकुन्दधवलस्तुहिनाचललीलामुद्वहति ॥७५॥
एतस्मिन् स्थितः स्वामी चतुर्विधसंघस्य चतुर्विधं धर्मम् । कथयिष्यतीति तैः कृतानि चत्वारि द्वाराणि ॥७६॥
तथा चतुर्ष्वपि द्वारेषु स्फाटिकसोपानमालाकलिताः । वाप्यो रचिता विकासितनीलोत्पलवृन्दाः ॥७७॥
तथा विहितानि वनानि चम्पकपुन्नागनागविटपिनाम् । पवनोद्वेलनशीलपल्लवकरसंज्ञितसकललोकानि ॥७८॥
सिंहासनं च मध्ये हेममयं निर्मितमतिविशालम् । उदयाचलशिखरमिव त्रिभुवनरविसङ्गमीहमानम् ॥७९॥
तथोपरि द्वादशगुणः पवनोद्वेल्लद्गुच्छसंछन्नः । कोमलकिशलयकलितोऽशोकवरपादपो रचितः ॥८०॥
एष त्रिगुप्तिगुप्तो निर्जितदण्डत्रयस्त्रिकालवित् । त्रिभुवनगुरुरिति रचितं विमलं छत्रत्रयमुपरि ॥८१॥
एक एव जिननाथः पोतो भवसागर इति कथयितुम् । धरण्याऽङ्गुलीव समूर्ध्विता धर्मध्वजमिषतः ॥८२॥
भामण्डलं च पृष्ठे निर्मितं रत्नकिरणमण्डितम् । वरदुन्दुभिश्च तथा तत्र ताडिता सहर्षसुरैः ॥८३॥
शक्रेशानेन्द्रावपि हि द्वयोरपि पार्श्वयोश्चन्द्रकरधवलम् । चालयन्ति चामरयुगं तथा वृष्टिर्भवति कुसुमानाम् ॥८४॥
पुरतोऽपि धर्मचक्रं प्रतिष्ठितं घटितममलरत्नैः । यत् सेवागततरणिरिव राजते विजित इति जगद्रविणा ॥८५॥
अत्रान्तरे जिनेन्द्रः सुरविरचितकनकपद्मपङ्क्तौ । स्थापयन् क्रमयुगलं स्तूयमानश्चारणमुनिभिः ॥८६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मज्झवि तं नमणिज्जं तित्थं लोयाण इय निदंसंतो। कयकिच्चोवि हु भयवं 'नमोत्थु तित्थस्स' इय भणइ॥८८॥
अह समवसरणसीहासणं सरुक्खं पयाहिणीकाउं। पुव्वाभिमुहो भयवं उवविसइ तिलोयहियकारी॥८९॥
अन्नाइवि जिणपडिरूवगाइं तिन्नेव तिसुवि दिसासु। ठाविंति सुरा सीहासणम्मि अकलियपहावाणि॥९०॥
ताइं च तप्पभावेण तयणुरूवाइं चेव सोहंति। अह चउरूवो जाओ एगोवि सुपासजिणनाहो॥९१॥
तं च नमिऊण देवा केवि हु गायंति केवि नच्चंति। फोडिंति केवि-तिवइं कुणंति तह संथवं केवि॥९२॥
जिणवरपयपउमोवरि अमंदमयरंदबिंदुसंवलियं। मुंचंति केवि देवा पणवन्नं जलरुहसमूहं॥९३॥
चेलंचलेहिं वीयंति केवि केवि हु कुणंति भत्तीए। उब्भियभुयदंडा चंडतंडवाडंबरं पुरओ॥९४॥
रंभापमुहाओ विलासिणीओ संगीयकरणनिउणाओ। पयडियभावाभिणयं हरिसियहिययाओ नच्चंति॥९५॥
एत्थंतरम्मि सिरिकलियमउडमणिकिरणकविसियदसासा। सव्वे सुरासुरिंदा तिपयाहिणपुव्वगं नमिउं।९६।
नियनियसमुचियठाणेसु संनिसन्ना, सहस्सनयणेण। एत्थंतरे निसिद्धो सुरयणकोलाहलो सहसा॥९७॥
भयवंपि दसणमालामऊहसलिलेण धोइयाइव्व। विमलाए एगाइवि अणेगजणसंसयहराए॥९८॥
सुरनरतिरिक्खसाहारणाए जलवाहगज्जिगहिराए। संसारदुक्खसंतत्तसत्तसंतावहरिणीए॥९९॥
जोयणमित्तपडिफलणपच्चलाए गिराए महुराए। अह परिसाए सुपासो साहेउं धम्ममारद्धो॥१००॥
एत्थंतरम्मि वणपालियाए अच्चब्भुयं भुवणगुरुणो। रिद्धिं पलोइऊणंससंभमं विम्हियमणाए॥१०१॥

प्रणम्यमानः सादरनरकिन्नरखचरसुरसमूहैः। सुरपतिदर्शितमार्गः पूर्वद्वारेण प्रविशति॥८७॥
ममापि तन्नमनीयं तीर्थं लोकानामिति निदर्शयन्। कृतकृत्योऽपि हि भगवान् 'नमोऽस्तु तीर्थाय' इति भणति॥८८॥
अथ समवसरणसिंहासनं सवृक्षं प्रदक्षिणीकृत्य। पूर्वाभिमुखो भगवानुपविशति त्रिलोकीहितकारी॥८९॥
अन्यान्यपि जिनप्रतिरूपकाणि त्रीण्येव तिसृष्वपि दिक्षु। स्थापयन्ति सुराः सिंहासनेऽकलितप्रभावाणि॥९०॥
तानि च तत्प्रभावेण तदनुरूपाण्येव शोभन्ते। अथ चतूरूपो जात एकोऽपि सुपार्श्वजिननाथः॥९१॥
तं च नत्वा देवाः केऽपि खलु गायन्ति केऽपि नृत्यन्ति। स्फोटयन्ति केऽपि त्रिपदीं कुर्वन्ति तथा संस्तवं केऽपि॥९२॥
जिनपरपादपद्मोपर्यमन्दमकरन्दबिन्दुसंवलितम्। मुञ्चन्ति केऽपि देवाः पञ्चवर्णं जलरुहसमूहम्॥९३॥
चेलाञ्चलैर्वीजयन्ति केऽपि केऽपि हि कुर्वन्ति भक्त्या। ऊर्ध्वितभुजदण्डाश्चण्डताण्डवाडम्बरं पुरतः॥९४॥
रम्भाप्रमुखा विलासिन्यः संगीतकरणनिपुणाः। प्रकटितभावाभिनयं हर्षितहृदया नृत्यन्ति॥९५॥
अत्रान्तरे श्रीकलितमुकुटमणिकिरणकपिशितदशाशाः। सर्वे सुरासुरेन्द्रास्त्रिप्रदक्षिणापूर्वकं नत्वा॥९६॥
निजनिजसमुचितस्थानेषु संनिषण्णाः, सहस्रनयनेन। अत्रान्तरे निषिद्धः सुरजनकोलाहलः सहसा॥९७॥
भगवानपि दशनमालामयूखसलिलेन धौतयेव। विमलयैकयाप्यनेकजनसंशयहरया॥९८॥
सुरनरतिर्यक्साधारणया जलवाहगर्जिगभीरया। संसारदुःखसंतप्तसत्त्वसंतापहारिण्या॥९९॥
योजनमात्रप्रतिफलनप्रत्यलया गिरा मधुरया। अथ पर्षदि सुपार्श्वः कथयितुं धर्ममारब्धः॥१००॥
अत्रान्तरे वनपालिकयाऽत्यद्भुतां भुवनगुरोः। ऋद्धिं प्रलोक्य ससंभ्रमं विस्मितमनसा॥१०१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आगंतूणं तह पणमिऊण सिरिसेहरं नरवरिंदं । विन्नत्तममंदाणंदगग्गयं तस्सिमं पुरओ ॥१०२॥
दिट्ठीए देव ! वद्धसि देविंदनरिंदवंदिओ अज्ज । तुह उज्जाणे संझाए आगओ जिणवरसुपासो॥१०३॥
तस्स य केवलनाणं उप्पन्नं संपयं अणाबाहं । लोयालोयब्भंतरसमत्थवत्थुप्पयासकरं ॥१०४॥
एगं तु कासवकुलं न केवलं धवलियं नियजसेण । तिहुयणमवि नीसेसं सुपासनाहेण नूणमिणं॥१०५॥
पिच्छसु सव्वत्थवि सामि! सालपुरओ चउव्विहसुराणं। रयणमयविमाणेहिं रेहइ नयरं सुरपुरिव्व॥१०६॥
अह भत्तिभरोणयमउलिमिलियकरसंपुडो पणमिऊण । हरिसेण जिणवरिंदं थोउं सक्कत्थएण तओ॥१०७॥
दाउं धणद्धतेरसलक्खे दाणम्मि तीए, पडिहारं । आणविउं नयरीए कारवइ महूसवं राया ॥१०८॥
तह पडुपडहपयाणेण पउरलोयं पवट्टए सव्वं । समुचियसिंगारेणं जिणनाहनमंसणाहेउं ॥१०९॥
सयमवि य मत्तमयगलउत्तुंगतुरंगरहवरठिएहिं । अंतेउरसुयसामंतमंतिविंदेहिं परियरिओ ॥११०॥
संचलिओ जाव तहिं ताव य थणसिहरलुलियहारलया। करकलियकणयदंडा पविसेउं भणइ पडिहारी॥१११॥
देव ! पुरा तुब्भेहिं चउरमई नाम पेसिओ दूओ । जो आसि मयणमंजरिकन्नाए सयंवरनिमित्तं ॥११२॥
अंगाहिववंगाहिवमगहाहिवनरवईण कुमराणं । आमंतणत्थमिण्हिं सो चिट्ठइ दारदेसम्मि ॥११३॥
तो मुंचसुत्ति भणिए नरवइणा सो पवेसिओ तीए। धरणियलविलुलियसिरो विन्नवइ सरूवमह पहुणो॥११४॥
अहमासि गओ तुह सासणाओ अंगाइनिवपसूयाणं । आहवणत्थं कन्नासयंवरे देव! कुमराणं ॥११५॥

आगत्य तथा प्रणम्य श्रीशेखरं नरवरेन्द्रम् । विज्ञप्तममन्दानन्दगद्गदं तस्येदं पुरतः ॥१०२॥
दिष्टया देव ! वर्ध्यसे देवेन्द्रनरेन्द्रवन्दितोऽद्य । तवोद्याने संध्यायामागतो जिनवरसुपार्श्वः ॥१०३॥
तस्य च केवलज्ञानमुत्पन्नं सांप्रतमनाबाधम् । लोकालोकाभ्यन्तरसमस्तवस्तुप्रकाशकरम् ॥१०४॥
एकं तु काश्यपकुलं न केवलं धवलितं निजयशसा । त्रिभुवनमपि निःशेषं सुपार्श्वनाथेन नूनमिदम् ॥१०५॥
पश्य सर्वत्रापि स्वामिन् ! शालपुरतश्चतुर्विधसुराणाम् । रत्नमयविमानै राजति नगरं सुरपुरीव ॥१०६॥
अथ भक्तिभरावनतमौलिमिलितकरसंपुटः[1] प्रणम्य । हर्षेण जिनवरेन्द्रं स्तुत्वा शक्रस्तवेन ततः ॥१०७॥
दत्त्वा धनार्धत्रयोदशलक्षाणि दाने तस्यै, प्रतिहारम् । आज्ञप्य नगर्यां कारयति महोत्सवं राजा ॥१०८॥
तथा पटुपटहप्रदानेन पौरलोकं वर्तयति सर्वम् । समुचितशृङ्गारेण जिननाथनमस्यनहेतोः ॥१०९॥
स्वयमपि च मत्तमदकलोत्तुङ्गतुरङ्गरथवरस्थितैः । अन्तःपुरसुतसामन्तमन्त्रिवृन्दैः परिकरितः ॥११०॥
संचलितो यावत्तत्र तावच्च स्तनशिखरलुठितहारलता। करकलितकनकदण्डा प्रविश्य भणति प्रतिहारी ॥१११॥
देव ! पुरा युष्माभिश्चतुरमतिर्नाम प्रेषितो दूतः । य आसीद् मदनमञ्जरीकन्यायाः स्वयंवरनिमित्तम् ॥११२॥
अङ्गाधिपवङ्गाधिपमगधाधिपनरपतीनां कुमाराणाम् । आमन्त्रणार्थमिदानीं स तिष्ठति द्वारदेशे ॥११३॥
ततो मुञ्चेति भणिते नरपतिना स प्रवेशितस्तया । धरणितलविलुठितशिरा विज्ञपयति स्वरूपमसौ प्रभवे ॥११४॥
अहमासं गतस्तव शासनादङ्गादिनृपप्रसूतानाम् । आह्वानार्थं कन्यास्वयंवरे देव ! कुमाराणाम् ॥११५॥

---

१ ग. °रपुत्तमहंतमंतिसामंतपरि° ।

उचियपडिवत्तिपुव्वं मएवि सव्वे कमेण सच्चविया । नीसेसगुणिजणाउलपुहईअच्छेरयब्भूया ॥११६॥
जं जं संबंधविऊ वरेसु जोअंति किंपि तं ताणं । कुलरूवविहवपभिई नीसामन्नंपि सामन्नं ॥११७॥
अह जोग्गयं मुणेउं सव्वाणवि सासणं तुह नरिंद ! । संपाडियं च तेहिवि पडिच्छियं नमिरमउलीहिं॥११८॥
तो तक्खणदिन्नपयाणभेरिभंकारतुमुलियदियंता । सज्जियचउरंगबला आउच्छियगुरुजणा चलिया ॥११९॥
लोभिज्जंता गुणकित्तणेण कुमरीए विसमठाणाइं । लंघित्तु पंचनवइसंखा कुमरा इहं पत्ता ॥१२०॥
ता आइससु लहुं चिय दीसन्तुद्दंडपुंडरीएहिं । टिविडिक्किज्जइ तुह नयरिपरिसरो ताण सिन्नेहिं॥१२१॥
इय सुणिऊणं चिंतइ नरवरोवि एएवि जह पसंगाओ । दट्ठूण भुवणसामिं लहंतु जयलच्छिपरिरंभं॥१२२॥
इय ताण पवेसत्थं पच्चोणीए बले समाइसइ । तेवि विहिओवयारा पविसंति महाविभूईए ॥१२३॥
पत्ता य रायमंदिरममंदमाणंदिया नरिंदेण । परिरंभिऊण पणमंतमउलिणो निद्धवयणेहिं ॥१२४॥
तो कहियजिणागमवइयरेहिं तेहिंपि परिगओ राया । नियअंबाए य समं सोमाए करेणुयारूढो ॥१२५॥
जिणनाहसमवसरणे संचलिओ भत्तिनिब्भरुच्छाहो । पत्तो कमेण तत्तो करिणीए लहुं समोअरइ॥१२६॥
जाव विहीए पविसइ उज्जाणवणस्स मज्झभागम्मि । ता जिणवरस्स लच्छीवित्थारं पासिउं भणइ॥१२७॥
अम्मो ! पिच्छसु पुरओ किंकरआयारधारयसुरेहिं । जिणनाहं मुत्तूणं सेविज्जइ कस्स कमकमलं॥१२८॥
छत्तत्तयं च तिहुयणसामित्तुवलक्खणं इमं कस्स । अन्नस्सोवरि सुइरं धरंति ससिपंडुरं तियसा ? ॥१२९॥
रयणासणे निसन्नो वीइज्जइ सुरवरेहिं को अन्नो । अम्मो ! मोत्तूण जिणं चमरुप्पीलेहिं धवलेहिं ?॥१३०॥

उचितप्रतिपत्तिपूर्वं मयापि सर्वे क्रमेण दृष्टाः । निःशेषगुणिजनाकुलपृथिव्याश्चर्यभूताः ॥११६॥
यद्यत् संबन्धविदो वरेषु पश्यन्ति किमपि तत्तेषाम् । कुलरूपविभवप्रभृति निःसामान्यमपि सामान्यम्॥११७॥
अथ योग्यतां ज्ञात्वा सर्वेषामपि शासनं तव नरेन्द्र ! । संपादितं च तैरपि प्रतीष्टं नम्रमौलिभिः ॥११८॥
ततस्तत्क्षणदत्तप्रयाणभेरीभाङ्कारतुमुलितादिगन्ताः । सज्जितचतुरङ्गबला आपृष्टगुरुजनाश्चलिताः ॥११९॥
लोभ्यमाना गुणकीर्तनेन कुमार्या विषमस्थानानि । लङ्घित्वा पञ्चनवतिसंख्याः कुमारा इह प्राप्ताः ॥१२०॥
तस्मादादिश लघ्वेव दृश्यमानोद्दण्डपुण्डरीकैः । मण्ड्यते तव नगरीपरिसरस्तेषां सैन्यैः ॥१२१॥
इति श्रुत्वा चिन्तयति नरवरोऽप्येतेऽपि यथा प्रसङ्गात् । दृष्ट्वा भुवनस्वामिनं लभन्तां जयलक्ष्मीपरिरम्भम्॥१२२॥
इति तेषां प्रवेशार्थं प्रत्युन्नीतं बलं समादिशति । तेऽपि विहितोपचाराः प्रविशन्ति महाविभूत्या ॥१२३॥
प्राप्ताश्च राजमन्दिरममन्दमानन्दिता नरेन्द्रेण । परिरभ्य प्रणमन्मौलयः स्निग्धवचनैः ॥१२४॥
ततः कथितजिनागमव्यतिकरैस्तैरपि परिगतो राजा । निजाम्बया च समं सोमया करेणुकारूढः ॥१२५॥
जिननाथसमवसरणे संचलितो भक्तिनिर्भरोत्साहः । प्राप्तः क्रमेण ततः करिण्या लघु समवतरति ॥१२६॥
यावद् विधिना प्रविशत्युद्यानवनस्य मध्यभागे । तावज्जिनवरस्य लक्ष्मीविस्तारं दृष्ट्वा भणति ॥१२७॥
अम्ब ! पश्य पुरतः किङ्कराकारधारकसुरैः । जिननाथं मुक्त्वा सेव्यते कस्य करकमलम् ? ॥१२८॥
छत्रत्रयं च त्रिभुवनस्वामित्वोपलक्षणमिदं कस्य । अन्यस्योपरि सुचिरं धरन्ति शशिपाण्डुरं त्रिदशाः ? ॥१२९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मणिमइयधम्मचक्कच्छलेण भाणूवि कं समल्लियइ ? । सुरा कमलाणि व कस्स य पयविन्नासं पडिच्छंति ?॥
भमिरभमरउलमुहला कस्स पुरो पडइ कुसुमवुट्ठीवि । गयणाउ मुत्तिरमणीकडक्खमालव्व अइतरला॥१३२॥
इय साहिंतो जणणीए सव्वओ हरिसनिब्भरो राया । पढमं पायारमइक्कमित्तु दुइयं समारुहइ॥१३३॥
तत्थ य पिच्छइ बहुभवपरिभमणज्जियमहंतवेराणं । जीवाणं मिहुणाइं अन्नोन्नपसन्नचित्ताइं ॥१३४॥
तत्तो पुणोवि पभणइ अंब! महच्छेरयं इमं उयह । जिणनाहसहाए जह मिलंति एक्कम्मि वेरिगणा॥१३५॥
मज्जारस्स सिरम्मि य नहग्गभागेहिं मूसओ कह णु । कंडुयमाणो निसुणइ जिणवयणं मुक्कआयंको॥१३६॥
अइउग्गविसभुयंगमफणाकडप्पम्मि नियसि उवविट्ठो । सालूरो गयवेरो जणइ जणाणं महच्छरियं॥१३७॥
चत्तपओसस्स चिरं मओ मयंदस्स केसरकलावं । ईसुम्मीलियनयणस्स अग्गसिंगेण विवरेइ ॥१३८॥
वणमहिसो गवलग्गेण नियह तुरयस्स लोयणद्धंतं । कंडुयमाणो न कुणइ जिणवयणपरस्स विहुरत्तं ॥
निच्चलसामलसिहिकंठकंदले कोमले किसलयव्व । उयह अही जिणवयणं कुंडलियकलेवरो सुणइ॥१४०॥
पिच्छसु कडारकेसरकडप्पदुप्पिच्छपंचवयणाण । मज्झे संवलियकरो वसई करी जिणपहावेण ॥१४१॥
इय एवमाइअच्चुब्भुयाइं विम्हयकराइं अंबाए । दंसिंतो नरनाहो पत्तो तइयम्मि पायारे ॥ १४२ ॥
तत्थ य निरुवमभत्तीपरव्वसो बहलपुलयकलियंगो । आणंदपुरस्सरसुरसमूहपिच्छिज्जमाणो य ॥१४३॥
नियपरिवारेण जुओ तिपयाहिणदाणपुव्वगं राया । रयणमयपायपीढग्गभायविणिहित्तभालयलो॥१४४॥

रत्नासने निषण्णो वीज्यते सुरवरैः कोऽन्यः । अम्ब ! मुक्त्वा जिनं चामरसंघातैर्धवलैः ? ॥१३०॥
मणिमयधर्मचक्रच्छलेन भानुरपि कं समुपसर्पति ? । सुराः कमलानीव कस्य च पादविन्यासं प्रतीच्छन्ति?॥१३१॥
भ्रमणशीलभ्रमरकुलमुखरा कस्य पुरः पतति कुसुमवृष्टिरपि । गगनान्मुक्तिरमणीकटाक्षमालेवातितरला ?॥१३२॥
इति कथयञ्जननीं सर्वतो हर्षनिर्भरो राजा । प्रथमं प्राकारमतिक्रम्य द्वितीयं समारोहति ॥१३३॥
तत्र च पश्यति बहुभवपरिभ्रमणार्जितमहावैराणाम् । जीवानां मिथुनानि अन्योन्यप्रसन्नचित्तानि ॥१३४॥
ततः पुनरपि प्रभणति अम्ब ! महाश्चर्यमिदं पश्य । जिननाथसभायां यथा मिलन्ति एकत्र वैरिगणाः ॥१३५॥
मार्जारस्य शिरसि च नभोऽग्रभागैर्मूषकः कथं नु । कण्डूयमानः शृणोति जिनवचनं मुक्तातङ्कः ॥१३६॥
अत्युग्रविषभुजङ्गमफणानिकरे पश्यस्युपविष्टः । शालूरो गतवैरो जनयति जनानां महाश्चर्यम् ॥१३७॥
त्यक्तप्रद्वेषस्य चिरं मृगो मृगेन्द्रस्य केसराकलापम् । ईषदुन्मीलितनयनस्याग्रशृङ्गेण विवृणोति ॥१३८॥
वनमहिषो गवलाग्रेण पश्य तुरगस्य लोचनपर्यन्तम् । कण्डूयमानो न करोति जिनवचनपरस्य विधुरत्वम् ॥
निश्चलश्यामलशिखिकण्ठकन्दले कोमले किशलयमिव । पश्याहिर्जिनवचनं कुण्डलितकलेवरः शृणोति॥१४०॥
पश्य कडारकेसरनिकरदुर्दर्शपञ्चवदनानाम् । मध्ये संवलितकरो वसति करी जिनप्रभावेण ॥१४१॥
इत्येवमाद्यत्यद्भुतानि विस्मयकराण्यम्बायै । दर्शयन् नरनाथः प्राप्तस्तृतीये प्राकारे ॥१४२॥
तत्र च निरुपमभक्तिपरवशो बहलपुलककलिताङ्गः । आनन्दपुरस्सरसुरसमूहदृश्यमानश्च ॥१४३॥
निजपरिवारेण युतस्त्रिप्रदक्षिणादानपूर्वकं राजा । रत्नमयपादपीठाग्रभागविनिहितभालतलः ॥१४४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नमिऊण जिणवरिंदं पणनवइकुमरेहिं परिगओ सणियं। पुव्वुत्तरदिसिभागे निवसइ सुद्धम्मि महिवीढे ॥
तज्जणणीवि हु नरवइअवरोहवहूहिं परिगया तत्थ। पुरओ काऊण निवं उवट्ठिया चिट्ठइ पहिट्ठा॥१४६॥
अह तेसु निविट्ठेसुं भालयलालीणअंजलिपुडेसु। भयवं सुपासनाहो एवं धम्मक्कहं कहइ ॥१४७॥
भो भो देवाणुपिया! संसारे माणुसत्तणं सारं। तं पुण दसहिं चुल्लगपमुहाहरणेहिं अइदुलहं॥१४८॥
तथाहि;—
मोहाइकम्मअइनिविडवियडनियडेहिं नियडिया केवि। जीवा अणंतकायाभिहाणगुत्तीए निवसंति॥१४९॥
तेसिं च मोहमोहियमईण कहकहवि दिट्ठिविसयम्मि। पत्तेयवणस्सइभूमियावि संजायए नूणं ॥१५०॥
तत्थवि पत्ता केवि हु तिलपीसयगोणउव्व चिरकालं। चिट्ठंति परिभमंता पुणोवि तत्थेव तत्थेव॥१५१॥
तत्तो तओ विमुक्का कहकहवि अहापवत्तकरणेण। सेसेगिंदियजंतुसु वरया वच्चंति ते जीवा ॥१५२॥
तत्थवि कुकम्मवुइया नगाण संताडणेण चिरकालं। तत्थेव जह तहच्चिय गिरिव्व खित्ता सहंति दुहं ॥
वसिऊणोसप्पिणिसप्पिणीउणंताउ तत्थेव ते जीवा। विगलिंदिएसु कहकहवि दिव्वजोएण जायंति॥१५४॥
तत्थवि तमपडलंतरियलोयणा तेसु चेव अणवरयं। तरुवरसाहासुव अंधवायसा परिभमंति चिरं॥१५५॥
ताणं च तओ सुलहं कहं नु पंचिंदियत्तणं हंत!। जाणं न तिप्पेइ विही विगलिंदियपभवदुक्खेहिं॥१५६॥
अह कहवि कम्मपरिणइवसेण अणुकूलभावमावन्नो। जइ सोवि दुग्घडं घडइ कहवि पंचिंदिए जम्मं ॥
तहवि हु दूसहनारयविडंबणाहिं विडंबइ भवम्मि। तह कहवि जह न वीरइ वयणसहस्सेहिंवि कहेउं ॥

नत्वा जिनवरेन्द्रं पञ्चनवतिकुमारैः परिगतः शनैः। पूर्वोत्तरदिग्भागे निवसति शुद्धे महीपीठे ॥१४५॥
तज्जनन्यपि खलु नरपत्यवरोधवधूभिः परिगता तत्र। पुरतः कृत्वा नृपमुपस्थिता तिष्ठति प्रहृष्टा ॥१४६॥
अथ तेषु निविष्टेषु भालतलालीनाञ्जलिपुटेषु। भगवान् सुपार्श्वनाथ एवं धर्मकथां कथयति ॥१४७॥
भो भो देवानुप्रियाः! संसारे मनुष्यत्वं सारः। तत् पुनर्दशभिश्चुल्लकप्रमुखोदाहरणैरतिदुर्लभम् ॥१४८॥
मोहादिकर्मातिनिबिडविकटनिगडैर्निगडिताः केऽपि। जीवा अनन्तकायाभिधानगुप्तौ निवसन्ति ॥१४९॥
तेषां च मोहमोहितमतीनां कथंकथमपि दृष्टिविषये। प्रत्येकवनस्पतिभूमिकापि संजायते नूनम् ॥१५०॥
तत्रापि प्राप्ताः केऽपि खलु तिलपेषकगव इव चिरकालम्। तिष्ठन्ति परिभ्रमन्तः पुनरपि तत्रैव तत्रैव॥१५१॥
ततस्ततो विमुक्ताः कथंकथमपि यथाप्रवृत्तकरणेन। शेषैकेन्द्रियजन्तुषु वराका व्रजन्ति ते जीवाः ॥१५२॥
तत्रापि कुकर्मवृता नगानां संताडनेन चिरकालम्। तत्रैव यथा तथैव गिरय इव क्षिप्ताः सहन्ते दुःखम्॥१५३॥
उषित्वावसर्पिण्युत्सर्पिणीरनन्तास्तत्रैव ते जीवाः। विकलेन्द्रियेषु कथंकथमपि दैवयोगेन जायन्ते ॥१५४॥
तत्रापि तमःपटलान्तरितलोचनास्तेष्वेवानवरतम्। तरुवरशाखास्विवान्धवायसाः परिभ्रमन्ति चिरम् ॥१५५॥
तेषां च ततः सुलभं कथं नु पञ्चेन्द्रियत्वं हन्त!। येषां न तृप्यति विधिर्विकलेन्द्रियप्रभवदुःखैः? ॥१५६॥
अथ कथमपि कर्मपरिणतिवशेनानुकूलभावमापन्नः। यदि सोऽपि दुर्घटं घटयति कथमपि पञ्चेन्द्रिये जन्म ॥
तथापि हि दुःसहनारकविडम्बनाभिर्विडम्बयति भवे। तथा कथमपि यथा न शक्यते वदनसहस्रैरपि कथयितुम्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं किलिट्ठकम्ममम्मि घुम्मियाणं इओ तओ ताणं । बहुपोग्गलपरियट्टावट्टविवट्टीण अणवरयं ॥१५९॥
घणजोणिलक्खकच्छवगलच्छणातिक्खदुक्खदुंहियाण। किण्हपमुक्खालेसाअबालसेवालकलियाण॥१६०॥
कोहमहावडवानलतत्ताणं रायपंकखुत्ताणं । मिच्छत्तमच्छभीयाण कलिससलिलम्मि बुड्डाणं ॥१६१॥
जीवाण भवसमुद्दे अणोरपारम्मि दुल्लहं एयं । मणुयत्तजाणवत्तं विसालकुलजाइदलकलियं ॥१६२॥
तं पुण पत्तंपि हु कहकहंपि रहियं सुकन्नधारेण । तत्थेव निमज्जंतं पुणोवि को धारिउं तरइ ? ॥१६३॥
ते य पुण कन्नधारा दुविहा चिट्ठंति भवसमुद्दम्मि । एगे कुतित्थपत्थाणपत्थिया मग्गमूढा य ॥१६४॥
अन्ने उण सयलअवायरक्खणखमा भवसमुद्दमग्गम्मि । दीवंतरेसु संबलसंपाडणपयडमाहप्पा ॥१६५॥
ता जइ सम्मं अपरिक्खिऊण पुव्वुत्तकन्नधाराणं । वयणेण परिपिल्लइ जीवो मणुयत्तबोहित्थं ॥१६६॥
ता माणमीणखलियं मच्छरमयराणणम्मि पडिफलियम् । मायावित्तलयावणगहणे गाढं निगूढंव॥१६७॥
लोहमहागिरिगुरुसिहरघट्टणाजज्जरिज्जमाणंव । अइपबलकामकल्लोलमालआवत्तपडियंव ॥१६८॥
मोहमहागिरिकुहरंतरालवासीहिं लद्धलक्खेहिं । लूडिज्जंतं इंदियचोरेहिं सुदुन्निवारेहिं ॥१६९॥
कोहमहावडवानलकरालजालावलीकलिज्जंतं । रुद्दज्झाणभिहाणेण सवरराएण हीरंतं ॥१७०॥
रायग्गाहपसारियउयारसिंगारदाढउग्गाढं । विसयमहाविसविसहरसएहिं वेढिज्जमाणंव ॥१७१॥
इय एवमाइबहुविहअवायपडियं तडत्ति फुट्टंतं । किंकायव्वविमूढा न हु ते पारंति तं धरिउं ॥१७२॥
तम्मि य फुट्टे जीवो पुणोवि संसारजलहिमज्झम्मि । निवडइ अणंतकायाइएसु दुक्खाइं य सहेइ॥१७३॥

एवं क्लिष्टकर्मणा घूर्णितानामितस्ततस्तेषाम् । बहुपुद्गलपरावर्तावर्तविवर्तिनामनवरतम् ॥१५९॥
घनयोनिलक्षकच्छपकलक्षणतीक्ष्णदुःखदुःखितानाम् । कृष्णप्रमुख्यलेश्याऽबालशैवालकलितानाम् ॥१६०॥
क्रोधमहावडवानलतप्तानां रागपङ्कमग्नानाम् । मिथ्यात्वमत्स्यभीतानां क्लेशसलिले मग्नानाम् । ॥१६१॥
जीवानां भवसमुद्रेऽनादिपारे दुर्लभमेतत् । मनुजत्वयानपात्रं विशालकुलजातिदलकलितम् ॥१६२॥
तत् पुनः प्राप्तमपि हि कथंकथमपि रहितं सुकर्णधारेण । तत्रैव निमज्जत् पुनरपि को धारयितुं शक्नोति ?॥
ते च पुनः कर्णधारा द्विविधास्तिष्ठन्ति भवसमुद्रे । एके कुतीर्थप्रस्थानप्रस्थिता मार्गमूढाश्च ॥१६४॥
अन्ये पुनः सकलापायरक्षणक्षमा भवसमुद्रमार्गे । द्वीपान्तरेषु शम्बलसंपादनप्रकटमाहात्म्याः ॥१६५॥
तस्माद् यदि सम्यगपरीक्ष्य पूर्वोक्तकर्णधाराणाम् । वचनेन परिपीडयति जीवो मनुजत्वयानपात्रम् ॥१६६॥
ततो मानमीनस्खलितं मत्सरमकराननने प्रतिफलितम् । मायावृत्तलतावनगहने गाढं निगूढमिव ॥१६७॥
लोभमहागिरिगुरुशिखरघट्टनाजर्जर्यमाणमिव । अतिप्रबलकामकल्लोलमालावर्तपतितमिव ॥१६८॥
मोहमहागिरिकुहरान्तरालवासिभिर्लब्धलक्ष्यैः । लुण्ठ्यमानमिन्द्रियचौरैः सुदुर्निवारैः ॥१६९॥
क्रोधमहावडवानलकरालज्वालावलीकल्यमानम् । रौद्रध्यानाभिधानेन शबरराजेन ह्रियमाणम् ॥१७०॥
रागग्राहप्रसारितोदारशृङ्गारदंष्ट्रोद्गाढम् । विषयमहाविषविषधरशतैर्वेष्ट्यमानमिव ॥१७१॥
इत्येवमादिबहुविधापायपतितं तडदिति स्फुट्यमानम् । किंकर्तव्यविमूढा न खलु ते पारयन्ति तद् भर्तुम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता इह कुतित्थपत्थियकुकन्नहारे लहुं विमोत्तूणं। सम्मं परिक्खिऊणं सुकन्नधारे य अणुसरह ॥१७४॥
ते पुण संसारमहासमुद्दतरणम्मि कन्नधारसमा। पंच परमिट्ठिणो च्चिय जयत्तए पयडमाहप्पा ॥१७५॥
जेणं ते च्चिय उम्मग्गमग्गिराणं निवारणसमत्था। जहवट्टियपरिभावियसंसारोदहिसरूवा य ॥१७६॥
तिच्चिय पुव्वपसाहियअवायनियराउ रक्खिऊण इमं। अव्वाबाहपहेणं निंति सुचारित्तदीवम्मि ॥१७७॥
तत्थवि य सव्वसावज्जविरइनामम्मि तुंगसेलम्मि। नेऊण वरमहव्वयरयणाइं खिवंति एयम्मि॥१७८॥
जेहिं करयलकलिएहिं नत्थि भुवणेवि किंपि हु असज्झं। निव्वुइपुरीवि परमा नियडच्चिय हवइ लहुमेव॥
तस्स य गिरिणो उवरिं दसविहमुणिधम्मनामरुक्खाओ। असमट्ठारससीलंगसहस्सफलनियरमुवणिंति॥
तस्सवि य अग्गभागे केवलनाणाभिहाणसिहरम्मि। वीसामिऊण कइवयदिणाइं तो तस्स अग्गम्मि१८१
निव्वाणपुरी चिट्ठइ भवपारावारपरमतीरसमा। तम्मि य ठवंति जीवं मोत्तुं मणुयत्तबोहित्थं ॥१८२॥
जीए न जम्मो न जरा नय मरणं नेह छुहपिवासावि। नय रायरोसरोया न भयं नय सोयलेसोवि ॥
नव्वामोहो न मओ नवि चिंता नेय खेयसोयावि। न विसाओ नवि निद्दा कयाइ अरई नय खणंपि॥
केवलममंदआणंदअमयसेएण अक्खयसरूवो। निरंजणो थिरप्पा जीवो रयणप्पईवोव्व ॥१८५॥
लोयालोयब्भंतरसमत्थसुपसत्थवत्थुवित्थारं। उज्जोयंतो चिट्ठइ सयावि अखंडियप्पसरो ॥१८६॥
एत्थंतरम्मि पणनवइकुमरेहिं पुच्छिओ जिणवरिंदो। भयवं! जे तुब्भेहिं कहिया इह कन्नधारसमा।१८७।

तस्मिंश्च स्फुटिते जीवः पुनरपि संसारजलधिमध्ये। निपतत्यनन्तकायादिकेषु दुःखानि च सहते ॥१७३॥
तस्मादिह कुतीर्थप्रस्थितकुकर्णधाराँल्लघु विमुच्य। सम्यक् परीक्ष्य सुकर्णधारांश्चानुसरत ॥१७४॥
ते पुनः संसारमहासमुद्रतरणे कर्णधारसमाः। पञ्च परमेष्ठिन एव जगत्त्रये प्रकटमाहात्म्याः ॥१७५॥
येन त एवोन्मार्गमार्गिकाणां निवारणसमर्थाः। यथावस्थितपरिभावितसंसारोदधिस्वरूपाश्च ॥१७६॥
त एव पूर्वप्रकथितापायनिकराद् रक्षित्वेदम्। अव्याबाधपथेन नयन्ति सुचारित्रद्वीपम् ॥१७७॥
तत्रापि च सर्वसावद्यविरतिनाम्नि तुङ्गशैले। नीत्वा वरमहाव्रतरत्नानि क्षिपन्त्येतस्मिन् ॥१७८॥
यैः करतलकलितैर्नास्ति भुवनेऽपि किमपि ह्यसाध्यम्। निर्वृतिपुर्यपि परमा निकटैव भवति लघ्वेव॥१७९॥
तस्य च गिरेरुपरि दशविधमुनिधर्मनामवृक्षात्। असमाष्टादशशीलाङ्गसहस्रफलनिकरमुपनयन्ति ॥१८०॥
तस्यापि चाग्रभागे केवलज्ञानाभिधानशिखरे। विश्रम्य कतिपयदिनानि ततस्तस्याग्रे ॥१८१॥
निर्वाणपुरी तिष्ठति भवपारावारपरमतीरसमा। तस्यां च स्थापयन्ति जीवं मोक्तुं मनुजत्वयानपात्रम्॥१८२॥
यस्यां न जन्म न जरा नच मरणं नेह क्षुत्पिपासे अपि। नच रागरोषरोगा न भयं नच शोकलेशोऽपि॥१८३॥
न व्यामोहो न मदो नापि चिन्ता नच खेदशोकावपि। न विषादो नापि निद्रा कदाप्यरतिर्नच क्षणमपि॥
केवलममन्दानन्दामृतसेकेनाक्षयस्वरूपः। निरञ्जनः स्थिरात्मा जीवो रत्नप्रदीप इव ॥१८५॥
लोकालोकाभ्यन्तरसमस्तसुप्रशस्तवस्तुविस्तारम्। उद्द्योतयंस्तिष्ठति सदाप्यखण्डितप्रसरः ॥१८६॥
अत्रान्तरे पञ्चनवतिकुमारैः पृष्टो जिनवरेन्द्रः। भगवन्! ये युष्माभिः कथिता इह कर्णधारसमाः ॥१८७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पंच परमिट्ठिणो ते पत्तेयं कहह अम्ह पसिऊण । तो कहइ जिणो ताणं पत्तेयं पण जिणाईए ॥१८८॥
अह पणनउई कुमरा चलणेसुं निवडिऊण जयगुरुणो । संसारविरत्तमणा एवं भणिउं समारद्धा॥१८९॥
भयवं ! पढमा तुब्भे पणपरमिट्ठीण भवजलनिहिस्स । पारगया, ता इण्हि अम्हेवि हु तुह पसाएण॥१९०॥
तुब्भेहिं कन्नधारोवमेहिं मणुयत्तजाणवत्तम्मि । कहकहवि हु आरूढा दुत्तरभवजलहिमज्झाओ ॥१९१॥
तुह परिकहियपहेणं निव्वाणपुरम्मि गंतुमिच्छामो । तो भयवयावि भणियं जुत्तं तुम्हारिसाण इमं॥१९२॥
एवमुवबूहिऊणं जयगुरुणा दिक्खिया सहत्थेण । पिंगलकुमारपमुहा कइवयलोगेण परियरिया ॥१९३॥
तत्तो निरुवमरूवोवसोहिया चित्तसत्तिसंजुत्ता । वोच्छिन्ननेहनियडा विसिट्ठकुलजाइसंपन्ना ॥१९४॥
परिचत्तसव्वसंगा समत्थसुपसत्थसत्थपारगया । सुरविसरवंदणिज्जा ते पणनउई महामुणिणो ॥१९५॥
जइधम्मभारदुद्धरधुरंधरा गुणकलावपरिकलिया । रेहंति सिस्सकलहेहिं परिवुडा दिसिगइंदव्व ॥१९६॥
एत्थंतरम्मि अन्ने राईसरसिट्ठिसत्थवाहसुया । सामंतमंतिणो तह अन्नेवि विसिट्ठकुलपुत्ता ॥१९७॥
भववासुव्विग्गमणा कयाहिलासा य सव्वविरईए । जिणवरसुपासपासं अल्लीणा भयवया ताहे ॥१९८॥
पुव्वुत्तेण कमेणं तेवि सहत्थेण दिक्खिया तत्तो । सोमावि समं सामंतमंतिदारेहिं सारेहिं ॥१९९॥
सव्वविरइं पवज्जिउमहिलसमाणी उवट्ठिया पुरओ । तो तीसेवि महव्वयदाणं पहुणा सयं विहिअं॥२००॥
जे पव्वज्जं काउं असमत्था केवि ते सनारीया । सावयधम्मे ठविया एवं च सुपासनाहस्स ॥२०१॥
पढमम्मि समोसरणे समग्गगुणरयणरोहणगिरिंदो । संघो चउव्विहोवि य जाओ, अह भयवया ताणं॥२०२॥

पञ्च परमेष्ठिनस्तान् प्रत्येकं कथयास्मान् प्रसद्य । ततः कथयति जिनस्तेषां प्रत्येकं पञ्च जिनादिकान्॥१८८॥
अथ पञ्चनवतिः कुमाराश्चरणयोर्निपत्य जगद्गुरोः । संसारविरक्तमनस एवं भणितुं समारब्धाः ॥१८९॥
भगवन् ! प्रथमा यूयं पञ्चपरमेष्ठिनां भवजलनिधेः । पारगताः, तस्मादिदानीं वयमपि खलु तव प्रसादेन॥१९०॥
युष्माभिः कर्णधारोपमैर्मनुजत्वयानपात्रे । कथंकथमपि खल्वारूढा दुस्तरभवजलधिमध्यात् ॥१९१॥
तव परिकथितपथेन निर्वाणपुरे गन्तुमिच्छामः । ततो भगवतापि भणितं युक्तं युष्मादृशामिदम् ॥१९२॥
एवमुपबृंह्य जगद्गुरुणा दीक्षिता स्वहस्तेन । पिङ्गलकुमारप्रमुखाः कतिपयलोकेन परिकरिताः ॥१९३॥
ततो निरुपमरूपोपशोभिताश्चित्रशक्तिसंयुक्ताः । व्युच्छिन्नस्नेहनिगडा विशिष्टकुलजातिसंपन्नाः ॥१९४॥
परित्यक्तसर्वसङ्गाः समस्तसुप्रशस्तशास्त्रपारगताः । सुरविसरवन्दनीयास्ते पञ्चनवतिर्महामुनयः ॥१९५॥
यतिधर्मदुर्धरभारधुरन्धरा गुणकलापपरिकलिताः । राजन्ति शिष्यकलभैः परिवृता दिग्गजेन्द्रा इव ॥१९६॥
अत्रान्तरेऽन्ये राजेश्वरश्रेष्ठिसार्थवाहसुताः । सामन्तमन्त्रिणस्तथाऽन्येऽपि विशिष्टकुलपुत्राः ॥१९७॥
भववासोद्विग्नमनसः कृताभिलाषाश्च सर्वविरत्याम् । जिनवरसुपार्श्वपार्श्वमालीनाः, भगवता तदा ॥१९८॥
पूर्वोक्तेन क्रमेण तेऽपि स्वहस्तेन दीक्षितास्ततः । सोमापि समं सामन्तमन्त्रिदारैः सारैः ॥१९९॥
सर्वविरतिं प्रपत्तुमभिलषमाणोपस्थिता पुरतः । ततस्तस्या अपि महाव्रतदानं प्रभुणा स्वयं विहितम् ॥२००॥
ये प्रव्रज्यां कर्तुमसमर्थाः केऽपि ते सनारीकाः । श्रावकधर्मे स्थापिताः, एवं च सुपार्श्वनाथस्य ॥२०१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पणनुवइसंखमुणिपुंगवाण सयलत्थसंगहपराइं। उप्पन्नविगमधुवलक्खणाइं तिन्नेव य पयाइं॥२०३॥
कहियाइं तओ अंतोमुहुत्तमेत्तेण तयणुसारेण। तक्कालुल्लसियअउव्वबुद्धिविहवप्पभावेणं॥२०४॥
पुव्वभवब्भत्थसमत्थसत्थपरमत्थवित्थरवसेणं। सव्वेहिं विरइयाइं दुवालसंगाइं, एवं च॥ २०५॥
सयमेव जा जिणिंदो एए ठावेइ गणहरपयम्मि। ता गंधवासचुन्नं थाले घित्तूण सक्कोवि॥२०६॥
पुरओ तुरियरं चिय उवट्ठिओ अवसरंति कलिऊण। तो उट्ठिऊण सामी गिण्हइ चुन्नं समुट्ठीए॥२०७॥
ताणं च अवणयाणं सिरम्मि पक्खिवइ इय पयंपंतो। तुम्हाणमणुन्नायं तित्थमिमं पज्जवगुणेहिं॥२०८॥
एत्थंतरम्मि भमरउलमुहलियं ताणमुत्तिमंगम्मि। पणवन्नवासवासं विहियं तोसाउ तियसेहिं॥२०९॥
सोमज्जावि हु अज्जाण संजमुज्जोयसासणनिमित्तं। ठविया पवित्तिणिपए निम्मलसीलेक्ककुलभवणं॥
एत्थंतरम्मि उग्घाडपोरिसीसूयगो बली पत्तो। कारविओ सिरिसेहरनिवेण वरकलमसालिमओ॥२११॥
आढगमित्तो उच्छालिओ य गहिओ सुरासुरनरेहिं। तो सव्वे सुरवइणो पत्ता नंदीसरे दीवे॥२१२॥
काऊण जिणिंदाणं अट्ठाहियमह सट्ठाणमणुपत्ता। इय काउं वक्खाणं कइवि दिणे तयणु जिणनाहो॥२१३॥
सव्वेहिं गणहरेहिं तहणेगमुणीहिं साहुणीहिं च। परियरिओ निक्खंतो नवकंचणकमलकयचरणो॥२१४॥
तो आगासगएणं लंबियमुत्तावचूलकलिएणं। छत्तेण तहा सारयससंकधवलेहिं चमरेहिं॥२१५॥
गयणयलालंबियपायवीढसीहासणेण विउलेण। तह माहिंदज्झएणं नहमग्गगएण रायंतो॥२१६॥

प्रथमे समवसरणे समग्रगुणरत्नरोहणगिरीन्द्रः। संघश्चतुर्विधोऽपि च जातः, अथ भगवता तेषाम्॥२०२॥
पञ्चनवतिसंख्यमुनिपुङ्गवानां सकलार्थसंग्रहपराणि। उत्पन्नविगमध्रुवलक्षणानि त्रीण्येव च पदानि॥२०३॥
कथितानि ततोऽन्तर्मुहूर्तमात्रेण तदनुसारेण। तत्कालोल्लसितापूर्वबुद्धिविभवप्रभावेण॥२०४॥
पूर्वभवाभ्यस्तसमस्तशास्त्रपरमार्थविस्तरवशेन। सर्वैं विरचितानि द्वादशाङ्गानि, एवं च॥२०५॥
स्वयमेव यावज्जिनेन्द्र एतान् स्थापयति गणधरपदे। तावद् गन्धवासचूर्णं स्थाले गृहीत्वा शक्रोऽपि॥२०६॥
पुरतस्त्वरिततरमेवोपस्थितोऽवसर इति कलयित्वा। तत उत्थाय स्वामी गृह्णाति चूर्णं स्वमुष्ट्या॥२०७॥
तेषां चावनतानां शिरसि प्रक्षिपतीति प्रजल्पन्। युष्माकमनुज्ञातं तीर्थमिदं पर्यवगुणैः॥२०८॥
अत्रान्तरे भ्रमरकुलमुखरितस्तेषामुत्तमाङ्गे। पञ्चवर्णवासवासो विहितस्तोषात् त्रिदशैः॥२०९॥
सोमार्यापि खल्वार्याणां संयमोद्योतशासननिमित्तम्। स्थापिता प्रवर्तिनीपदे निर्मलशीलैककुलभवनम्॥२१०॥
अत्रान्तरे उद्घाटपौरुषीसूचको बलिः प्राप्तः। कारितः श्रीशेखरनृपेण वरकलमशालिमयः॥२११॥
आढकमात्र उच्छालितश्च गृहीतः सुरासुरनरैः। ततः सर्वे सुरपतयः प्राप्ता नन्दीश्वरे द्वीपे॥२१२॥
कृत्वा जिनेन्द्राणामष्टाह्निकामथ स्वस्थानमनुप्राप्ताः। इति कृत्वा व्याख्यानं कत्यपि दिनानि तदनु जिननाथः॥
सर्वैर्गणधरैस्तथानेकमुनिभिः साध्वीभिश्च। परिकरितो निष्क्रान्तो नवकाञ्चनकमलकृतचरणः॥२१४॥
तत आकाशगतेन लम्बितमुक्तावचूलकलितेन। छत्रेण तथा शारदशशाङ्कधवलैश्चामरैः॥२१५॥
गगनतलालम्बितपादपीठासिंहासनेन विपुलेन। तथा माहेन्द्रध्वजेन नभोमार्गगतेन राजन्॥२१६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सायरमणुगच्छंतीसु भत्तिपरिकलियतियसकोडीसु । वायंतेसु य अणुकूलसिसिरसुसुयंधपवणेसु ॥२१७॥
हिट्ठाहुत्तं परिसंठिएसु मग्गम्मि कंटगगणेसु । भत्तीइव नमंतीसु मग्गतरुविसरसेणीसु ॥२१८॥
अणुगिण्हंतो तह सव्वविरइदाणेण भव्वसत्तजणं । गामागरनयरमडंबखेडपुरकव्वडाईसु ॥२१९॥
विहरंतो संपत्तो कमेण सिरिनंदिवद्धणपुरम्मि । पुव्वुत्तरदिसिभागे कुसुमकरंडम्मि उज्जाणे ॥२२०॥
पुव्वुत्तेण कमेणं रइयं देवेहिं वरसमोसरणं । रयणमयपगारब्भंतरम्मि सीहासणं ठवियं ॥२२१॥
पुव्वाभिमुहं मणिमयसुपायवीढेण संजुयं तत्तो । भयवं सुपासनाहो तिजयपहू तत्थ उवविसइ ॥२२२॥
पयवीढअदूरे च्चिय भयवंतो गणहराइया सव्वे । नियनियठाणेसु ठिया तिरिया दुइयम्मि पायारे॥२२३॥
तथाहि;—
मुणिवेमाणियदेवीसाहुणीओ ठंति अग्गिकोणम्मि । जोइसियभवणवंतरदेवीओ होंति नेरईए ॥२२४॥
भवणवणजोइसदेवा वायव्वे, कप्पवासिणो अमरा । नरनारीओ ईसाणे पुव्वाइसु पविसिउं ठंति॥२२५॥
एत्थंतरे पसिद्धी वित्थरिया नंदिवद्धणपुरम्मि। जह सिरिसुपासनाहो उज्जाणे इह समोसरिओ ॥२२६॥
तत्तो सुइभूयतणू नयरजणो जाइ जिणवरं दट्ठुं । पूओवगरणपडलयहत्थो सुपसत्थवेसधरो ॥२२७॥
तं तह वच्चंतं पिच्छिऊण सिरिविजयवद्धणो राया । पासायगवक्खगओ पुच्छइ मइसायरममच्चं ॥२२८॥
जह इंदमहप्पमुहो किं कोवि महूसवो नयरमज्झे । पुप्फकरंडयहत्थो जं वच्चइ एस सयलजणो ? ॥२२९॥

सादरमनुगच्छन्तीषु भक्तिपरिकलितत्रिदशकोटिषु । वात्सु चानुकूलशिशिरसुसुगन्धपवनेषु ॥२१७॥
अधोमुखं परिसंस्थितेषु मार्गे कण्टकगणेषु । भक्त्येव नमन्तीषु मार्गतरुविसरश्रेणीषु ॥२१८॥
अनुगृह्णंस्तथा सर्वविरतिदानेन भव्यसत्त्वजनम् । ग्रामाकरनगरमडम्बखेटपुरकर्बटादिषु ॥२१९॥
विहरन् संप्राप्तः क्रमेण श्रीनन्दिवर्धनपुरे । पूर्वोत्तरदिग्विभागे कुसुमकरण्ड उद्याने ॥२२०॥
पूर्वोक्तेन क्रमेण रचितं देवैर्वरसमवसरणम् । रत्नमयप्राकाराभ्यन्तरे सिंहासनं स्थापितम् ॥२२१॥
पूर्वाभिमुखं मणिमयसुपादपीठेन संयुतं ततः । भगवान् सुपार्श्वनाथस्त्रिजगत्प्रभुस्तत्रोपविशति ॥२२२॥
पादपीठादूर एव भगवन्तो गणधरादिकाः सर्वे । निजनिजस्थानेषु स्थितास्तिर्यञ्चो द्वितीये प्राकारे ॥२२३॥
मुनिवैमानिकदेवीसाध्व्यस्तिष्ठन्त्यग्निकोणे । ज्यौतिषिकभवनव्यन्तरदेव्यो भवन्ति नैर्ऋते ॥२२४॥
भवनवनज्यौतिषदेवा वायव्ये, कल्पवासिनोऽमराः । नरनार्य ईशाने पूर्वादिषु प्रविश्य तिष्ठन्ति ॥२२५॥
अत्रान्तरे प्रसिद्धिर्विस्तृता नन्दिवर्धनपुरे । यथा श्रीसुपार्श्वनाथ उद्यान इह समवसृतः ॥२२६॥
ततः शुचिभूततनुर्नगरजनो याति जिनवरं द्रष्टुम् । पूजोपकरणपटलकहस्तः सुप्रशस्तवेषधरः ॥२२७॥
तं तथा व्रजन्तं दृष्ट्वा श्रीविजयवर्धनो राजा । प्रासादगवाक्षगतः पृच्छति मतिसागरममत्यम् ॥२२८॥
यथेन्द्रमहप्रमुखः किं कोऽपि महोत्सवो नगरमध्ये । पुष्पकरण्डकहस्तो यद् व्रजत्येष सकलजनः ? ॥२२९॥
ततः संनिहितजनाज्जिनागमनं विज्ञाय सोऽपि । जल्पति न कोऽप्यन्यो महोत्सवः किन्तु बहिः ॥२३०॥

---

१ गं. मईयपाय ।

तो संनिहियजणाओ जिणआगमणं वियाणिउं सोवि । जंपइ न कोवि अन्नो महूसवो किंतु बाहिम्मि ॥
उज्जाणवणे सुम्मइ समोसढो सिरिसुपासतित्थयरो । तव्वंदणत्थमेसो नयरजणो वच्चइ समग्गो ॥२३१॥
तं सोऊणं पभणइ नरनाहो जह अमच्च ! अम्हेवि । तव्वंदणानिमित्तं वच्चिस्सामो किमन्नेण ? ॥२३२॥
भणियं च तेण तद्दंसणंपि कल्लाणकारणं देव ! । किं पुण गमणनमंसणपयसेवापमुहपडिवत्ती ॥२३३॥
ता कुणसु सयं तद्दंसणेण मणुयत्तस्स सफलत्तं । इय वुत्ते सचिवेणं विजयनरिंदो तओ तुरियं ॥२३४॥
संचलिओ जिणवरपायमूलमह सो कमेण संपत्तो । पंचविहाभिगमेणं उल्लसियाविरलरोमंचो ॥२३५॥
तिक्खुत्तो दाऊणं पयाहिणं पणमिउं च जिणनाहं । भत्तिभरनिब्भरंगो एवं थुणिउं समारद्धो ॥२३६॥
देव ! तुह चरणनहमणिमऊहदीवा जयंतु जे रविणो । खंडंति चंडिमं मोहतिमिरहरणेण भुवणम्मि॥२३७॥
पहु ! बहुपयंडपासंडिमंडिए महियलम्मि जीवाण । तुह दंसणंपि जायइ अणंतभवचिन्नपुन्नेहिं ॥२३८॥
अज्जं चिय मह मणवंछियाइं जायाइं अज्ज जाओ हं । चिरकालओवि जं दिट्ठिगोयरे नाह ! तं जाओ॥२३९॥
ता लहु इण्हि सारयसंपुन्नससंककिरणसिसिराए । अवहरसु नियगिराए जिणम्ह भवगिम्हसंतावं॥२४०॥
इय संथोउं राया उवविट्ठइ ठाविऊण नियदिट्ठिं । जिणवरवयणे, एत्तो भयवं धम्मकहं कहइ ॥२४१॥
कहं विय ?
जोणीलक्खाणि य परिभमित्तु लद्धूण कहवि मणुयत्तं । जे नायरंति धम्मं नरिंद ! ते अप्पणो अहिया॥२४२॥
जेणं करयलपरिकलियसलिलबिंदुव्व गलइ अणुसमयं । जीयं, जराइरोगा देहं दूमंति तह निच्चं ॥२४३॥

उद्यानवने श्रूयते समवसृतः श्रीसुपार्श्वतीर्थकरः । तद्वन्दनार्थमेष नगरजनो व्रजति समग्रः ॥२३१॥
तत् श्रुत्वा प्रभणति नरनाथो यथाऽमर्त्य ! वयमपि । तद्वन्दनानिमित्तं व्रजिष्यामः किमन्येन ? ॥२३२॥
भणितं च तेन तद्दर्शनमपि कल्याणकारणं देव ! । किं पुनर्गमननमस्यनपदसेवाप्रमुखप्रतिपत्तिः ॥२३३॥
तस्मात् कुरुष्व स्वयं तद्दर्शनेन मनुजत्वस्य सफलत्वम् । इत्युक्ते सचिवेन विजयनरेन्द्रस्ततस्त्वरितम् ॥२३४॥
संचलितो जिनवरपादमूलमथ स क्रमेण संप्राप्तः । पञ्चविधाभिगमेनोल्लसिताविरलरोमाञ्चः ॥२३५॥
त्रिर्दत्त्वा प्रदक्षिणां प्रणम्य च जिननाथम् । भक्तिभरनिर्भराङ्ग एवं स्तोतुं समारब्धः ॥२३६॥
देव ! तव चरणनखमणिमयूखदीपा जयन्तु, ये रवेः । खण्डयन्ति चण्डिमानं मोहतिमिरहरणेन भुवने॥२३७॥
प्रभो ! बहुप्रचण्डपाखण्डिमण्डिते महीतले जीवानाम् । तव दर्शनमपि जायतेऽनन्तभवचीर्णपुण्यैः ॥२३८॥
अद्यैव मम मनोवाञ्छितानि जातान्यद्य जातोऽहम् । चिरकालतोऽपि यद् दृष्टिगोचरे नाथ ! त्वं जातः ॥२३९॥
तस्माल्लध्विदानीं शारदसंपूर्णशशाङ्ककिरणशिशिरया । अपहर निजगिरया जिनास्माकं भवग्रीष्मसंतापम् ॥२४०॥
इति संस्तुत्य राजोपतिष्ठते स्थापयित्वा निजदृष्टिम् । जिनवरवदने, इतो भगवान् धर्मकथां कथयति ॥२४१॥
कथमिव ?
योनिलक्षाणि च परिभ्रम्य लब्ध्वा कथमपि मनुजत्वम् । ये नाचरन्ति धर्मं नरेन्द्र ! त आत्मनोऽहिताः॥२४२॥
येन करतलपरिकलितसलिलबिन्दुरिव गलत्यनुसमयम् । जीवितम्, ज्वरादिरोगा देहं दावयन्ति तथा नित्यम्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अइबहुकिलेससमुवज्जियावि चोराइहरणकवडेहिं । लच्छी खणेण नासइ विज्जुलयाचंचला नूणं ॥२४४॥
पिउमाइमित्तसुकलत्तपुत्तसयणाइओवि संजोगो । खणदिट्ठनट्ठरूवो जलनिहिकल्लोलसंकासो ॥२४५॥
विसयसुहं पुण विरसं खणरमणीयं च जोव्वणं नूणं । किं बहुणा इह नरवर ! मोत्तुं जिणदेसियं धम्मं ॥
न हु किंपि सासयं इय मुणित्तु तं चेव कुणसु अवियप्पं। जेण लहुमेव सासयसिवसुहठाणं तुमं लहसि ॥
इय सोउं संविग्गो दाणविरयस्स नियकुमारस्स । काउं रज्जभिसेयं विजयनरिंदो पमोएण ॥२४८॥
पव्वज्जं पडिवज्जइ महाविभूईए जिणवरसमीवे । एत्तो य दाणविरओ नरनाहो भणइ नमिऊण ॥२४९॥
जिणनाह ! रज्जकज्जे समुज्जयाणं गिहे वसंताण । जं किंपि हु करणिज्जं अम्हाण तमिण्हिमाइससु ॥
तो भणइ जिणो सावयधम्मो नरनाह ! तुम्ह कायव्वो । सो य दुवालसभेओ ते पुण भेया इमे नेया ॥
पाणिवहमुसावाए अदिन्नमेहुणपरिग्गहे चेव । दिसिभोगदंडसमइयदेसे तह पोसहविभागे ॥२५२॥
एयस्स सभेयस्सवि पत्तेयं पंच पंच अइयारा । मूलं पुण सम्मत्तं सभेयभिन्नस्सवि इमस्स ॥२५३॥
तस्स य पंच अइयारा ता तं पडिवज्जिऊण नरनाह ! । निरईयारं सावयधम्मं बारसविहं कुणसु ॥२५४॥
इय सोऊणं पभणइ दाणविरओ जिणिंद ! जे केवि । पालंति निरइयारं सम्मत्तं जं फलं ताणं ॥२५५॥
जे पुण साईयारं केवि हु पालंति जं च ताण फलं । तह बारसभेयंपि हु सावयधम्मं निरइयारं॥२५६॥
जे आयरंति केवि हु ताण फलं, जे य साइयारं तु । पालंति ताण य फलं सवित्थरं सोउमिच्छामि ॥

अतिबहुक्लेशसमुपार्जितापि चौरादिहरणकपटैः । लक्ष्मीः क्षणेन नश्यति विद्युलताचञ्चला नूनम् ॥२४४॥
पितृमातृमित्रसुकलत्रपुत्रस्वजनादिकोऽपि संयोगः । क्षणदृष्टनष्टरूपो जलनिधिकल्लोलसंकाशः ॥२४५॥
विषयसुखं पुनर्विरसं क्षणरमणीयं च यौवनं नूनम् । किं बहुनेह नरवर ! मुक्त्वा जिनदेशितं धर्मम् ॥२४६॥
न खलु किमपि शाश्वतमिति ज्ञात्वा तदेव कुरुष्वाविकल्पम् । येन लघ्वेव शाश्वतशिवसुखस्थानं त्वं लभसे ॥
इति श्रुत्वा संविग्नो दानविरतस्य निजकुमारस्य । कृत्वा राज्याभिषेकं विजयनरेन्द्रः प्रमोदेन ॥२४८॥
प्रव्रज्यां प्रतिपद्यते महाविभूत्या जिनवरसमीपे । इतश्च दानविरतो नरनाथो भणति नत्वा ॥२४९॥
जिननाथ ! राज्यकार्ये समुद्यतानां गृहे वसताम् । यत् किमपि हि करणीयमस्माकं तदिदानीमादिश ॥२५०॥
ततो भणति जिनः श्रावकधर्मो नरनाथ ! त्वया कर्तव्यः । स च द्वादशभेदस्ते पुनर्भेदा इमे ज्ञेयाः ॥२५१॥
प्राणिवधमृषावादादत्तमैथुनपरिग्रहाश्चैव । दिग्भोग-दण्ड-सामायिक-देशास्तथा पौषध-विभागौ ॥२५२॥
एतस्य सभेदस्यापि प्रत्येकं पञ्च पञ्चातिचाराः । मूलं पुनः सम्यक्त्वं सभेदभिन्नस्याप्यस्य ॥२५३॥
तस्य च पञ्चातिचारास्तस्मात् तत्प्रतिपद्य नरनाथ ! । निरतीचारं श्रावकधर्मं द्वादशविधं कुरुष्व ॥२५४॥
इति श्रुत्वा प्रभणति दानविरतो जिनेन्द्र ! ये केऽपि । पालयन्ति निरतिचारं सम्यक्त्वं यत् फलं तेषाम् ॥२५५॥
ये पुनः सातीचारं केऽपि खलु पालयन्ति यच्च तेषां फलम् । तथा द्वादशभेदमपि खलु श्रावकधर्मं निरतिचारम्
य आचरन्ति केऽपि खलु तेषां फलं, ये च सातिचारं तु । पालयन्ति तेषां च फलं सविस्तरं श्रोतुमिच्छामि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता पसिऊणं साहसु सोयाहरणं जिणिंद! जं जाणं। जायं फलंति, एत्तो भयवंपि हु कहिउमारद्धो ॥

॥ इति श्रीसुपार्श्वजिनचरित्रे केवलज्ञानश्रीप्राप्तिः ॥

तस्मात् प्रसद्य कथय सोदाहरणं जिनेन्द्र! यद् येषाम्। जातं फलमिति, इतो भगवानपि खलु कथयितुमारब्धः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सम्मत्त थिरचित्ता सत्ता जे पवयणं पभाविंति। चंपयमालव्व लहंति ते सिवं तब्भवेणेव ॥ १ ॥
तहाहि;
जंबुद्दीवे दीवे भारहवासस्स मज्झयारम्मि । अत्थि नयरी विसाला तिहावि नामेण य विसाला ॥२॥
जत्थुवसग्गो गुरुलाघवं च गुणबाहिया य तह वुड्ढी । वन्ननिवायवियारा वागरणे न उण लोयम्मि॥३॥
तत्थत्थि अत्थिमणवंछियत्थसंपाडणिक्कदुल्ललिओ । ललियंगउत्ति राया राया जणकुमुयसंडस्स ॥४॥
निज्जियविपक्खलक्खो कमलदलक्खो कलासु निरुद्दक्खो। जिणधम्मबद्धलक्खो जो निच्चं विहियहियरक्खो
तस्सत्थि पिया भज्जा निरुवमलज्जा सुसीलकयचोज्जा । सद्धम्मम्मि सुसज्जा पीइमई नाम निरवज्जा ॥
ताणं च परोप्परपीइनिब्भरं विसयसोक्खनिरयाणं। पंचसुयाणं उवरिं जाया धूया पवररूवा ॥७॥
गिरिकंदरंतरगया देहोवचएण गुणकलावेण । चंपयलयव्व वड्ढइ चंपयमालत्ति कयनामा ॥८॥
अह जोग्गत्तं पत्ता अज्झावयकुमुयचंदपासम्मि। लक्खणसाहित्तपमाणजोइसाईणि सा पढइ ॥९॥
सामंतमंतिभडसंकडम्मि अह अन्नया नरिंदस्स । अत्थाणम्मि पविट्ठो पडिहारनिरूवियसरूवो ॥१०॥
रायाहिरायअरिकेसरिस्स पहुणो कुणालनयरीए । नामेणं अमरगुरू रायगुरुत्तणगुणग्घविओ ॥११॥
अब्भुट्ठिऊण रन्ना सायरमवगूहिउं उचियठाणे । उववेसिऊण पुट्ठो अरिकेसरिनिवइणो कुसलं ॥१२॥
तम्मि य खणम्मि बाला चंपयमाला सहीहिं परियरिया । नियअज्झावयजुत्ता संपत्ता रायपासम्मि॥१३॥

सम्यक्त्वे स्थिरचित्ताः सत्त्वा ये प्रवचनं प्रभावयन्ति । चम्पकमालेव लभन्ते ते शिवं तद्भवेनैव ॥१॥
तथाहि;—
जम्बूद्वीपे द्वीपे भारतवर्षस्य मध्ये । अस्ति नगरी विशाला त्रिधापि नाम्ना च विशाला ॥२॥
यत्रोपसर्गो गुरुलाघवं च गुणबाधिता च तथा वृद्धिः । वर्णनिपातविकारा व्याकरणे न पुनर्लोके ॥३॥
तत्रास्त्यर्थिमनोवाञ्छितार्थसंपादनैकदुर्ललितः । ललिताङ्गक इति राजा राजा जनकुमुदषण्डस्य ॥४॥
निर्जितविपक्षलक्षः कमलदलाक्षः कलासु निश्चितदक्षः । जिनधर्मबद्धलक्ष्यो यो नित्यं विहिताहितरक्षः ॥५॥
तस्यास्ति प्रिया भार्या निरुपमलज्जा सुशीलकृताश्चर्या । सद्धर्मे सुसज्जा प्रीतिमती नाम निरवद्या ॥६॥
तयोश्च परस्परप्रीतिनिर्भरं विषयसौख्यनिरतयोः । पञ्चसुतानामुपरि जाता दुहिता प्रवररूपा ॥७॥
गिरिकन्दरान्तर्गता देहोपचयेन गुणकलापेन । चम्पकलतेव वर्धते चम्पकमालेति कृतनामा ॥८॥
अथ योग्यतां प्राप्ताऽध्यापककुमुदचन्द्रपार्श्वे । लक्षणसाहित्यप्रमाणज्यौतिषादीनि सा पठति ॥९॥
सामन्तमन्त्रिभटसंकटेऽथान्यदा नरेन्द्रस्य । आस्थाने प्रविष्टः प्रतिहारनिरूपितस्वरूपः ॥१०॥
राजाधिराजारिकेसरिणः प्रभोः कुणालानगर्याः । नाम्नाऽमरगुरू राजगुरुत्वगुणपरिपूर्णः ॥११॥
अभ्युत्थाय राज्ञा सादरमवगुह्योचितस्थाने । उपवेश्य पृष्टोऽरिकेसरिनृपतेः कुशलम् ॥१२॥
तस्मिंश्च क्षणे बाला चम्पकमाला सखीभिः परिकरिता । निजाध्यापकयुक्ता संप्राप्ता राजपार्श्वे ॥१३॥

---

१ विस्तीर्णा, विशिष्टः शालः प्राकारो यस्याम्, विशिष्टाः शालाः = द्रुमाश्च यस्यां सा त्रिधा विशालेत्यर्थः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पायवडिया निवेण उच्छंगे ठाविऊण सा पुट्ठा । किं पढियं पुत्ति! तए कहेहि मूलाओ आरब्भ? ॥१४॥
सा किंपि जा न जंपइ ता भणियं कुमुयचंदविबुहेग । अपढियमवि मुणइ इमा नरवर! बहुसत्थपरमत्थं॥
तं सोउं अमरगुरू अरिकेसरिणो महानरिंदस्स । जइ गिहिणी हवइ इमा तो लट्ठं इय [1]विचिंतेउं ॥१६॥
पुच्छइ किं तुह वच्छे चूडामणिसत्थआगमो अत्थि?। सा भणइ अत्थि किंचिवि, जइ अत्थि कहेह ता एयं॥
होही को तुज्झ पई कया य कह वट्टिही य सह तुमए । संतइसंपत्तीए कइ पुत्ता कइ व पुत्तीओ? ॥१८॥
लज्जाए जा न जंपइ तं पइ पच्चुत्तरं, तओ भणिया । उज्झाएण कहिज्जउ मा विज्जाहीलणं होही ॥१९॥
तो परिचिंतिय जंपइ मउयं महुरक्खरेहिं सा बाला । अरिकेसरिनरनाहो वरिसंते मह पई होही ॥२०॥
बारह वरिसे रत्तो छम्मासे विरचिऊण रच्चेही । सुयजुयलं एक्का कन्नगा उ तह संतई होही ॥२१॥
इय कहियं तुह पुट्ठं इण्हिमपुट्ठंपि किंपि साहेमि । तुह पुत्तो संपत्तो परलोयगईय दसमदिणे ॥२२॥
तीए च्चिय रयणीए चरिमे जामम्मि पणइणी तुम्ह । पुत्तरयणं पसूया वरलंछणलंछियसरीरं ॥२३॥
अह सो विसायसंतोसपरवसो पुच्छए नरिंदसुयं । को हेऊ संजाओ परलोयगमे मह सुयस्स ?॥२४॥
तो सविसेसं परिभाविऊण चूडामणीए परमत्थं । सम्मं नाउं साहइ जहट्ठियं वइयरं एवं ॥२५॥
तं पत्थिओ सि जइया रायाएसेण तायमुद्दिसिउं । तइया किल तुह पुत्तो तए समं आसि संचलिओ॥२६॥
थक्को तए विमुक्को समुव्वहंतो मणम्मि अवमाणं । सुहपंसुकीलिएहिं कीलंतो सह वयंसेहिं ॥२७॥

पादपतिता नृपेणोत्सङ्गे स्थापयित्वा सा पृष्टा । किं पठितं पुत्रि ! त्वया कथय मूलादारभ्य ? ॥१४॥
सा किमपि यावन्न जल्पति तावद्भणितं कुमुदचन्द्रविबुधेन । अपाठितमपि जानातीयं नरवर ! बहुशास्त्रपरमार्थम्।१५।
तत् श्रुत्वाऽमरगुरुररिकेसरिणो महानरेन्द्रस्य । यदि गृहिणी भवेदियं ततः सुन्दरमिति विचिन्त्य ॥१६॥
पृच्छति किं तव वत्से ! चूडामणिशास्त्रागमोऽस्ति ? । सा भणत्यस्ति किञ्चिदपि, यद्यस्ति कथय तत एतत्॥
भविष्यति कस्तव पतिः कदा च कथं वर्त्स्यति च सह त्वया । संततिसंपत्तौ कति पुत्राः कति वा पुत्र्यः?।१८।
लज्जया यावन्न जल्पति तं प्रति प्रत्युत्तरं, ततो भणिता । उपाध्यायेन कथ्यतां मा विद्याहेलनं भूत्॥१९॥
ततः परिचिन्त्य जल्पति मृदुकं मधुराक्षरैः सा बाला । अरिकेसरिनरनाथो वर्षान्ते मम पतिर्भविष्यति ॥२०॥
द्वादश वर्षाणि रक्तो षण्मासान् विरज्य रङ्क्ष्यति । सुतयुगलमेका कन्यका तु तथा संततिर्भविष्यति ॥२१॥
इति कथितं तव पृष्टमिदानीमपृष्टमपि किमपि कथयामि । तव पुत्रः संप्राप्तः परलोकगतौ दशमदिने ॥२२॥
तस्यामेव रजन्यां चरमे यामे प्रणयिनी तव । पुत्ररत्नं प्रसूता वरलाञ्छनलाञ्छितशरीरम् ॥२३॥
अथ स विषादसंतोषपरवशः पृच्छति नरेन्द्रसुताम् । को हेतुः संजातः परलोकगमे मम सुतस्य ? ॥२४॥
ततः सविशेषं परिभाव्य चूडामणेः परमार्थम् । सम्यग् ज्ञात्वा कथयति यथास्थितं व्यतिकरमेवम् ॥२५॥
त्वं प्रस्थितोऽसि यदा राजादेशेन तातमुद्दिश्य । तदा किल तव पुत्रस्त्वया सममासीत् संचलितः ॥२६॥
अवसरे त्वया विमुक्तः समुद्वहन् मनस्यपमानम् । सुखपांशुक्रीडितैः क्रीडन् सह वयस्यैः ॥२७॥

---

१ ग. किंपि चि° । २ क. ख. पभणइ चूडामणीइवि परिस्समो अत्थि रायपुत्तीए ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह अन्नया कयाई उज्जाणमहूसवम्मि गमणत्थं । तुहपुव्वपुरिसखग्गं करे करेऊण जा चलिओ ॥२८॥
तो जणणीए भणियं पूइज्जइ चेव खग्गरयणमिणं। न हु चालिज्जइ ता वच्छ ! गच्छ एयं विमोत्तूण ॥२९॥
अवमाणियमप्पाणं मन्नंतो सोवि पुव्वकम्मवसा । रयणीए पसुत्ताए सपरियणाएवि जणणीए ॥३०॥
सणियं सणियं सयणीययाउ गंतूण उववणस्संतो । वावीए निवडिओ विहडिओ य से पाणसंबंधो ॥
सव्वत्थ गविट्ठो सो अलहंतेणं पउत्तिमित्तंपि । जणणीपमुहजणेणं तो तुह पासम्मि धावणओ ॥३२॥
संपेसिओ कुरंगो एही सो संपयम्मि एत्थेव । तक्खणमह पडिहारेण सूइओ सोवि संपत्तो ॥३३॥
नरनाहं अमरगुरुं च नमिय तं तह कहेइ सो सव्वं । जह कुमरीए भणियं अमरगुरू अह पयंपेइ ॥३४॥
अन्नाणतिमिरहरणी अलद्धरूवा य जयत्तयवहूहिं । तुम्ह गिहे अवइन्ना पच्चक्खसरस्सई एसा ॥३५॥
इय सेसेवि पसंसारसिए अत्थाणसंठिए लोए । आपुच्छिऊण जणयं समुट्ठिया जाव किर कुमरी ॥३६॥
ता अंगविलग्गं नरवरेण अन्नेण तयणु लोएण । दिन्नमसेसाहरणं, रन्ना तह कुमुयचंदस्स ॥३७॥
दिन्नं सुवण्णलक्खस्स सासणं नासणं दरिद्दस्स । चंपयमालाणुगओ गओ तओ सोवि नियठाणं ॥३८॥
नरनाहो अमरगुरुं पइ जंपइ तुम्ह संपइ कुणालं। गंतुं जुत्तं तुरियं नियपरियणट्ठावणट्ठाए ॥३९॥
ता संखेवेणं चिय कहेहि रायाहिरायआएसं । तो जंपइ अमरगुरू तुम्ह गढो अत्थि सीमाए ॥४०॥
सो अम्हं चिय दिज्जउ लिज्जउ अत्थेण सह गढो उचिओ । इय आएसो रायाहिवस्स, तो जंपए राया ॥

अथान्यदा कदाचिदुद्यानमहोत्सवे गमनार्थम् । त्वत्पूर्वपुरुषखड्गं करे कृत्वा यावच्चलितः ॥२८॥
ततो जनन्या भणितं पूज्यत एव खड्गरत्नमिदम् । न च चाल्यते तस्माद् वत्स ! गच्छैनं विमुच्य ॥२९॥
अवमानितमात्मानं मन्यमानः सोऽपि पूर्वकर्मवशात् । रजन्यां प्रसुप्तायां सपरिजनायामपि जनन्याम् ॥३०॥
शनैः शनैः शयनीयाद् गत्वोपवनस्यान्तः । वाप्यां निपतितो विघटितश्च तस्य प्राणसंबन्धः ॥३१॥
सर्वत्र गवेषितः सोऽलभमानेन प्रवृत्तिमात्रमपि । जननीप्रमुखजनेन ततस्तव पार्श्वे धावनकः ॥३२॥
संप्रेषितः कुरङ्ग एष्यति स सांप्रतमत्रैव । तत्क्षणमथ प्रतिहारेण सूचितः सोऽपि संप्राप्तः ॥३३॥
नरनाथममरगुरुं च नत्वा तत् तथा कथयति स सर्वम् । यथा कुमार्या भणितममरगुरुरथ प्रजल्पति ॥३४॥
अज्ञानतिमिरहरणी अलब्धरूपा च जगत्त्रयवधूभिः । युष्माकं गृहेऽवतीर्णा प्रत्यक्षसरस्वत्येषा ॥३५॥
इति शेषेऽपि प्रशंसारसिके आस्थानसंस्थिते लोके । आपृच्छ्य जनकं समुत्थिता यावत्किल कुमारी ॥३६॥
तावदङ्गविलग्नं नरवरेणान्येन तदनु लोकेन । दत्तमशेषाभरणं, राज्ञा तथा कुमुदचन्द्राय ॥३७॥
दत्तं सुवर्णलक्षस्य शासनं नाशनं दारिद्र्यस्य । चम्पकमालानुगतो गतस्ततः सोऽपि निजस्थानम् ॥३८॥
नरनाथोऽमरगुरुं प्रति जल्पति तव संप्रति कुणालाम्। गन्तुं युक्तं त्वरितं निजपरिजनस्थापनार्थम् ॥३९॥
ततः संक्षेपेणैव कथय राजाधिराजादेशम् । ततो जल्पत्यमरगुरुर्युष्माकं दुर्गोऽस्ति सीम्नि ॥४०॥
सोऽस्मभ्यं दीयतां लायतामर्थेन सह दुर्ग उचितः । इत्यादेशो राजाधिपस्य, ततो जल्पति राजा ॥४१॥

---

१ क. ० या य उज्जाणियाए सो मित्तमंडलीकलिओ ।

अरिकेसरिनरवइणो रज्जमिणं किं गढेण एक्केण?। तो अमरगुरू जंपइ सुयणत्ते तुज्झ को तुल्लो? ॥४२॥
अप्पाविउं गढं सो रन्ना संमाणिओ बहुपयारं। नियनयरिं संचलिओ चिंतइ विम्हयवसं पत्तो ॥४३॥
बालाए अबलाए सारयबालिंदुनिम्मलकलाए। कलिकालकलुत्तिन्नाए तिन्नि अच्चब्भुयाइं से ॥४४॥
तथाहि;–
इह देसकालववहियबायरसुहुमत्थपयडणं नाणं। रूवं अवयवसमुदयसोहं मुणिमणविणोयखमं ॥४५॥
इत्थियणतुच्छयाविसयसत्थअवहेलओ फुडं विणओ। अब्भासाओ कम्मम्मि कोसलं तं इमं विहिणो ॥
संपत्तो य कुणालापहुणो अरिकेसरिस्स पासम्मि। ललियंगरायपेसियमुवणीयमुवायणं तत्तो ॥४७॥
उचियपडिवत्तिपुव्वं उवविसिउं कहइ तुम्ह आएसो। ललियंगएण रन्ना सीसेण पडिच्छिओ एवं ॥४८॥
अह जहवत्तं साहइ जंपेइ अवच्चवं च सो चेव। जेण पसूया भुवणिक्कभूसणं एरिसा कन्ना ॥४९॥
तथाहि;–
रूवेण रई वरई गउरी गंगावि जीए न हु चंगा। सोहग्गेण सदंभा रंभावि हु तं नियंताणं ॥५०॥
सयलकलाकुसलत्तं तीए पाएण, किंतु नरनाह!। चूडामणीइ सो कोवि पगरिसो जो न अन्नस्स ॥५१॥
कह जाणह इय भणिए सवित्थरो पुत्तमरणवुत्तंतो। तीए जह परिकहिओ तह कहिओ तेण नियरन्नो।
किं बहुणा अणुरूवो संजोओ जायए जयप्पवरो। जइ तुम्हाणं करफंससुहलंभं लहइ सा बाला ॥५३॥
एवं निसुणंतेणं नरवइणा वम्महो तहग्घविओ। जह गरिमधीरिमाहिं चत्तो ईसाइव खणेण ॥५४॥
तो पभणइ अमरगुरुं बुद्धीए अमरगुरुसमस्सावि। जाओ तुज्झ पमाओ जं सा न हु मग्गिया तइया॥५५॥

अरिकेसरिनरपते राज्यमिदं किं दुर्गेणैकेन?। ततोऽमरगुरुर्जल्पति सुजनत्वे तव कस्तुल्यः? ॥४२॥
अर्पयित्वा दुर्गं स राज्ञा संमानितो बहुप्रकारम्। निजनगरीं संचलितश्चिन्तयति विस्मयवशं प्राप्तः ॥४३॥
बालाया अबलायाः शारदबालेन्दुनिर्मलकलायाः। कलिकालकलोत्तीर्णायास्त्रीण्यत्यद्भुतानि तस्याः ॥४४॥
इह देशकालव्यवहितबादरसूक्ष्मार्थप्रकटनं ज्ञानम्। रूपमवयवसमुदयशोभं मुनिमनोविनोदक्षमम् ॥४५॥
स्त्रीजनतुच्छताविषयशास्त्रावहेलकः स्फुटं विनयः। अभ्यासात् कर्मणि कौशलं तदिदं विधेः ॥४६॥
संप्राप्तश्च कुणालाप्रभोररिकेसरिणः पार्श्वे। ललिताङ्गराजप्रेषितमुपनीतमुपायनं ततः ॥४७॥
उचितप्रतिपत्तिपूर्वमुपविश्य कथयति युष्माकमादेशः। ललिताङ्केन राज्ञा शीर्षेण प्रतीष्ट एवम् ॥४८॥
अथ यथावृत्तं कथयति जल्पत्यपत्यवांश्च स एव। येन प्रसूता भुवनैकभूषणमीदृशी कन्या ॥४९॥
रूपेण रतिर्वराकी गौरी गङ्गापि यस्या न हि चङ्गा। सौभाग्येन सदम्भा रम्भापि खलु तां पश्यताम् ॥५०॥
सकलकलाकुशलत्वं तस्याः प्रायेण, किन्तु नरनाथ!। चूडामणौ स कोऽपि प्रकर्षो यो नान्यस्य ॥५१॥
कथं जानीथेति भणिते सविस्तरः पुत्रमरणवृत्तान्तः। तया यथा परिकथितस्तथा कथितस्तेन निजराजस्य॥५२॥
किं बहुनाऽनुरूपः संयोगो जायेत जगत्प्रवरः। यदि युष्माकं करस्पर्शसुखलाभं लभते सा बाला ॥५३॥
एवं शृण्वता नरपतिना मन्मथस्तथा पूर्णः। यथा गरिमधीरिमभ्यां त्यक्त ईर्ष्ययेव क्षणेन ॥५४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं जइ कन्नारयणं संपाडइ नरवरो स अन्नस्स । रयणनिहिं दंसिय उक्खयाणि ता अम्ह नयणाणि ॥५६॥
तो जंपइ अमरगुरू होइ न अन्नस्स सा नरिंद ! जओ । वरिसस्संते तं चिय तीए वरो अप्पणो कहिओ ॥५७॥
भणइ निवो तहवि रइं न दिंति एयाइं मज्झ नयणाइं । तद्दंसणपीऊसासायणअइलंपडत्तेण ॥५८॥
ता पत्थणामिसेणं तीए तं गच्छ तत्थ सिग्घंपि । वेसंतरं करेउं तुम्हं थइयाधरो होउं ॥५९॥
अहमवि सह तुब्भेहिं अलक्खिओ एमि तो तहा विहिए । संपत्थिओ विसालं अमरगुरू पवरबलकलिओ ॥६०॥
सीहदुवारम्मि ठिओ पडिहारनिवेइओ निवसहाए । संपत्तो नरवइणा नेहेणवगूहिओ बाढं ॥६१॥
उचियासणे निवेसिय पुट्ठो अरिकेसरिस्स तणुकुसलं । ललियंगएण रन्ना तह सिग्घागमणहेउं च ॥६२॥
तो पभणइ अमरगुरू मज्झ सयासाउ रायपुत्तीए । सोउं गुणसामग्गिं अप्पाणं तव्वरत्तेणं ॥६३॥
वरिसंते विन्नाउं अइऊसुयमाणसो निवो जाओ । दिट्ठिमपत्ताए इमाए नूण पाणे परिच्चयइ ॥६४॥
ता एवं वट्टंते जं जुज्जइ किंपि कुणह तं तुब्भे । कहिउमिमं तुह सुहिणो वसणं परिनिव्वुया अम्हे ॥६५॥
एवं चिय जंपताण ताण सहसा समागया बाला । पिउपायवंदणत्थं जुत्ता समवयवयंसीहिं ॥६६॥
नियअंकम्मि निवेसिय वुत्ता पुहईसरेण सा बाला । वच्छे ! एसो विउसो समागओ कस्स कज्जेण ? ॥६७॥
सा पभणइ थइयावाहयस्स एयस्स चेव, तो राया । विम्हइयमणो चिंतइ जुज्जइ एयं जमेएण ॥६८॥
मह नामियं न सीसं उवविट्ठो आसणेवि न हु नीए । मुत्तीवि कहइ एयस्स नियमओ रायरायत्तं ॥६९॥

ततः प्रभणत्यमरगुरुं बुद्धयाऽमरगुरुसमस्यापि । जातस्तव प्रमादो यत् सा न खलु मार्गिता तदा ॥५५॥
तद्यदि कन्यारत्नं संपादयति नरवरः सोऽन्यस्मै । रत्ननिधिं दर्शयित्वोत्खातानि ततोऽस्माकं नयनानि ॥५६॥
ततो जल्पत्यमरगुरुर्भवति नान्यस्य सा नरेन्द्र ! यतः । वर्षस्यान्ते त्वमेव तया वर आत्मनः कथितः ॥५७॥
भणति नृपस्तथापि रतिं न दत्त एते मम नयने । तद्दर्शनपीयूषास्वादनातिलम्पटत्वेन ॥५८॥
तस्मात् प्रार्थनामिषेण तस्यास्त्वं गच्छ तत्र शीघ्रमपि । वेषान्तरं कृत्वा तव स्थगिकाधरो भूत्वा ॥५९॥
अहमपि सह युष्माभिरलक्षित एमि ततस्तथा विहिते । संप्रस्थितो विशालाममरगुरुः प्रवरबलकलितः ॥६०॥
सिंहद्वारे स्थितः प्रतीहारनिवेदितो नृपसभायाम् । संप्राप्तो नरपतिना स्नेहेनावगूढो बाढम् ॥६१॥
उचितासने निवेश्य पृष्टोऽरिकेसरिणस्तनुकुशलम् । ललिताङ्गकेन राज्ञा तथा शीघ्रागमनहेतुं च ॥६२॥
ततः प्रभणत्यमरगुरुर्मम सकाशाद् राजपुत्र्याः । श्रुत्वा गुणसामग्रीमात्मानं तद्वरत्वेन ॥६३॥
वर्षान्ते विज्ञायात्युत्सुकमानसो नृपो जातः । दृष्टिमप्राप्तायामस्यां नूनं प्राणान् परित्यजेत् ॥६४॥
तस्मादेवं वर्तमाने यद् युज्यते किमपि कुरुथ तद् यूयम् । कथयित्वेदं तव सुहृदो व्यसनं परिनिर्वृता वयम् ॥६५॥
एवमेव जल्पतोस्तयोः सहसा समागता बाला । पितृपादवन्दनार्थं युक्ता समवयोवयस्याभिः ॥६६॥
निजाङ्के निवेश्योक्ता पृथिवीश्वरेण सा बाला । वत्स ! एष विद्वान् समागतः कस्य कार्येण ? ॥६७॥
सा प्रभणति स्थगिकावाहकस्यैतस्यैव, ततो राजा । विस्मितमनाश्चिन्तयाति युज्यत एतद् यदेतेन ॥६८॥
मह्यं नमितं न शीर्षमुपविष्ट आसनेऽपि न हि नीचे । मूर्तिरपि कथयत्येतस्य नियमतो राजराजत्वम् ॥६९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो उट्ठिऊण सीहासणम्मि तं ठाविउं पणमिउं च । अवरासणे निविट्ठो चंपयमालं पयंपेइ ॥७०॥
नरवरपाणिग्गहणे वरिसविलंबम्मि तुज्झ को हेऊ ? । नियपायंगुट्ठं पइ निवेसए सा तओ दिट्ठिं ॥७१॥
जंपइ न किंपि जा ताव नरवरो सद्दिऊण जोइसियं । भणइ कुमरीए पाणिग्गहणे लग्गं निवेएह॥७२॥
सो भणइ हुंति न इमम्मि वच्छरे सोहणाइं लग्गाइं । जं भाणुखित्तसंठियजीवेणं दूसियं एयं ॥७३॥
यत उक्तम्;

"गुरुक्षेत्रगते भानौ भानुक्षेत्रगते गुरौ । विवाहादि न कुर्वीत वाञ्छन् शुभपरम्पराम् ॥"

तेरसमासे अहिए गुरुस्स एक्कम्मि होइ रासिम्मि । जं भुत्ती तो वरिसे गयम्मि वइसाहमासस्स ॥७४॥
उत्तरफग्गुणपाए पढमे एक्कारसीए सुद्धाए । सुक्के हरिसणजोगे रविरिक्खा दसमरिक्खम्मि ॥७५॥
उदयाओ गए घडियापणगे घडियातिभागऊणम्मि । विसलग्गे बवुत्तमअंसे उदयाइसुद्धिजुयं ॥७६॥
पंचग्गहबलजुत्तं रविसुक्केसुच्चठाणपत्तेसु । लायाइदोसमुक्कं नरवर ! अइसोहणं लग्गं ॥७७॥
तत्तो य तं लिहाविय अप्पावेउं पुरोहियस्स तओ । संमाणिउं विसज्जइ जोइसियं मेइणीनाहो ॥७८॥
नेऊण रायरायं मज्जणसालाए अंगमद्देहिं । तो लक्खपागतिल्लेण अब्भंगावेइ मज्जेइ ॥७९॥
कारेइ समालिहणं परिहावइ तह य वरदुगूलाइं । देवालयम्मि नेउं अप्पेइ य पुप्फगंधाइं ॥८०॥
सोवि ववहारउच्चिय पूयइ पणमइ तओ सपरिवारं । नेउं भोयणसालाए भोइउं ठवइ पल्लंके ॥८१॥
भणइ य तप्पच्चक्खं गोत्तीमुक्खं जहा इह जणस्स । पुन्नेहिं इहागमणं एवंविहपुरिसरयणस्स ॥८२॥

तत उत्थाय सिंहासने तं स्थापयित्वा प्रणम्य च । अपरासने निविष्टश्चम्पकमालां प्रजल्पति ॥७०॥
नरवरपाणिग्रहणे वर्षविलम्बे तव को हेतुः ? । निजपादाङ्गुष्ठं प्रति निवेशयति सा ततो दृष्टिम् ॥७१॥
जल्पति न किमपि यावत्तावन्नरवरः शब्दयित्वा ज्यौतिषिकम् । भणति कुमार्याः पाणिग्रहणे लग्नं निवेदयत ।
स भणति भवन्ति नास्मिन् वर्षे शोभनानि लग्नानि । यद् भानुक्षेत्रसंस्थितजीवेन दूषितमेतत् ॥७३॥
त्रयोदशमासेऽधिके गुरोरेकस्मिन् भवति राशौ । यद्भुक्तिस्ततो वर्षे गते वैशाखमासस्य ॥७४॥
उत्तरफाल्गुनपादे प्रथमे एकादश्यां शुद्धायाम् । शुक्रे हर्षणयोगे रविऋक्षाद् दशमर्क्षे ॥७५॥
उदयाद् गते घटिकापञ्चके घटिकात्रिभागोने । वृषलग्ने बवोत्तमांश उदयादिशुद्धियुतम् ॥७६॥
पञ्चग्रहबलयुक्तं रविशुक्रयोरुच्चस्थानप्राप्तयोः । लातादिदोषमुक्तं नरवर ! अतिशोभनं लग्नम् ॥७७॥
ततश्च तल्लेखयित्वाऽर्पयित्वा पुरोहिताय ततः । संमान्य विसृजति ज्यौतिषिकं मेदिनीनाथः ॥७८॥
नीत्वा राजराजं मज्जनशालायामङ्गमर्दैः । ततो लक्षपाकतैलेनाभ्यङ्गयति मज्जयति ॥७९॥
कारयति समालेपनं परिधापयति तथा च वरदुकूलानि । देवालयं नीत्वाऽर्पयति च पुष्पगन्धादि ॥८०॥
सोऽपि व्यवहारत एव पूजयति प्रणमति ततः सपरिवारम्। नीत्वा भोजनशालायां भोजयित्वा स्थापयति पल्यङ्के॥
भणति च तत्प्रत्यक्षं गोत्रिमुख्यं यथाऽस्य जनस्य । पुण्यैरिहागमनमेवंविधपुरुषरत्नस्य ॥८२॥

---

१ क. सिद्धि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता गोत्तिनिहित्ताणवि संपज्जउ सुंदरा दसा इण्हि । भुंजावेउ परिहाविउं च मुच्चंति ते सव्वे ॥८३॥
सम्माणिउं नरिंदो हयगयरहरयणभूसणाईहिं । भणिओ सुहासणत्थो ललियंगयपुहइनाहेण ॥८४॥
नयणेसु तुम्ह दंसणअमयरसासायपरवसेसुंपि । परिचिंतइ मह हिययं एयाणट्ठाणपडिबंधो ॥८५॥
कहवि मरुत्थलि हंसो पत्तो पामरगिहम्मि करिनाहो । न पहुप्पइ ताण इमं जेण चिरं तत्थ वासंति (?)॥८६॥
ता नियनयराभिमुहं करइ पयाणं जया नरवरिंदो । चंपयमालावि तया कन्नच्चिय तत्थ आगमिही ॥८७॥
सह मज्झ अमच्चेहिं, पाणिग्गहऊसवम्मि कन्नाए । होहिंति ते निमित्तं, भणइ तओ नरवराहिवई ॥८८॥
उचियन्नुएसु कालन्नुएसु धीरेसु गरुयहियएसु । सुयणधुरंधर ! को धरइ तुज्झ लीहं तिहुयणेवि ? ॥८९॥
सब्भावनेहपरिपेसलाण निच्चं रसायणाणंव । तुह विणयालावाणं नरवर ! तित्ति न वच्चामो ॥९०॥
तहवि मणोरहसाला चंपयमाला न ठाइ जा पुरओ । ता सिढिलियगुरुकज्जंतराण इह ठाणमम्हाण॥९१॥
तो सो चंपयमालाए सह लहुं नरवरं विसज्जेइ । कइवयपयाणयाइं अणुगंतुं वलइ अणुन्नाओ ॥९२॥
रायावि तयणु पंचप्पहाणचिंतिज्जमाणनिवकज्जं । नियनयरं संपत्तो कमेण ऊसियधयपडायं ॥९३॥
सो चंपयमालाए पासाओ अप्पिओ नरिंदेण । जत्थ ठिया नियठाणट्ठियस्स नयणूसवं कुणइ ॥९४॥
पइदिवसं जाइ तहिं, अहन्नया नरवरेण अमरगुरू । सह नीओ सो जंपइ कलावियारे भणइ किंपि॥९५॥
सा भणइ विविहपासंडिविहिअधम्माण तुम्ह कोऽभिमओ ? । तो सो भणइ किमेवं अप्पत्थुयमुल्लवेह तुमं ?॥९६॥
सा जंपइ किमपत्थुयमिह किं धम्मो कला न तुम्ह मया । इहलोयपारलोइयसिवसुहसंपाडणप्पवरा ? ॥९७॥

तस्माद् गोत्रिनिहितानामपि संपद्यतां सुन्दरा दशेदानीम् । भोजयित्वा परिधाप्य च मुच्यन्ते ते सर्वे ॥८३॥
संमान्य नरेन्द्रो हयगजरथरत्नभूषणादिभिः । भणितः सुखासनस्थो ललिताङ्गकपृथिवीनाथेन ॥८४॥
नयनयोस्तव दर्शनामृतरसास्वादपरवशयोरपि । परिचिन्तयति मम हृदयमेतेषां स्थानप्रतिबन्धम् ॥८५॥
कथमपि मरुस्थले हंसः प्राप्तः पामरगृहे करिनाथः । न प्रभवति तयोरिदं येन चिरं तत्र वासयति ॥८६॥
तस्माद् निजनगराभिमुखं करोति प्रयाणं यदा नरवरेन्द्रः । चम्पकमालापि तदा कन्यैव तत्रागमिष्यति ॥८७॥
सह ममामात्यैः, पाणिग्रहोत्सवे कन्यायाः । भविष्यन्ति ते निमित्तं, भणति ततो नरवराधिपतिः ॥८८॥
उचितज्ञेषु कालज्ञेषु धीरेषु गुरुहृदयेषु । सुजनधुरन्धर ! को धरति तव रेखां त्रिभुवनेऽपि ? ॥८९॥
सद्भावस्नेहपरिपेशलानां नित्यं रसायनानामिव । तव विनयालापानां नरवर ! तृप्तिं न व्रजामः ॥९०॥
तथापि मनोरथशाला चम्पकमाला न तिष्ठति यावत्पुरतः । तावच्छिथिलितगुरुकार्यान्तराणामिह स्थानमस्माकम् ॥
ततः स चम्पकमालया सह लघु नरवरं विसृजति । कतिपयप्रयाणकान्यनुगम्य वलतेऽनुज्ञातः ॥९२॥
राजापि तदनु पञ्चप्रधानचिन्त्यमाननृपकार्यम् । निजनगरं संप्राप्तः क्रमेणोच्छ्रितध्वजपताकम् ॥९३॥
स चम्पकमालायै प्रासादोऽर्पितो नरेन्द्रेण । यत्र स्थिता निजस्थानस्थितस्य नयनोत्सवं करोति ॥९४॥
प्रतिदिवसं याति तत्र, अथान्यदा नरवरेणामरगुरुः । सह नीतः स जल्पति कलाविचारे भणत किमपि॥९५॥
सा भणति विविधपाखण्डिविहितधर्माणां तव कोऽभिमतः ? । ततः स भणति किमेवमप्रस्तुतमुल्लपथ यूयम् ? ॥

यतः,

बावत्तरीकलापंडियावि पुरिसा अपंडिया चेव । सव्वकलाणं पवरं जे धम्मकलं न याणंति ॥९८॥

भणियं च अमरगुरुणा न वियारो एत्थ संगओ कोवि । जो जस्स पुव्वपुरिसेहिं सेविओ तस्स सो धम्मो ॥

किञ्च;

सुस्सीला दुस्सीला व होउ जणणीए किं वियारेण । अन्नं विज्जुवएसो ओसहविसए जह पमाणं ॥१००॥

तह नियगुरूहिं जेसिं जो कहिओ जन्नपभिइओ धम्मो । सो चिय तेसिं पमाणं किमिमीए अणत्थचिंताए ? ॥

इय भणिउं अमरगुरू धम्मवियारम्मि उवरओ जाव । ताव कलयंठिकंठा भणइ लट्ठं तए भणियं ॥१०२॥

किंतु न एवं जंपंति पंडिया होंति तुज्झ जे सरिसा । परमपुरिसत्थभूए धम्मे जुत्तो च्चिय वियारो ॥१०३॥

परमत्तं पुरिसत्थेसिमस्स जं एस अत्थकामाणं । पयडं निबंधणं बहुजणस्स भणियं च नीईए ॥१०४॥

" धर्मादर्थोऽर्थतः कामः कामात् सुखफलोदयः । आत्मानं हन्ति तौ हत्वा यो युक्त्या न निषेवते ॥ "

पुन्नस्स य पावस्स य जइवि अभावो भणिज्जए मोक्खो । सोवि हु पुन्नप्पगई विवागकज्जं तु सुपसिद्धं ॥

जं जंपियं तए बुह ! कमागओ जो य जेसिं किल धम्मो । सो य पमाणो तेसिं एयंपि न संगइं लहइ ।

पुव्वपुरिसक्कमेणं जइ दालिद्दं हवेइ वाही वा । ता किं कुलजाएहिं ताइं नो वज्जणिज्जाइं ? ॥१०७॥

तह जणणीदिट्ठंतो न हु लट्ठो जेण सुप्पसिद्धमिणं । जणणीवि गलियसीला अप्परिचत्ता हणइ तणयं ॥

ओसहदिट्ठंतेणवि गुरूवएसो पमाणिओ तुमए । रायदोसविउत्तो परमत्थविऊ य होइ गुरू ॥१०९॥

सा जल्पति किमप्रस्तुतमिह किं धर्मः कला न तव मता । ऐहलौकिकपारलौकिकशिवसुखसंपादनप्रवरा ? ॥९७॥

द्वासप्ततिकलापण्डिता अपि पुरुषा अपण्डिता एव । सर्वकलानां प्रवरां ये धर्मकलां न जानन्ति ॥९८॥

भणितं चामरगुरुणा न विचारोऽत्र संगतः कोऽपि । यो यस्य पूर्वपुरुषैः सेवितस्तस्य स धर्मः ॥९९॥

सुशीला दुःशीला वा भवतु जनन्याः किं विचारेण । अन्यद् वैद्योपदेश औषधविषये यथा प्रमाणम् ॥१००॥

तथा निजगुरुभिर्येषां यः कथितो यज्ञप्रभृतिको धर्मः । स एव तेषां प्रमाणं किमनयाऽनर्थचिन्तया ? ॥१०१॥

इति भणित्वाऽमरगुरुर्धर्मविचार उपरतो यावत् । तावत्कलकण्ठीकण्ठा भणति सुन्दरं त्वया भणितम् ॥१०२॥

किन्तु नैवं जल्पन्ति पण्डिता भवन्ति तव ये सदृशाः । परमपुरुषार्थभूते धर्मे युक्त एव विचारः ॥१०३॥

परमत्वं पुरुषार्थेष्वस्य, यदेषोऽर्थकामयोः । प्रकटं निबन्धनं बहुजनस्य भणितं च नीतौ ॥१०४॥

पुण्यस्य च पापस्य च यद्यप्यभावो भण्यते मोक्षः । सोऽपि हि पुण्यप्रकृतिर्विपाककार्यं तु सुप्रसिद्धम् ॥१०५॥

यज्जल्पितं त्वया बुध ! क्रमागतो यश्च येषां किल धर्मः । स च प्रमाणं तेषामेतदपि न संगतिं लभते ॥१०६॥

पूर्वपुरुषक्रमेण यदि दारिद्र्यं भवति व्याधिर्वा । ततः किं कुलजातैस्तौ नो वर्जनीयौ ? ॥१०७॥

तथा जननीदृष्टान्तो न खलु सुन्दरो येन सुप्रसिद्धमिदम् । जनन्यपि गलितशीलाऽपरित्यक्ता हन्ति तनयम् ॥

औषधदृष्टान्तेनापि गुरूपदेशः प्रमाणितस्त्वया । रागद्वेषवियुक्तः परमार्थविच्च भवति गुरुः ॥१०९॥

---

१ क. वज्जै ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सो सयमरिहंतो तव्वयणविऊ वा ठिओ य आणाए। काले च्चिय जयणाए वट्टंतो मच्छरविमुक्को ॥११०॥
रागाईहिं विमुक्को अरहंतो अन्नदेवया न तहा। किमिह पमाणं इय गुरुभणिए पभणेइ रायसुया ॥१११॥
एयं इत्थ पमाणं जं तेसिं तेसु तेसु सत्थेसु। सुव्वइ तहा सरूवं जह रागाईण उवलंभो ॥११२॥
संहारसिट्ठिपालणकारणभावेण जं जहा भणियं। अकुणंताण सयं चिय अकहंताणं च लोयाणं ॥११३॥
किञ्च तत्प्रतिकृतयोऽपि दर्शयन्त्यन्यदेवानामर्हतश्चान्तरम्;—

"इह हि रमणीशस्त्राक्षालीधराः सुरमूर्त्तयो, निपुणसुगमान् रागद्वेषभ्रमान् गमयन्त्यलम्।
तव पुनरियं त्यक्तासङ्गा तनुः कृतकृत्यतां, प्रसभमुशती स्वामिन्! सत्यं प्रवक्ति तदत्ययम्॥"

इच्चाइसुजुत्तीहिं सो तीए निरुत्तरो तहा विहिओ। जह अरिकेसरिसहिओ जिणधम्मे निच्चलो जाओ॥
तो पभणइ अमरगुरू भवजलहितरी तुमम्ह संपत्ता। जं उम्मग्गपयट्टा ठविया जिणधम्मसग्गम्मि॥११५॥
इय तेण कहवि गमिओ वरिसो कट्ठेण जुगसमाणो सो। पत्ते य लग्गसमए रन्ना वीवाहिया बाला॥
तीए समं विसयसुहं पंचपयारं तओ अणुहवंतो। इंदुव्व देवलोए गयंपि कालं न याणेइ ॥११७॥
अप्पाणं अमरगुरू अहन्नया सुमिणयम्मि रयणिमुहे। करहारूढं पिच्छइ गच्छंतं दाहिणदिसाए॥११८॥
चिंतइ जइ सच्चमिणं तो मह आउक्खओ समासन्नो। धाउक्खोहाईहि य किंपुण सुमिणाइं दीसंति॥
इय सो भणइ नरिंदं पुच्छह देविं ममाउणो सेसं। देविसयासे नेउं तं भणइ निवो सयं पुच्छ॥१२०॥
अपुट्ठा सा साहइ सव्वं से सुमिणवइयरं देवी। भणइ य तुह दस मासा सेसो आउस्स तो सोवि॥१२१॥
भणइ मह धम्मजणणी! धम्मगुरू संति संपयं कत्थ?। जंपइ देवी जोयणसए[1] दिवड्ढे पुराणपुरे॥१२२॥

स स्वयमर्हन् तद्वचनविद्वा स्थितश्चाज्ञायाम्। काल एव यतनायां वर्तमानो मात्सर्यविमुक्तः ॥११०॥
रागादिभिर्विमुक्तोऽर्हन्नन्यदेवता न तथा। किमिह प्रमाणमिति गुरुभणिते प्रभणाति राजसुता ॥१११॥
एतदत्र प्रमाणं यत् तेषां तेषु तेषु शास्त्रेषु। श्रूयते तथा स्वरूपं यथा रागादीनामुपलम्भः ॥११२॥
संहारसृष्टिपालनकारणभावेन यद्यथा भणितम्। अकुर्वतां स्वयमेवाकथयतां च लोकानाम् ॥११३॥
इत्यादिसुयुक्तिभिः स तया निरुत्तरस्तथा विहितः। यथाऽरिकेसरिसहितो जिनधर्मे निश्चलो जातः ॥११४॥
ततः प्रभणत्यमरगुरुर्भवजलधितरी त्वमस्माकं संप्राप्ता। यदुन्मार्गप्रवृत्ताः स्थापिता जिनधर्ममार्गे ॥११५॥
इति तेन कथमपि गमितो वर्षः कष्टेन युगसमानः सः। प्राप्ते च लग्नसमये राज्ञा विवाहिता बाला ॥११६॥
तया समं विषयसुखं पञ्चप्रकारं ततोऽनुभवन्। इन्द्र इव देवलोके गतमपि कालं न जानाति ॥११७॥
आत्मानममरगुरुरथान्यदा स्वप्ने रजनीमुखे। करभारूढं पश्यति गच्छन्तं दक्षिणदिशि ॥११८॥
चिन्तयति यदि सत्यमिदं ततो ममायुःक्षयः समासन्नः। धातुक्षोभादिभिश्च किन्तु स्वप्ना दृश्यन्ते ॥११९॥
इति स भणाति नरेन्द्रं पृच्छत देवीं ममायुषः शेषम्। देवीसकाशे नीत्वा तं भणति नृपः स्वयं पृच्छ॥१२०॥
अपृष्टा सा कथयाति सर्वं तस्य स्वप्नव्यतिकरं देवी। भणति च तव दश मासाः शेष आयुषस्ततः सोऽपि॥

---

१ ख. ग. °पन्ना।

तो अमरगुरू जंपइ रायं देविं च खमह अवरद्धं । जं किंपि मए, संपइ मह सरणं ताण पयकमलं ॥
भणइ सगग्गयवयणं नरनाहोवि बुह ! तुज्झ अवराहा । तीरंति केवि सहिउं इक्को पुण दुक्करं खमिउं ॥
इहलोयपारलोइयसुहसयसंपत्तिकारणं देवी । चंपयमाला देसंतराओ जं आणिया तुमए ॥१२५॥
सद्दाविय तस्स सुयं तस्स पए ठवए नरवरिंदो । सम्माणिऊण विविहं पच्चक्खं रायलोयस्स ॥१२६॥
कारइ कारागारं सुन्नं घोसावए अमारिं च । दावेइ अमरगुरुणा दाणं अंधाइदीणाणं ॥१२७॥
सम्माणइ साहम्मियवग्गं सव्वंपि तह य कारवइ । जिणमंदिरेसु मणनयणसुहयअट्ठाहियामहिमं ॥१२८॥
इय एवमाइ तक्कालधम्मकिच्चं करावेउं सयलं । धम्माइकज्जजोग्गं पउरं अप्पाविउं दविणं ॥१२९॥
अइजविणवाहणाइं अप्पावेउं तहेव वरसुहडे । मग्गसहाए दाउं काउं अन्नंपि जं किच्चं ॥१३०॥
आपुच्छिऊण बहुयाइं रज्जकज्जाइं धम्मकज्जाइं । अणुरूवम्मि य लग्गे अणुकूलेसुं च सउणेसुं ॥१३१॥
अणुगंतूणं पढमं पयाणयं नरवरेण अमरगुरू । पव्वज्जागहणत्थं विसज्जिओ स बहुमाणेण ॥१३२॥
मग्गजिणभवणमहिमाइधम्मकम्माइं अग्गओ चेव । अप्पियदव्वेहिं धम्मिएहिं सयलाइं कारिंतो ॥१३३॥
सिरिसमयजलहिकेवलिपयमूले तुरियमेव गंतूणं । पडिवज्जिवि पव्वज्जं सासयसोक्खं गओ मोक्खं ॥
अह रायपुव्ववल्लहदुल्लहदेवीइ दूरमुवयरिउं । बहुकूडकवडभरिया भणिया पव्वाइया सुलसा ॥१३५॥
भयवइ ! किंपि कलंकं चंपयमालाए ठवसु जेण इमं । विसमीसत्तणसंकियमहुभोयणमिव निवो चयइ ॥

भणति मम धर्मजननि ! धर्मगुरवः सन्ति सांप्रतं कुत्र ? । जल्पति देवी योजनशते दिवाढ्ये पुराणपुरे ॥१२२॥
ततोऽमरगुरुर्जल्पति राजानं देवीं च क्षमध्वमपराद्धम् । यत् किमपि मया, संप्रति मम शरणं तेषां पादकमलम् ॥
भणति सगद्गदवचनं नरनाथोऽपि बुध ! तवापराधाः । शक्यन्ते केऽपि सोढुमेकः पुनर्दुष्करः क्षमितुम् ॥१२४॥
ऐहलौकिकपारलौकिकसुखशतसंपत्तिकारणं देवी । चम्पकमाला देशान्तराद्यदानीता त्वया ॥१२५॥
शब्दयित्वा तस्य सुतं तस्य पदे स्थापयति नरवरेन्द्रः । सम्मान्य विविधं प्रत्यक्षं राजलोकस्य ॥१२६॥
कारयति कारागारं शून्यं घोषयत्यमारिं च । दापयत्यमरगुरुणा दानमन्धादिदीनेभ्यः ॥१२७॥
सम्मानयति साधर्मिकवर्गं सर्वमपि तथा च कारयति । जिनमन्दिरेषु मनोनयनसुखदाष्टाह्निकामहिमानम् ॥१२८॥
इत्येवमादि तत्कालधर्मकृत्यं कारयित्वा सकलम् । धर्मादिकार्ययोग्यं प्रचुरमर्पयित्वा द्रविणम् ॥१२९॥
अतिजविवाहनान्यर्पयित्वा तथैव वरसुभटान् । मार्गसहायान् दत्त्वा कृत्वाऽन्यदपि यत्कृत्यम् ॥१३०॥
आपृच्छ्य बहुकानि राज्यकार्याणि धर्मकार्याणि । अनुरूपे च लग्नेऽनुकूलेषु च शकुनेषु ॥१३१॥
अनुगम्य प्रथमं प्रयाणकं नरवरेणामरगुरुः । प्रव्रज्याग्रहणार्थं विसृष्टः स बहुमानेन ॥१३२॥
मार्गजिनभवनमहिमादिधर्मकर्माण्यग्रत एव । अर्पितद्रव्यैर्धार्मिकैः सकलानि कारयन् ॥१३३॥
श्रीसमयजलधिकेवलिपादमूले त्वरितमेव गत्वा । प्रतिपद्य प्रव्रज्यां शाश्वतसौख्यं गतो मोक्षम् ॥१३४॥
अथ राजपूर्ववल्लभदुर्लभदेव्या दूरमुपचर्य । बहुकूटकपटभृता भणिता प्रव्राजिका सुलसा ॥१३५॥
भगवति ! कमपि कलङ्कं चम्पकमालायां स्थापय येनेमाम् । विषमिश्रत्वशङ्कितमधुभोजनमिव नृपस्त्यजति ॥१३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पव्वाइया पयंपइ इमीए रमणीगुणेहिं पवरेहिं। बहुमाणपयं अप्पा न ठाविओ नरवरिंदस्स ॥१३७॥
किंपुण सो मूढप्पा इय मन्नइ ठाविओ हमेयाए। जिणदेसियम्मि धम्मे परमप्पयपरमहेउम्मि ॥१३८॥
ता तीए धम्मभंसे कयम्मि रायावि चिंतिही एसा। जह भणइ तहा न कुणइ इय वायालत्तमित्तमिणं॥
ता तत्थेव जइस्सं वच्छे ! पच्छा कलंकदाणेवि। तुज्झ मणोरहरुक्खो होही संपुन्नफुल्लफलो॥१४०॥
इय निच्छयं विहेउं पत्ता पव्वाइया नियमढीए। दुल्लहदेवीवि तयं पइदिणमुवयरइ सविसेसं ॥१४१॥
तत्तो पइदियहं सा उवायसयसंकुला विचिंतेइ। को णु उवाओ जिणधम्मभंसणे होज्ज एईए ? ॥१४२॥
हुं नायं जह एसा अपत्तपुत्ता तओ पभायम्मि। गंतुं तीए सयासे आसीवाएण तोसेउं ॥१४३॥
पुत्तउवायं साहेमि तीइ पकरेमि रक्खण्हवणाइं। ओवाइयमाईयं इच्छावावेमि कालीए ॥१४४॥
इय चिंतिउं पभाए पत्ता देवीए वासभवणम्मि। पडिहारीए सा पुव्वसंगया भणइ तं एवं ॥१४५॥
साहसु मं देवीए, सावि हु तं कुणइ भणइ एवं च। को आएसो तीए झत्ति विसज्जेहि दाराओ ॥१४६॥
देवीए इय भणिए पडिहारी विन्नवेइ जह एसा। देवीए दट्ठव्वा मज्झ पसायं विहेऊण ॥१४७॥
एवं होउत्ति तओ भणिए देवीइ, तं पवेसेइ। उवविट्ठा आसीसं दाउं सा भणइ एगंते ॥१४८॥
देवीए नत्थि पुत्तो पुत्तविहूणासु वल्लहासुंपि। कालेण गलइ पिम्मं तह य अपुत्ताण न हु सुगई ॥१४९॥
ता कुण मह भणियं गिण्ह मूलियं रक्खकंडयसमेयं। मंतपवित्तं ण्हवणाइयं च कारेह मह हत्था ॥१५०॥
तह कालीदेवीए पूयं काऊण तप्पणापुव्वं। सुयविसयं ओवाइयमिच्छसु तुह जेण होइ सुओ ॥१५१॥

प्रव्राजिका प्रजल्पत्यनया रमणीगुणैः प्रवरैः। बहुमानपदमात्मा न स्थापितो नरवरेन्द्रस्य ॥१३७॥
किन्तु स मूढात्मेति मन्यते स्थापितोऽहमेतया। जिनदेशिते धर्मे परमपदपरमहेतौ ॥१३८॥
तस्मात्तस्या धर्मभ्रंशे कृते राजापि चिन्तयिष्यत्येषा। यथा भणति तथा न करोतीति वाचालत्वमात्रमिदम् ॥
तस्मात्तत्रैव यतिष्ये वत्से ! पश्चात् कलङ्कदानेनापि। तव मनोरथवृक्षो भविष्यति संपूर्णफुल्लफलः ॥१४०॥
इति निश्चयं विधाय प्राप्ता प्रव्राजिका निजमठिकायाम्। दुर्लभदेव्यपि तां प्रतिदिनमुपचरति सविशेषम् ॥१४१॥
ततः प्रतिदिवसं सोपायशतसंकुला विचिन्तयति। को नूपायो जिनधर्मभ्रंशने भवेदेतस्याः ? ॥१४२॥
हुं ज्ञातं यथैषाऽप्राप्तपुत्रा ततः प्रभाते। गत्वा तस्याः सकाश आशीर्वादेन तोषयित्वा ॥१४३॥
पुत्रोपायं कथयामि तस्याः प्रकरोमि रक्षास्नपनादि। उपयाचितादिकमेषयामि काल्याः ॥१४४॥
इति चिन्तयित्वा प्रभाते प्राप्ता देव्या वासभवने। प्रतिहार्या सा पूर्वसंगता भणति तामेवम् ॥१४५॥
कथय मां देव्यै, सापि हि तत् करोति भणत्येवं च। क आदेशस्तस्या झटिति विसृज द्वारात् ॥१४६॥
देव्येति भणिते प्रतिहारी विज्ञपयति यथैषा। देव्या द्रष्टव्या मयि प्रसादं विधाय ॥१४७॥
एवं भवत्विति ततो भणिते देव्या, तां प्रवेशयति। उपविष्टाऽऽशिषं दत्त्वा सा भणत्येकान्ते ॥१४८॥
देव्या नास्ति पुत्रः पुत्रविहीनासु वल्लभास्वपि। कालेन गलति प्रेम तथा चापुत्राणां न हि सुगतिः ॥१४९॥
तस्मात्कुरु मम भणितं गृहाण मूलिकां रक्षाकाण्डकसमेताम्। मन्त्रपवित्रां स्नपनादिकं च कारय मम हस्तेन ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय वुत्ता सम्मत्ते अखोहणिज्जा सइंदविंदेहिं । देवेहिं सा जंपइ धुत्तारसि जइ जणं अन्नं ॥१५२॥
जिणवयणभावियाणं अवगयदुहरूवभवसरूवाणं । तुम्हारिसीण वयणं न कमेइ विसंव अमयम्मि ॥१५३।
पुत्तविहूणा सिच्चाइ पलवियं जं तए अइवियड्ढे !। इत्थीरयणाण हुंति कइ सुया जेण चक्कीणं ?॥१५४।
जम्मंतरपत्ताणवि पुव्वभवब्भत्थपेमवसगाणं । सहसा उल्लावा तदभिहाणगब्भा पयट्टंति ॥१५५॥
होइ इह अपुत्ताणं न य सुगई, मोहविलसियमिमंपि । पुत्ता अबंभहेऊ बंभे धम्मो तओ सुगई ॥१५६॥
पुत्तेहिं जइ सग्गो होइ तओ गड्डु सुयरी पढमं । साणी वा सउणी वा कमढी वा गच्छिही सग्गं ॥१५७॥
जइ रक्खकंडयाई पुत्तं जणयंति तो न हु अपुत्तो । जायइ जयम्मि कोवि हु, जणं मुहा मा भमाडेसु॥१५८।
जंपि पलत्तं कालीइ पूयमिच्चाइ, तत्थ का काली । किंव सुरमंसगिद्धाइसाइणीएवि देवत्तं ? ॥१५९॥
मोत्तूण जिणं जिणमयट्ठिए य अन्नं अहं न वंदामि । वरकरिवरम्मि चडिउं को खरक्खंधं समारुहइ ?।१६०।
इय एवं जुत्तीहिं धुत्ती सुनिवारियावि नोट्ठाइ । पडिहारीए बाहाहिं धरिय निव्वासिया तत्तो ॥१६१॥
कोवेण धमधमंती सुमरइ सा पुव्वसाहियं विज्जं । सुमरियमित्ता पत्ता किं कायव्वंति सा भणइ ॥१६२॥
पव्वाइया पयंपइ एसा नियनाणगव्विया पावा । मज्झवि कुणइ अवन्नं ता जीवंती जहा एसा ॥१६३॥
सारीरमाणसाइं दुहाइं अणुहवइ रायपरिचत्ता । सीलविसयं कलंकं तह एईए पयासेह ॥१६४॥
तो विज्जादेवीए रयणीइ समागयस्स नरवइणो । वासभवणे रमंतो सह तीए दंसिओ पुरिसो ॥१६५।

तथा कालीदेव्याः पूजां कृत्वा तर्पणापूर्वम् । सुतविषयमुपयाचितामिच्छ तव येन भवति सुतः ॥१५१॥
इत्युक्ता सम्यक्त्वेऽक्षोभणीया सेन्द्रवृन्दैः । देवैः सा जल्पति प्रतारयसि यदि जनमन्यम् ॥१५२॥
जिनवचनभावितेष्ववगतदुःखरूपभवस्वरूपेषु । युष्मादृशीनां वचनं न क्रामेद् विषमिवामृते ॥१५३॥
पुत्रविहीनाऽसीत्यादि प्रलपितं यत् त्वयाऽतिविदग्धे !। स्त्रीरत्नानां भवन्ति कति सुता येन चाक्रिणाम् ?॥१५४।
जन्मान्तरप्राप्तानामपि पूर्वभवाभ्यस्तप्रेमवशगानाम् । सहसोल्लापास्तदभिधानगर्भाः प्रवर्तन्ते ॥१५५॥
भवतीहापुत्राणां न च सुगतिः, मोहविलसितमिदमपि । पुत्रा अब्रह्महेतवो ब्रह्मणि धर्मस्ततः सुगतिः॥१५६॥
पुत्रैर्यदि स्वर्गो भवति ततश्छागी शूकरी प्रथमम् । शुनी वा शकुनिर्वा कमठी वा गच्छेत् स्वर्गम् ॥१५७॥
यदि रक्षाकाण्डकादयः पुत्रं जनयन्ति ततो न खल्वपुत्रः । जायते जगति कोऽपि हि, जनं मुधा मा भ्रमय॥१५८।
यदपि प्रलपितं काल्याः पूजामित्यादि, तत्र का काली । किंवा सुरामांसगृद्धातिशायिन्या अपि देवत्वम् ? ॥
मुक्त्वा जिनं जिनमतस्थितांश्चान्यमहं न वन्दे । वरकरिवरे चटित्वा कः खरस्कन्धं समारोहति ?॥१६०॥
इत्येवं युक्तिभिर्धूर्ता सुनिवारितापि नोत्तिष्ठति । प्रतिहार्या बाहुभ्यां धृत्वा निर्वासिता ततः ॥१६१॥
कोपेनोद्धमन्ती स्मरति सा पूर्वसाधितां विद्याम् । स्मृतमात्रा प्राप्ता किं कर्तव्यमिति सा भणति ॥१६२॥
प्रव्राजिका प्रजल्पत्येषा निजज्ञानगर्विता पापा । ममापि करोत्यवज्ञां तस्माज्जीवन्ती यथैषा ॥१६३॥
शारीरमानसानि दुःखान्यनुभवति राजपरित्यक्ता । शीलविषयं कलङ्कं तथैतस्याः प्रकाशय ॥१६४॥
ततो विद्यादेव्या रजन्यां समागताय नरपतये । वासभवने रममाणः सह तया दर्शितः पुरुषः ॥१६५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राया जा अवलोयइ सविसेसं ता अदंसणं पत्तो। सो सहसा, तो राया विम्हइयमणो विचिंतेइ ॥१६६॥
एईए रूवमोहियहियओ विज्जाहरो इमो कोवि। पच्छन्नो पडिवन्नो धिद्धी! इत्थीसहावस्स ॥१६७॥
नय घिप्पइ सुसणेहि न हु विणइहि गुणिहि, नहु लज्जह नय माणिण नय चाडुयसइहिं।
नय खरकोमलवयणि न विहवि न जोव्वणिण, दुग्गेज्झउं मणु महिलहं चिंतह आयरिण ॥१६८॥
जो जाइ जुवइवग्गे सब्भावं मयणमोहिओ पुरिसो। दुत्तरदुक्खसमुद्दे निवडइ सो नत्थि संदेहो ॥१६९॥
जिणवयणभावियावि हु निम्मलकुलसंभवावि धीरावि। जइ एसावि कुसीला का गणणा इयरनारीणं? ॥
इय तीए विरत्तमणो राया चिंतेइ मज्झ भोगखमा। नूणं न होइ एसा तहावि संभासणीया मे ॥१७१॥
जेणुवयारो सो कोइ तीए जिणधम्मदाणओ विहिओ। भवसयपरंपरासुवि पडिउवयारे न जस्स खमो ॥
किञ्च।
वायसविट्टालियभोयणं तु को भुंजिउं समहिलसइ?। अमयंव छिप्पछित्तं न भोगमरिहेइ विउसाण ॥
इय तीए अंगसंगे संगोविऊण अप्पणो चित्तं। संवरिउं आगारं तीए सयासम्मि संपत्तो ॥१७४॥
पुव्वठिईए तत्तो तीए अब्भुट्ठिओ ठिओ सिज्जं। संभासिवि खणमेगं पुणोवि उट्ठेइ नरनाहो ॥१७५॥
इय पइद्दिणंपि एवं संभासाई करेइ नरनाहो। नो पुण तणुसंभोगं तो सा एवं विचिंतेइ ॥१७६॥
किं कारणं नरिंदो मंदसिणेहो पईव इव दाउं। खणमेगं दरिसावं पुणोवि अदंसणीहोइ? ॥१७७॥
तो ओगिण्हिय सद्दं करेइ चूडामणीइ उवओगं। पव्वाइयविज्जाए पिच्छइ विलसियमसेसंपि ॥१७८॥

राजा यावदवलोकते सविशेषं तावददर्शनं प्राप्तः। स सहसा, ततो राजा विस्मितमना विचिन्तयति ॥१६६॥
एतया रूपमोहितहृदयो विद्याधरोऽयं कोऽपि। प्रच्छन्नः प्रतिपन्नो धिग् धिक् स्त्रीस्वभावम् ॥१६७॥
नच गृह्यते सुस्नेहैर्न च विनयैर्गुणैः, न हि लज्जाभिर्नच मानेन नच चाटुकशतैः।
नच खरकोमलवचनेन न विभवेन न यौवनेन, दुर्ग्राह्यं मनो महिलानां चिन्तयतादरेण ॥१६८॥
यो याति युवतिवर्गे सद्भावं मदनमोहितः पुरुषः। दुस्तरदुःखसमुद्रे निपतति स नास्ति संदेहः ॥१६९॥
जिनवचनभाविताऽपि हि निर्मलकुलसंभवापि धीरापि। यद्येषापि कुशीला का गणनेतरनारीणाम्? ॥१७०॥
इति तस्यां विरक्तमना राजा चिन्तयति मम भोगक्षमा। नूनं न भवत्येषा तथापि संभाषणीया मे ॥१७१॥
येनोपकारः स कोऽपि तया जिनधर्मदानतो विहितः। भवशतपरम्परास्वपि प्रत्युपकारे न यस्य क्षमः ॥१७२॥
वायसविदालितभोजनं तु को भोक्तुं समभिलषते?। अमृतं वा भिक्षास्पृष्टं न भोगमर्हति विदुषाम् ॥१७३॥
इति तस्या अङ्गसङ्गे संगोप्यात्मनश्चित्तम्। संवृत्याकारं तस्याः सकाशे संप्राप्तः ॥१७४॥
पूर्वस्थित्या ततस्तयाभ्युत्थितः स्थितः शय्यायाम्। संभाष्य क्षणमेकं पुनरप्युत्तिष्ठति नरनाथः ॥१७५॥
इति प्रतिदिनमप्येवं संभाषादीन् करोति नरनाथः। नो पुनस्तनुसंभोगं ततः सैवं विचिन्तयति ॥१७६॥
किं कारणं नरेन्द्रो मन्दस्नेहः प्रदीप इव दत्त्वा। क्षणमेकं दर्शनं पुनरप्यदर्शनीभवति? ॥ १७७ ॥
ततोऽवगृह्य शब्दं करोति चूडामणेरुपयोगम्। प्रव्राजिकाविद्यायाः पश्यति विलसितमशेषमपि ॥१७८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तहवि न पओसलेसंपि वहइ तस्सुवरि चिंतए एवं । भोगंतरायमेयं तु मज्झ छम्मासगमणिज्जं ॥१७९॥
किंचंतरायमेए भोगा धम्मस्स मोहवसगेहिं । सेविज्जंति बुहेहिं अणाइअब्भासनडिएहिं ॥१८०॥
ता एएसिं विग्घे सविसेसं उज्जमेमि धम्मम्मि । सो च्चिय जं सयलसुहाण कारणं इय विचिंतेउं ॥१८१॥
कईयावि महुरकलयंठकंठ सज्झाइ पयट्टइ, कईयावि गहियसुअंधकुसुम देवच्चणि वट्टइ ।
कईयावि बहुभवभमणभावण मणि भावइ, कईयावि सुद्धरम्मि जिणधम्मि लीण मणु ठावइ ॥१८२॥
इय एव विणोएहिं दिणं गमइ कुमइरहियसहियणसहिया । सामाइयअणुट्ठाणपरा गमइ रयणि अरइरहिया ॥
अह अन्नदिणे भणिया महल्लियाए रहम्मि सा देवी । किं तइए स नरिंदो मंदसिणेहोव्व पडिहाइ ? ॥१८४॥
चंपयमाला जंपइ चंदकलाणंव रमणरमणीणं । घडणाइं विहडणाइं पुणोवि घडणाइं कालवसा ॥१८५॥
किञ्च ।
चइयव्वच्चिय विसया किंपागफलंव विरसपरिणामा । ते जइ सयमेव न संपडंति ता एत्थ किमजुत्तं ? ॥१८६॥
सा भणइ होउ एवं किंपुण परपुरिससंगमपवाओ । लोयम्मि तुम्ह वट्टइ सो घट्टइ सुयणहिययाइं ॥१८७॥
जंपइ चंपयमाला केण पयारेण तं जणो भणइ । सा भणइ किर रमिज्जइ तुमए विज्जाहरो कोइ ॥१८८॥
चंपयमाला चिंतइ सच्चं चूडामणीए जं नायं । लोएमि इय अकित्ती पयासिया तीइ, तो भणइ ॥१८९॥
तह कहवि जइस्सं सज्जणाण तुम्हारिसाण वयणाइं । परदुक्खदुक्खियाणं हवंति अइउज्जलाइं जहा ॥१९०॥
भणिऊण पसायं सावि उट्ठिया नरवरोवि समयम्मि । वासभवणम्मि पत्तो चंपयमालाए इय भणिओ ॥

तथापि न प्रद्वेषलेशमपि वहति तस्योपरि चिन्तयत्येवम् । भोगान्तराय एष तु मम षण्मासगमनीयः ॥१७९॥
किञ्चान्तराय एते भोगा धर्मस्य मोहवशगैः । सेव्यन्ते बुधैरनाद्यभ्यासनटितैः ॥१८०॥
तत एतेषां विघ्ने सविशेषमुद्यच्छामि धर्मे । स एव यत् सकलसुखानां कारणमिति विचिन्त्य ॥१८१॥
कदापि मधुरकलकण्ठकण्ठं स्वाध्याये प्रयतते, कदापि गृहीतसुगन्धकुसुमा देवार्चने वर्तते ।
कदापि बहुभवभ्रमणभावनां मनसि भावयति, कदापि शुद्धरम्ये जिनधर्मे लीनं मनः स्थापयति ॥१८२॥
इत्येवं विनोदैर्दिनं गमयति कुमतिरहितसखीजनसहिता । सामायिकानुष्ठानपरा गमयति रजनिमरतिरहिता ॥
अथान्यदिने भणिता महत्या रहसि सा देवी । किं त्वयि स नरेन्द्रो मन्दस्नेह इव प्रतिभाति ? ॥१८४॥
चम्पकमाला जल्पति चन्द्रकलानामिव रमणरमणीनाम् । घटनानि विघटनानि पुनरपि घटनानि कालवशात् ॥
त्यक्तव्या एव विषयाः किम्पाकफलमिव विरसपरिणामाः । ते यदि स्वयमेव न संपतन्ति तदाऽत्र किमयुक्तम् ? ॥
सा भणति भवत्वेवं किन्तु परपुरुषसंगमप्रवादः । लोके तव वर्तते स घट्टते सुजनहृदयानि ॥१८७॥
जल्पति चम्पकमाला केन प्रकारेण तज्जनो भणति । सा भणति किल रम्यते त्वया विद्याधरः कोऽपि ॥१८८॥
चम्पकमाला चिन्तयति सत्यं चूडामणेर्यज्ज्ञातम् । लोकेऽपीत्यकीर्त्तिः प्रकाशिता तेन, ततो भणति ॥१८९॥
तथा कथमपि यतिष्ये सज्जनानां युष्मादृशां वदनानि । परदुःखदुःखितानां भवन्त्यत्युज्ज्वलानि यथा ॥१९०॥
भणित्वा प्रसादं साप्युत्थिता नरवरोऽपि समये । वासभवने प्राप्तश्चम्पकमालयेति भणितः ॥१९१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नरसिरचूडामणिणो तुह तरइ न कोइ गुणगणं गणिउं। पच्चक्खदिट्ठदोसेवि परियणे जस्स इय करुणा ॥
उच्छिट्ठभोयणस्सव चत्ते भोगे तए मह तणुस्स। चूडामणीए दाउं उवओगं इय मए नायं ॥१९३॥
जह सिज्जाए पुरिसो पिएण दिट्ठो मए सह लुलंतो। लोएवि इय अकित्ती दिन्नुवओगे पुणो नाया ॥
जणपच्चक्खं ता किंचि देह मह नाह दारुणं दिव्वं। जेणेस अयसपडहो वज्जंतो विरमए मज्झ ॥१९५॥
दिव्वुत्तिन्ना जुत्तिं तह नियनाहस्स परिकहिस्सामि। परपुरिसदंसणं इंदियालतुल्लं जहा मुणइ ॥१९६॥
भणइ निवो कइया तं कायव्वं, भणइ सा पभायम्मि। किं पुण तं, पउरमहल्लयाणं जं संमयं होही ॥
एवं होउत्ति तओ भणिउं आपुच्छिउं च तं देविं। विहियतस्समयकिच्चो सुत्तो अन्नत्थ गंतूणं ॥१९८॥
अह पडिबुद्धो चिंतइ निसावसाणम्मि कहवि दिव्ववसा। जइ एसा न विसुज्झइ ता दुत्तरमम्ह वसणमिणं ॥
इय पुणरुत्तं चिंताउरस्स दोलायमाणहिययस्स। सूइयमह कालनिवेयएण सूरुग्गमसरूवं ॥२००॥
तद्यथा;—
"आसीस्त्वं निशि राजभक्तहृदयेतीर्ष्यालुना वज्रिणा, प्रातः शङ्कित एव दिव्यपदवीं गत्वात्मनः शुद्धये।
ऊर्वीतापितवार्धितापकतलादाकृष्य मुक्तो बहिः, प्राच्यासौ नृप! तप्तमाषक इव प्रद्योतनो द्योतते ॥"
इय सोउं परिचिंतइ सुज्झइ एसा सुनिच्छियं दिव्वे। दिव्वंपि दिव्ववाणीए सूइयं होउ इममेव ॥२०१॥
तो विहियगोसकिच्चो सद्दाविय परिजणं पुरजणं च। धम्माहिगरणिए तह पभणइ एवं जहा भो भो! ॥
चंपयमाला देवी दुस्सीला एरिसो जणपवाओ। देवीए सुओ सा भणइ दिव्वसुद्धच्चिय जिमिस्सं ॥२०३॥
निच्छिओ मे तं पुण तत्तमासओ ता करेह सामग्गिं। भणइ जणो पामरवयणमित्तओ किं इमं जुत्तं? ॥

नरशिरश्चूडामणेस्तव शक्नोति न कोऽपि गुणगणं गणयितुम्। प्रत्यक्षदृष्टदोषेऽपि परिजने यस्येयं करुणा ॥
उच्छिष्टभोजनस्येव त्यक्ते भोगे त्वया मम तनोः। चूडामणौ दत्त्वोपयोगमिति मया ज्ञातम् ॥१९३॥
यथा शय्यायां पुरुषः प्रियेण दृष्टो मया सह लोठन्। लोकेऽपीत्यकीर्त्तिर्दत्तोपयोगे पुनर्ज्ञाता ॥१९४॥
जनप्रत्यक्षं तस्मात्किञ्चिद् देहि मम नाथ! दारुणं दिव्यम्। येनैषोऽयशःपटहो वाद्यमानो विरमति मम ॥१९५॥
दिव्योत्तीर्णा युक्तिं तथा निजनाथं परिकथयिष्यामि। परपुरुषदर्शनमिन्द्रजालतुल्यं यथा जानाति ॥१९६॥
भणति नृपः कदा तत्कर्तव्यम्, भणति सा प्रभाते। किं पुनस्तत्, पौरमहतां यत् संमतं भवेत् ॥१९७॥
एवं भवत्विति सको भणित्वाऽऽपृच्छ्य च तां देवीम्। विहिततत्समयकृत्यः सुप्तोऽन्यत्र गत्वा ॥१९८॥
अथ प्रतिबुद्धश्चिन्तयति निशावसाने कथमपि दिव्यवशात्। यद्येषा न विशुध्यति तदा दुस्तरमस्माकं व्यसनमिदम्
इति भृशं चिन्तातुरस्य दोलायमानहृदयस्य। सूचितमथ कालनिवेदकेन सूरोद्गमस्वरूपम् ॥२००॥
इति श्रुत्वा परिचिन्तयति शुध्यत्येषा सुनिश्चितं दिव्ये। दिव्यमपि दिव्यवाण्या सूचितं भवत्विदमेव ॥२०१॥
ततो विहितप्रातःकृत्यः शब्दयित्वा परिजनं पुरजनं च। धर्माधिकरणिकांस्तथा प्रभणत्येवं यथा भो भोः! ॥
चम्पकमाला देवी दुःशीलेदृशो जनप्रवादः। देव्या श्रुतः, सा भणति दिव्यशुद्धैव जेमिष्ये ॥२०३॥
निश्चितो मे तत्पुनस्तप्तमाषकस्तस्मात्कुरुत सामग्रीम्। भणति जनः पामरवचनमात्रतः किमिदं युक्तम्? ॥२०४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणइ नरिंदो जुत्तं अवन्नवाओ जहा तहा लोए । जेण पयट्टो नूणं गरुयाणवि हरइ माहप्पं ॥२०५॥
उक्तं च;—

"विरुद्धस्तथ्यो वा भवतु वितथो वा किमपरं, प्रतीतः सर्वस्मिन् हरति महिमानं जनरवः ।
तुलोत्तीर्णस्यापि प्रकटनिहताशेषतमसो, रवेस्तादृक् तेजो न हि भवति कन्यां गत इति ॥"

देवो जाणइ एवं जणेण भणियम्मि दिव्वठाणम्मि । गंतुं हक्कारावइ महल्लियं पेसिउं देविं ॥२०६॥
पारेवि पोसहं सा पूएवि विहीए जिणवरिंदेवि । सिवियं समारुहेउं संपत्ता दिव्वभूमीए ॥२०७॥
अंतेउरंपि दुल्लहदेवीपमुहं महल्लियामुहओ । विन्नविउं नरनाहं, अवलोयइ जवणियंतरियं ॥२०८॥
जाओ नयरक्खोहो मिलिओ लोओ वियंभिओ सद्दो । चंपयमालादेवीए सोहणं अज्ज होउत्ति ॥२०९॥
अह पज्जलिओ जलणो तवियं तवयम्मि तिल्लमइपउरं । कारणियनिउत्तेहिं पुरिसेहिं पुरो य देवीए ॥
जह जह पजलइ सिही तिल्लं उल्लसइ बहललहरीहिं । तह तह जणहिययाइं तन्निहियाइंव डज्झंति ॥२११॥
धम्माहिगरणिएहिं पक्खित्तो जाव मासओ तत्थ । ताव सहसत्ति अकम्हा पलयानलसंनिभो अनलो ॥
पज्जलिओ सव्वत्तो तडयडरावेहिं भरियनहविवरो । खडहडखुडंतपासायसिहरतुट्टंतकोट्टतडो ॥२१३॥
मायावि पियं पुत्तं पुत्तो जणणिंपि मिल्लिउं झत्ति । पासायसेलसालग्गलग्गओ गरुयधाहाहिं ॥२१४॥
पुक्करइ रुयइ विलवइ हा हा हा पुत्त! माइ! जणसद्दो । वित्थरिओ तह गयणे सासणदेवीए इय भणियं ॥
कित्तियमित्तं एयं चंदकलानिम्मलाए देवीए । आरोवंताणयसं तुम्हाणं अप्पवेरीणं ? ॥२१६॥
इय सुणिउं नयरजणो भयभीओ निवडिऊण चलणेसु । चंपयमालाभिमुहं एवं भणिउं समारद्धो ॥२१७॥

भणति नरेन्द्रो युक्तमवर्णवादो यथा तथा लोके । येन प्रवृत्तो नूनं गुरूणामपि हरति माहात्म्यम् ॥२०५॥
देवो जानात्येवं जनेन भणिते दिव्यस्थाने । गत्वा हक्कारयति वृद्धां प्रेष्य देवीम् ॥२०६॥
पारयित्वा पौषधं सा पूजयित्वा विधिना जिनवरेन्द्रानपि । शिबिकां समारुह्य संप्राप्ता दिव्यभूमौ ॥२०७॥
अन्तःपुरमपि दुर्लभदेवीप्रमुखं वृद्धामुखतः । विज्ञप्य नरनाथम्, अवलोकते यवनिकान्तरितम् ॥२०८॥
जातो नगरक्षोभो मिलितो लोको विजृम्भितः शब्दः । चम्पकमालादेव्याः शोभनमद्य भवत्विति ॥२०९॥
अथ प्रज्वलितो ज्वलनस्तापितं कटाहे तैलमतिप्रचुरम् । कारणिकनियुक्तैः पुरुषैः पुरश्च देव्याः ॥२१०॥
यथा यथा प्रज्वलति शिखी तैलमुल्लसति बहललहरीभिः । तथा तथा जनहृदयानि तान्निहितानीव दह्यन्ते ॥२११॥
धर्माधिकरणिकैः प्रक्षिप्तो यावन्माषकस्तत्र । तावत् सहसेत्यकस्मात्प्रलयानलसंनिभोऽनलः ॥२१२॥
प्रज्वलितः सर्वतस्तटटटरावैर्भृतनभोविवरः । खटखटखटत्प्रासादशिखरत्रुट्यत्कोट्टतटः ॥२१३॥
मातापि प्रियं पुत्रं पुत्रो जननीमपि मुक्त्वा झटिति । प्रासादशैलशालाग्रलग्नो गुरुस्वरैः ॥२१४॥
पूत्करोति रोदिति विलपति हा हा हा पुत्र ! मातः ! जनशब्दः । विस्तीर्णस्तथा गगने शासनदेव्येति भणितम् ॥
कियन्मात्रमेतच्चन्द्रकलानिर्मलायां देव्याम् । आरोपयतामयशो युष्माकमात्मवैरिणाम् ? ॥२१६॥
इति श्रुत्वा नगरजनो भयभीतो निपत्य चरणयोः । चम्पकमालाभिमुखमेवं भणितुं समारब्धः ॥२१७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ओ देवि ! रक्ख रक्खह नयरमनाहंव डज्झमाणमिणं । अविणीएसुवि उवजीवगेसु न परम्मुहा गरुया॥
यत:;—
"उपजीवकेषु विमुखाः सुजना न भवन्ति दुर्विनीतेषु । वत्सव्यथितेऽप्यूधसि सुरभिर्नो शमयति क्षीरम्" ॥
रायावि पयंपइ तुज्झ देवि ! फलिहुज्जलम्मि सीलम्मि । आरोवियं कलंकं जमिमेहिं जणेहिं मूढेहिं ॥
तस्सेव पावविसविडविणो कुसुममणुहवंति इह एए । तुज्झ पसायं मोत्तुं सरणं अन्नो न एआणं ॥२२०॥
चंपयमाला पभणइ जइ मह अरिकेसरिं विमोत्तूणं । वसइ मणेवि न अन्नो तो अग्गी एस विज्झाउ ॥
सुत्थावत्थं सयलंपि होउ डड्ढंपि डज्झमाणंपि । तव्वयणाणंतरओ सासणदेवीए तह विहियं ॥२२२॥
कोऊहलभत्तीहिं जे तत्थ सुरा समागया तेहिं । घुट्ठं जयइ सुसीलं तह मुक्का कुसुमवुट्ठीवि ॥२२३॥
जयजयरवसंमिस्सो उच्छलिओ देवदुंदुहीसद्दो । गयणयले य सलील्लं पणच्चियं देवनारीहिं ॥२२४॥
धरणियले सव्वत्तो नयरे दिज्जंति कुंकुमछडाओ । वंदणमालसणाहाइं तोरणाइं रइज्जंति ॥२२५॥
अक्खुडिओ पक्खुडिओ छिक्कंतोवि य सबालवुड्ढजणो । जीवउ चंपयमालत्ति जंपिरो वियरए तत्थ॥
इय अच्चब्भुयमवलोइऊण पव्वाइया भयत्तत्था । चिंतेइ अहमणत्थस्स मूलभूयम्हि एयस्स ॥२२७॥
ता मह मरणं सरणं सहियव्वाइं च दुक्खलक्खाइं । पावाइ मए पावाइं जेण विहियाइंणेगाइं ॥२२८॥
एयं तु महापावं मन्ने जइ नित्थरामि तत्थ गया । अपइट्ठाणं नरयं भणंति जं जिणमए निउणा ॥२२९॥
तहवि हु नियदुच्चरियं पयासिउं सयललोयपच्चक्खं । पणमामि महासइपायपंकयाइं तहिं गंतुं ॥२३०॥

हे देवि ! रक्ष रक्ष नगरमनाथमिव दह्यमानमिदम् । अविनीतेष्वप्युपजीवकेषु न पराङ्मुखा गुरवः ॥२१८॥
राजापि प्रजल्पति तव देवि ! स्फटिकोज्ज्वले शीले । आरोपितः कलङ्को यदेभिर्जनैर्मूढैः ॥२१९॥
तस्यैव पापविषविटपिनः कुसुममनुभवन्तीहैते । तव प्रसादं मुक्त्वा शरणमन्यो नैतेषाम् ॥२२०॥
चम्पकमाला प्रभणति यदि ममारिकेसरिणं विमुच्य । वसति मनस्यपि नान्यस्ततोऽग्निरेष विध्यायतु ॥२२१॥
सुस्थावस्थं सकलमपि भवतु दग्धमपि दह्यमानमपि । तद्वचनानन्तरतः शासनदेव्या तथा विहितम् ॥२२२॥
कौतूहलभक्तिभ्यां ये तत्र सुराः समागतास्तैः । घुष्टं जयति सुशीलं तथा मुक्ता कुसुमवृष्टिरपि ॥२२३॥
जयजयरवसंमिश्र उच्छलितो देवदुन्दुभिशब्दः । गगनतले च सलीलं प्रनर्तितं देवनारीभिः ॥२२४॥
धरणीतले सर्वतो नगरे दीयन्ते कुङ्कुमच्छटाः । वन्दनमालासनाथानि तोरणानि रच्यन्ते ॥२२५॥
क्रुष्टो विक्रोशितः क्षुतयन्नपि सबालवृद्धजनः । जीवतु चम्पकमालेति जल्पनशीलो विचरति तत्र ॥२२६॥
इत्यत्यद्भुतमवलोक्य प्रव्राजिका भयत्रस्ता । चिन्तयत्यहमनर्थस्य मूलभूताऽस्म्येतस्य ॥२२७॥
तस्माद् मम मरणं शरणं सोढव्यानि च दुःखलक्षाणि । पापया मया पापानि येन विहितान्यनेकानि ॥२२८॥
एतत्तु महापापं मन्ये यदि निस्तरामि तत्र गता । अप्रतिष्ठानं नरकं भणन्ति यं जिनमते निपुणाः ॥२२९॥
तथापि हि निजदुश्चरितं प्रकाशयित्वा सकललोकप्रत्यक्षम् । प्रणमामि महासतीपादपङ्कजानि तत्र गत्वा ॥

---

१ क °त्क्रम° ।

एयं तु करंतीए संपज्जइ कहवि जइवि मह मरणं । पावभरभारलहुयत्तकारणं तंपि न यणिट्ठं ॥२३१॥
इय साहसमवलंबिय तुरियं गंतूण दिव्वभूमीए । दूरुज्झियभुयदंडा सहासमक्खं भणइ एवं ॥२३२॥
जयउ जिणसासणमिणं महासईओ महप्पभावाओ । इय पाडिहेरपयडाओ जत्थ दीसंति अज्जवि य ॥
इय जंपिऊण चंमयमालापाएसु पणमिउं भणइ । जयइ तुह देवि ! सीलं निच्चलचित्ताए सम्मत्ते ॥२३४॥
अज्जप्पभिइं ममावि हु सम्मत्तं हवउ तुह पसाएण । देवगुरुणो य जे तुह ते मज्झवि होंतु जाजीवं ॥२३५॥
इय पडिवज्जिवि सम्मं चंपयमालाकलंकमवणेउं । निचदुच्चरियं पयडइ दुक्कम्मावगमओ एवं ॥२३६॥
जह देवीए सईणं सिरोमणीए समं अभिरमंतो । विज्जासामत्था दंसिओ मए निवइणो पुरिसो ॥२३७॥
निवपरियणम्मि तह पुरजणम्मि सयलम्मि वइयरो एसो । गमिओ परं पसिद्धिं विज्जासामत्थओ चेव ॥
अह तं पुच्छइ राया हेऊ को एत्थ तुज्झ, सा भणइ । मह कूडकवडदुक्कडकुडीए हेऊ किमन्नोवि ? ॥२३९॥
राया जंपइ जह अवितहं तए दुक्कडं नियं कहियं । हेऊवि तह कहिज्जउ अन्नह नूणं विणस्सिहिसि ॥
कित्तियमित्तं एयं सा जंपइ दुक्कडस्स एयस्स ? । अणुहवियव्वाइं मए अज्जवि नरएसु दुक्खाइं ॥२४१॥
राया जंपइ एयं सिंचह रे रे कढंततिल्लेण । धिट्ठिमजवमुद्दा गलइ जेण मणभवणदाराओ ॥२४२॥
जाव तहच्चिय काउं समुट्ठिया किंकरा निवाएसं । चंपयमाला जंपइ ससंभमा ताव नरनाहं ॥२४३॥
वारह वारह सामिय ! एए जा किंपि विन्नवेमि अहं । रन्ना तहेव विहिए चंपयमाला इमं भणइ ॥२४४॥

एतत्तु कुर्वत्याः संपद्यते कथमपि यद्यपि मम मरणम् । पापभरभारलघुत्वकारणं तदपि न चानिष्टम् ॥२३१॥
इति साहसमवलम्ब्य त्वरितं गत्वा दिव्यभूमौ । दूरोज्झितभुजदण्डा सभासमक्षं भणत्येवम् ॥२३२॥
जयतु जिनशासनमिदं महासत्यो महाप्रभावाः । इति प्रातिहार्यप्रकटा यत्र दृश्यन्तेऽद्यापि च ॥२३३॥
इति जल्पित्वा चम्पकमालापादौ प्रणम्य भणति । जयति तव देवि ! शीलं निश्चलचित्तायाः सम्यक्त्वे ॥२३४॥
अद्यप्रभृति ममापि खलु सम्यक्त्वं भवतु तव प्रसादेन । देवगुरवश्च ये तव ते ममापि भवन्तु यावज्जीवम् ॥
इति प्रतिपद्य सम्यक्त्वं चम्पकमालाकलङ्कमपनेतुम् । निजदुश्चरितं प्रकटयति दुष्कर्मावगमत एवम् ॥२३६॥
यथा देव्या सतीनां शिरोमणिना सममभिरममाणः । विद्यासामर्थ्याद् दर्शितो मया नृपतये पुरुषः ॥२३७॥
नृपपरिजने तथा पुरजने सकले व्यतिकर एषः । गमितः परां प्रसिद्धिं विद्यासामर्थ्यत एव ॥२३८॥
अथ तां पृच्छति राजा हेतुः कोऽत्र तव, सा भणति । मम कूटकपटदुष्कृतकुट्या हेतुः किमन्योऽपि ? ॥
राजा जल्पति यथाऽवितथं त्वया दुष्कृतं निजं कथितम् । हेतुरपि तथा कथ्यतामन्यथा नूनं विनङ्क्ष्यसि ॥
कियन्मात्रमेतत् सा जल्पति दुष्कृतस्यैतस्य ? । अनुभवितव्यानि मयाऽद्यापि नरकेषु दुःखानि ॥२४१॥
राजा जल्पत्येतां सिञ्चत रे रे तप्यमानतैलेन । धृष्टताजपमुद्रा गलति येन मनोभवनद्वारात् ॥२४२॥
यावत्तथैव कर्तुं समुत्थिताः किङ्करा नृपादेशम् । चम्पकमाला जल्पति ससंभ्रमा तावद् नरनाथम् ॥२४३॥
वारय वारय स्वामिन् ! एतान् यावत्किमपि विज्ञपयाम्यहम् । राज्ञा तथैव विहिते चम्पकमालेदं भणति ॥२४४॥

---

१ क. ख. °वज्जवि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुम्हारिसाण सामिय ! विवेयवररयणरोहणगिरीण । करुणारससरसीए किमिमीए जुत्तमिय काउं ? ॥
नियपाणच्चाएणवि परपाणे रक्खिउं महइ एसा । को कुणइ जीवलोए पिय ! एवं मरणभीरुम्मि[1] ? ॥
अन्नं च;—
नियदुच्चरियं इय संकडम्मि को पयडिउं तरइ एवं । जिणवयणं जस्स मणे न भावओ परिणयं होइ ? ॥
वोलीणा सावत्था जीए विसकंदली इमा आसि । ता वच्छल्लमिमीए जुत्तं एत्तो न दुहदाणं ॥२४८॥
उक्तं च;—
"साधर्मिकवत्सलता कल्पलता सकलसंपदां प्रसवे । यस्मात्तस्मात्तत्रैव कृतधियः कुर्वते यत्नम् ॥"
जुत्ताजुत्तं जाणइ देविच्चिय जंपिउं इय नरिंदो । चंपयमालाए समं संपत्तो नियंयभवणम्मि ॥२४९॥
पव्वाइयावि निव्वुयहियया निसुणेइ पइदिणं धम्मं । देवीइ संनिहाणे कुणइ य जहसत्ति गिहिउचियं ॥
पच्छायावदवानलकवलियहियया विसोवओगेण । अह दुल्लहदेवीवि हु इच्छइ नियजीवियं चइउं ॥२५१॥
इय तीए ववसियं नाउमित्थ चूडामणीए लहुमेव । तत्तो चंपयमाला संपत्ता तस्समीवम्मि ॥२५२॥
पुच्छइ किं तुम्ह करे पाएसु निवडिऊण सा भणइ । जं किंपि मुणह तुब्भे, को हेऊ, मुणह जं तुब्भे ॥२५३॥
जंपइ चंपयमाला एयस्स न होइ एस पडियारो । वज्जइ य अयसपडहो तिण्हं जुण्हुज्जलकुलाणं ॥२५४॥
एवं एवं धम्मं कुणमाणा गमह कइवि दियहाइं । पडियारम्मि उवायं इमस्स समए कहिस्सामि ॥२५५॥
अवयारउवयारपरायणाए परछिद्दपिहणवसणाए । तुज्झ नमो तुज्झ नमो सफलीकयसुकुलजम्माए ॥२५६॥

युष्मादृशां स्वामिन् ! विवेकवररत्नरोहणगिरीणाम् । करुणारससरस्याः किमस्या युक्तमिति कर्तुम् ? ॥२४५॥
निजप्राणत्यागेनापि परप्राणान् रक्षितुं काङ्क्षत्येषा । कः करोति जीवलोके प्रिय ! एवं मरणभीरौ ? ॥२४६॥
अन्यच्च,
निजदुश्चरितमिति संकटे कः प्रकटयितुं शक्नोत्येवम् । जिनवचनं यस्य मनसि न भावतः परिणतं भवति ? ॥२४७॥
अतिक्रान्ता सावस्था यस्यां विषकन्दलीयमासीत् । तस्माद् वात्सल्यमस्या युक्तमितो न दुःखदानम् ॥२४८॥
युक्तायुक्तं जानाति देव्येव जल्पित्वेति नरेन्द्रः । चम्पकमालया समं संप्राप्तो निजकभवने ॥२४९॥
प्रव्राजिकापि निर्वृतहृदया शृणोति प्रतिदिनं धर्मम् । देव्याः संनिधाने करोति च यथाशक्ति गृह्युचितम् ॥२५०॥
पश्चात्तापदवानलकवलितहृदया विषोपयोगेन । अथ दुर्लभदेव्यपि खल्विच्छति निजजीवितं त्यक्तुम् ॥२५१॥
इति तस्या व्यवसितं ज्ञात्वाऽत्र चूडामणिना लघ्वेव । ततश्चम्पकमाला संप्राप्ता तत्समीपे ॥२५२॥
पृच्छति किं तव करे पादयोर्निपत्य सा भणति । यत् किमपि जानीत यूयं, को हेतुः, जानीत यं यूयम् ॥२५३॥
जल्पति चम्पकमालैतस्य न भवत्येष प्रतिकारः । वाद्यते चायशःपटहस्त्रयाणां ज्योत्स्नोज्ज्वलकुलानाम् ॥२५४॥
एवमेवं धर्मं कुर्वाणा गमय कत्यपि दिवसानि । प्रतिकार उपायमस्य समये कथयिष्यामि ॥२५५॥
अपकारोपकारपरायणायै परच्छिद्रपिधानव्यसनायै । तुभ्यं नमस्तुभ्यं नमः सफलीकृतसुकुलजन्मायै ॥२५६॥

---

[1] ख. भीमम्मि ।

इय धरणिनिहित्तसिरा दुल्लहदेवी पुणो पणमिऊण। मह एए च्चिय चरणा सरणं इय भणिय पुणरुत्तं ॥२५७॥
भणइ तइच्चिय वयणं कस्सवि सुयणस्स सुयणु ! सच्चवियं। जं अगुणेसुवि सत्तेसु होंति उवयारिणो सुयणा॥
यतः;—

"निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः। नहि संहरति ज्योत्स्नां चन्द्रश्चाण्डालवेश्मसु ॥"

इय चंपयमालाए सह गुरुपीईए वड्ढमाणीए। दुल्लहदेवीए निवो चमक्किओ चिंतए एवं ॥२५९॥
सुकुलुप्पत्ती य गुणन्नुया य सम्मं इमीए निव्वडिया। वयगस्स इमस्स तहा अत्थोवि य परिणओ बाढं॥

"वरं ज्वालाकुले वह्नावह्नाय निहितं वपुः। न पुनर्गुणसंपन्ने कृतः स्वल्पोऽपि मत्सरः ॥"

इय एवं सव्वत्थवि समुव्वहंतो गुणेसु बहुमाणं। सविसेसं जिणधम्मे कुणइ पवित्तिं पुहइनाहो ॥२६१॥
तथाहि;—
पइनगरं पइगामं सव्वत्थ जिणेसराण भवणाइं। कारेइ नियय देसे विसेसओ सुविहियजणस्स ॥२६२॥
भत्तिबहुमाणपुव्वं वसहिपयाणाइएसु किच्चेसु। नियअहिगारियलोयं पयट्टए समयनीईए ॥२६३॥
साहम्मियवच्छल्लं परमंगं सिवसुहस्स तं कुणइ। सुणइ सिद्धंतसारं धरियस्स न मरणमाणवइ ॥२६४॥
सव्वत्थवि घोसावइ पडहयपुव्वं अमारिसद्दं च। उम्मुक्कसुंकदंडं सावयलोयं करावेइ ॥२६५॥
इय देवीए समेओ धम्मपरो पालए सुनीईए। रज्जमणवज्जकज्जे सज्जमई सययमुज्जमई ॥२६६॥
अह अन्नया कयाई पसवइ पुत्तं पवित्तसुमुहुत्ते। चंपयमाला पुव्वव्व दिणयरं अरुणकरचरणं ॥२६७॥
वद्धाविओ नरिंदो पियंवईयाए पुत्तजम्मेण। से दिन्नमंगलग्गं आभरणं मउडपरिवज्जं ॥२६८॥
तह सा दासत्ताओ मुक्काणत्तो य तह पडीहारो। जह जिणपूयापुव्वं वद्धावणयं करावेह ॥२६९॥

इति धरणीनिहितशिरा दुर्लभदेवी पुनः प्रणम्य। ममैतावेव चरणौ शरणमिति भणित्वा भूयः ॥२५७॥
भणति त्वयैव वचनं कस्यापि सुजनस्य सुतनु ! सत्यापितम्। यदगुणेष्वपि सत्त्वेषु भवन्त्युपकारिणः सुजनाः ॥२५८॥
इति चम्पकमालया सह गुरुप्रीतौ वर्धमानायाम्। दुर्लभदेव्या नृपश्चमत्कृतश्चिन्तयत्येवम् ॥२५९॥
सुकुलोत्पत्तिश्च गुणज्ञता च सम्यगस्या निष्पतिता। वचनस्यास्य तथाऽर्थोऽपि च परिणतो बाढम् ॥२६०॥
इत्येवं सर्वत्रापि समुद्वहन् गुणेषु बहुमानम्। सविशेषं जिनधर्मे करोति प्रवृत्तिं पृथिवीनाथः ॥२६१॥
प्रतिनगरं प्रतिग्रामं सर्वत्र जिनेश्वराणां भवनानि। कारयति निजदेशे विशेषतः सुविहितजनस्य ॥२६२॥
भक्तिबहुमानपूर्वं वसतिप्रदानादिकेषु कृत्येषु। निजाधिकारिलोकं प्रवर्तयति समयनीत्या ॥२६३॥
साधर्मिकवात्सल्यं परमाङ्गं शिवसुखस्य तत्करोति। शृणोति सिद्धान्तसारं धृतस्य न मरणमाज्ञपयति ॥२६४॥
सर्वत्रापि घोषयति पटहपूर्वममारिशब्दं च। उन्मुक्तशुल्कदण्डं श्रावकलोकं कारयति ॥२६५॥
इति देव्या समेतो धर्मपरः पालयति सुनीत्या। राज्यमनवद्यकार्ये सज्जमतिः सततमुद्यच्छति ॥२६६॥
अथान्यदा कदाचित्प्रसूते पुत्रं पवित्रे सुमुहूर्ते। चम्पकमाला पूर्वेव दिनकरमरुणकरचरणम् ॥२६७॥
वर्धितो नरेन्द्रः प्रियंवदया पुत्रजन्मना। तस्यै दत्तमङ्गलग्नमाभरणं मुकुटपरिवर्जम् ॥२६८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेणवि तहत्ति विहियं पुरिसे संपेसिऊण सव्वत्थ । धयचिंधहट्टसोहाए सोहियं तं पुरंपि कयं ॥२७०॥
मासम्मि अइक्कंते नामं पुत्तस्स सुहमुहुत्तम्मि । भुवणाणंदोत्ति कयं महाविभूईए भूवइणा ॥२७१॥
संगयकलाकलावो वित्तजुओ सयललोयमणहरणो । जुवरायपए रायव्व ठाविओ सो नरिंदेण ॥२७२॥
तत्तो कमेण पुत्तो जाओ बीओवि कुंमरकरिसीहो। दुहियावि तहा एक्का जयसुंदरिनामिया जाया ॥
इय वच्चंते काले चंपयमालाए नियपई भणिओ । समओ एस नरेसर ! वयमग्गे गरुयपुरिसाणं ॥२७४॥
तो भणइ निवो जुत्तं भणियं तुम्हेहिं किंतु कम्मवसा । तुहमुहकमलविलोयणतिसिओच्चिय अज्जवि मयच्छि !॥
तो पइ तं सा जंपइ मा जंपसु नाह ! एरिसं वयणं । अणुसाससु अप्पाणं इमेण अणुसासणकमेण ॥२७६॥
तद्यथा;—
ही ही निहीण रे जीव ! पाविउं मणुयजम्ममवि दुलहं । हारसि रमणीण कए जाणं का चंगिमा ताण ? ॥
तथाहि;—
जं मज्झे तं बाहिं जं बाहिं तं हविज्ज जइ मज्झे । रमणीतणुस्स ता होज्ज दुन्निवारा सुणयकाया ॥२७८॥
किं रमणीयं रमणीतणुस्स चम्मट्ठिरुहिरमइयस्स । मुत्तंतपुरीसनसावसाविसप्पंतगंधस्स ? ॥२७९॥
मयणअब्भुल्लिरदुल्ललियभिल्लसुमहल्लतिक्खभल्लीहिं । सो विज्झइ जो गिज्झइ रमणीरमणीयतणुफासे ॥२८०॥
जइ अणुरज्जसि तरुणीयणम्मि तह जइ जिणिंदधम्मम्मि । तो तेणेव भवेणं भवक्खओ तुह भवे जीव !॥
को अणुराओ का तम्मि भल्लिमा वल्लहम्मि रे जीव ! । जम्मि चलो सब्भावो गयणम्मिव तडितडक्कारो ! ॥

तथा सा दासत्वाद् मुक्ताऽऽज्ञप्तश्च तथा प्रतीहारः । यथा जिनपूजापूर्वं वर्धनकं कारय ॥२६९॥
तेनापि तथेति विहितं पुरुषान् संप्रेष्य सर्वत्र । ध्वजचिह्नहट्टशोभया शोभितं तत्पुरमपि कृतम् ॥२७०॥
मासेऽतिक्रान्ते नाम पुत्रस्य शुभमुहूर्ते । भुवनानन्द इति कृतं महाविभूत्या भूपतिना ॥२७१॥
संगतकलाकलापो वृत्तयुतः सकललोकमनोहरणः । युवराजपदे राजेव स्थापितः स नरेन्द्रेण ॥२७२॥
ततः क्रमेण पुत्रो जातो द्वितीयोऽपि कुमारकरिसिंहः[1] दुहितापि तथैका जयसुन्दरीनामिका जाता ॥२७३॥
इति व्रजति काले चम्पकमालया निजपतिर्भणितः । समय एष नरेश्वर ! व्रतमार्गे गुरुपुरुषाणाम् ॥२७४॥
ततो भणति नृपो युक्तं भणितं युष्माभिः किन्तु कर्मवशात् । त्वन्मुखकमलविलोकनतृषित एवाद्यापि मृगाक्षि ! ॥
ततः प्रति तं सा जल्पति मा जल्पीर्नाथ ! ईदृशं वचनम् । अनुशाध्यात्मानमनेनानुशासनक्रमेण ॥२७६॥
ही ही निहीन रे जीव ! प्राप्य मनुजजन्मापि दुर्लभम् । हारयसि रमणीनां कृते यासां का चङ्गिमा तासाम् ? ॥
यद् मध्ये तद् बहिर्यद् बहिस्तद् भवेद्यदि मध्ये । रमणीतनोस्ततो भवेयुर्दुर्निवाराः शुनककायाः ॥२७८॥
किं रमणीयं रमणीतनोश्चर्मास्थिरुधिरमयस्य । मूत्रान्त्रपुरीषनसावसाविसर्पद्गन्धस्य ? ॥२७९॥
मदनाभ्रंशनशीलदुर्ललितभिल्लसुमहातीक्ष्णभल्लीभिः । स विध्यति यो गृध्यति रमणीरमणीयतनुस्पर्शे ॥२८०॥
यथाऽनुरजसि तरुणीजने तथा यदि जिनेन्द्रधर्मे । ततस्तेनैव भवेन भवक्षयस्तव भवेज्जीव ! ॥२८१॥

---

१ क. ख. °मरिक° ।

अद्धच्छिपिच्छिरीहिं अबलाहिं विचलविवेयनेहाहिं । असुइगुरुकुट्टियाहिवि जे भंसिज्जंति सत्ताओ ॥
ताण फुसिज्जउ लीहा जीहा विउसाण थुणउ किं ताण । पुरिसायारधराणं चिंचापुरिसाणव नराणं ॥
ही ही ! अणज्जकज्जज्जयस्स रे जीव ! तुज्झ किं भणिमो । जिणसासणंपि कहमवि लद्धुं हारेसि मुहियाए ? ॥
जं विसएसु पसज्जसि भंजसि सुहसीलगरुयवणराई । मत्तकरिव्व न चेयसि देसणतिक्खंकुसपहारं ॥२८६॥
वड्डंतरम्मि भुल्लं हे हियय ! हयास ! जिणमयं लद्धुं । विसयसुहाइं वंछसि जीयट्ठा पियसि हालहलं ॥
विसघारिओ सि धत्तूरिओ सि मोहेण किंव ठगिओ सि । विसएसुवि जं सुक्खं मग्गसि रे जीव ! जाणंतो ॥
धी ! तुज्झ चंगिमा तुंगिमावि धी ! धी ! गुणाण माहप्पं । जं किर लद्धविवेओवि ववससे भुंजिउं विसए ॥
विसया विसंव विसया असिव्व विसया मसिव्व मन्नेसु । मइघारणछेयणकारणाउ जसमयलणाओ य ॥
ता खणमवि न खमं ते विसएसु मणो करित्तु रे जीव ! । सुरचावचंचले जीवियम्मि विसएसु का तण्हा ? ॥
इय लक्खमणं काउं सयावि झाएज्ज भवसरूवं तु । जेण जरमरणहरणं संवेगरसायणं लहह ॥२९२॥
इय तव्वयणायन्नणसंवेयवसुच्छलंतघणपुलओ । चंपयमालं सप्पणयनिब्भरं भणइ नरनाहो ॥२९३॥
मिच्छत्तकद्दमाओ तह उद्धरिउं पयट्टिओ पुव्विं । जह इहपरभवसुहकारणेसु अह उज्जओ जाओ ॥२९४॥
रज्जधुराधरणखमे संपइ पत्तेवि पुत्तरयणम्मि । पुव्वभवब्भासाओ रागानलदाहविहुरस्स ॥२९५॥
नियमुहसुवण्णकलसुल्लसंतसंवेयरसजलुप्पीलो । पल्हत्थिओ ममोवरि रायपयाव्व अवणेउं ॥२९६॥

कोऽनुरागः किं तस्मिन् भद्रत्वं वाल्लभ्ये रे जीव ! । यस्मिंश्चलः सद्भावो गगन इव तडित्तटत्कारः ॥२८२॥
अर्धाक्षिद्रष्ट्रीभिरबलाभिर्विचलविवेकस्नेहाभिः । अशुचिगुरुकोष्ठिकाभिरपि ये भ्रंश्यन्ते सत्त्वात् ॥२८३॥
तेषां मृज्यतां रेखा जिह्वा विदुषां स्तौतु किं तेषाम् । पुरुषाकारधराणां चञ्चापुरुषाणामिव नराणाम् ?॥२८४॥
ही ही ! अनार्यकार्यार्जकस्य रे जीव ! तव किं भणामः । जिनशासनमपि कथमपि लब्ध्वा हारयसि मुधा ॥
यद् विषयेषु प्रसीदसि भनक्षि शुभशीलगुरुवनराजीः । मत्तकरीव न चेतसि देशनातीक्ष्णाङ्कुशप्रहारम् ॥२८६॥
मार्गान्तरे भ्रष्टं हे हृदय ! हताश ! जिनमतं लब्ध्वा । विषयसुखानि वाञ्छसि जीवितार्थं पिबसि हलाहलम् ॥
विषघातितोऽसि धत्तूरितोऽसि मोहेन किंवा वञ्चितोऽसि । विषयेष्वपि यत्सौख्यं मार्गयसि रे जीव ! जानन् ॥
धिक्तव चाङ्गिमानं तुङ्गिमानं धिग्धिग् गुणानां माहात्म्यम् । यत्किल लब्धविवेकोऽपि व्यवस्यासि भोक्तुं विषयान् ॥
विषयान्विषमिव विषयानसिमिव विषयान्मषिमिव मन्यस्व । मतिघातनच्छेदनकारणाद्यशोमलिनकरणाच्च ॥२९०॥
तस्मात्क्षणमपि न क्षमं ते विषयेषु मनः कर्तुं रे जीव ! । सुरचापचञ्चले जीविते विषयेषु का तृष्णा ? ॥२९१॥
इति लक्ष्यमनः कृत्वा सदापि ध्यायेत भवस्वरूपं तु । येन जरामरणहरणं संवेगरसायनं लभध्वम् ॥२९२॥
इति तद्वचनाकर्णनसंवेगवशोच्छलद्घनपुलकः । चम्पकमालां सप्रणयनिर्भरं भणति नरनाथः ॥२९३॥
मिथ्यात्वकर्दमात् तथोद्धृत्य प्रवर्तितः पूर्वम् । यथेहपरभवसुखकारणेष्वसावुद्यतो जातः ॥२९४॥
राज्यधुराधरणक्षमे संप्रति प्राप्तेऽपि पुत्ररत्ने । पूर्वभवाभ्यासाद् रागानलदाहविधुरस्य ॥२९५॥

---

१ क. लसीलव°, ख. °लसरलव° । २ ख. धी गुणकलाण ।

ता सिग्घं चिय किज्जउ अप्पहिअं जा न एइ अप्पहियं। मरणमसरणपराणं अम्हाणं अकयसुकयाण ॥
समउत्ति इय वियाणिय वरनाणी बहुमुणीहिं परियरिओ। सुयजलहिनामसूरी समागओ नंदणुज्जाणे ॥
उज्जाणपालएणं कहिए दाऊण पीइदाणं से। सत्तट्ठपयाइं गंतुं तदभिमुहं वंदणं कुणइ ॥२९९॥
देवीहिं कुमरेण य अन्नेणवि मंतिपमुहलोएण। परिवरिओ देवेहिं इंदोव्व गइंदमारूढो ॥३००॥
उल्लसियअमंदाणंदपुलयजालेण जडिलियसरीरो। पंचविहाभिगमेणं संपत्तो सूरिपासम्मि ॥३०१॥
चंपयमालादुल्लहदेवीपमुहावरोहपरिवरिओ। सूरिचरणारविंदं नमिउं भूमीए उवविट्ठो ॥३०२॥
तो सजलजलयगज्जियगहिरसरेणं पसाहए सूरी। सव्वंपि भवसरूवं सवित्थरं तं निसामेउं ॥३०३॥
भालयलमिलियकरकमलसंपुडो विन्नवेइ नरनाहो। पहु! दिक्खानावाए उत्तारहि मं भवसमुद्दा ॥३०४॥
होउ अविग्घं तुह नरवरिंद! मा कुणसु कमवि पडिबंधं। तो राया मुणिउग्गहआसन्ने उच्छुवाडम्मि ॥
गंतुं सह कुमरेणं देवीहिवि तहय मंतिलोएण। सिंहासणम्मि कुमरं ठविऊणं भणइ मंतियणं ॥३०६॥
एसो भुवणाणंदो तुम्ह समक्खं मए नियपयम्मि। ठविओ तह दट्ठव्वो जहा अहं एत्तियं कालं ॥३०७॥
इय वोत्तुं तक्कंठे ठविओ हारो नियाओ कंठाओ। नियमउडोवि पिणद्धो तस्स सिरे रयणचिंचइओ ॥
काउं चंदणतिलयं सपरियणो पणमिऊण तं भणइ। एस जणो दट्ठव्वो तह जह दिट्ठो मए पुव्विं ॥३०९॥
जह मह आणा सिरसा पडिच्छिया तह इमस्स नरवइणो। सम्मं पडिच्छियव्वा इय भणिओ परियणो तत्तो ॥

निजमुखसुवर्णकलशोल्लसत्संवेगरसजलसंघातः। पर्यस्तो ममोपरि रागप्रतापमिवापनेतुम् ॥२९६॥
तस्माच्छीघ्रमेव क्रियतामात्महितं यावन्नैत्याप्रथितम्। मरणमशरणपराणामस्माकमकृतसुकृतानाम् ॥२९७॥
समय इतीति विज्ञाय वरज्ञानी बहुमुनिभिः परिकरितः। श्रुतजलधिनामसूरिः समागतो नन्दनोद्याने ॥२९८॥
उद्यानपालकेन कथिते दत्त्वा प्रीतिदानं तस्मै। सप्ताष्टपदानि गत्वा तदभिमुखं वन्दनं करोति ॥२९९॥
देवीभिः कुमारेण चान्येनापि मन्त्रिप्रमुखलोकेन। परिवृतो देवैरिन्द्र इव गजेन्द्रमारूढः ॥३००॥
उल्लसितामन्दानन्दपुलकजालेन जटिलितशरीरः। पञ्चविधाभिगमेन संप्राप्तः सूरिपार्श्वे ॥३०१॥
चम्पकमालादुर्लभदेवीप्रमुखावरोधपरिवृतः। सूरिचरणारविन्दं नत्वा भूम्यामुपविष्टः ॥३०२॥
ततः सजलजलदगर्जितगभीरस्वरेण प्रकथयति सूरिः। सर्वमपि भवस्वरूपं सविस्तरं तन्निशम्य ॥३०३॥
भालतलमिलितकरकमलसंपुटो विज्ञपयति नरनाथः। प्रभो! दीक्षानावोत्तारय मां भवसमुद्रात् ॥३०४॥
भवत्वविघ्नं तव नरवरेन्द्र! मा कुरुष्व कमपि प्रतिबन्धम्। ततो राजा मुन्यवग्रहासन्न इक्षुवाटे ॥३०५॥
गत्वा सह कुमारेण देवीभिरपि तथा च मन्त्रिलोकेन। सिंहासने कुमारं स्थापयित्वा भणति मन्त्रिजनम् ॥३०६॥
एष भुवनानन्दो युष्माकं समक्षं मया निजपदे। स्थापितस्तथा द्रष्टव्यो यथाहमेतावन्तं कालम् ॥३०७॥
इत्युक्त्वा तत्कण्ठे स्थापितो हारो निजात्कण्ठात्। निजमुकुटोऽपि पिनद्धस्तस्य शिरसि रत्नमण्डितः ॥३०८॥
कृत्वा चन्दनतिलकं सपरिजनः प्रणम्य तं भणति। एष जनो द्रष्टव्यस्तथा यथा दृष्टो मया पूर्वम् ॥३०९॥
यथा ममाज्ञा शिरसा प्रतीष्टा तथास्य नरपतेः। सम्यक् प्रत्येष्टव्येति भणितः परिजनस्ततः ॥३१०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दुल्लहदेवीचंपयमालापमुहाहिं सयलदेवीहिं । आसीसामुहलाहिं तस्स कओ अक्खयक्खेवो ॥३११॥
भणइ य चंपयमाला कमागयं जाय ! रज्जरिणमेयं। तइ संकमियं पिउणा नित्थरियव्वं पयत्तेण ॥३१२॥
पुत्तय ! लोए भन्नंति अत्थसत्थेसु तिन्नि पुरिसत्था । तेसुंपि अत्थकामा धम्माउच्चिय लहिज्जंति ॥३१३॥
परमत्थम्मि उ सुच्चिय मोक्खस्सवि कारणं न उण इयरे । जं ते निसेविया भवदुहिक्कहेउं भवंति तओ ॥३१४॥
पुरिसत्थत्तं किं तेसु, होइ धम्मोवि वच्छ ! पुरिसत्थो। सोच्चिय जो खलु भणिओ जिणेहिं गयरायदोसेहिं ॥
ता वच्छ ! तए अप्पा पयट्टियव्वोऽपमत्तचित्तेणं । तह नियवच्चसमाणो लोओवि जिणिंदधम्मम्मि ॥३१६॥
नय रायधम्मबाहाए होइ एसोवि, तत्थवि पयत्तो[1] । नो मोत्तव्वो रेहइ जेण अवत्थोचियं सव्वं ॥३१७॥
सव्वकलाकुसलस्सवि पत्तट्ठस्सवि जिणिंदधम्मम्मि । जा तुह सिक्खा सच्चं अवच्चनेहस्स तं ललियं ॥
इय तीसे उवएसे पाउं सवणंजलीहिं अमयंव। भुवणाणंदनरिंदो उट्ठेउं पणमइ नरिंदं ॥३१९॥
तह देवीओवि, तत्तो तेणाणुगओऽरिकेसरिनरिंदो । देवीहिं परियणेण य वंदइ गंतु मुणिंदपए ॥३२०॥
तह गिण्हइ अक्खेवेण मोक्खसोक्खाभिकंखिरो दिक्खं। चंपयमालापमुहावरोहरमणीहिं परियरिओ ॥३२१॥
पव्वाइया सुलसावि हु तीए गुरू संकरोवि सयलेण। सह परियणेण गिण्हइ दिक्खं गुरुपायमूलम्मि ॥३२२॥
चंपयमालापभिई अज्जाउ समप्पियाउ मयहरीए। सिरिआणंदसिरीए संजयसिरीएव्व पच्चक्खं ॥३२३॥
भुवणाणंदनिवोवि हु वंदेउं जिणवरं मुणिंदे य। संपत्तो नियभवणं हरिसविसायाउलो धणियं ॥३२४॥

दुर्लभदेवीचम्पकमालाप्रमुखाभिः सकलदेवीभिः । आशीर्मुखराभिस्तस्य कृतोऽक्षताक्षेपः ॥३११॥
भणति च चम्पकमाला क्रमागतं जात ! राज्यर्णमेतत् । त्वयि संक्रमितं पित्रा निस्तरीतव्यं प्रयत्नेन ॥३१२॥
पुत्रक ! लोके भण्यन्तेऽर्थशास्त्रेषु त्रयः पुरुषार्थाः । तेष्वप्यर्थकामौ धर्मादेव लभ्येते ॥३१३॥
परमार्थतस्तु स एव मोक्षस्यापि कारणं न पुनरितरौ । यत्तौ निषेवितौ भवदुःखैकहेतू भवतस्ततः ॥३१४॥
पुरुषार्थत्वं किं तयोः, भवति धर्मोऽपि वत्स ! पुरुषार्थः । स एव यः खलु भणितो जिनैर्गतरागद्वेषैः ॥३१५॥
तस्माद् वत्स ! त्वयात्मा प्रवर्तितव्योऽप्रमत्तचित्तेन । तथा निजापत्यसमानो लोकोऽपि जिनेन्द्रधर्मे ॥३१६॥
न च राजधर्मबाधया भवत्येषोऽपि, तत्रापि प्रयत्नः । नो मोक्तव्यो राजते येनावस्थोचितं सर्वम् ॥३१७॥
सर्वकलाकुशलस्यापि बहुशिक्षितस्यापि जिनधर्मे । या तव शिक्षा सत्यमपत्यस्नेहस्य तल्ललितम् ॥३१८॥
इति तस्या उपदेशान् पीत्वा श्रवणाञ्जलिभ्याममृतमिव । भुवनानन्दनरेन्द्र उत्थाय प्रणमति नरेन्द्रम् ॥३१९॥
तथा देवीरपि, ततस्तेनानुगतोऽरिकेसरिनरेन्द्रः । देवीभिः परिजनेन च वन्दते गत्वा मुनीन्द्रपादान् ॥३२०॥
तथा गृह्णात्यक्षेपेण मोक्षसौख्याभिकाङ्क्षनशीलो दीक्षाम् । चम्पकमालाप्रमुखावरोधरमणीभिः परिकरितः ॥३२१॥
प्रव्राजिका सुलसापि हि तस्या गुरुः शङ्करोऽपि सकलेन। सह परिजनेन गृह्णाति दीक्षां गुरुपादमूले ॥३२२॥
चम्पकमालाप्रभृतय आर्याः समर्पिता महत्तरायै । श्रीआनन्दश्रियै संयमश्रिया इव प्रत्यक्षम् ॥३२३॥
भुवनानन्दनृपोऽपि खलु वन्दित्वा जिनवरं मुनीन्द्रांश्च। संप्राप्तो निजभवनं हर्षविषादाकुलो बाढम् ॥३२४॥

---

१ क. य जत्तो ।

चिंतइ तओ किमेसा नयरी अन्ना गिहंपि अन्नयरं । अन्ने य ते पएसा जे पिउणा भूसिया हुंता ॥३२५॥
जह गयणं रयणीए रहियं रयणीयरेण न हु सोहं । धरइ तहा नगरमिणं अहियं ताएण परिचत्तं ॥३२६॥
कालेण गलियसोगो पालइ रज्जं जणाण कयचोज्जं । सिरिभुवणाणंदनिवो अक्कमियासेसरिउचक्को ॥३२७॥
अरिकेसरिमुणिराओ राईदिवसंपि करइ सुत्तत्थं । सुत्तत्थतदुभयविऊ जाओ कालेण गीयत्थो ॥३२८॥
सूरिपयम्मि गुरूहिं ठविओ सह दिक्खिओ य सव्वो सो । मुणिसाहुणीण वग्गो परिवारत्तेणणुन्नाओ ॥
विहरंतस्सवि य तओ खीणघाइकम्मतमनियरे । सज्झाणसेलसिहरे उइओ वरकेवलदिणिंदो ॥३३०॥
पडिबोहिवि भवियजणं सुइरं, आउक्खयम्मि सेलेसिं । आरुहिउं अरिकेसरिसूरी परमप्पयं पत्तो ॥३३१॥
दुल्लहदेवीसुलसापमुहाहिं साहुणीहिं परियरिया । एक्कारस अंगाइं चंपयमालावि परिपढइ ॥३३२॥
ठविया पवित्तिणिपए विहरइ वसुहाए विविहतवनिरया । निरयाइदुहपरंपरमवणिंती भूरिभवियाणं ॥३३३॥

अह सा गुरुसुस्सूसविसोहियकम्ममल, वेयावच्चसमुज्जमरुंभियतमपडल ।
सह अउव्वकरणक्कमि खवगसेढि करवि, मोहमहोयहि लीलह अइदुत्तरु तरवि ॥३३४॥
चरणुवरतअगंजियअंतररिउबलिण, तिहुयणु नियवि समग्गु विनिम्मलकेवलिण ।
तीसदिवसअणसणिण सुसाहुणिपरिगरिय, मोक्खुठाणि अक्खेविण चंपयमाल ठिय ॥३३५॥ ॥

॥ इति सम्यक्त्वप्रशंसायां चम्पकमालाकथानकं समाप्तम् ॥

चिन्तयति ततः किमेषा नगर्यन्या गृहमप्यन्यतरत् । अन्ये च ते प्रदेशा ये पित्रा भूषिता अभवन् ॥३२५॥
यथा गगनं रजन्यां रहितं रजनीकरेण न हि शोभाम् । धराति तथा नगरमिदमधिकं तातेन परित्यक्तम् ॥३२६॥
कालेन गलितशोकः पालयति राज्यं जनानां कृताश्चर्यम् । श्रीभुवनानन्दनृप आक्रान्ताशेषरिपुचक्रः ॥३२७॥
अरिकेसरिमुनिराजो रात्रिंदिवसमपि करोति सूत्रार्थम् । सूत्रार्थतदुभयविज्जातः कालेन गीतार्थः ॥३२८॥
सूरिपदे गुरुभिः स्थापितः सह दीक्षितश्च सर्वः सः । मुनिसाध्वीनां वर्गः परिवारत्वेनानुज्ञातः ॥३२९॥
विहरतोऽपि च ततः क्षीणघातिकर्मतमोनिकरे । सद्ध्यानशैलशिखर उदितो वरकेवलदिनेन्द्रः ॥३३०॥
प्रतिबोध्य भविकजनं सुचिरम्, आयुःक्षये शैलेशीम् । आरुह्यारिकेसरिसूरिः परमपदं प्राप्तः ॥३३१॥
दुर्लभदेवीसुलसाप्रमुखाभिः साध्वीभिः परिकरिता । एकादशाङ्गानि चम्पकमालापि परिपठति ॥३३२॥
स्थापिता प्रवर्त्तिनीपदे विहरति वसुधायां विविधतपोनिरता । निरयादिदुःखपरम्परामपनयन्ती भूरिभविकानाम् ॥

अथ सा गुरुशुश्रूषाविशोधितकर्ममला, वैयावृत्त्यसमुद्यमरुद्धतमःपटला ।
सहापूर्वकरणक्रमेण क्षपकश्रेणिं कृत्वा, मोहमहोदधिं लीलयाऽतिदुस्तरं तीर्त्वा ॥३३४॥
चरणोपरततागञ्जितान्तररिपुबलेन, त्रिभुवनं दृष्ट्वा समग्रं विनिर्मलकेवलेन ।
त्रिंशद्दिवसानशनेन सुसाध्वीपरिकरिता, मोक्षस्थानेऽक्षेपेण चम्पकमाला स्थिता ॥३३५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जह गहगणाण गयणं आहारो रोहणो य रयणाणं। सिंधूणं जह जलही तह सम्मत्तं सिवसुहाणं ॥१॥
जह उवसमो मुणीणं चाओ विहवीण सीलमित्थीण । तह सम्मत्तं गिहिणो जइणो यवि भूसणं परमं ॥२॥
संकाए जिणधम्मे सव्वे देसे य मइलिए तम्मि । जायइ विहलं सयलंणुट्ठाणं मणिरहस्सेव ॥३॥
तथाहि;——

महुरा नामेण पुरी अत्थि पसिद्धा जयम्मि भमरहिया । वित्तसुपवित्तपत्ता लच्छीनिवासा कमलिणिव्व॥४॥
तत्थत्थि अत्थिमणवंछियत्थसंपूरणेक्कवेसमणो । वेसमणो वरसिट्ठी सम्मादिट्ठी पुरगरिट्ठो ॥५॥
रूवेण रूविणी इव रूविणिनामेण गेहिणी तस्स । मिच्छत्तमोहियमई तहावि सा भत्तुणो इट्ठा ॥६॥
ताणं च दुन्नि पुत्ता जाया समयम्मि सुंदरतरंगा। मणिसिंहनामो पढमो बीओ उण मणिरहो नाम ॥७॥
ताणं च परोप्परपीइपगरिसो वड्ढिओ तहा कहवि । जह रामलक्खणाण निसुणिज्जइ समयसत्थेसु ॥८॥
अह अन्नया कयाइ जुगवं जमुणानईए कूलम्मि । कीलंताणं ताणं चारणसमणो तहिं पत्तो ॥९॥
मयणंव मुत्तिमंतं तं दट्ठुं जणियलोयणाणंदा । गुरुभत्तिपगरिसेणं नमंसिउं दोवि उवविट्ठा ॥१०॥
तो धम्मलाभपुव्वं मुणिणा संभासिओ विसेसेण । पारद्धा धम्मकहा तेसिं हियट्ठाए जिणभणिया ॥११॥
इह भो भद्दा ! भवसायरम्मि तुब्भेहिंणोरपारम्मि । जुगसमिलानाएण कहवि भमंतेहिं मणुयत्तं ॥१२॥
पत्तं आरियखित्ते जाइकुलाईहिं संगयं इन्हिं । सवणुग्गहोवि एसो संपत्तो तुम्ह पुन्नेहिं ॥१३॥
अन्नंपि हु कल्लाणं सव्वं संसारवासिजीवाणं । संपाडिज्जइ पुन्नेण चेव केणावि भणियं च ॥१४॥

यथा ग्रहगणानां गगनमाधारो रोहणश्च रत्नानाम् । सिन्धूनां यथा जलधिस्तथा सम्यक्त्वं शिवसुखानाम् ॥
यथोपशमो मुनीनां त्यागो विभविनां शीलं स्त्रीणाम् । तथा सम्यक्त्वं गृहिणो यतिनश्चापि भूषणं परमम् ॥२॥
शङ्कया जिनधर्मे सर्वतो देशतश्च मलिनिते तस्मिन् । जायते विफलं सकलमनुष्ठानं मणिरथस्येव ॥३॥
मथुरा नाम्ना पुर्यस्ति प्रसिद्धा जगति भ्रम-र-हिता । वृत्तसुपवित्रपा(प)त्रा लक्ष्मीनिवासा कमलिनीव ॥४॥
तत्रास्त्यर्थिमनोवाञ्छितार्थसंपूरणैकवैश्रमणः । वैश्रमणो वरश्रेष्ठी सम्यग्दृष्टिः पुरगरिष्ठः ॥५॥
रूपेण रूपिणीव रूपिणीनाम्ना गेहिनी तस्य । मिथ्यात्वमोहितमतिस्तथापि सा भर्तुरिष्टा ॥६॥
तयोश्च द्वौ पुत्रौ जातौ समये सुन्दरतराङ्गौ । मणिसिंहनामा प्रथमो द्वितीयः पुनर्मणिरथो नाम ॥७॥
तयोश्च परस्परप्रीतिप्रकर्षो वर्धितस्तथा कथमपि । यथा रामलक्ष्मणयोः श्रूयते समयशास्त्रेषु ॥८॥
अथान्यदा कदाचिद्युगपद् यमुनानद्याः कूले । क्रीडतोस्तयोश्चारणश्रमणस्तस्मिन् प्राप्तः ॥९॥
मदनमिव मूर्तिमन्तं तं दृष्ट्वा जनितलोचनानन्दौ । गुरुभक्तिप्रकर्षेण नमस्यित्वा द्वावप्युपविष्टौ ॥१०॥
ततो धर्मलाभपूर्वं मुनिना संभाषितो विशेषेण । प्रारब्धा धर्मकथा तयोर्हितार्थं जिनभणिता ॥११॥
इह भो भद्राः ! भवसागरे युष्माभिरनादिपारे । युगसमिञ्ज्ञातेन कथमपि भ्रमद्भिर्मनुजत्वम् ॥१२॥
प्राप्तमार्यक्षेत्रे जातिकुलादिभिः संगतमिदानीम् । श्रवणावग्रहोऽप्येष संप्राप्तो युष्माकं पुण्यैः ॥१३॥
अन्यदपि खलु कल्याणं सर्वं संसारवासिजीवानाम् । संपाद्यते पुण्येनैव, केनापि भणितं च ॥१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

" यद्वपुरतिरमणीयं स्त्रीजनकमनीयमनभिभवनीयम् । यत्साम्राज्यमखण्डं तत्खण्डं धर्मलाभेक्षोः ।"

एयं च किसीए कडंगरंव, परमत्थओ फलं मोक्खो । धम्मस्स सुचिन्नस्सेह अवितहो सो य जिणभणिओ ॥
तत्तो अपत्तपुव्वे जिणधम्मे सम्ममायरं कुणह । जेण दुहलहरिरुद्दं भवसमुद्दं लहुं तरह ॥१६॥
सो दुविगप्पो कहिओ जिणेहिं जियरागदोसमोहेहिं । साहुगिहिभेयभिन्नो पढमो य महव्वयाइओ ॥१७॥
बीओ बारसभेओ मूलं दुण्हंपि तेसिं सम्मत्तं । तं संकाइविमुक्कं जीवाइतत्तसद्दहणं ॥१८॥
सुरनरवरकयसेवो अरिहं देवो सुसाहुणो गुरुणो । इय सम्मत्तं वुत्तं तव्विवरीयं तु मिच्छत्तं ॥१९॥
भालयलमिलियकरकमलसंपुडो विन्नवेइ तं साहुं । मणिसिहनामा नमिउं भयवं ! पढमस्स असमत्था ॥२०॥
बीयस्सवि असमत्था तहावि तुह दंसणं अमोहंति । पसिय सम्मत्तमित्तो दिज्जउ अम्हाण जिणधम्मो ॥
जइ जोग्गया मुणीसर ! अम्हाणं अत्थि, तो मुणी भणइ । रयणाण महग्घाणवि रयणनिहीवि हु न किं ठाणं ? ॥
इय भणिऊणं मुणिणा करुणारसवासियंतकरणेण । आरोवियं विहीए सम्मत्तं ताण दोण्हंपि ॥२३॥
तह कहिया तस्स गुणा सवित्थरं साहिया य दोसावि । तक्कारयाण कहिउं सुरनारयसुक्खदुक्खाइं ॥२४॥
उप्पइओ मुणिवसहो तेवि य पत्ता नियम्मि गेहम्मि । पिउणो कहंति जह अज्ज ताय ! जमुणानईकूले ॥
सम्मत्तमूलपसरियसुद्धमहव्वयविसालखंधालो । सप्पसरसमिइगुत्तीमहल्लसाहो दमपवालो ॥२६॥
सुरनरसुहकुसुमड्ढो गुणगंधड्ढो न रायदवदड्ढो । सउणजणजणियसद्दो मोक्खफलड्ढो खमारूढो ॥२७॥
भवगिम्हतवियजणकयनिव्वुइदेसणसुसीयलच्छाओ । पणयजणकप्पविडवी अम्हेहिं मुणिवरो दिट्ठो॥२८॥

एतच्च कृष्यास्तृणामिव, परमार्थतः फलं मोक्षः । धर्मस्य सुचीर्णस्येहावितथः स च जिनभणितः ॥१५॥
ततोऽप्राप्तपूर्वे जिनधर्मे सम्यगादरं कुरुत । येन दुःखलहरीरुद्रं भवसमुद्रं लघु तरत ॥१६॥
स द्विविकल्पः कथितो जिनैर्जितरागद्वेषमोहैः । साधुगृहिभेदभिन्नः प्रथमश्च महाव्रतादिकः ॥१७॥
द्वितीयो द्वादशभेदो मूलं द्वयोरपि तयोः सम्यक्त्वम् । तच्छङ्कादिविमुक्तं जीवादितत्त्वश्रद्धानम् ॥१८॥
सुरनरवरकृतसेवोऽर्हन् देवः सुसाधवो गुरवः । इति सम्यक्त्वमुक्तं तद्विपरीतं तु मिथ्यात्वम् ॥१९॥
भालतलमिलितकरकमलसंपुटो विज्ञपयति तं साधुम् । मणिसिंहनामा नत्वा भगवन् ! प्रथमायासमर्थौ ॥२०॥
द्वितीयायाप्यसमर्थौ तथापि तव दर्शनममोघमिति । प्रसद्य सम्यक्त्वमात्रो दीयतामावाभ्यां जिनधर्मः ॥२१॥
यदि योग्यता मुनीश्वर ! आवयोरस्ति, ततो मुनिर्भणति । रत्नानां महार्घाणामपि रत्ननिधिरपि हि न किं स्थानम् ? ॥
इति भणित्वा मुनिना करुणारसवासितान्तःकरणेन । आरोपितं विधिना सम्यक्त्वं तयोर्द्वयोरपि ॥२३॥
तथा कथितास्तस्य गुणाः सविस्तरं कथिताश्च दोषा अपि । तत्कारकाणां कथयित्वा सुरनारकसुखदुःखानि ॥
उत्पतितो मुनिवृषभस्तावपि च प्राप्तौ निजे गेहे । पितरं कथयतो यथाऽद्य तात ! यमुनानदीकूले ॥२५॥
सम्यक्त्वमूलप्रसृतशुद्धमहाव्रतविशालस्कन्धः । सप्रसरसमितिगुप्तिमहाशाखो दमप्रवालः ॥२६॥
सुरनरसुखकुसुमाढ्यो गुणगन्धाढ्यो न रागदवदग्धः । शाकुन(रूढ)जनजनितशब्दो मोक्षफलाढ्यो क्षमारूढः ॥२७॥

---

१ ग. पंच ।

मोक्खमहातरुबीयं तेणं अम्हाण हिययखित्तेसु । सम्मत्तं निहिऊणं सित्तं सद्धासुहजलेण ॥२९॥
तो सेट्ठी वेसमणो मणम्मि तुट्ठोवि पभणए एवं । जुत्तं तुम्हेहिं कयं जइ जणणीबहुमयं होही ॥३०॥
तो ताणं जणणीए भणियं भो डिम्भगा ! जहिच्छाए । पुरपउरपरिसराइं सराइं सरियाण पुलिणाइं ॥३१॥
इत्थागया गया इव निरंकुसा भमडिऊण सच्छंदं । निक्खणिया नियहट्टे किं नो चिट्ठेह रे दुट्ठा ! ॥३२॥
कोऽवसरो तुम्हाणं संपइ धम्मस्स सवणगहणेसु ? । मोत्तुं नियवाणिज्जं अन्नं नो किंपि कायव्वं ॥३३॥
तो जेट्ठो जणणीए सुणिउं वयणाणि जंपए एवं । न पुणोवि इमं काहं खमसु महं महपसाएण ॥३४॥
बीओ पुणो विचिंतइ करम्मि चिंतामणिं कहवि पत्तं । किं चयइ कोविओ कोवि कहवि नियजीयविगमेवि ?
केणवि कारुणिएणं अमयरसं पाइओ महारोगी । सो य पइखणमणुहवइ लाघवं तेण रोगस्स ॥३६॥
तो तमणक्खपरायणपियजणवयणेण वमउ किं रोगी ? । तो भणउ किंपि जणणी धम्मं न चएमि जीवंतो ॥
पत्तं अपत्तपुव्वं सम्मत्तं जं मए इमं तस्स । चिट्ठउ जणणी इण्हिं वहबंधणमारणकरावि ॥३८॥
अन्नोवि कोइ सक्कइ जक्खो रक्खो न अहव सहसक्खो । मं चालेउं चलिओवि पलयपवणोव्व सुरसेलं ॥३९॥
इय तीए निब्भओ सो गच्छइ जिणभवणसाहुवसहीसु । पूयइ वंदइ गिहजिणपडिमाउ तिसंझमुवउत्तो ४०
जिट्ठो भणइ जणणीएणिट्ठमेयं करेसु मा वच्छ ! । घरजिणपडिमापूया ताएण कयावि सा न कया ॥४१॥
तं मणिरहो रहम्मी पभणइ एवं कयम्मि किर जणणी । अणुयत्तिया भविस्सइ इयं तुह भावो न सो जुत्तो ॥

भवग्रीष्मतप्तजनकृतनिर्वृतिदेशनसुशीतलच्छायः । प्रणतजनकल्पविटपी आवाभ्यां मुनिवरो दृष्टः ॥२८॥
मोक्षमहातरुबीजं तेनावयोर्हृदयक्षेत्रयोः । सम्यक्त्वं निधाय सिक्तं श्रद्धाशुभजलेन ॥२९॥
ततः श्रेष्ठी वैश्रमणो मनसि तुष्टोऽपि प्रभणत्येवम् । युक्तं युवाभ्यां कृतं यदि जननीबहुमतं भवेत् ॥३०॥
ततस्तयोर्जनन्या भणितं भो डिम्भकौ ! यदृच्छया । पुरप्रचुरपरिसरेषु सरस्सु सरितां पुलिनेषु ॥३१॥
अत्रागतौ गजाविव निरंकुशौ भ्रान्त्वा स्वच्छन्दम् । निष्खातौ निजहट्टे किं नो तिष्ठतं रे दुष्टौ ? ॥३२॥
कोऽवसरो युवयोः संप्रति धर्मस्य श्रवणग्रहणयोः ? । मुक्त्वा निजवाणिज्यमभ्यन्नो किमपि कर्तव्यम् ॥३३॥
ततो ज्येष्ठो जनन्याः श्रुत्वा वचनानि जल्पत्येवम् । न पुनरपीदं करिष्ये क्षमस्व मां महाप्रसादेन ॥३४॥
द्वितीयः पुनर्विचिन्तयति करे चिन्तामणिं कथमपि प्राप्तम् । किं त्यजति कोविदः कोऽपि कथमपि निजजीवितविगमेपि
केनापि कारुणिकेनामृतरसं पायितो महारोगी । स च प्रतिक्षणमनुभवति लाघवं तेन रोगस्य ॥३६॥
ततस्तं रोषपरायणप्रियजनवचनेन वमतु किं रोगी ? । ततो भणतु किमपि जननी धर्मं न त्यजामि जीवन् ॥३७॥
प्राप्तमप्राप्तपूर्वं सम्यक्त्वं यन्मयेदं तस्य । तिष्ठतु जननीदानीं वधबन्धनमारणकरापि ॥३८॥
अन्योऽपि कोऽपि शक्नोति यक्षो रक्षो नाथवा सहस्राक्षः । मां चालयितुं चलितोऽपि प्रलयपवन इव सुरशैलम् ।
इति तस्या निर्भयः स गच्छति जिनभवनसाधुवसतिषु । पूजयति वन्दते गृहजिनप्रतिमास्त्रिसंध्यमुपयुक्तः ॥४०॥
ज्येष्ठो भणति जनन्या अनिष्टमेतत् कार्षीर्मा वत्स ! । गृहजिनप्रतिमापूजा तातेन कदापि सा न कृता ॥४१॥

---

१ क. 'णुवत्ति°।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं च करंतेणं एईए दुरासयम्मि बहुमाणो । संजणिओ होज्ज मए निबंधणं दुक्खलक्खाणं ॥४३॥
जंपि तुम्हेहिं चत्ता सुधम्मकिरिया इमीए वयणेणं । तंपि न जुत्तं जम्हा इमीए एसो न उवयारो ॥४४॥
किंतु इमो उवयारो जं जिणधम्मे ठविज्जए एसा । तं तु सयं अचयंताण चेव संगच्छए नूणं ॥४५॥
किञ्च ।
न हु जिणधम्मो लब्भइ पइजम्मं नेय तारिसो सुगुरू । तम्हा निस्संकं चिय कुण धम्मं किं च जणणीए? ॥
किंच जणणी न जणणी पियावि न पिया न बंधवो बंधू । नय तं मित्तं मित्तं जं जिणधम्माउ भंसेइ ॥
धम्मोवि न खलु अन्नो रम्मो परमत्थओ इमं मोत्तुं । जं जीवदयामूलो सा जीवदया य नन्नत्थ ॥४८॥
देवोवि जिणवरोच्चिय जो विब्भमसंभमेहिं परिमुक्को । अन्ने तयागमेसुवि विब्भमसहिया जओ भणिया ॥४९॥
किञ्च ।
जणणी जणओ जाया भायापभिईणि भवपरावत्ते । न हि समगमिति एत्तो अईयभवसंभवाणीव ॥५०॥
धम्माधम्माण फलं जम्मंतरसंचियाण पुण पयडं । रिद्धिसमुद्धुरनिद्धणकुलसंभवओ जहासंखं ॥५१॥
जिट्ठो पभणइ को वच्छ ! पच्चओ, जं जिणेवि संदेहो । चिट्ठउ ता तद्धम्मो न हु कज्जं कारणाभावा ॥
इय संकाघणपंके खुत्तं तं नाउं मणिरहो भणइ । तुह खयरविसेणस्सव बहुदुहसहणं भवे होही ॥५३॥
तथाहि;—
अत्थि सुपसिद्धविज्जा विज्जासाहगसहस्सनयचलणा । मंतसरोरुहसरसी देवी पउमावई नाम ॥५४॥
जिणभवणबहिं बहुरूवरुइरमीसरगिहंव रयणड्ढं । अट्ठावयगिरिसिहरे तब्भवणं अत्थि रमणीयं ॥५५॥

तं मणिरथो रहसि प्रभणत्येवं कृते किल जननी । अनुवृत्ता भविष्यतीति तव भावो न स युक्तः ॥४२॥
एवं च कुर्वतैतस्या दुराशये बहुमानः । संजनितो भवेद् मया निबधनं दुःखलक्षाणाम् ॥४३॥
यदपि युष्माभिस्त्यक्ता सुधर्मक्रियाऽस्या वचनेन । तदपि न युक्तं यस्मादस्या एष नोपचारः ॥४४॥
किन्त्वयमुपचारो यज्जिनधर्मे स्थाप्यत एषा । तत् तु स्वयमत्यजतामेव संगच्छते नूनम् ॥४५॥
न खलु जिनधर्मो लभ्यते प्रतिजन्म नैव तादृशः सुगुरुः । तस्मान्निःशङ्कमेव कुरु धर्मं किं च जनन्या ? ॥४६॥
किञ्च जननी न जननी पितापि न पिता न बान्धवो बन्धुः । नच तन्मित्रं मित्रं यज्जिनधर्माद् भ्रंशयति ॥४७॥
धर्मोऽपि न खल्वन्यो रम्यः परमार्थत इमं मुक्त्वा । यज्जीवदयामूलः सा जीवदया च नान्यत्र ॥४८॥
देवोऽपि जिनवर एव यो विभ्रमसंभ्रमैः परिमुक्तः । अन्ये तदागमेष्वपि विभ्रमसहिता यतो भणिताः ॥४९॥
जननी जनको जाया भ्रातृप्रभृतीनि भवपरावर्ते । नहि समकं यन्तीतोऽतीतभवसंभवानीव ॥५०॥
धर्माधर्मयोः फलं जन्मान्तरसंचितयोः पुनः प्रकटम् । ऋद्धिसमुद्धुरनिर्धनकुलसंभवतो यथासंख्यम् ॥५१॥
ज्येष्ठः प्रभणति को वत्स ! प्रत्ययो, यज्जिनेऽपि संदेहः । तिष्ठतु तावत्तद्धर्मो न हि कार्यं कारणाभावात् ॥५२॥
इति शङ्काघनपङ्के मग्नं तं ज्ञात्वा मणिरथो भणति । तव खचरविषेणस्येव बहुदुःखसहनं भवे भविष्यति ॥५३॥
अस्ति सुप्रसिद्धविद्या विद्यासाधकसहस्रनतचरणा । मन्त्रसरोरुहसरसी देवी पद्मावती नाम ॥५४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह अन्नया कयाई वेयड्ढनगाउ कमलविमलाण। विज्जाहरीण जुयलं संपत्तं तत्थ जिणभवणे॥५६॥
पूइय जिणपडिमाओ भत्तीए वंदिऊण विहिसारं। सारंगीगयगेयज्झुणीए गायंति गीयाइं॥५७॥
जिणनाहगुणपगरिससंबद्धाइं विसुद्धबंधाइं। सव्वत्तो ता सहसा उच्छलिओ बहलहलबोलो॥५८॥
जय जयसद्दुम्मीसो अहमहमिगयाए पविसमाणाणं। विज्जाहराण चेइयहरम्मि जिणबिंबपूयट्ठा॥५९॥
तो तेण कलयलेणं सारंगिरवम्मि अवलविज्जंते। पउमावईय भवणे गंतूणं ताउ गायंति॥६०॥
जह गोयरीए हरिणा आगरिसिज्जंति महुरसद्देण। तह तग्गीयरवेणं सेणविसेणा दुवे खयरा॥६१॥
पच्छन्नठिया निसुणंति ताण गेयज्झुणीओ महुराओ। जाणेरिसा झुणीओ होज्जा नणु ताण रूवंपि॥६२॥
इय बुद्धीए गंतुं पासंता ताण रूवरिद्धीओ। ईसाइव मयणेण समाहया तिक्खबाणेहिं॥६३॥
ताओवि ताण रूवं पिच्छंतीओ तहाहया तेण। सारंगीओ कराओ पडियाउवि जह न चेयंति॥६४॥
अह ते नियजणएणं वाहरिया दोवि जंति सट्ठाणं। नियहिययाणं ताणं हियएहिं विणिमयं काउं॥६५॥
ताओवि तेसु गएसुं सहसा मुच्छानिमीलियच्छीओ। धरणीए निवडियाओ तो अणुकंपाए देवीए॥६६॥
काऊणं पउणाओ भणियाओ जह इमाण तुम्हेक्को। थोवदियएहिं भत्ता होही ता मुंचह विसायं॥६७॥
तो ता महापसाउत्ति जंपिउं हरिसपुलइयसरीरा। पत्ता जणयगिहम्मी मणेसु तेच्चिय वहंतीओ॥६८॥
ते य छउमेण केणवि वलिया जा तत्थ ता अपिच्छंता। गयसव्वस्सा इव ठंति ताव देवी इमं भणइ॥६९॥

जिनभवनाद् बहिर्बहुरूपरुचिरमीश्वरगृहमिव रत्नाढ्यम्। अष्टापदगिरिशिखरे तद्भवनमस्ति रमणीयम्॥५५॥
अथान्यदा कदाचिद् वैताढ्यनगात् कमलाविमलयोः। विद्याधर्योर्युगलं संप्राप्तं तत्र जिनभवने॥५६॥
पूजयित्वा जिनप्रतिमा भक्त्या वन्दित्वा विधिसारम्। सारङ्गीगतगेयध्वनिना गायतो गीतानि॥५७॥
जिननाथगुणप्रकर्षसंबद्धानि विशुद्धबन्धानि। सर्वतस्तावत्सहसोच्छलितो बहलकलकलः॥५८॥
जयजयशब्दोन्मिश्रोऽहमहमिकया प्रविशताम्। विद्याधराणां चैत्यगृहे जिनबिम्बपूजार्थम्॥५९॥
ततस्तेन कलकलेन सारङ्गीरवेऽपलप्यमाने। पद्मावत्या भवने गत्वा ते गायतः॥६०॥
यथा गोचर्यां हरिणा आकृष्यन्ते मधुरशब्देन। तथा तद्गीतरवेण सेनविषेणौ द्वौ खचरौ॥६१॥
प्रच्छन्नस्थितौ शृणुतस्तयोर्गेयध्वनीन् मधुरान्। ययोरीदृशा ध्वनयो, भवेन्ननु तयो रूपमपि॥६२॥
इति बुद्ध्या गत्वा पश्यन्तौ तयो रूपर्द्धीः। ईर्ष्ययेव मदनेन समाहतौ तीक्ष्णबाणैः॥६३॥
ते अपि तयो रूपं पश्यन्त्यौ तथाहते तेन। सारङ्ग्यौ करात् पतिते अपि यथा न चेततः॥६४॥
अथ तौ निजजनकेन व्याहृतौ द्वावपि यातः स्वस्थानम्। निजहृदययोस्तयोर्हृदयाभ्यां विनिमयं कृत्वा॥६५॥
ते अपि तयोर्गतयोः सहसा मूर्च्छानिमीलिताक्ष्यौ। धरण्यां निपतिते ततोऽनुकम्पया देव्या॥६६॥
कृत्वा प्रगुणे भणिते यथानयोर्युवयोरेकः। स्तोकदिवसैर्भर्ता भविष्यति ततो मुञ्चतं विषादम्॥६७॥
ततस्ते महाप्रसाद इति जल्पित्वा हर्षपुलकितशरीरे। प्राप्ते जनकगृहे मनसोस्तावेव वहन्त्यौ॥६८॥
तौ च छद्मना केनापि वलितौ यावत्तत्र ते अपश्यन्तौ। गतसर्वस्वाविव तिष्ठतस्तावद्देवीदं भणति॥६९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहमित्थ वसामिच्चिय न तत्तओ मह मणम्मि जिणधम्मो । ता जइ तदसग्गाहं मुंचह पावेमि तो ताओ ॥
तत्थ विसेणो चिंतिय किं जिणधम्मेण मह परुक्खेण । संदिद्धेणं, जंपइ परिचत्तो सो मए देवि ! ॥७१॥
सेणो पुणो पयंपइ सुसंनिविट्ठम्मि जुत्तिलक्खेहिं । अहरियचिंतामणिकामधेणुकप्पद्दुमसरूवे ॥७२॥
जं जिणधम्मे चत्ते संपज्जइ तेण नत्थि मह कज्जं । तुम्हारिसाण जइ पुण इय चित्तं जयइ ता मोहो ७३
तुट्ठा मणम्मि बाहिं भिउडिं काऊण जंपए देवी । रे मूढ ! ममं मूढं जंपसि ता मरसि रे दुट्ठ ! ॥७४॥
सो भणइ तुमं मरणं एक्कं दाउं खमा व न खमा वा । जिणधम्मे पुण चत्ते भवंति मरणाइंणंताइं ॥७५॥
तो सा किर अइकुद्धा सेणं घित्तूण उप्पयइ गयणे । विजयपुरारामे तं ठविउं सीहासणे भणइ ॥७६॥
भद्दं तुज्झ महायस ! सुपुरिससयवत्तपढमलीहस्स । तं खमसु कवडवयणेहिं दूमिओ जं खणं एक्कं ॥७७॥
जाओ लद्धवयासाओ तुज्झ हिययम्मि ताओ कन्नाओ । इह नयरे विज्जाहररायसुदाढस्स तणयाओ ॥७८॥
ताहिं च तुज्झ संपाडणम्मि पुव्वं मए पवन्नम्मि । भणियं महापसाउत्ति तो अहं जामि इय भणिउं ॥७९॥
ताण गिहे सा वच्चइ पिच्छइ ताओ य मयणविहुराओ । पियरेहिं सदुक्खेहिं धणियं अणुसोयमाणीओ ॥
तप्पिउकयपडिवत्ती देवी जंपेइ कह णु वच्छाओ ! । तं मह वयणं वीसरिय इममवत्थं पवन्नाओ ? ॥८१॥
सो इह आणिओ तुम्ह वल्लहो भणइ खेयरो को सो । दाहिणसेढीरहचक्कवालपहुणो सुसेणस्स ॥८२॥
सुगहीयनामधेओ सेणो नामेण पुत्तवररयणं । एयासु साणुराओ उज्जाणे चिट्ठइ इहेव ॥८३॥
तो नगरूसवमाणविय नरवरो सहरिसं सविच्छड्डो । देवीए सह गंतुं आणइ तं करिवरारूढं ॥८४॥

अहमत्र वसाम्येव न तत्त्वतो मम मनसि जिनधर्मः । तस्माद्यदि तदसद्ग्रहं मुञ्चतं प्रापयामि ततस्ते ॥७०॥
तत्र विषेणश्चिन्तयित्वा किं जिनधर्मेण मम परोक्षेण । संदिग्धेन, जल्पति परित्यक्तः स मया देवि ! ॥७१॥
सेनः पुनः प्रजल्पति सुसंनिविष्टे युक्तिलक्षैः । अधरितचिन्तामणिकामधेनुकल्पद्रुमस्वरूपे ॥७२॥
यज्जिनधर्मे त्यक्ते संपद्यते तेन नास्ति मम कार्यम् । युष्मादृशां यदि पुनरिति चित्तं जयति ततो मोहः ॥७३॥
तुष्टा मनसि बहिर्भृकुटिं कृत्वा जल्पति देवी । रे मूढ ! मां मूढां जल्पसि ततो म्रियसे रे दुष्ट ! ॥७४॥
स भणति त्वं मरणमेकं दातुं क्षमा वा न क्षमा वा । जिनधर्मे पुनस्त्यक्ते भवन्ति मरणान्यनन्तानि ॥७५॥
ततः सा किलातिक्रुद्धा सेनं गृहीत्वोत्पतति गगने । विजयपुरारामे तं स्थापयित्वा सिंहासने भणति ॥७६॥
भद्रं तव महायशः ! सुपुरुषशतपत्रप्रथमरेखस्य । तत् क्षमस्व कपटवचनैर्दावितो (दूनः) यत्क्षणमेकम् ॥७७॥
ये लब्धावकाशे तव हृदये ते कन्ये । इह नगरे विद्याधरराजसुदंष्ट्रस्य तनये ॥७८॥
ताभ्यां च तव संपादने पूर्वं मया प्रपन्ने । भणितं महाप्रसाद इति ततोऽहं यामीति भणित्वा ॥७९॥
तयोर्गृहे सा व्रजति पश्यति ते च मदनविधुरे । पितृभ्यां सदुःखाभ्यां गाढमनुशोचन्त्यौ ॥८०॥
तत्पितृकृतप्रतिपत्तिर्देवी जल्पति कथं नु वत्से ! । तद् मम वचनं विस्मृत्येमामवस्थां प्रपन्ने ? ॥८१॥
स इहानीतो युवयोर्वल्लभः, भणति खेचरः कः सः । दक्षिणश्रेणीरथचक्रवालप्रभोः सुषेणस्य ॥८२॥
सुगृहीतनामधेयः सेनो नाम्ना पुत्रवररत्नम् । एतयोः सानुराग उद्याने तिष्ठतीहैव ॥८३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताओ तयवत्थाओ तं दट्ठुं अमयसिचयाउव्व । उवलद्धचेयणाओ तिरियच्छीओ पलोयंति ॥८५॥
देवी भणइ नरेसर ! इमस्स लहुबंधुणा विसेणेण । गंतूणं नियनयरे सेणस्सइदारुणं वसणं ॥८६॥
कहिउं जणओ जणणी सयणो तह परियणो पुरजणो य । दुहसायरम्मि छूढो नियमइउक्करिसहिट्ठेण ॥
जिणवरमए दढत्तं सेणस्स असग्गहं मइब्भंसं । पयडंतेणं, ता जामि तत्थ तेसिं जणेमि धिइं ॥८८॥
इय भणिऊणं देवी सुसेणखयरस्स सेणतणुकुसलं । कहिउं सवित्थरं तो सहसा अदंसणी जाया ॥८९॥
एत्तो य सुसेणोवि हु पुत्तस्स अमंगलं पडिहणेउं । जिणभवणपूयपुव्वं वद्धावणयं पवट्टेइ ॥९०॥
नयरजणोवि समग्गो अच्चंतविसप्पमाणआणंदो । नच्चइ गायइ हसई य परोप्परं पुन्नपत्ताई ॥९१॥
तं तह दट्ठुं आणंदगुंदलं तो विसेणखयरोवि । भूविब्भमखग्गेहिं खंडिज्जंतो पुरजणेण ॥९२॥
लज्जामइलियवयणो ईसाविनडिज्जमाणचित्तो य । परिचत्तसयणसंगो भमिउं बहुएसु देसेसु ॥९३॥
अट्टवसट्टो संतो कालं कालंतरम्मि काऊण । भमइ चिरं संसारे पाएणं दुक्खिओ दीणो ॥९४॥
सेणोवि सुसेणेणं जणएणं ठाविओ नियपयम्मि । वित्तविवाहो नियनयरमागओ चरिमसमयम्मि ॥९५॥
सेणखयरोवि समगं विमलाकमलाहिं विलसिउं सुचिरं । समए पुन्नं परिपालिऊण तह खयररायत्तं ॥९६॥
ऊसप्पिऊण जिणनाहसासणं नासणं भवदुहाणं । रज्जधुराधरणखमं ठविउं कमलासुयं रज्जे ॥९७॥
विमलाकमलाहिं समं अन्नेणं परियणेण पउरेण । दिक्खं पालिय पत्तो सासयसोक्खम्मि मोक्खम्मि ॥९८॥

ततो नगरोत्सवमाज्ञप्य नरवरः सहर्षं सविस्तारः । देव्या सह गत्वाऽऽनयति तं करिवरारूढम् ॥८४॥
ते तदवस्थे तं दृष्ट्वाऽमृतसिक्ते इव । उपलब्धचेतने तिर्यगक्ष्यौ प्रलोकेते ॥८५॥
देवी भणति नरेश्वर ! अस्य लघुबन्धुना विषेणेन । गत्वा निजनगरे सेनस्यातिदारुणं व्यसनम् ॥८६॥
कथयित्वा जनको जननी स्वजनस्तथा परिजनः पुरजनश्च । दुःखसागरे क्षिप्तो निजमत्युत्कर्षहृष्टेन ॥८७॥
जिनवरमते दृढत्वं सेनस्यासद्ग्रहं मतिभ्रंशम् । प्रकटयता, तस्माद्यामि तत्र तेषां जनयामि धृतिम् ॥८८॥
इति भणित्वा देवी सुषेणखचरस्य सेनतनुकुशलम् । कथयित्वा सविस्तरं ततः सहसाऽदर्शना जाता ॥८९॥
इतश्च सुषेणोऽपि खलु पुत्रस्यामङ्गलं प्रतिहन्तुम् । जिनभवनपूजापूर्वं वर्धापनकं प्रवर्तयति ॥९०॥
नगरजनोऽपि समग्रोऽत्यन्तविसर्पदानन्दः । नृत्यति गायति हसति च परस्परं पूर्णपात्रादिः ॥९१॥
तं तथा दृष्ट्वाऽऽनन्दगुन्दलं ततो विषेणखचरोऽपि । भ्रूविभ्रमखड्गैः खण्ड्यमानः पुरजनेन ॥९२॥
लज्जामलिनितवदन ईर्ष्याविनट्यमानचित्तश्च । परित्यक्तस्वजनसङ्गो भ्रान्त्वा बहुकेषु देशेषु ॥९३॥
आर्तवशार्तः सन् कालं कालान्तरे कृत्वा । भ्रमति चिरं संसारे प्रायेण दुःखितो दीनः ॥९४॥
सेनोऽपि सुषेणेन जनकेन स्थापितो निजपदे । वृत्तविवाहो निजनगरमागतश्चरमसमये ॥९५॥
सेनखचरोऽपि समं विमलाकमलाभ्यां विलस्य सुचिरम् । समये पूर्णं परिपाल्य तथा खचरराजत्वम् ॥९६॥
उत्सर्प्य जिननाथशासनं नाशनं भवदुःखानाम् । राज्यधुरधरणक्षमं स्थापयित्वा कमलासुतं राज्ये ॥९७॥
विमलाकमलाभ्यां सममन्येन परिजनेन पौरेण । दीक्षां पालयित्वा प्राप्तः शाश्वतसौख्ये मोक्षे ॥९८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता जिणधम्मे पत्ते संकाविसवासिणा विसेणेण । जं अणुभूयं दुक्खं तं तुह एवं कए होही ॥९९॥
उवएसामयमेयं हिययम्मि न संकमेइ जा तस्स । तो मणिरहेणं बंधू उवेहिओ निग्गुणत्ताओ ॥१००॥
भमिही संसारवणे दुहदवदड्ढो चिराउ पावेही । जिणधम्मबोहिलाभं, इयरो चइऊण गिहवासं ॥१०१॥
पालियचरित्तधम्मो तेणेव भवेण सिवसुहं पत्तो । तम्हा निस्संकमणा सम्मत्ते आयरं कुणह ॥१०२॥

तस्माज्जिनधर्मे प्राप्ते शङ्काविषवासिना विषेणेन । यदनुभूतं दुःखं तत्तवैवं कृते भविष्यति ॥९९॥
उपदेशामृतमेतद् हृदये न संक्रामति यावत्तस्य । ततो मणिरथेन बन्धुरुपेक्षितो निर्गुणत्वात् ॥१००॥
भ्रमिष्यति संसारवने दुःखदवदग्धश्चिरात् प्राप्स्यति । जिनधर्मबोधिलाभं, इतरस्त्यक्त्वा गृहवासम् ॥१०१॥
पालितचारित्रधर्मस्तेनैव भवेन शिवसुखं प्राप्तः । तस्मान्निःशङ्कमनसः सम्यक्त्व आदरं कुरुत ॥१०२॥

॥ इति सम्यक्त्वद्वारे शङ्कोदाहरणे मणिसिंहमणिरथकथानकं समाप्तम् ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्नन्नदंसणाकंखनडियहियियस्स सुंदरस्सेव । जायइ धम्मब्भंसो तप्पच्चइओ य संसारो ॥१॥
तथाहि;—
कमलसरंव विरायइ रायगिहं रायहंसकयसोहं । सच्छपयं सुविसालं लच्छिनिवासं सलक्खणियं ॥२॥
तत्थत्थि दरियरिउकरडिकरडतडपाडणिक्कखरनहरो । नरकेसरिनरनाहो अरिवहुवेहव्वदिक्खगुरू ॥३॥
तत्थ निवसंति वणिणो धणिणो करिणोव्व दाणदुल्ललिया । उन्नयवंसप्पभवा भद्दमहाभद्दनामाणो ॥४॥
जयविजयाओ भज्जा ताणं पढमस्स सुंदरो पुत्तो । बीयस्स खेमचंदो विस्सस्सवि विस्सुओ जाओ ॥५॥
विणएण नएण पोरिसेणं, सो अन्नया सपरिवारो । सुंदरसहिओ पत्तो उज्जाणे जणमणाणंदो ॥६॥
आणंदगुंदलेणं ललइ लीलावईहिं परिकलिओ । नंदणवणम्मि इंदोव्व अच्छराविंदपरियरिओ ॥७॥
अह तस्स बालमित्तो सुंदरनामा अदूरदेसम्मि । अभिरममाणो अहिणा दट्ठो चरणंगुलीदेसे ॥८॥
तो तक्खणेण खलिया तस्स गई निवडिओ महीवट्ठे । मउलियलोयणजुयलो झडत्ति नीलच्छवी जाओ ॥
हाहारवे पयट्टे पत्तो तस्संतियं सपरिवारो । सो खेमचंदमित्तो किंकिंति पयंपिरो सहसा ॥१०॥
तो तं तह दट्ठूणं केऊरमणिं जलेण ओहलिही । जा तस्स छंटणत्थं ता केऊरो अही जाओ ॥११॥
तो दब्भं गहिऊणं जा उंजिस्सइ सयं सरेऊण । गारुडमंतं ताव य तणसंखा विंछिया जाया ॥१२॥
ता खुहियमणो चिंतइ जाव उवायं तओ य केणावि । कहियं जहा पसिद्धो गारुडिओ एस मह मित्तं ॥
दो भायरो य एए पुव्विं देसंतरम्मि पढिऊण । गारुडमंताईयं वलिया नियदेसगमणत्थं ॥१४॥

अन्यान्यदर्शनाकाङ्क्षानटितहृदयस्य सुन्दरस्येव । जायते धर्मभ्रंशस्तत्प्रत्ययितश्च संसारः ॥१॥
कमलसर इव विराजति राजगृहं राजहंसकृतशोभम् । स्वच्छप्रजं(पयः) सुविशालं लक्ष्मीनिवासं सलाक्षणिकम् ॥
तत्रास्ति दृप्तरिपुकरटिकरटतटपाटनैकखरनखरः । नरकेसरिनरनाथोऽरिवधूवैधव्यदीक्षागुरुः ॥३॥
तत्र निवसतो वणिजौ धनिनौ करिणाविव दानदुर्ललितौ । उन्नतवंशप्रभवौ भद्रमहाभद्रनामानौ ॥४॥
जयाविजये भार्ये तयोः प्रथमस्य सुन्दरः पुत्रः । द्वितीयस्य क्षेमचन्द्रो विश्वस्यापि विश्रुतो जातः ॥५॥
विनयेन नयेन पौरुषेण, सोऽन्यदा सपरिवारः । सुन्दरसहितः प्राप्त उद्याने जनमनआनन्दः ॥६॥
आनन्दगुन्दलेन ललति लीलावतीभिः परिकलितः । नन्दनवन इन्द्र इवाप्सरोवृन्दपरिकरितः ॥७॥
अथ तस्य बालमित्रं सुन्दरनामाऽदूरदेशे । अभिरममाणमहिना दष्टं चरणाङ्गुलीदेशे ॥८॥
ततस्तत्क्षणेन स्खलिता तस्य गतिर्निपतितो महीपृष्ठे । मुकुलितलोचनयुगलो झटिति नीलच्छविर्जातः ॥९॥
हाहारवे प्रवृत्ते प्राप्तं तस्यान्तिकं सपरिवारम् । तत्क्षेमचन्द्रमित्रं किं किमिति प्रजल्पितृ सहसा ॥१०॥
ततस्तत् तथा दृष्ट्वा केयूरमणिं जलेनावघर्षिष्यते । यावत्तस्य सेचनार्थं तावत्केयूरोऽहिर्जातः ॥११॥
ततो दर्भं गृहीत्वा यावद् योक्ष्यति स्वयं स्मृत्वा । गारुडमन्त्रं तावच्च तृणसंख्या वृश्चिका जाताः ॥१२॥
तदा क्षुब्धमनाश्चिन्तयति यावदुपायं ततश्च केनापि । कथितं यथा प्रसिद्धो गारुडिक एष मम मित्रम् ॥१३॥
द्वौ भ्रातरौ चैतौ पूर्वं देशान्तरे पठित्वा । गारुडमन्त्रादिकं वलितौ निजदेशगमनार्थम् ॥१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पत्ता महाअरन्ने जलपाणट्ठा नईदहं चलिया। दिट्ठो तम्मज्झाओ बाह वयंतो महासप्पो ॥१५॥
तस्स य उवरि दिट्ठो कसिणतणू मणिमऊहपिंजरिओ। गुरुदप्पो लहुसप्पो तो तं पिच्छेवि लहुभाया ॥
भणइ इमाणं बंधव! गमणं खिल्लेमि कड्ढिउं रेहं। तो भणिओ जिट्ठेणं न एस तुह मन्नए आणं ॥१७॥
लहुओ अइप्पयंडो तालउडस्सावि गरुयविसवेओ। खत्तियजाई एसो न कमइ एयस्स ता मंतो ॥१८॥
इय तन्निवारिएणावि आणं दाऊण कड्ढिया रेहा। तो जो गरुओ सप्पो सो न चलइ तप्पएसाओ ॥१९॥
तो तप्पट्ठीओ लहुओ उत्तरिउं पम्हुसेइ तं रेहं। नियदेहं लोलेउं पुणोवि तप्पट्ठिमारुहिओ ॥२०॥
चलिओ य तप्पभावा वाहणसप्पो, इओ य हत्थीणं। गलगज्जिगरुयसद्दो उच्छलिओ भरियनहविवरो ॥
तो भणिओ जिट्ठेणं वच्छ! समागच्छ रुक्खमारुहिउं। रक्खामो अप्पाणं एयाओ हत्थिजूहाओ ॥२२॥
अन्नं च विसेण इमस्स भावियं सलिलमिममहं मन्ने। जं जलवन्नविरुद्धा इमम्मि अइनीलिमा भाइ ॥२३॥
ता पिच्छामो एयं करिजूहं किं इमं जलं पियइ। तह पीयम्मिवि किं होइ, ते तओ रुक्खमारूढा ॥२४॥
तत्तो सिंहुत्तट्ठं करिजूहं पिट्ठओ करेऊण। कलहाइमुक्कलद्दिं ठावंतो निययकुंभम्मि ॥२५॥
सिंहाभिमुहं धावइ जूहवई जाव ताव उच्छलिउं। सज्जियकमो स सीहो चडिओ कुंभत्थले तस्स ॥२६॥
धूणिओ य तेण तत्तो पडिओ धरणीए चंपिओ करिणा। पाएण गयप्पाणो तत्तो हरिसेण गुलगुलियं ॥२७॥
करिणीहिं कलहेहिं य खणमेक्कं हरिसगुंदलं काउं। तत्तो अइतिसिएहिं सरिओ सरियादहो जाव ॥२८॥

प्राप्तौ महारण्ये जलपानार्थं नदीद्रहं चलितौ। दृष्टस्तन्मध्याद् बहिर्व्रजन् महासर्पः ॥१५॥
तस्य चोपरि दृष्टः कृष्णतनुर्मणिमयूखपिञ्जरितः। गुरुदर्पो लघुसर्पस्ततस्तं दृष्ट्वा लघुभ्राता ॥१६॥
भणत्यनयोर्बान्धव! गमनं स्खलयामि कृष्ट्वा रेखाम्। ततो भणितो ज्येष्ठेन नैष तव मन्यत आज्ञाम् ॥१७॥
लघुकोऽतिप्रचण्डस्तालपुटादपि गुरुविषवेगः। क्षत्रियजातिरेष न क्रामत्येतस्य तस्मान्मन्त्रः ॥१८॥
इति तन्निवारितेनाप्याज्ञां दत्त्वा कृष्टा रेखा। ततो यो गुरुः सर्पः स न चलति तत्प्रदेशात् ॥१९॥
ततस्तत्पृष्ठतो लघुरुत्तीर्य प्रमुष्णाति तां रेखाम्। निजदेहं लोठयित्वा पुनरपि तत्पृष्ठमारूढः ॥२०॥
चलितश्च तत्प्रभावाद् वाहनसर्पः, इतश्च हस्तिनाम्। गलगर्जिगुरुशब्द उच्छलितो भृतनभोविवरः ॥२१॥
ततो भणितो ज्येष्ठेन वत्स! समागच्छ वृक्षमारुह्य। रक्षाव आत्मानमेतस्माद् हस्तियूथात् ॥२२॥
अन्यच्च विषेणास्य भावितं सलिलमिदमहं मन्ये। यज्जलवर्णविरुद्धोऽस्मिन्नतिनीलिमा भाति ॥२३॥
तस्मात्पश्याव एतत्करियूथं किमिदं जलं पिबति। तथा पीतेऽपि किं भवति, तौ ततो वृक्षमारूढौ ॥२४॥
ततः सिंहोत्त्रस्तं करियूथं पृष्ठतः कृत्वा। कलभादिमुक्तपुरीषं स्थापयन्निजकुम्भे ॥२५॥
सिंहाभिमुखं धावति यूथपतिर्यावत् तावदुच्छल्य। सज्जितक्रमः स सिंहश्चटितः कुम्भस्थले तस्य ॥२६॥
धूनितश्च तेन ततः पतितो धरण्यां चम्पितः करिणा। पादेन गतप्राणस्ततो हर्षेण गुलगुलितम् ॥२७॥
करिणीभिः कलभैश्च क्षणमेकं हर्षगुन्दलं कृत्वा। ततोऽतितृषितैः सृतः सरिद्द्रहो यावत् ॥२८॥

---

१ ग. ताउ ठाणाओ।

तो जूहवई अग्गे होऊणं पाणियं परिक्खेइ । तो तिणयणगलनीलं तं दट्ठूणं निवारेइ ॥२९॥
सव्वंपि तओ जूहं, सयं तु गच्छेइ वणनिगुंजम्मि । तद्दहपच्चासन्ने मोडेउं विडविणो डालं ॥३०॥
कस्सवि, विसघायत्थं खिवेइ नीरम्मि तक्खणादेव । हरहासहारधवलं जायं तो निव्विसं नीरं ॥३१॥
तो तं नियसन्नाए आहूयं हत्थिणा नियं जूहं । सिच्छाए पियइ जलं तक्कीलाए पकीलेउं ॥३२॥
नीहरिउं नीराओ गयं गइंदाणं जूहमन्नत्थ । उत्तरिय तरुवराओ तीरे नीरस्स संपत्ता ॥३३॥
सज्जणहिययसरिच्छं सच्छमउच्छं जलं पिएऊण । तं ओसहीए वलयं घित्तूणं पत्थिया एत्थ ॥३४॥
आगच्छंतेहिं पहे गारुडिया णिज्जिया तहाणेगे । विसधारियावि बहवे उट्ठविया ओसहिवसेण ॥३५॥
तम्मज्झाओ जिट्ठो एस इह आगओ मह सगासे । कालडसियंपि मन्ने जीवावेउं समत्थोत्ति ॥३६॥
तो सेट्ठिसुओ पभणइ नरिंद ! सज्जीकरेसु मह मित्तं । काऊण मह पसायं, लक्खं कणयस्स दाविस्सं ॥३७॥
तो तेणोसहिवलयं ओहलिउं सीयलेण सलिलेण । सो सुंदरो सुहत्थं झडत्ति जा छंटिओ ताव ॥३८॥
लोहमयतवयतावियतिल्लछडाहिंव नीरबिंदूहिं । सव्वसरीरे जाया फुडियाओ बिंदुसंखाओ ॥३९॥
नय कोवि से विसेसो जाओ जाया य नवरि गुरुपीडा । तो सोवि असज्झो मज्झ एस इय भणिय नीहरिओ॥
तो अन्नेणं केणवि कप्पडिओ कोवि आणिओ तत्थ । कहिया य खेमचंदस्स मंतसत्तीवि तस्स इमा ॥४१॥
निययाओ नगराओ गामंतरपत्थियस्स मज्झ सुओ । अवयरिओ तुरयाओ सरीरचिंतानिमित्तेण ॥४२॥
तो चरणचंपिएणं डसिओ सप्पेण गरुयदप्पेण । मह पिच्छंतस्स तओ पडिओ धरणीए अधरो सो ॥४३॥

ततो यूथपतिरग्रे भूत्वा पानीयं परीक्षते । ततस्त्रिनयनगलनीलं तद् दृष्ट्वा निवारयति ॥२९॥
सर्वमपि ततो यूथं, स्वयं तु गच्छति वननिकुञ्जे । तद्ह्रदप्रत्यासन्ने मर्दित्वा विटपिनः शाखाम् ॥३०॥
कस्यापि, विषघातार्थं क्षिपति नीरे तत्क्षणादेव । हरहासहारधवलं जातं ततो निर्विषं नीरम् ॥३१॥
ततस्तद् निजसंज्ञयाऽऽहूतं हस्तिना निजं यूथम् । स्वेच्छया पिबति जलं तत्क्रीडया प्रक्रीड्य ॥३२॥
निःसृत्य नीराद् गतं गजेन्द्राणां यूथमन्यत्र । उत्तीर्य तरुवरात् तीरे नीरस्य संप्राप्तौ ॥३३॥
सज्जनहृदयसदृशं स्वच्छमतुच्छं जलं पीत्वा । तदोषधेर्वलयं गृहीत्वा प्रस्थितावत्र ॥३४॥
आगच्छद्भ्यां पथि गारुडिका निर्जितास्तथाऽनेके । विषधारिता अपि बहव उत्थापिता ओषधिवशेन ॥३५॥
तन्मध्याज्ज्येष्ठ एष इहागतो मम सकाशे । कालदष्टमपि मन्ये जीवयितुं समर्थ इति ॥३६॥
ततः श्रेष्ठिसुतः प्रभणति नरेन्द्र ! सज्जीकुरुष्व मम मित्रम् । कृत्वा मयि प्रसादं, लक्षं कनकस्य दापयिष्ये ॥
ततस्तेनौषधिवलयमवघृष्य शीतलेन सलिलेन । स सुन्दरः सुखार्थं झटिति यावत् सिक्तस्तावत् ॥३८॥
लोहमयकटाहतापिततैलच्छटाभिरिव नीरबिन्दुभिः । सर्वशरीरे जाताः स्फोटिका बिन्दुसंख्याः ॥३९॥
न च कोऽपि तस्य विशेषो जातो जाता च केवलं गुरुपीडा । ततः सोऽप्यसाध्यो ममैष इति भणित्वा निःसृतः॥
ततोऽन्येन केनापि कार्पटिकः कोऽप्यानीतस्तत्र । कथिता च क्षेमचन्द्राय मन्त्रशक्तिरपि तस्येयम् ॥४१॥
निजाद् नगराद् ग्रामान्तरप्रस्थितस्य मम सुतः । अवतीर्णस्तुरगाच्छरीरचिन्तानिमित्तेन ॥४२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वाहरियं च मए तो न कोवि आगच्छई जणाभावा। तो नियगुरुआणाए मएवि सो उंजिओ तहवि ॥४४॥
अइनिचेट्ठो दिट्ठो मउत्ति सो मन्निउं मए नयरा। आहूओ सयलजणो समागओ गरुयसामग्गिं ॥४५॥
काऊणं सिवियाए विहिया निग्गमणपमुहसोहावि। तित्थाभिमुहं नीओ घणतूररवेण तं सोउं ॥४६॥
कप्पडिओ पहियजुओ मुणिउं तूरस्स सरविसेसेण। पभणइ अहो! अणाहो जीवंतो डज्झिही वरओ ॥
तो तं वयणं सोउं पहिएणं पेसिओ निओ पुरिसो। अम्ह सयासे अज्जवि पज्जालेमो न जाव चियं ॥४८॥
तो तेणं गंतूणं तव्वयणं विम्हयावहं अम्ह। कहियं, भणिया य तहा एमेव पडिक्खह मुहुत्तं ॥४९॥
एवं ठियाण तुम्हं किर पडियारं करिस्सए कोवि। एत्तो कप्पडिएणं भणिओ पहिओ जहा तुम्ह ॥५०॥
संवलयमत्थि, सो भणइ अत्थि दहिसालिओयणकरंबो। भुत्तो सो तेण तओ सुत्तविउट्ठुव्व उट्ठेइ॥५१॥
मज्झ सुओ कट्ठेहिं उट्ठविओवि हु तओ य अम्हेहिं। तस्स सयासं नीओ वज्जंतणवज्जतूरेहिं ॥५२॥
पाएसु पाडिओ तस्स तह य सयलेण सयणवग्गेण। जं जस्स आसि पासे आभरणं तेण तं दिन्नं ॥५३॥
पहिएण तओ भणिओ कप्पडिओ पसिय कहसु मह एयं। भुत्तो तए करंबो एयस्स विसं कहं नट्ठं ? ॥
सव्वोवि विम्हयाउलहियओ पासट्ठिओ जणो भणइ। जुत्तमिमेणं पुट्ठं ता तेणुव्वक्किउं वमिओ ॥५५॥
हालाहलपुंजो इव करंबओ नीलवन्नदुप्पिच्छो। तो जंपइ सव्वजणो अचिंतमाहप्प! तुज्झ नमो ॥५६॥
परमुवयारी एसो पहिओवि य इय ठविवि नियचित्ते। अइगउरवेण नीया दोवि मए नियगेहम्मि ॥५७॥

ततश्चरणचम्पितेन दष्टो सर्पेण गुरुदर्पेण। मयि पश्यति ततः पतितो धरण्यामधरः सः ॥४३॥
व्याहृतं च मया ततो न कोऽप्यागच्छति जनाभावात्। ततो निजगुर्वाज्ञया मयापि स योजितस्तथापि ॥४४॥
अतिनिश्चेष्टो दृष्टो मृत इति स मत्वा मया नगरात्। आहूतः सकलजनः समागतो गुरुसामग्रीम् ॥४५॥
कृत्वा शिबिकायां विहिता निर्गमनप्रमुखशोभापि। तीर्थाभिमुखं नीतो घनतूररवेण तं श्रुत्वा ॥४६॥
कार्पटिकः पथिकयुतो ज्ञात्वा तूरस्य स्वरविशेषेण। प्रभणत्यहो! अनाथो जीवन् धक्ष्यते वराकः ॥४७॥
ततस्तद्वचनं श्रुत्वा पथिकेन प्रेषितो निजः पुरुषः। अस्माकं सकाशेऽद्यापि प्रज्वालयामो न यावच्चिताम्॥४८॥
ततस्तेन गत्वा तद्वचनं विस्मयावहमस्माकम्। कथितं, भणिताश्च तथैवमेव प्रतीक्षध्वं मुहूर्तम् ॥४९॥
एवं स्थितेषु युष्मासु किल प्रतिकारं करिष्यति कोऽपि। इतः कार्पटिकेन भणितः पथिको यथा तव ॥५०॥
शम्बलमस्ति, स भणत्यस्ति दधिशाल्योदनकरम्बः। मुक्तः स तेन ततः सुप्तव्युत्थ इवोत्तिष्ठति ॥५१॥
मम सुतः कष्टैरुत्थापितोऽपि खलु ततश्चास्माभिः। तस्य सकाशं नीतो वाद्यमानानवद्यतूरैः ॥५२॥
पादयोः पातितस्तस्य तथा च सकलेन स्वजनवर्गेण। यद् यस्यासीत् पार्श्वे आभरणं तेन तद् दत्तम् ॥५३॥
पथिकेन ततो भणितः कार्पटिकः प्रसद्य कथय ममैतत्। भुक्तस्त्वया करम्ब एतस्य विषं कथं नष्टम्?॥५४॥
सर्वोऽपि विस्मयाकुलहृदयः पार्श्वस्थितो जनो भणति। युक्तमनेन पृष्टं ततस्तेनोद्गीर्य वमितः ॥५५॥
हालाहलपुञ्ज इव करम्बको नीलवर्णदुर्दर्शः। ततो जल्पति सर्वजनोऽचिन्त्यमाहात्म्य! तुभ्यं नमः ॥५६॥
परमोपकार्येष पथिकोऽपि चेति स्थापयित्वा निजचित्ते। अतिगौरवेण नीतौ द्वावपि मया निजगेहे ॥५७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संमाणिऊण बहुयं सुवन्नवत्थाइएहिं वत्थूहिं। मोकलिओ सो पहिओ कप्पडिओ पुण नियम्मि गिहे॥५८॥
धरिओ कइवि दिणाइं संपइ पुण पट्ठिओ सदेसम्मि। वोलाविउं य एएण सह अहं एत्थ संपत्तो॥५९॥
एत्थवि निसुया वत्ता जह दट्ठो सुंदरो विसहरेण। तो एस इहाणीओ मएत्ति सो भणइ सुट्ठु कयं॥६०॥
कप्पडिएण तहेव य पउंजिओ पुव्ववन्नियपओगो। नहु थेवोवि विसेसो संजाओ तस्स विसविसए॥
इय जं विससमणट्ठा किज्जइ अन्नंपि तस्स तं सव्वं। होइ अणत्थफलं चिय अफलं वा जायए किंपि॥
ता आदिन्नोप्फुन्नो जा चिट्ठइ खेमचंदवणिप्पवरो। ता केणवि आगंतु निवेइयं एरिसं तस्स॥६३॥
जह चूयरुक्खहिट्ठा दिट्ठो मुणिपुंगवो मए एक्को। नासग्गनिसियदिट्ठी अइधम्मिट्ठो परमजोगी॥६४॥
तो तस्स पायमूले खिप्पउ एसो भणिज्जउ एवं। जह सप्पदट्ठमेयं जीवावसु परमकारुणिय!॥६५॥
तो तव्वयणाणंतरमारोवेऊण पवरसिवियाए। नीओ साहुसयासं तयभिमुहं भणियमेयं च॥६६॥
पन्नवसि दयाधम्मं जइ सम्मं मुणसि जिणमयरहस्सं। ता सामि! मज्झ मित्तं जीवावसु इय निसामेउं॥
नय किंपि मुणी जंपइ जा ता जक्खेण अवयरिय पत्ते। भणियं इमेण महवासठाणकंकेल्लिणो डालं॥
भग्गं, तो रुट्ठेणं इमस्स एयं कयं मए सव्वं। मुणिचरणरेणुतिलयं ता भाले कुणह एयस्स॥६९॥
जेणेसुज्झत्ति मुच्चइ विसवियणाए विणावि जत्तेण। जम्हा महाणुभावाण दंसणं सव्वदुहहरणं॥७०॥
एसो महाणुभावो निस्संगो निम्ममो निरारंभो। मंततंताइविरओ निरओ निरयप्पहविभंगे॥७१॥
तो तेणं हिट्ठेणं कयं तहच्चेव सोवि विसमुक्को। उट्ठेउं तक्खणं चिय सुत्तविउद्ठुव्व विम्हइओ॥७२॥

संमान्य बहु सुवर्णवस्त्रादिकैर्वस्तुभिः। विसृष्टः स पथिकः कार्पटिकः पुनर्निजे गृहे॥५८॥
धृतः कत्यपि दिनानि संप्रति पुनः प्रस्थितः स्वदेशे। गमयितुं चैतेन सहाहमत्र संप्राप्तः॥५९॥
अत्रापि श्रुता वार्ता यथा दष्टः सुन्दरो विषधरेण। तत एष इहानीतो मयेति स भणति सुष्ठु कृतम्॥६०॥
कार्पटिकेन तथैव च प्रयुक्तः पूर्ववर्णितप्रयोगः। नच स्तोकोऽपि विशेषः संजातस्तस्य विषविषये॥६१॥
इति यद् विषशमनार्थं क्रियतेऽन्यदपि तस्य तत् सर्वम्। भवत्यनर्थफलमेवाफलं वा जायते किमपि॥६२॥
तस्मादादीर्णापूर्णो यावत्तिष्ठति क्षेमचन्द्रवणिक्प्रवरः। तावत्केनाप्यागत्य निवेदितमीदृशं तस्मै॥६३॥
यथा चूतवृक्षस्याधो दृष्टो मुनिपुङ्गवो मयैकः। नासाग्रन्यस्तदृष्टिरतिधर्मिष्ठः परमयोगी॥६४॥
ततस्तस्य पादमूले क्षिप्यतामेष भण्यतामेवम्। यथा सर्पदष्टमेतं जीवय परमकारुणिक!॥६५॥
ततस्तद्वचनानन्तरमारोप्य प्रवरशिविकायाम्। नीतः साधुसकाशं तदभिमुखं भणितमेतच्च॥६६॥
प्रज्ञापयसि दयाधर्मं यदि सम्यग्जानासि जिनमतरहस्यम्। तदा स्वामिन्! मम मित्रं जीवयेति निशम्य॥६७॥
नच किमपि मुनिर्जल्पति यावत्तावद् यक्षेणावतीर्य पत्रे। भणितमनेन मद्वासस्थानकङ्केलेः शाखा॥६८॥
भग्ना, ततो रुष्टेनास्यैतत् कृतं मया सर्वम्। मुनिचरणरेणुतिलकं तस्माद् भाले कुरुतैतस्य॥६९॥
येनैष झटिति मुच्यते विषवेदनया विनापि यत्नेन। यस्मान्महानुभावानां दर्शनं सर्वदुःखहरणम्॥७०॥
एष महानुभावो निस्सङ्गो निर्ममो निरारम्भः। मन्त्रतन्त्रादिविरतो निरतो निरयपथविभङ्गे॥७१॥

पुच्छइ किमेस लोओ मिलिओ एगत्थ, किंव कीलाओ। नच्चणगेयप्पमुहाओ ताओ सहसोवसंताओ ? ॥
तो कहिए वुत्तंते वित्थरओ सो मुणि नमंसेइ। मुणिणावि धम्मलाभिय धम्मो कहिउं समाढत्तो ॥७४॥
भो भो भव्वा ! भवसायरम्मि बहुकुमयनीरभरियम्मि। किच्छेण लहइ बुड्डो सुबोहिनिच्छिड्डबोहित्थं॥
लब्भंति सुरसुहाइं लब्भंति नरिंदविंदरिद्धीओ। नय भो सुबोहिरयणं लब्भइ मिच्छत्ततमहरणं॥७६॥
बहुपुन्नपावणिज्जं रज्जंपि लभिज्ज चक्कवट्टीणं। न उणो सुबोहिबहुलाभसंगयं नरभवं विमलं ॥७७॥
सुच्चिय सुबोहिलाभो जत्थ जिणो देवया विगयराओ। पंचमहव्वयधारी गुरूवि, जीवाइतत्ताण ॥७८॥
सम्मं च परिन्नाणं सम्मत्तं तं च बिंति जिणवसहा। संकाइदोसरहियं तं पालिता सुहीहोह ॥७९॥
संका पुव्वुद्दिट्ठा कहिया तेसिं सवित्थरा मुणिणा। अन्नन्नदंसणाणं अहिलासो होइ पुण कंखा ॥८०॥
सा सम्मत्तधरेहिं दूरं दूरेण होइ चइयव्वा। निरवज्जरयणलाभे को कायमणीउ अहिलसेइ ? ॥८१॥
इच्चाइवित्थरे साहियम्मि सम्मत्तमूलजिणधम्मे। वणिखेमचंदसुंदरपमुहा बहवो जणा तत्थ ॥८२॥
मुणिपायपंकयग्गे सम्मं सम्मत्तमह पवज्जित्ता। वज्जित्ता मिच्छत्तं नियनियगेहेसु संपत्ता ॥८३॥
पालिंति निरइयारं, अह अन्नया कोउगेण चवलत्ता। भिक्खूण मढं गंतुं तद्धम्मं सुंदरो सुणइ ॥८४॥
मित्तेण वारिओवि हु न ठाइ भणइ य कहंति एएवि। झाणं नाणं निव्वाणसाहणं एत्थ किमजुत्तं ?॥८५॥
तो भणइ खेमचंदो इंदियवसयाण झाणनाणाइं। गयमज्जणतुल्लाइं एसो य इमो समुवएसो ॥८६॥

ततस्तेन दृष्टेन कृतं तथैव सोऽपि विषमुक्तः। उत्थाय तत्क्षणमेव सुप्तव्युत्थ इव विस्मितः ॥७२॥
पृच्छति किमेष लोको मिलित एकत्र, किंवा क्रीडाः। नर्तनगेयप्रमुखास्ताः सहसोपशान्ताः ? ॥७३॥
ततः कथिते वृत्तान्ते विस्तरतः स मुनिं नमस्यति। मुनिनापि धर्मलाभमुक्त्वा धर्मः कथयितुं समारब्धः ॥७४॥
भो भो भव्याः ! भवसागरे बहुकुमतनीरभृते। कृच्छ्रेण लभते मग्नः सुबोधिनिश्छिद्रयानपात्रम् ॥७५॥
लभ्यन्ते सुरसुखानि लभ्यन्ते नरेन्द्रवृन्दर्द्धयः। न च भोः सुबोधिरत्नं लभ्यते मिथ्यात्वतमोहरणम् ॥७६॥
बहुपुण्यप्रापणीयं राज्यमपि लभेत चक्रवर्तिनाम्। न पुनः सुबोधिबहुलाभसंगतं नरभवं विमलम् ॥७७॥
स एव सुबोधिलाभो यत्र जिनो देवता विगतरागः। पञ्चमहाव्रतधारी गुरुरपि, जीवादितत्त्वानाम् ॥७८॥
सम्यक् च परिज्ञानं सम्यक्त्वं तच्च ब्रुवन्ति जिनवृषभाः। शङ्कादिदोषरहितं तत्पालयन्तः सुखीभवत ॥७९॥
शङ्का पूर्वोद्दिष्टा कथिता तेषां सविस्तरा मुनिना। अन्यान्यदर्शनानामभिलाषो भवति पुनः काङ्क्षा ॥८०॥
सा सम्यक्त्वधरैर्दूरं दूरेण भवति त्यक्तव्या। निरवद्यरत्नलाभे कः काचमणीनभिलषति ? ॥८१॥
इत्यादिविस्तरे कथिते सम्यक्त्वमूलजिनधर्मे। वणिक्क्षेमचन्द्रसुन्दरप्रमुखा बहवो जनास्तत्र ॥८२॥
मुनिपादपङ्कजस्याग्रे सम्यक् सम्यक्त्वमथ प्रपद्य। वर्जयित्वा मिथ्यात्वं निजनिजगेहेषु संप्राप्ताः ॥८३॥
पालयन्ति निरतिचारम्, अथान्यदा कौतुकेन चपलत्वात्। भिक्षूणां मठं गत्वा तद्धर्मं सुन्दरः शृणोति ॥८४॥
मित्रेण वारितोऽपि खलु न तिष्ठति भणति च कथयन्त्येतेऽपि। ध्यानं ज्ञानं निर्वाणसाधनमत्र किमयुक्तम् ? ८५
ततो भणति क्षेमचन्द्र इन्द्रियवशगानां ध्यानज्ञाने। गजमज्जनतुल्ये एष चायं समुपदेशः ॥८६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथाहि;—

"मणुन्नं भोयणं भुच्चा मणुन्नं सयणासणं । मणुन्नंसि अगारंसि मणुन्नं झायए मुणी ॥

मृद्वी शय्या प्रातरुत्थाय पेया मध्ये भक्तं पानकं चापराह्णे । द्राक्षाखण्डं शर्करा चार्धरात्रे मोक्षश्चान्ते शाक्यपुत्रेण दृष्टः"

अणुसोयप्पट्ठाणं इमं खु संसारकारणं परमं । इंदियजयम्मि तम्हा सहलाइं नाणचरणाइं ॥८७॥

ता मित्त ! तुमं भुल्लो रीरीकणएसु तुल्लकयमुल्लो । वेरुलियकायतुल्लत्तजंपिरो तह हसिज्जिहसि ॥८८॥

एवं निरुत्तरो सो कओवि मित्तेण खेमचंदेणं । अन्नन्नदंसणग्गहअसग्गहं नो परिचयइ ॥८९॥

तो अन्नया कयाई नीओ सूरीण पायमूलम्मि । ताणं च तेण कहियं तस्स सरूवं पुरा आसि ॥९०॥

तो तेहिं कहंतेहिं धम्मं, पत्थावमाणिउं भणिया । कंखाए बहुदोसा कहा य एसा समारद्धा ॥९१॥

तथाहि;—

वित्तसिहंडिपसूयावहासियं विबुहविहियमणतोसं । तिदिवंव गोवइजुयं सिरिकलियं गयपुरं अत्थि ॥९२॥

दरियारिसलहपसरस्स पावगो तत्थ अत्थि अत्थीणं । दालिद्ददारुदहणिक्कपचलो भूवई राया ॥९३॥

तस्स समीवे कोवि हु केयय[1]विसयाओ आगओ सुहडो । भुयमित्तबली मग्गइ सो लक्खं वरिसवित्तीए ॥९४॥

तो भूवइणा भणिओ का सत्ती, सो भणइ मह नत्थि । सत्ती कावि हु, सुकयं तु अत्थि तं जेण दिट्ठो सि ॥

तो तस्स खग्गधारी विन्नवइ नरेसरं पणमिऊण । मह पहुणो गुणगणगुरुणो सत्तिदुगं इयरजणदुलहं ॥९६॥

हारेइ न संगामे तह बुद्धी कावि सा, इमो जीए । सत्तुं उप्पन्नविरोहकारणंपि हु पसाएइ ॥९७॥

तो दाऊण पसायं किंचिम्मत्तं समप्पिउं सिन्नं । विंझायलविसमपएसवासिणो समरवीरस्स ॥९८॥

मनोज्ञं भोजनं भुक्त्वा मनोज्ञं शयनासनम् । मनोज्ञेऽगारे मनोज्ञं ध्यायति मुनिः ॥

अनुश्रोतःप्रस्थानमिदं खलु संसारकारणं परमम् । इन्द्रियजये तस्मात् सफले ज्ञानचरणे ॥८७॥

तस्माद् मित्र ! त्वं स्खलितो रीरीकनकयोः कृततुल्यमूल्यः । वैडूर्यकाचतुल्यत्वजल्पिता तथा हसिष्यसे ॥८८॥

एवं निरुत्तरः स कृतोऽपि मित्रेण क्षेमचन्द्रेण । अन्यान्यदर्शनग्रहासद्ग्रहं न परित्यजति ॥८९॥

ततोऽन्यदा कदाचिद् नीतः सूरीणां पादमूले । तेभ्यश्च तेन कथितं तस्य स्वरूपं पुरासीत् ॥९०॥

ततस्तैः कथयद्भिर्धर्मं, प्रस्तावमानीय भणिताः । काङ्क्षाया बहुदोषाः कथा चैषा समारब्धा ॥९१॥

वृत्तशिखण्डिप्रसूतावभासितं विबुधविहितमनस्तोषम् । त्रिदिवमिव गोपतियुतं श्रीकलितं गजपुरमासीत् ॥९२॥

दृप्तारिशलभप्रसरस्य पावकस्तत्रास्त्यर्थिनाम् । दारिद्र्यदारुदहनैकप्रत्यलो भूपती राजा ॥९३॥

तस्य समीपे कोऽपि खलु केतकविषयागतः सुभटः । भुजमात्रबलो मार्गयति स लक्षं वर्षवृत्त्या ॥९४॥

ततो भूपतिना भणितः का शक्तिः स भणति मम नास्ति । शक्तिः कापि खलु सुकृतं त्वस्ति त्वं येन दृष्टोऽसि ॥

ततस्तस्य खड्गधारी विज्ञपयति नरेश्वरं प्रणम्य । मम प्रभोर्गुणगणगुरोः शक्तिद्विकमितरजनदुर्लभम् ॥९६॥

हारयति न संग्रामे तथा बुद्धिः कापि सा, अयं यया । शत्रुमुत्पन्नविरोधकारणमपि खलु प्रसादयति ॥९७॥

---

[1] क. केयइ, ख. केवय-।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पल्लीवइणो अइपवरसूरनिब्भिच्चभिच्चवग्गस्स । लद्धजयस्स रणेसु उवरिं सो पेसिओ रन्ना ॥९९॥
आएसाणंतरमेव पत्थिओ सो ठिओ ससीमाए । तस्स विसज्जइ दूयं सो तं गंतुं भणइ एवं ॥१००॥
सोहडसुहडो तुह उवरि पेसिओ नरवरेण भूवइणा । तो तस्स कुणसु सेवं जइ इच्छसि अप्पणो कुसलं ॥
सो भणइ तुज्झ जीहाछेयं न हु कारवेमि दुउत्ति । तो गंतुं इय पभणसु सोहडं मज्झ वयणेणं ॥१०२॥
एसो हमागउच्चिय ता पविसेउं कयंतवयणम्मि । जइ महसि ता पडिक्खसु एत्थ ठिओ चेव दिणदसगं ॥
दूएणं पडिवयणे कहिए तो सोहडो तओ चलिओ । पल्लिवईवि ससिन्नो मिलियाइं दोन्निवि बलाइं ॥
तो सोहडेण भणिया नियसुहडा मज्झ पिट्ठभायम्मि । परसिन्नपहारागोयरम्मि भो चिट्ठह नियंता॥१०५॥
सो पल्लिवई चिंतइ उवेहिओ एस निययसिन्नेण । तो भणिओ चय सत्थं अज्जवि रक्खेमि तुह पाणे ॥
सो भणइ तुज्झ पाणा मह रुट्ठे अप्पणो च्चिय दुरक्खा । मज्झ हरिस्स न गन्नं तुम्हेहिं सियाललक्खेहिं ॥
परिहरिय खत्तधम्मं तेण ससिन्नेण तस्स एक्कस्स । पहरिउमारद्धं एक्ककालमइकोहवसगेण ॥१०८॥
मुक्काइं पहरणाइं तेहिं सरीराउ तस्स उप्फिडिउं । जेहिं चिय मुक्काइं हणंति तेसिं सरीराइं ॥१०९॥
इय नियपहरणजज्जरदेहे भग्गम्मि तस्स सेन्नम्मि । उप्पाडिय आणीओ पल्लिवई नियसिन्नम्मि॥११०॥
पडिगाहियं च सव्वं पहरणआहरणवाहणाईयं । गंतूणं तं पल्लिं सव्वस्सं तस्स घित्तूण ॥१११॥
भंजाविऊण घाए पल्लिवई कारिओ पडुसरीरो । सव्वस्सेणं सह पेसिओ य नरनाहपासम्मि ॥११२॥

ततो दत्त्वा प्रसादं किञ्चिन्मात्रं समर्प्य सैन्यम् । विन्ध्याचलविषमप्रदेशवासिनः समरवीरस्य ॥९८॥
पल्लीपतेरतिप्रवरशूरनिर्भृत्यभृत्यवर्गस्य । लब्धजयस्य रणेषूपरि स प्रेषितो राज्ञा ॥९९॥
आदेशानन्तरमेव प्रस्थितः स स्थितः स्वसीम्नि । तस्मै विसृजति दूतं स तं गत्वा भणत्येवम् ॥१००॥
सौभटसुभटस्तवोपरि प्रेषितो नरवरेण भूपतिना । ततस्तस्य कुरुष्व सेवां यदीच्छस्यात्मनः कुशलम् ॥१०१॥
स भणति तव जिह्वाच्छेदं न खलु कारयामि दूत इति । ततो गत्वेति प्रभण सौभटं मम वचनेन ॥१०२॥
एषोऽहमागत एव तावत् प्रवेष्टुं कृतान्तवदने । यदि काङ्क्षसि तदा प्रतीक्षस्वात्र स्थित एव दिनदशकम् १०३
दूतेन प्रतिवचने कथिते ततः सौभटस्ततश्चलितः । पल्लीपतिरपि ससैन्यो मिलिते द्वे अपि बले ॥१०४॥
ततः सौभटेन भणिता निजसुभटा मम पृष्ठभागे । परसैन्यप्रहारागोचरे भोस्तिष्ठत पश्यन्तः ॥१०५॥
स पल्लीपतिश्चिन्तयत्युपेक्षित एष निजसैन्येन । ततो भणितस्त्यज शस्त्रमद्यापि रक्षामि तव प्राणान् ॥१०६॥
स भणति तव प्राणा मयि रुष्टे आत्मन एव दूरक्षाः । मम हरेर्न गणना युष्माकं शृगाललक्षाणाम् ॥१०७॥
परिहृत्य क्षत्त्रधर्मं तेन ससैन्येन तमेकम् । प्रहर्तुमारब्धमेककालमतिक्रोधवशगेन ॥१०८॥
मुक्तानि प्रहरणानि तैः शरीरात् तस्योद्भ्रश्य । यैरेव मुक्तानि घ्नन्ति तेषां शरीराणि ॥१०९॥
इति निजप्रहरणजर्जरदेहे भग्ने तस्य सैन्ये । उत्पाट्यानीतः पल्लीपतिर्निजसैन्ये ॥११०॥
परिग्राहितं च सर्वं प्रहरणाभरणवाहनादिकम् । गत्वा तां पल्लीं सर्वस्वं तस्य गृहीत्वा ॥१११॥
भञ्जयित्वा घातान् पल्लीपतिः कारितः पटुशरीरः । सर्वस्वेन सह प्रेषितश्च नरनाथपार्श्वे ॥११२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विन्नावियं च को मह आएसो संपयंति तो रन्ना । सो चेव गहीयवेलो पल्लिवई पेसिओ ठविओ॥११३॥
हक्कारिऊण सोहडसुहडो संमाणिओ बहुपयारं । उवलद्धसमरवुत्तंतविम्हयाउलियहियएण ॥११४॥
पुट्ठो रन्ना कह तुह जाया अच्चब्भुया इमा सत्ती ? । तो सो साहइ जह पहु ! संगामुड्डामरी विज्जा ॥११५॥
अत्थि मह महाइसया दिन्ना सिरिजोगिणा जयंतेण । सा साहिया विहीए तीए पभावो इमो सव्वो ॥
तं सोऊणं राया चिंतइ समरम्मि ताव निव्वडिओ । बुद्धीएवि माहप्पं निएमि इय चिंतिउं तो सो ॥
मुद्दियसमुग्गमप्पिय अहन्नया पाहुडं नरिंदेण । उज्जेणिरायपासम्मि पेसिओ इय भणेऊण ॥११८॥
अम्हं महिंदराएण राइणा दूरदेसभावाओ । न विरोहकारणं किंपि तारिसं किंतु अप्पाणं ॥११९॥
सो अम्हेवि य बहु मन्निमोत्ति वड्ढेइ मच्छरो गरुओ । ता नहमंसप्पीई जह संपज्जए तह करिज्जा ॥
आएसोत्ति भणेउं चलिओ पत्तो कमेण उज्जेणिं । पडिहारसूइओ सो पविसइ नरनाहअत्थाणे ॥१२१॥
नियनिवअप्पियमुद्दियसमुग्गयं ढोइऊण निवपुरओ । पणमिय तद्दावियआसणम्मि उवविसइ तो रन्ना ॥
उम्मुद्दिओ समुग्गो तम्मज्झे लहुसमुग्गयं नियइ । अह तम्मज्झे दट्ठुं भूइच्चिय चिंतइ नरिंदो ॥१२३॥
भालयलघडियभिउडी आयंबिरलोयणो जहा मज्झ । दप्पंधेणं तेणं मन्ने विहिओ तिरक्कारो ॥१२४॥
ता दंसिस्सामि फलं तस्स इमस्स य तदुत्तकारिस्स । तो दंसेउं भूइं जंपइ किं दूय ! एयंति ? ॥१२५॥
सो भणइ लक्खहोमो कारविओ नरवरेण तुम्हाणं । तप्पुन्नविभागट्ठा भूई संपेसिया एसा ॥१२६॥
तो मन्नंतो सो तं तहत्ति पढमोवयारहयहियओ । हक्कारिय आसन्ने हत्थं पट्ठीए से देइ ॥१२७॥

विज्ञापितं च को ममादेशः सांप्रतमिति ततो राज्ञा । स एव गृहीतवेलः पल्लीपतिः प्रेष्यः स्थापितः ॥११३॥
हक्कारयित्वा सौभटसुभटः संमानितो बहुप्रकारम् । उपलब्धसमरवृत्तान्तविस्मयाकुलितहृदयेन ॥११४॥
पृष्टो राज्ञा कथं तव जाताऽत्यद्भुतेयं शक्तिः ? । ततः स कथयति यथा प्रभो ! संग्रामोड्डामरी विद्या ॥११५॥
अस्ति मम महातिशया दत्ता श्रीयोगिणा जयन्तेन । सा साधिता विधिना तस्याः प्रभावोऽयं सर्वः ॥११६॥
तत् श्रुत्वा राजा चिन्तयति समरे तावन्निर्वर्तितः । बुद्धेरपि माहात्म्यं पश्यामीति चिंतयित्वा ततः सः ॥११७॥
मुद्रितसमुद्गमर्पयित्वाथान्यदा प्राभृतं नरेन्द्रेण । उज्जयिनीराजपार्श्वे प्रेषित इति भणित्वा ॥११८॥
अस्माकं महेन्द्रराजेन राज्ञा दूरदेशभावात् । न विरोधकारणं किमपि तादृशं किन्त्वात्मानम् ॥११९॥
स वयमपि च बहु मन्यामह इति वर्धते मत्सरो गुरुः । तस्मान्नखमांसप्रीतिर्यथा संपद्यते तथा कुर्याः ॥१२०॥
आदेश इति भणित्वा चलितः प्राप्तः क्रमेणोज्जयिनीम् । प्रतिहारसूचितः स प्रविशति नरनाथास्थाने ॥१२१॥
निजनृपार्पितमुद्रितसमुद्गकं ढौकित्वा नृपपुरतः । प्रणम्य तद्दापितासने उपविशति ततो राज्ञा ॥१२२॥
उन्मुद्रितः समुद्गस्तन्मध्ये लघुसमुद्गकं पश्यति । अथ तन्मध्ये दृष्ट्वा भूतिमेव चिन्तयति नरेन्द्रः ॥१२३॥
भालतलघटितभ्रकुटिराताम्रलोचनो यथा मम । दर्पान्धेन तेन मन्ये विहितस्तिरस्कारः ॥१२४॥
ततो दर्शयिष्यामि फलं तस्यास्य च तदुक्तकारिणः । ततो दर्शयित्वा भूतिं जल्पति किं दूत ! एतदिति ॥१२५॥
स भणति लक्षहोमः कारितो नरवरेण युष्माकम् । तत्पुण्यविभागार्थं भूतिः संप्रेषितैषा ॥१२६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भणइ य भद्दं मह बंधवस्स, सो भणइ सव्वकालंपि। इण्हिं पणयपरम्मी विसेसओ तुम्ह चित्तम्मि ॥
तो सो कइवयदिवसे धरिओ तत्थेव निवइणा तत्तो। वत्थाहरणतुरंगमपभिइं दाउं महपसायं ॥१२९॥
निययप्पहाणपुरिसेण संजुयं अप्पिऊण हत्थिदुगं। तह रयणाहरणं पाहुडम्मि एयं च उवइंसिउं ॥१३०॥
जह भणियव्वो राया देसो कोसो य चउव्विहं सिन्नं। नियगमिव मज्झतणयं कज्जे वावारियव्वंति॥१३१॥
रन्ना विसज्जिओ सो पत्तो य कमेण गयपुरे, इत्तो। सह सोहडेण पुव्विं भूवइणा पेसिओ आसि ॥१३२॥
जो विस्संभट्ठाणं पढमं चिय तेण वइयरो सव्वो। परिकहिओ नरवइणो सो पुण तस्सासि पच्चक्खो ॥
अह सो महिंदनरवइपहाणपुरिसोवि सोहडेण समं। पणमइ नरनाहं उचियआसणे निविसिउं तत्तो ॥
तं नियपहुपाहुडमप्पिऊण वयणं महिंदरायस्स। तह साहइ जह भणियं, एत्तो संमाणिउं रन्ना ॥१३५॥
पडिपाहुडं समप्पिय विसज्जिओ नरवरेण इय तेसिं। पइदिणपवड्ढमाणप्पणयाणं जंति दियहाइं॥१३६॥
रण्णावि बुद्धिजुत्तं पोरिसमेयस्स इय कलेऊण। सव्वोवि रज्जभारो निक्खित्तो सोहडे सुहडे ॥१३७॥
सव्वत्थ कयपमाणो अखलियआणो नरिंदलोएण। सो भुंजइ रज्जसिरिं इओ य भूवइनरिंदस्स ॥१३८॥
पुव्वकमागयवेरो अईवखुद्दो नरेसरकुबेरो। अत्थि अरिंजिपुरीए सो तं उवचरइ पच्छन्नं ॥१३९॥
उवयारं तु पडिच्छइ इमाए बुद्धीए सोहडो तस्स। नरवरभूवइकज्जं विणासियव्वं न ताव मए॥१४०॥
किंतु इमोवि हु गरुओ राया अणुयत्तिओ हवइ एवं। गरुयाणंणुवित्ती न निप्फला होइ कइयावि॥१४१॥

ततो मन्यमानः स तत् तथेति प्रथमोपचारहृतहृदयः। आहूयासने हस्तं पृष्ठे तस्य ददाति ॥१२७॥
भणति च भद्रं मम बान्धवस्य, स भणति सर्वकालमपि। इदानीं प्रणयपरे विशेषतस्तव चित्ते ॥१२८॥
ततः स कतिपयदिवसान् धृतस्तत्रैव नृपतिना ततः। वस्त्राभरणतुरङ्गमप्रभृतिं दत्त्वा महाप्रसादम् ॥१२९॥
निजप्रधानपुरुषेण संयुतमर्पयित्वा हस्तिद्विकम्। तथा रत्नाभरणं प्राभृते एतच्चोपदिश्य ॥१३०॥
यथा भणितव्यो राजा देशः कोशश्च चतुर्विधं सैन्यम् निजकमिव मदीयं कार्ये व्यापारयितव्यमिति ॥१३१॥
राज्ञा विसृष्टः स प्राप्तश्च क्रमेण गजपुरे, इतः। सह सौभटेन पूर्वं भूपतिना प्रेषित आसीत् ॥१३२॥
यो विश्रम्भस्थानं प्रथममेव तेन व्यतिकरः सर्वः। परिकथितो नरपतये स पुनस्तस्यासीत्प्रत्यक्षः ॥१३३॥
अथ स महेन्द्रनरपतिप्रधानपुरुषोऽपि सौभटेन समम्। प्रणमति नरनाथमुचितासने निविश्य ततः ॥१३४॥
तन्निजप्रभुप्राभृतमर्पयित्वा वचनं महेन्द्रराजस्य। तथा कथयति यथा भणितम्, इतः संमान्य राज्ञा ॥१३५॥
प्रतिप्राभृतं समर्प्य विसृष्टो नरवरेणेति तयोः। प्रतिदिनप्रवर्धमानप्रणययोर्यान्ति दिवसानि ॥१३६॥
राज्ञापि बुद्धियुक्तं पौरुषमेतस्येति कलयित्वा। सर्वोऽपि राज्यभारो निक्षिप्तः सौभटे सुभटे ॥१३७॥
सर्वत्र कृतप्रमाणोऽस्खलिताज्ञो नरेन्द्रलोकेन। स भुङ्क्ते राज्यश्रियमितश्च भूपतिनरेन्द्रस्य ॥१३८॥
पूर्वक्रमागतवैरोऽतीवक्षुद्रो नरेश्वरकुबेरः। अस्त्यरिञ्जितपुर्यां स तमुपचरति प्रच्छन्नम् ॥१३९॥
उपचारं तु प्रतीच्छत्यनया बुद्ध्या सौभटस्तस्य। नरवरभूपतिकार्यं विनाशयितव्यं न तावन्मया ॥१४०॥
किन्त्वयमपि खलु गुरू राजाऽनुवृत्तो भवत्येवम्। गुरूणामनुवृत्तिर्न निष्फला भवति कदापि ॥१४१॥

तो भूवई कइयावि हु सम्मं नाऊण वइयरं एयं । चिंतइ अइदुद्धरिसो निग्गहजोग्गो यवस्समिमो॥१४२॥
दावइ य विसं उग्गं मओ य सो तेण तस्स आकंखा। एक्कम्मिवि पडिवक्खे एवं अइदारुणा जाया॥१४३॥
तम्हा दढसम्मंत्तो होउं अज्जेसु सिवसुहमणंतं । कंखाए विणडिओ पुण भमिहिसि संसारकंतारे ॥१४४॥
इय मुणिदेसणसवणा पडिबुद्धा पाणिणो बहू तत्थ। चिंतेइ सुंदरो पुण किमेस गलसोसणं कुणइ ?॥१४५॥
सव्वेवि अभिमया मज्झ ताव सव्वे य पूयणिज्जा य। इय कयबुद्धी मरिउं भमिओ संसारवणगहणे॥१४६॥
सम्मं च खेमचंदो सम्मत्तं पालिउं निरइयारं । सोहम्मे उववन्नो कमेण पत्तो य निव्वाणं ॥१४७॥

॥ इत्याकाङ्क्षायां सुन्दरकथानकं समाप्तम् ॥

ततो भूपतिः कदापि खलु सम्यग्ज्ञात्वा व्यतिकरमेतम् । चिन्तयत्यतिदुर्धर्षो निग्रहयोग्यश्चावश्यमयम् ॥१४२॥
दापयति च विषमुग्रं मृतश्च स तेन तस्याकाङ्क्षा । एकस्मिन्नपि प्रतिपक्ष एवमतिदारुणा जाता ॥१४३॥
तस्माद् दृढसम्यक्त्वो भूत्वाऽर्जय शिवसुखमनन्तम् । काङ्क्षया विनटितः पुनर्भ्रमिष्यसि संसारकान्तारे ॥१४४॥
इति मुनिदेशनाश्रवणात् प्रतिबुद्धाः प्राणिनो बहवस्तत्र । चिन्तयति सुन्दरः पुनः किमेष गलशोषणं करोति ? ॥
सर्वेऽप्यभिमता मम तावत् सर्वे च पूजनीयाश्च । इति कृतबुद्धिर्मृत्वा भ्रान्तः संसारवनगहने ॥१४६॥
सम्यक् च क्षेमचन्द्रः सम्यक्त्वं पालयित्वा निरतिचारम् । सौधर्म उपपन्नः क्रमेण प्राप्तश्च निर्वाणम् ॥१४७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साहूण दुगुंछाए जिणधम्मफलम्मि संसइमणस्स । दुहदंदोली जायइ जह जाया भक्खरदियस्स॥१

तथाहि;—

अत्थि इह भरहवासे कामिणिवयणंव रयणरमणीयं । सुहधामदीहरच्छं नगरं नामेण गिरिनगरं ॥२॥
संतिकिरियासु कुसलो दुहापि जन्नप्पिओ दिओ अत्थि । सच्छंदोवि परवसो॰नामेणं विस्सभूइत्ति॥३॥
तस्सत्थि पिया घरिणी सरणी सरणीव नेहसस्सस्स । भत्तावि हु भत्तारे नो अणुयत्तेइ भत्तारं ॥४॥
भक्खरभाणुभिहाणा दुवेवि पाणप्पिया सुया ताण । नवजोव्वणाभिरामा रमंति ते काणणाईसु ॥५॥
अहन्नया वसंते उवसंते गिम्हनिवबलं पत्तं । रवितावलूयवाओलिघम्मेणं जणमभिभवंतं ॥६॥
तो नलिणहारचंदणपंकजलद्दाइसाहणबलेणं । कहकहवि हु गिम्हबलं रुंभेइ जणो वियंभंतं ॥७॥
ता भाणुभक्खरेहिं वणगहणासन्नवत्तिणि सरम्मि । कीलंतेहिं जुवई दिट्ठा निद्दंभरंभव्व ॥८॥
तो तीए रूवसोहाए मोहिया जाव कट्ठनिच्चिट्ठा । ते ठंति ताव तीएवि सदयं संभासिया एवं ॥९॥
के तुब्भे किं जाया निच्चेट्ठा, ते भणंति तुह रूवं । दट्ठुं अदिट्ठपुव्वं एगग्गमणा पलोयंता ॥१०॥
तो सविआरं तेसिं सोच्चा पच्चुत्तरं तरलदिट्ठी । ताण हिययाणि हरिउं चलिया कमलाणि उच्चिणिउं॥
तो कुवियव्व तुरंता लग्गा तप्पिट्ठओ तओ सावि । वंचेउं तद्दिट्ठिं कत्थवि लीणा निगुंजम्मि ॥१२॥
तीए दिसाए तेवि हु गच्छंता एवमेव भुल्लमणा । पासंति मुणिं एगं मयणं संपत्तमुत्तिंव ॥१३॥
तो तम्मि दिट्ठिविसए संपत्ते तम्मणाउ ओसरिओ । मयणो हरिणो हरिणोव्व ते तओ गरुयभत्तीए ॥

साधूनां जुगुप्सया जिनधर्मफले संशयिमनसः । दुःखद्वन्द्वाली जायते यथा जाता भास्कराद्विजस्य ॥१॥
अस्तीह भरतवर्षे कामिनीवदनमिव रचनारमणीयम् । सुखधामदीर्घरथ्यं (र्घाक्षं) नगरं नाम्ना गिरिनगरम्॥२॥
शान्तिक्रियासु कुशलो द्विधाऽपि यज्ञ (जन्य) प्रियो द्विजोऽस्ति । स्वच्छन्दोऽपि परवशो नाम्ना विश्वभूतिरिति॥
तस्यास्ति प्रिया गृहिणी सरणिः सरणिरिव स्नेहसस्यस्य । भक्तापि खलु भर्तरि नो अनुवर्तते भर्तारम् ॥४॥
भास्करभान्वभिधानौ द्वावपि प्राणप्रियौ सुतौ तयोः । नवयौवनाभिरामौ रमाते तौ काननादिषु ॥५॥
अथान्यदा वसन्त उपशान्ते ग्रीष्मनृपबलं प्राप्तम् । रवितापलूतावातालिघर्मेण जनमभिभवत् ॥६॥
ततो नलिनहारचन्दनपङ्कजलार्द्रादिसाधनबलेन । कथंकथमपि खलु ग्रीष्मबलं रुणद्धि जनो विजृम्भमाणम् ॥
तदा भानुभास्कराभ्यां वनगहनासन्नवर्तिनि सरसि । क्रीडद्भ्यां युवतिर्दृष्टा निर्दम्भरम्भेव ॥८॥
ततस्तस्या रूपशोभया मोहितौ यावत्काष्ठनिश्चेष्टौ । तौ तिष्ठतस्तावत्तयापि सदयं संभाषितावेवम् ॥९॥
कौ युवां किं जातौ निश्चेष्टौ, तौ भणतस्तव रूपम् । दृष्ट्वाऽदृष्टपूर्वमेकाग्रमनसौ प्रलोकमानौ ॥१०॥
ततः सविकारं तयोः श्रुत्वा प्रत्युत्तरं तरलदृष्टिः । तयोर्हृदये हर्तुं चलिता कमलान्युच्चेतुम् ॥११॥
ततः कुपिताविव त्वरमाणौ लग्नौ तत्पृष्ठतस्ततः सापि । वञ्चयित्वा तद्दृष्टिं कुत्रापि लीना निकुञ्जे ॥१२॥
तस्यां दिशि तावपि हि गच्छन्तावेवमेव भ्रष्टमनसौ । पश्यतो मुनिमेकं मदनं संप्राप्तमूर्तिमिव ॥१३॥
ततस्तस्मिन् दृष्टिविषये संप्राप्ते तन्मनसोऽपसृतः । मदनो हरेर्हरिण इव तौ ततो गुरुभक्त्या ॥१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वंदेऊणं तप्पायपंकयं महुयरव्व संलीणा । देसणमयरंदरसं रसंति परमप्पमोएणं ॥१५॥
अह देसणावसाणे भाणू भालयलमिलियकरकमलो । पुच्छेइ तयं साहुं जह भयवं ! मज्झ साहेइ ॥१६॥
देहोवि हु तुम्हाणं निवलंछणलंछिओ जहा पवरं । रज्जसिरिमुज्झिऊणं तुमए दिक्खा पवन्नत्ति ॥१७॥
तो एवंविहजोव्वणभरम्मि तरुणियणपत्थणिज्जम्मि । किं उप्पन्नं वेरग्गकारणं, तो मुणी कहइ ॥१८॥
सयलंपि भवसरूवं विवेइणो जणइ भद्द ! वेरग्गं । केवलदुक्खत्ताओ अवियारिज्जंतरमणिज्जं ॥१९॥
उक्तं च;—

"अज्ञस्य सुखदुःखाभ्यां भिन्ना वृत्तिः प्रकाशते । विवेकिनस्तु संसारे दुःखमेव हि केवलम् ॥
सर्वं हेममयं यद्वत् पश्यत्युन्मत्तकेऽशिते । तद्वदज्ञानसंभ्रान्तो भवेऽपि सुखमीक्षते ॥"

मज्झ विसेसेण पुणो जाया वेरग्गकारणं जाया । भाणू भणेइ कहमिव, मुणीवि तो साहए एवं ॥२०॥
तथाहि;—

अत्थि इह भरहवासे नयरं सोरियपुरंति पुरपवरं । दुग्गंगसंगयं भूइभूसियं हरसरीरंव ॥२१॥
सूरोवि अणुग्गकरो सोमोवि हु मयकलंकपरिमुक्को । दढधम्मो तत्थ निवो भज्जा गुणसुंदरी तस्स ॥
गुणराओ ताण सुओ पत्तो जोव्वणमिओ वसंतउरे । ईसाणचंदरन्नो कणगवई नाम वरधूया ॥२३॥
तीए सयंवरो, सो तत्थ गओ सुहडविंदपरियरिओ । निवदिन्नावासाओ सयंवरामंडवे पत्तो ॥२४॥
अन्नेवि तत्थ अहमहमिगाए निवनिवहनंदणा गुणिणो । उब्भडकयसिंगारा सयंवरामंडवे पत्ता ॥२५॥
उचियपरिवारजुत्तो उचिए देसम्मि आसणे उचिए । आगंतुं उवविट्ठो राया ईसाणचंदोवि ॥२६॥
धाईपडिहारीहिं सहिया आएसओ नरिंदस्स । आगंतुं कणगवई उवविट्ठा जणयपयमूले ॥२७॥

वन्दित्वा तत्पादपङ्कजं मधुकराविव संलीनौ । देशनामकरन्दरसं रसतः परमप्रमोदेन ॥१५॥
अथ देशनावसाने भानुर्भालतलामिलितकरकमलः । पृच्छति तं साधुं यथा भगवन् ! मां कथयति ॥१६॥
देहोऽपि खलु युष्माकं नृपलाञ्छनलाञ्छितो यथा प्रवराम् । राज्यश्रियमुज्झित्वा युष्माभिर्दीक्षा प्रपन्नेति ॥१७।
तत एवंविधयौवनभरे तरुणीजनप्रार्थनीये । किमुत्पन्नं वैराग्यकारणं, ततो मुनिः कथयति ॥१८॥
सकलमपि भवस्वरूपं विवेकिनो जनयति भद्र ! वैराग्यम् । केवलदुःखत्वादविचार्यमाणरमणीयम् ॥१९॥
मम विशेषेण पुनर्जाता वैराग्यकारणं जाया । भानुर्भणति कथमिव, मुनिरपि ततः कथयत्येवम् ॥२०॥

अस्तीह भरतवर्षे नगरं शौर्यपुरमिति पुरप्रवरम् । दुर्गाङ्गसंगतं भूतिभूषितं हरशरीरमिव ॥२१॥
सूरोऽप्यनुग्रकरः सोमोऽपि खलु मृग (मद) कलङ्कपरिमुक्तः । दृढधर्मस्तत्र नृपो भार्या गुणसुन्दरी तस्य ॥२२॥
गुणराजस्तयोः सुतः प्राप्तो यौवनमितो वसन्तपुरे । ईशानचन्द्रराजस्य कनकवती नाम वरदुहिता ॥२३॥
तस्याः स्वयंवरः, स तत्र गतः सुभटवृन्दपरिकरितः । नृपदत्तावासात् स्वयंवरामण्डपे प्राप्तः ॥२४॥
अन्येऽपि तत्राहमहमिकया नृपनिवहनन्दना गुणिनः । कृतोद्भटशृङ्गाराः स्वयंवरामण्डपे प्राप्ताः ॥२५॥
उचितपरिवारयुक्त उचिते देश आसन उचिते । आगत्योपविष्टो राजेशानचन्द्रोऽपि ॥२६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो तीए तिरियपसरियकडक्खरज्जूहिं संजमेऊण। गुणराओ नियहियए पक्खित्तो तक्खणं चेव॥२८॥
तेणवि तग्गयलोयणमणेण दट्ठूण तीए तं ललियं। मइ अणुरत्ता एसत्ति चिंतियं नूण जं भणियं॥२९॥
निद्धमहुरा य दिट्ठी अलसं गमणं वियंभणं अहियं। इयएवमाइभावा पियाणुरायं निवेयंति॥३०॥
एत्थंतरम्मि कुमरीए रायलोयं पयंसिउं लग्गा। गोत्ताइसमुक्कित्तणपुव्वं पडिहारिया जाव॥३१॥
ता कुमरी तीए पुरो पियराण ईसिमउलियच्छिपुडा। सहसच्चिय अपडुत्तं पयंसिउं नियसरीरस्स॥३२॥
नियगावासम्मि गया कुमरी किर पीडियत्ति सूलेण। जणणीपमुहजणेणं उवयरिया ओसहाईहिं॥३३॥
तो राया उट्ठेउं जोडियकरसंपुडो नरिंदजणं। बज्जरइ अपडुदेहा कणगवई अज्ज तो मज्झ॥३४॥
काऊण गुरुअरोहं आवासे हुंतु ताव जावेसा। संजायइ दिढदेहा अम्हं तुम्हं च पुन्नेहिं॥३५॥
एवं होउत्ति तओ सयंवरामंडवाउ ते सव्वे। नियआवासेसु गया रायावि गओ सभवणम्मि॥३६॥
एत्तो संझासमए जामिल्लयसूइया बहिं एक्का। मज्झिमवया वयंसी कुमरीए पेसिया छन्नं॥३७॥
गुणरायस्स सयासे अप्पइ सा चित्तपट्टियं तस्स। विरहावत्थादुत्थं सो पिच्छइ तत्थ तं कुमरिं॥३८॥
पठति च सा;—
अमयतणू तीए तुमं सुहय! निहित्तो मणे पलित्तं च। तं दहइ तीए देहं अमयम्मि विसं समुप्पन्नं॥३९॥
ततश्च;—
अइनिम्मलं अणग्घं सुवित्तमुत्ताणुसंगयं गरुयं। गुणआहारं हारं तदप्पियं तीए हिययंव॥४०॥

धात्रीप्रतिहारीभिः सहिताऽऽदेशतो नरेन्द्रस्य। आगत्य कनकवत्युपविष्टा जनकपादमूले॥२७॥
ततस्तस्यास्तिर्यक्प्रसृतकटाक्षरज्जूभिः संयम्य। गुणराजो निजहृदये प्रक्षिप्तस्तत्क्षणमेव॥२८॥
तेनापि तद्गतलोचनमनसा दृष्ट्वा तस्यास्तल्ललितम्। मय्यनुरक्तैषेति चिन्तितं नूनं यद् भणितम्॥२९॥
स्निग्धमधुरा च दृष्टिरलसं गमनं विजृम्भणमाधिकम्। इत्येवमादिभावाः प्रियानुरागं निवेदयन्ति॥३०॥
अत्रान्तरे कुमारीं राजलोकं प्रदर्शयितुं लग्ना। गोत्रादिसमुत्कीर्तनपूर्वं प्रतिहारी यावत्॥३१॥
तावत् कुमारी तस्याः पुरः पित्रोरीषन्मुकुलिताक्षिपुटा। सहसैवापटुत्वं प्रदर्श्य निजशरीरस्य॥३२॥
निजकावासे गता कुमारी किल पीडितेति शूलेन। जननीप्रमुखजनेनोपचरितौषधादिभिः॥३३॥
ततो राजोत्थाय योजितकरसंपुटो नरेन्द्रजनम्। कथयत्यपटुदेहा कनकवत्यद्य ततो मम॥३४॥
कृत्वा गुर्ववरोधमावासे भवन्तु तावद्यावदेषा। संजायते दृढदेहाऽस्माकं युष्माकं च पुण्यैः॥३५॥
एवं भवत्विति ततः स्वयंवरामण्डपात् ते सर्वे। निजकावासेषु गता राजापि गतः स्वभवने॥३६॥
इतः संध्यासमये यामिकसूचिता बहिरेका। मध्यमवया वयस्या कुमार्या प्रेषिता छन्नम्॥३७॥
गुणराजस्य सकाशेऽर्पयति सा चित्रपट्टिकां तस्मै। विरहावस्थादुःस्थां स पश्यति तत्र तां कुमारीम्॥३८॥
अमृततनुस्तया त्वं सुभग! निहितो मनसि प्रदीप्तं च। तद् दहति तस्या देहममृते विषं समुत्पन्नम्॥३९॥
अतिनिर्मलमनघं सुवृत्तमुक्तानुसंगतं गुरुम्। गुणाधारं हारं तदर्पितं तस्या हृदयमिव॥४०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नियवच्छालंकारं करेसु इय तीए जंपिए कुमरो । तं तह काउं तुट्ठेण तीए कुमरीकए नियंयं ॥४१॥
सव्वंगियमाभरणं दिन्नं, एत्तो य तीए संलत्तं । तुब्भेहिं समं इह अत्थि किंपि वत्तव्वमेगंते ॥४२॥
तत्तो य कुमरदिट्ठीए चोइओ उट्ठिओ जणो सव्वो । तो विन्नत्तो तीए कुमरो, विन्नवइ इय कुमरी ॥४३॥
जीवियमायत्तं तुम्ह किंतु मह नाह ! मंदभागाए । तुम्ह सरीरे संभोगजोग्गया कइवयदिणंते ॥४४॥
भोगंतरायकारणविगमे होहित्ति तुज्झ कहणत्थं । सहसा अपडुत्तं दंसिऊण लोयाण मज्झम्मि ॥४५॥
अज्ज सयंवरमाला नो पक्खित्ता, पभायसमयम्मि । खिवियव्वा इय दूईवयणं सुणिऊण तयभिमुहं॥४६॥
भणइ गुणरायकुमरो जइवि हु अइदुकरं इमं मज्झ। जं तीइ असंभोगो तहवि हु आणवइ जं कुमरी ॥४७॥
तं चेव पमाणं इय विसज्जिया सा गया य तप्पासं । तव्वुत्तंत्तो सव्वो कहिओ कुमरीए एगंते ॥ ४८॥
तो बीयदिणे तीए सयंवरामंडवम्मि तक्कंठे । निवचक्कसमक्खं चिय खित्ता कुसुमाण वरमाला ॥४९॥
सव्वं नरिंदचक्कं सम्माणेउं विसज्जियं रन्ना । गुणरायकुमारेणं परिणीया सा निवंगरुहा ॥५०॥
कइवयदिणावसाणे पत्तो सोरियपुरम्मि सह तीए । गुरुयणकओवयारा मुक्का सा अन्नधवलहरे ॥५१॥
कुमरोवि नियावासे पत्तो मित्तेहिं परिगओ तत्थ । दोगुंदगोव्व देवो कीलेइ विचित्तकीलाहिं ॥५२॥
तो पइदिणंपि गच्छइ तब्भवणे रमइ विविहकीलाहिं । तीए समं पीईए दिणाणि गच्छंति कुमरस्स॥५३॥
न य तीए अभिप्पायं लक्खइ सुवियक्खणोवि वरकुमरो । तत्तो य सो विसूरइ केण उवाएण सो नेओ॥
किञ्च ।

निजवक्षोऽलंकारं कुरुष्वेति तया जल्पिते कुमारः । तत् तथा कृत्वा तुष्टेन तस्यै कुमारीकृते निजकम् ॥४१॥
सर्वाङ्गीणमाभरणं दत्तं, इतश्च तया संलप्तम् । युष्माभिः सममिहास्ति किमपि वक्तव्यमेकान्ते ॥४२॥
ततश्च कुमारदृष्ट्या चोदित उत्थितो जनः सर्वः । ततो विज्ञप्तस्तया कुमारो, विज्ञपयतीति कुमारी ॥४३॥
जीवितमायत्तं तव किन्तु मम नाथ ! मन्दभाग्यायाः । तव शरीरे संभोगयोग्यता कतिपयदिनान्ते ॥४४॥
भोगान्तरायकारणविगमे भविष्यतीति तव कथनार्थम् । सहसाऽपटुत्वं दर्शयित्वा लोकानां मध्ये ॥४५॥
अद्य स्वयंवरमाला नो प्रक्षिप्ता, प्रभातसमये । क्षेप्तव्येति दूतीवचनं श्रुत्वा तदभिमुखम् ॥४६॥
भणति गुणराजकुमारो यद्यपि खल्वतिदुष्करमिदं मम । यत् तयाऽसंभोगस्तथापि खल्वाज्ञापयति यत्कुमारी ॥
तदेव प्रमाणमिति विसृष्टा सा गता च तत्पार्श्वम् । तद्वृत्तान्तः सर्वः कथितः कुमार्या एकान्ते ॥४८॥
ततो द्वितीयदिने तया स्वयंवरामण्डपे तत्कण्ठे । नृपचक्रसमक्षमेव क्षिप्ता कुसुमानां वरमाला ॥४९॥
सर्वं नरेन्द्रचक्रं सम्मान्य विसृष्टं राज्ञा । गुणराजकुमारेण परिणीता सा नृपाङ्गरुहा ॥५०॥
कतिपयदिनावसाने प्राप्तः शौर्यपुरे सह तया । कृतगुरुजनोपचारा मुक्ता साऽन्यधवलगृहे ॥५१॥
कुमारोऽपि निजावासे प्राप्तो मित्रैः परिगतस्तत्र । दौगुन्दुक इव देवः क्रीडति विचित्रक्रीडाभिः ॥५२॥
ततः प्रतिदिनमपि गच्छति तद्भवने रमते विविधक्रीडाभिः । तया समं प्रीत्या दिनानि गच्छन्ति कुमारस्य ॥
न च तस्या अभिप्रायं लक्षयति सुविचक्षणोऽपि वरकुमारः । ततश्च स खिद्यते केनोपायेन स ज्ञेयः ॥५४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किं जोव्वणेण किं वा धणेण किं जीविएण रूवेण। जइ मे सयं न लग्गइ एसा उक्कंठिया कंठे? ॥५५॥
अन्नम्मि दिणे नियमंदिरट्ठियं पणमिऊण पडिहारो। विन्नवइ कुमारं जह दुवारपरिसंठिओ पुरिसो॥५६॥
सियचंदणकयतिलओ सियवत्थनियंसणो कुसुमहत्थो। अहिलसइ दंसणं तुम्ह सामि! को तत्थ आएसो?
मुंच लहुं इय भणिए पवेसिओ आसणम्मि दिन्नम्मि। उवविट्ठो आभट्ठो कत्तो भण केण कज्जेण? ॥५८॥
तेण भणियं महायस! जसहरनामेण सिद्धपुत्तेण। मह दिन्ना वरविज्जा विहिया मे पुव्वसेवावि ॥५९॥
बारस वरिसाइं, तओ तुज्झ पसाएण सिज्झिही सावि। कुमरेण तओ भणियं किं फलमेईए, सो भणइ॥
नहयलगमणं धणकणयसंपया कामरूवकरणं च। लाभाइपरिन्नाणं सिद्धाए हवइ विज्जाए ॥६१॥
भणियं कुमरेण तओ जं कायव्वं मए तयं भणसु। सो भणइ एगराई मह उत्तरसाहगो होसु ॥६२॥
पडिवन्नं कुमरेणं परोवयारिक्करसियचित्तेण। परपत्थणाए जम्हा किं किं न कुणंति सप्पुरिसा? ॥६३॥
अह सो कयविहिकवओ पत्तो कुमारेण सह मसाणम्मि। रयणीयरसंकिन्ने जमगेहसमे महाभीमे ॥६४॥
किण्हचउद्दसिरयणीनिसीहसमयम्मि, मंडलं लिहियं। पज्जालिओ य जलणो तम्मज्झे खइरकट्ठेहिं ॥६५॥
रत्तकणवीरचंदणगुग्गुलमाईहिं जाव सो जावं। देइ तहिं कुमरो पुण करवालकरो पुरो ठाइ ॥६६॥
ताव सहसत्ति कोवि हु उत्तरआसाए अणुत्तरविरूवो। आगच्छंतो दिट्ठो महानिहाउव्व हक्काहिं ॥६७॥
विहडंतो गिरिकूडे कलयलरवेहिं भरियनहविवरो। पलयानलसारिच्छो मुहेण जालाओ मिल्लंतो ॥६८॥
दप्पुब्भडसप्पफडाकडप्पमउडो सुमंगलारूढो। डमडमियडमरुयाडोवडामरो रोसरत्तच्छो ॥६९॥

किं यौवनेन किंवा धनेन किं जीवितेन रूपेण। यदि मे स्वयं न लगत्येषोत्कण्ठिता कण्ठे? ॥५५॥
अन्यस्मिन् दिवसे निजमन्दिरस्थितं प्रणम्य प्रतिहारः। विज्ञपयति कुमारं यथा द्वारपरिसंस्थितः पुरुषः॥५६॥
सितचन्दनकृततिलकः सितवस्त्रनिवसनः कुसुमहस्तः। अभिलषति दर्शनं तव स्वामिन्! कस्तत्रादेशः? ॥५७॥
मुञ्च लघ्विति भणिते प्रवेशित आसने दत्ते। उपविष्ट आभाषितः कुतो भण केन कार्येण? ॥५८॥
तेन भणितं महायशः! यशोधरनाम्ना सिद्धपुत्रेण। मह्यं दत्ता वरविद्या विहिता मया पूर्वसेवापि ॥५९॥
द्वादश वर्षाणि, ततस्तव प्रसादेन सेत्स्यति सापि। कुमारेण ततो भणितं किं फलमेतस्याः, स भणति ॥६०॥
नभस्तलगमनं धनकनकसंपत् कामरूपकरणं च। लाभादिपरिज्ञानं सिद्धायां भवति विद्यायाम् ॥६१॥
भणितं कुमारेण ततो यत् कर्तव्यं मया तद् भण। स भणत्येकरात्रे ममोत्तरसाधको भव ॥६२॥
प्रतिपन्नं कुमारेण परोपकारैकरसिकचित्तेन। परप्रार्थनया यस्मात् किं किं न कुर्वन्ति सत्पुरुषाः? ॥६३॥
अथ स कृतविधिकवचः प्राप्तः कुमारेण सह श्मशाने। रजनीचरसंकीर्णे यमगेहसमे महाभीमे ॥६४॥
कृष्णचतुर्दशीरजनीनिशीथसमये, मण्डलं लिखितम्। प्रज्वलितश्च ज्वलनस्तन्मध्ये खदिरकाष्ठैः ॥६५॥
रक्तकरवीरचन्दनगुग्गुलादिभिर्यावत् स जापम्। ददाति तत्र कुमारः पुनः करवालकरः पुरस्तिष्ठति ॥६६॥
तावत् सहसेति कोऽपि ह्युत्तराशायामनुत्तरविरूपः। आगच्छन् दृष्टो महानिर्घात इव हक्काभिः ॥६७॥
विघटयन् गिरिकूटान् कलकलरवैर्भृतनभोविवरः। प्रलयानलसदृशो मुखेन ज्वाला मुञ्चन् ॥६८॥

कुडिलकविलकेसो नासियासेसवेसो अइमसिसमदेहो सद्दविक्खित्तमेहो ।
पणयसुहनिहाणो मेहनायाभिहाणो करकलियकवालो खित्तवालो करालो ॥७०॥
पत्तो सो अइरुट्ठो जंपइ रे रे अणज्ज ! अज्जवि य । इत्थेव तुमं चिट्ठसि अणनुन्नाओ मए धिट्ठ ! ॥७१॥
साहेसि एत्थ विज्जं मह पूयमकाउमिच्छसि य सिद्धिं । न हवसि ता तुममिण्हिं ता इट्ठं सरसु रे देवं ॥
एसोवि रायतणओ तुमए वेयारिओ अविणयस्स । अणुहवउ फलं वरओ अहव कुसंगो न किं कुणइ ? ॥
तव्वयणायन्नणजायकोवकुमरेण पभाणिओ एवं । रे रे निल्लज्ज अहम्म ! अज्ज रुट्ठो जमो तुज्झ ॥७४॥
पासपरिसंठिए मइ इमस्स सक्कोपि कुणइ किं विग्घं । इय एवं जंपंतो पत्तो कुमरो तयासन्ने ॥७५॥
पभणइ अणज्ज ! किं पलविएण जइ अत्थि पोरिसं तुज्झ । अब्भिडसु मइ सद्धिं अवणेमो जेण तुह गव्वं॥
अमरिसवसेण तो सो चलिओ तस्संमुहं असत्थं तं । दट्ठुं कुमरो खग्गं मिल्लइ दूरेण तो झत्ति ॥७७॥
निविडीकुणइ कडिल्लं सकेसपासं तओ य तेण समं । जुज्झंतो हयहियं काउं तं कुणइ गयदप्पं ॥७८॥
इत्तो विज्जादेवी समागया तत्थ तं दट्ठुं । पभणइ कुमार ! सिद्धा सत्तिक्कधणस्स तुज्झ अहं ॥७९॥
किं तुह कीरउ साहसु, कुमरेणं पभणिया इमं देवी । एयस्स तुमं सिज्झसु संपाडसु वंछियं अत्थं ॥८०॥
तुह साहेज्जेणं चिय सिद्धा हमिमस्स, किंपि भण अन्नं । तो कणगवईभोगंतरायहेउं स पुच्छेइ ॥८१॥
सा उवओगं दाउं जंपइ एयं सयंपि जाणिहिसि । कामियरूवधरत्तेण तं च तुह होउ मह वयणा ॥८२॥

दर्पोद्धटसर्पफटासंघातमुकुटः सुमङ्गलारूढः । डमडमितडमरुकाटोपडामरो रोषरक्ताक्षः ॥६९॥
कुटिलकपिलकेशो नाशिताशेषद्वेष्योऽतिमषिसमदेहः शब्दाविक्षिप्तमेघः ।
प्रणतसुखनिधानं मेघनादाभिधानः करकलितकपालः क्षेत्रपालः करालः ॥७१॥
प्राप्तः सोऽतिरुष्टो जल्पति रे रेऽनार्य ! अद्यापि च । अत्रैव त्वं तिष्ठस्यननुज्ञातो मया धृष्ट ! ॥७॥०
साधयस्यत्र विद्यां मम पूजामकृत्वेच्छसि च सिद्धिम् । न भवसि तावत्त्वमिदानीं तस्मादिष्टं स्मर रे देवम् ॥७२॥
एषोऽपि राजतनयस्त्वया प्रतारितोऽविनयस्य । अनुभवतु फलं वराकोऽथवा कुसङ्गो न किं करोति ? ॥७३॥
तद्वचनाकर्णनजातकोपकुमारेण प्रभणित एवम् । रे रे निर्लज्ज ! अधर्म ! अद्य रुष्टो यमस्तव ॥७४॥
पार्श्वपरिसंस्थिते मय्यस्य शक्रोऽपि करोति किं विघ्नम् । इत्येवं जल्पन् प्राप्तः कुमारस्तदासन्ने ॥७५॥
प्रभणत्यनार्य ! किं प्रलपितेन यद्यस्ति पौरुषं तव । संगच्छस्व मया सार्धमपनयामि येन तव गर्वम् ॥७६॥
अमर्षवशेन ततः स चालितस्तत्संमुखमशस्त्रं तम् । दृष्ट्वा कुमारः खड्गं मुञ्चति दूरेण ततो झटिति ॥७७॥
निबिडीकरोति कटीभवं सकेशपाशं ततश्च तेन समम् । युध्यमानो हतहृदयं कृत्वा तं करोति गतदर्पम् ॥७८॥
इतो विद्यादेवी समागता तत्र तं दृष्ट्वा । प्रभणति कुमार ! सिद्धा सत्त्वैकधनस्य तवाहम् ॥७९॥
किं तव क्रियतां कथय, कुमारेण प्रभणितेदं देवी । एतस्य त्वं सिध्य संपादय वाञ्छितमर्थम् ॥८०॥
तव साहाय्येनैव सिद्धाहमस्य, किमपि भणान्यत् । ततः कनकवतीभोगान्तरायहेतुं स पृच्छति ॥८१॥
सोपयोगं दत्त्वा जल्पत्येतत्स्वयमपि ज्ञास्यासि । कामितरूपधरत्वेन तच्च तव भवतु मम वचनात् ॥८२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेणं महापसाए भणिए देवी गया नियट्ठाणे । सिद्धेणं गुणराओ सप्पणयं तो इमं भणिओ ॥८३॥
तुम्हाणुभावओ च्चिय समीहियत्थो मए समणुपत्तो । तो आएसो दिज्जउ निद्देसकरस्स मह कोइ ॥८४॥
भणइ कुमारो विलसह इच्छाए एस तुम्ह आएसो । सो भणइ सुमरियव्वो कत्थइ कज्जे तहावि अहं॥
इय भणिउं सोवि गओ कुमरो पक्खालिऊण नियदेहं । निययावासम्मि गओ मोत्तूणं रयणिवत्थाणि ॥
काऊणं सिंगारं कणगवईमंदिरम्मि सो पत्तो । पच्चूसे विविहाहिं कहाहिं गमिऊण खणमेगं ॥८७॥
नियभवणे संपत्तो गमिउं दिवसं गओ य रयणीए । माणुसचक्खुअगोयररूवं काऊण एगागी ॥८८॥
कणगवईए भवणे खग्गसहाओ गिहस्स उवरिम्मि । जा चिट्ठइ कणगवईवि ताव तत्थेव संपत्ता ॥८९॥
दासीजुयलेण समं भणेइ हे सुयणु ! कित्तिया रयणी । दासी भणइ निसीहो आगमवेला विमाणस्स ॥
तो तीइ मग्गिओ ण्हाणसाडओ खालियं नियं अंगं । पट्टंसुएण लूहिय कयंगराया सुनेवत्था ॥९१॥
विविहालंकारधरा जा अच्छइ ता विमाणमणुपत्तं । तत्थ चडियाओ ताओ कुमरोवि अदिस्सरूवधरो॥९२॥
तो उत्तरदिसिहुत्तं मणव सिग्घं अविग्घओ गंतुं । सरतीरे ओइन्नं विमाणमह नंदणवणम्मि ॥९३॥
विज्जाहररायावि हु दिट्ठो कुमारेण चूयहिट्ठम्मि । नीहरिय विमाणाओ कणगवई तस्स पासम्मि ॥९४॥
संपत्ता नमिऊणं तस्स य आणाइ तत्थ उवविट्ठा । थेववेलाए पत्ता अन्नावि तिन्नि कुमरीओ ॥९५॥
रइरंभारूवाओ उब्भडनवजोव्वणाभिरामाओ । उवविट्ठाओ ताओ खेयरनाहं पणमिऊण ॥९६॥
थेववेलाए खयरो सुइभूओ नियसियामलदुगूलो । पन्नत्तिदेविभवणे पत्तो नमिऊण पन्नत्तिं ॥९७॥

तेन महाप्रसादे भणिते देवी गता निजस्थाने । सिद्धेन गुणराजः सप्रणयं तत इदं भणितः ॥८३॥
तवानुभावत एव समीहितार्थो मया समनुप्राप्तः । तत आदेशो दीयतां निदेशकरस्य मम कोऽपि ॥८४॥
भणति कुमारो विलसतेच्छयैष तवादेशः । स भणति स्मर्तव्यः कुत्रापि कार्ये तथाप्यहम् ॥८५॥
इति भणित्वा सोऽपि गतः कुमारः प्रक्षाल्य निजदेहम् । निजावासे गतो मुक्त्वा रजनिवस्त्राणि ॥८६॥
कृत्वा शृङ्गारं कनकवतीमन्दिरे स प्राप्तः । प्रत्यूषे विविधाभिः कथाभिर्गमयित्वा क्षणमेकम् ॥८७॥
निजभवने संप्राप्तो गमयित्वा दिवसं गतश्च रजन्याम् । मानुषचक्षुरगोचररूपं कृत्वैकाकी ॥८८॥
कनकवत्या भवने खड्गसहायो गृहस्योपरि । यावत्तिष्ठति कनकवत्यपि तावत्तत्रैव संप्राप्ता ॥८९॥
दासीयुगलेन समं भणति हे सुतनु ! कियती रजनिः । दासी भणति निशीथ आगमवेला विमानस्य ॥९०॥
ततस्तया मार्गितः स्नानशाटकः क्षालितं निजमङ्गम् । पट्टांशुकेन रूक्षयित्वा कृताङ्गरागा सुनेपथ्या ॥९१॥
विविधालङ्कारधरा यावदास्ते तावद्विमानमनुप्राप्तम् । तत्र चटिते ते कुमारोऽप्यदृश्यरूपधरः ॥९२॥
तत उत्तरदिगभिमुखं मन इव शीघ्रमविघ्नतो गत्वा । सरस्तीरेऽवतीर्णं विमानमथ नन्दनवने ॥९३॥
विद्याधरराजापि खलु दृष्टः कुमारेण चूतस्याधः । निःसृत्य विमानात् कनकवती तस्य पार्श्वे ॥९४॥
संप्राप्ता नत्वा तस्य चाज्ञया तत्रोपविष्टा । स्तोकवेलया प्राप्ता अन्या अपि तिस्रः कुमार्यः ॥९५॥
रतिरम्भारूपा उद्भटनवयौवनाभिरामाः । उपविष्टास्ताः खेचरनाथं प्रणम्य ॥९६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेणारद्धो जावो आलिहियं मंडलंपि घुसिणेण । भूसन्नाणुन्नाया तिन्निवि कुमरीओ नमिऊण ॥९८॥
एक्का सारइ वीणं एक्का वन्नं करेइ महुरसरं । एक्का वायइ वंसं एवं तहिं ताहिं विहियम्मि ॥९९॥
कणगवई नच्चणवारउत्ति कलिऊण कच्छियं पत्ता । नच्चइ सहावभावं विचित्तकरणंगहारेहिं ॥१००॥
कणगवईए सरहसपणच्चणा तुट्टिऊण किंकणिया । पडिया कुमरपयंते तेणवि संगोविउं धरिया ॥१०१॥
तो रंगुत्तिन्नाए तीए सव्वत्थ सा गविट्ठावि । नो दिट्ठा, सव्वाओ विसज्जियाओ य अह तेण ॥१०२॥
नियनियविमाणचडियाउ ताउ सव्वाउ नियनियगिहेसु । संपत्ताउ खणेणं कुमरो उण तव्विमाणाउ ॥
अदिस्संतो तीए तग्गिहदाराउ उत्तरेऊण । निययावासम्मि गओ रयणीए चरमपहरम्मि ॥१०४॥
पच्चूसे उट्ठित्ता तक्कालावस्सयं विहेऊण । नियमइसागरमंतिस्स अप्पिया किंकिणी हत्थे ॥१०५॥
भणिओ कणगवईए अप्पिज्जसु मज्झ वयणओ चेव । तो तब्भवणम्मि गया ते दट्ठुं उट्ठए सावि॥१०६॥
सयमासणं समप्पइ सयमवि उवविसइ तस्समीवम्मि । तो सारजूयं रमिउं कुमरीकुमरेहिं पारद्धं ॥१०७॥
हारंतम्मि कुमारे कणगवई भणइ किंपि सारेहि । ता कुमरेण भणिओ मंती मइसागरो एयं ॥१०८॥
गहणयमप्पसु, तो तेण अप्पिया किंकिणी रयणरुइरा । कडवट्टीओ तीए करम्मि तो तीए सा दट्ठुं ॥
पच्चभिनाया हा ! कत्थ पाविया, पुच्छिओ भणइ पडिया कि । कत्थ पएसे पत्ता, सो भणइ जत्थ ते पडिया॥
सा भणइ न याणामी, कुमरो जंपेइ एस नेमित्ती । भूयभविस्सं जाणइ ता पुच्छसु जत्थ ते पडिया ॥

स्तोकवेलया खचरः शुचिभूतो निवसितामलदुकूलः । प्रज्ञप्तिदेवीभवने प्राप्तो नत्वा प्रज्ञप्तिम् ॥९७॥
तेनारब्धो जाप आलिखितं मण्डलमपि घुसृणेन । भ्रूसंज्ञानुज्ञातास्तिस्रोऽपि कुमार्यो नत्वा ॥९८॥
एका स्वारयति वीणामेका वर्णं करोति मधुरस्वरम् । एका वादयति वंशमेवं तत्र ताभिर्विहिते ॥९९॥
कनकवती नर्तनवार इति कलयित्वा कच्छिकां प्राप्ता । नृत्यति सहावभावं विचित्रकरणाङ्गहारैः ॥१००॥
कनकवत्याः सरभसप्रनर्तनात् त्रुटित्वा किङ्किणी । पतिता कुमारपादान्ते तेनापि संगोप्य धृता ॥१०१॥
ततो रङ्गोत्तीर्णया तया सर्वत्र सा गवेषितापि । नो दृष्टा, सर्वा विसृष्टाश्चाथ तेन ॥१०२॥
निजनिजविमानचटितास्ताः सर्वा निजनिजगृहेषु । संप्राप्ताः क्षणेन कुमारः पुनस्तद्विमानात् ॥१०३॥
अदृश्यमानस्तया तद्गृहद्वारादुत्तीर्य । निजावासे गतो रजन्याश्चरमप्रहरे ॥१०४॥
प्रत्यूषे उत्थाय तत्कालावश्यकं विधाय । निजमतिसागरमन्त्रिणोऽर्पिता किङ्किणी हस्ते ॥१०५॥
भणितः कनकवत्या अर्पयेर्मद्वचनत एव । ततस्तद्भवने गतौ तौ दृष्ट्वोत्तिष्ठति सापि ॥१०६॥
स्वयमासनं समर्पयति स्वयमप्युपविशति तत्समीपे । ततः शारद्यूतं रमयितुं कुमारीकुमाराभ्यां प्रारब्धम् ॥
जीयमाने कुमारे कनकवती भणति किमपि सारय । तदा कुमारेण भणितो मन्त्री मतिसागर एतस्यै ॥१०८॥
ग्रहणकमर्पय, ततस्तेनार्पिता किङ्किणी रत्नरुचिरा । कटीपट्टतस्तस्याः करे ततस्तया सा दृष्ट्वा ॥१०९॥
प्रत्यभिज्ञाता हा ! क्व प्रापिता, पृष्टः भणति पतिता क्व ? । क्व प्रदेशे प्राप्ता, स भणति यत्र ते पतिता॥
सा भणति न जानामि, कुमारो जल्पत्येष नैमित्तिकः । भूतभविष्यज्जानाति तस्मात्पृच्छ यत्र ते पतिता ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो पुच्छइ कणगवई सचिवं, मे कहसु, तेणभिप्पायं। नाऊण कुमरतणयं भणियं कल्ले कहिस्सामि ॥
खिल्लेउं खणमेगं तहेव सो तो गओ नियभवणे। अत्थमिए दिणनाहो रयणीए पढमपहरम्मि ॥११३॥
संपत्तो तब्भवणे पुणोवि सा पत्थिया जहा पुव्विं। कुमरोवि तहेव तओ तत्थेव गयाइं सव्वाइं ॥११४॥
पुव्वक्कमेण खयरेण जावहोमाइयम्मि पारद्धे। आरद्धं पिच्छणयं कुमरीहिं तत्थ कणगवई ॥११५॥
वीणं वाएइ तओवक्खित्तमणाए तीए कुमरेण। वामचरणाओ सिग्घं अवहरियं नेउरं तत्तो ॥११६॥
तो पिच्छणए वित्ते भणिया दासी हले! गवेसेह। केणवि पच्छन्नेणं अवहरियं नेउरं मज्झ ॥११७॥
तो रंगगओ लोओ पुट्ठो दासीए विणयपणयाए। नो कत्थवि उवलद्धं सुट्ठुगविट्ठंपि तं तत्थ ॥११८॥
पुव्वकमेण तत्तो नियनियठाणम्मि ताइं पत्ताइं। कुमरोवि नियावासे सुत्तो तत्तो पभायम्मि ॥११९॥
आवस्सयं विहेउं तत्तो मइसागरस्स अप्पेउं। तं नेउरं तहेव य पत्तो भज्जाए भवणम्मि ॥१२०॥
कुमरो कओवयारो उवविट्ठो सावि तत्थ उवविट्ठा। पारद्धा तो गोट्ठी समस्सपरिपूरणाईया ॥१२१॥
कुमरेण पढियं;—
पडुपवणाहयपउमिणि! दलतरलं जीवियं च पेम्मं च। जीवाणं जुव्वणधणं
(तओ तीए सुणिऊण भणियं) तम्हा धम्मं कुणह सम्मं ॥१२२॥
तओ तीए पढिया पहेलिया;—
जइ सिक्खविओ सीसो जईण रयणीए जुज्जइ न गंतुं। तो कीस भणइ अज्जो मा संकसु दोवि तुल्लाइं ॥

ततः पृच्छति कनकवती सचिवं, मां कथय, तेनाभिप्रायम्। ज्ञात्वा कुमारस्य भणितं कल्ये कथयिष्यामि ॥
क्रीडयित्वा क्षणमेकं तथैव स ततो गतो निजभवने। अस्तमिते दिननाथे रजन्याः प्रथमप्रहरे ॥११३॥
संप्राप्तस्तद्भवने पुनरपि सा प्रस्थिता यथा पूर्वम्। कुमारोऽपि तथैव ततस्तत्रैव गताः सर्वे ॥११४॥
पूर्वक्रमेण खचरेण जापहोमादिके प्रारब्धे। आरब्धं प्रेक्षणकं कुमारीभिस्तत्र कनकवती ॥११५॥
वीणां वादयति ततोऽवक्षिप्तमनसस्तस्याः कुमारेण। वामचरणात् शीघ्रमपहृतं नूपुरं ततः ॥११६॥
ततः प्रेक्षणके वृत्ते भणिता दासी हले! गवेषय। केनापि प्रच्छन्नेनापहृतं नूपुरं मम ॥११७॥
ततो रङ्गगतो लोकः पृष्टो दास्या विनयप्रणतया। नो कुत्राप्युपलब्धं सुष्ठु गवेषितमपि तत्तत्र ॥११८॥
पूर्वक्रमेण ततो निजनिजस्थाने ते प्राप्ताः। कुमारोऽपि निजावासे सुप्तस्ततः प्रभाते ॥११९॥
आवश्यकं विधाय ततो मतिसागरस्यार्पयित्वा। तन्नूपुरं तथैव च प्राप्तो भार्याया भवने ॥१२०॥
कुमारः कृतोपचार उपविष्टः सापि तत्रोपविष्टा। प्रारब्धा ततो गोष्ठी समस्यापरिपूरणादिका ॥१२१॥
कुमारेण पठितम्;—
पटुपवनाहतपद्मिनि! दलतरलं जीवितं च प्रेम च। जीवानां यौवनधनं
(ततस्तया श्रुत्वा भणितम्) तस्माद् धर्मं कुरु सम्यक् ॥१२२॥
ततस्तया पठिता प्रहेलिका;—

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुमरेण तओ भणियं रयणी दिवसो य दोवि तुल्लाइं । तस्स जओ सो दोहिवि जहट्ठियं नियइ नाणेण ॥
एमाइविणोएणं खणं गमेऊण तीए तो पुट्ठो । मइसागरो तए किं जोइसमवलोइयं किंपि ? ॥१२५॥
आमं, किंतु तुहन्नं किंपि नट्ठंति पभणिए भणइ । किं तं, जं तं जाणसि इय भणिए भणेइ जाणेमि॥१२६॥
किंपुण कत्थ य नट्ठं अहं न याणामि कहह जइ मुणह । दोण्हवि पडणट्ठाणं एक्कंचिय तीए सो कहइ ॥१२७॥
तो विम्हिया विचिंतइ किंकिणिया मज्झ कत्थइ पडिया । इय निच्छओ न आसी,तओ य परिभावियं एयं ॥
कत्थवि इहेव य पडिया चडिया एयस्स तेण हत्थम्मि । नेउरपडणट्ठाणं एसो तीएव परिकहइ ॥१२९॥
ता जोइसेण जाणइ जइ जाणउ किंतु किंकिणी तत्थ । पडिया इमस्स हत्थे चडिया केणप्पओगेण ? ॥
न य गंतुं तत्थ इमो खमो तओ साहसिक्करसियस्स । मह भत्तुणो च्चिय इमं वियंभियं होज्ज तो भणइ ॥
किं नेउरंपि तुम्हं हत्थे चडियं, भणेइ सो आमं । सा भणइ मह समप्पह तीए तो सो समप्पेइ ॥१३२॥
तो सा पभणइ कुमरं सोहणमेयं तु जइ सयं लद्धं । अह अन्नाओ पत्तं मह पइणा ता न लट्ठयरं॥१३३॥
जओ ।
जलणपवेसेणवि मज्झ नत्थि सुद्धित्ति जंपिए भणइ । किं जलणपवेसेणं मह चित्ते विससु निस्संकं ॥
तत्तो य सा विचिंतइ मह पइणो एस वइयरो सव्वो । मन्ने पच्चक्खो च्चिय ता अज्जप्पभिइं न तप्पासे॥
गंतव्वं, ठायव्वं मंदव्ववएसओ इहेव मए । विज्जाहराहिवइणो दासीवयणाउ कहिऊणं ॥१३६॥

यदि शिक्षितः शिष्यो यतीनां रजन्यां युज्यते न गन्तुम् । ततः कस्माद्भणत्यार्यो मा शङ्कस्व द्वे अपि तुल्ये॥१२३॥
कुमारेण ततो भणितं रजनिर्दिवसश्च द्वावपि तुल्यौ । तस्य यतः स द्वयोरपि यथास्थितं पश्यति ज्ञानेन ॥१२४॥
एवमादिविनोदेन क्षणं गमयित्वा तया ततः पृष्टः । मतिसागरस्त्वया किं ज्यौतिषमवलोकितं किमपि ? ॥१२५॥
आम, किन्तु तवान्यत् किमपि नष्टमिति प्रभणिते भणति । किं तत, यत्त्वं जानासीति भणिते भणति जानामि ॥
किन्तु क्व च नष्टमहं न जानामि कथय यदि जानासि । द्वयोरपि पतनस्थानमेकमेव तां स कथयति ॥१२७॥
ततो विस्मिता विचिन्तयति किङ्किणी मम कुत्रापि पतिता । इति निश्चयो नासीत्, ततश्च परिभावितमेतत् ॥
कुत्रापीहैव च पतिता चटितैतस्य तेन हस्ते । नूपुरपतनस्थानमेष तस्या इव परिकथयति ॥१२९॥
तस्माज्ज्यौतिषेण जानाति यदि जानातु किन्तु किङ्किणी तत्र । पतितास्य हस्ते चटिता केन प्रयोगेण ?॥१३०॥
न च गन्तुं तत्रायं क्षमस्ततः साहसैकरसिकस्य । मम भर्तुरेवेदं विजृम्भितं भवेत् ततो भणति ॥१३१॥
किं नूपुरमपि युष्माकं हस्ते चटितं, भणति स आम । सा भणति मह्यं समर्पय तस्यै ततः स समर्पयति ॥
ततः सा प्रभणति कुमारं शोभनमेतत्तु यदि स्वयं लब्धम् । अथान्यस्मात्प्राप्तं मम पत्या तदा न सुन्दरतरम्॥
यतः ।
ज्वलनप्रवेशेनापि मम नास्ति शुद्धिरिति जल्पिते भणति । किं ज्वलनप्रवेशेन मम चित्ते विश निःशङ्कम् ॥
ततश्च सा विचिन्तयति मम पत्युरेष व्यतिकरः सर्वः । मन्ये प्रत्यक्ष एव तस्मादद्यप्रभृति न तत्पार्श्वे॥१३५॥
गन्तव्यं, स्थातव्यं मान्द्यव्यपदेशत इहैव मया । विद्याधराधिपतिं दासीवचनात् कथयित्वा ॥१३६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं परिक्खिवए तस्स माणसे होइ किंपि जं उचियं। तं काहामि तओ सा बीयदिणे पेसए दासिं ॥
जाइ कुमारोवि तहिं तहेव दासी य विन्नवइ तत्थ। विज्जाहररायं जह अपडुतणू अज्ज कणयवई॥१३८॥
अह संभंतो चिंतइ किं सच्चं रोगिणी इमा जाया। ता पुच्छइ पन्नत्तिं सा साहइ पडुसरीरा सा॥१३९॥
तो सो जंपइ कुद्धो तीए सरीरं अहं पडुकरिस्सं। तं पुण सुमरसु इट्ठं देवयमिण्हिं मरसि पावे! ॥१४०॥
पुव्वं च आसि कहियं कणगवईए इमीए जह कुमरो। पच्छन्नो तत्थ ठिओ मुणइ इमं वइयरं सव्वं ॥
तत्तो य सा पयंपइ सरणं सो मह कुमारगुणराओ। निद्दय! निद्दोसाए मारिज्जंतीइ पाव! तए॥१४२॥
तो विज्जाहरराओ पभणइ सो को विसेसओ कहसु। भणिओ नो दासीए सुट्ठु कयं जं तए पुट्ठं १४३
कुमरस्स चरियकहणेण तुह पवित्तेमि कण्णजुयलमहं। धवलइ जुन्हा अच्चंतमलिणवन्नेवि य पयत्थे॥१४४॥
मज्झ विसेसेण पुणो जुत्तं तन्नामगहणमिह समए। मरणसमयम्मि जम्हा सुमरिज्जइ देवयं इट्ठं ॥१४५॥
सो चिय इट्ठो सो चेव देवया मज्झ सामिणीएवि। ता सुणसु सुणसु कुपुरिस! सुपुरिसचरियं कहिज्जंतं॥
जेण समक्खं चिय नरवईण गुणरूवविक्कमबलेण। सोहग्गजयपडायव्व अहम! मह सामिणी गहिया ॥
जेणं चिय गरुयगुणेण सयलसत्थत्थभावियमणेण। दूरट्ठिओवि नाओ तुमंपि केणवि पओगेण॥१४८॥
जेणं तुमं दिट्ठेणवि न होसि भुवणम्मि साहसधणेण। तेण अहमत्तणो कीरमाणमिच्छामि इह रक्खं ॥
आयन्निऊण एयं जाओ तिवलीतरंगियनिडालो। विज्जाहरो हरो इव पभणइ संहरणजायरसो॥१५०॥
तं सरणं सरमाणा मरणं पावेसि तं महापावे!। मह मंडलग्गअग्गी लग्गिस्सइ तस्सवि सरीरे ॥१५१॥

एवं परीक्षिते तस्य मानसे भवति किमपि यदुचितम्। तत्करिष्यामि ततः सा द्वितीयदिने प्रेषयति दासीम् ॥
याति कुमारोऽपि तत्र तथैव दासी च विज्ञपयति तत्र। विद्याधरराजं यथाऽपटुतनुरद्य कनकवती ॥१३८॥
अथ संभ्रान्तश्चिन्तयति किं सत्यं रोगिणीयं जाता। ततः पृच्छति प्रज्ञप्तिं सा कथयति 'पटुशरीरा सा' ॥
ततः स जल्पति क्रुद्धस्तस्याः शरीरमहं पटूकरिष्ये। त्वं पुनः स्मरेष्टं दैवतमिदानीं म्रियसे पापे! ॥१४०॥
पूर्वं चासीत्कथितं कनकवत्याऽस्यै यथा कुमारः। प्रच्छन्नस्तत्र स्थितो जानातीमं व्यतिकरं सर्वम् ॥१४१॥
ततश्च सा प्रजल्पति शरणं स मम कुमारगुणराजः। निर्दय! निर्दोषाया मार्यमाणायाः पाप! त्वया॥१४२॥
ततो विद्याधरराजः प्रभणति स को विशेषतः कथय। भणितस्ततो दास्या सुष्ठु कृतं यत्त्वया पृष्टम्॥१४३॥
कुमारस्य चरितकथनेन तव पवित्रयामि कर्णयुगलमहम्। धवलयति ज्योत्स्नाऽत्यन्तमलिनवर्णानपि पदार्थान् ॥
मम विशेषेण पुनर्युक्तं तन्नामग्रहणमिह समये। मरणसमये यस्मात् स्मर्यते दैवतमिष्टम् ॥१४५॥
स एवेष्टः स एव देवता मम स्वामिन्या अपि। तस्मात् शृणु शृणु कुपुरुष! सुपुरुषचरित्रं कथ्यमानम् ॥
येन समक्षमेव नरपतीनां गुणरूपविक्रमबलेन। सौभाग्यजयपताकेवाधम! मम स्वामिनी गृहीता ॥१४७॥
येनैव गुरुगुणेन सकलशास्त्रार्थभावितमनसा। दूरस्थितोऽपि ज्ञातस्त्वमपि केनापि प्रयोगेण ॥१४८॥
येन त्वं दृष्टेनापि न भवसि भुवने साहसधनेन। तेनाहमात्मनः क्रियमाणामिच्छामीह रक्षाम् ॥१४९॥
आकर्ण्यैतज्जातास्त्रिवलीतरङ्गितललाटः। विद्याधरो हर इव प्रभणति संहरणजातरसः ॥१५०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं पभणंतेणं तेणं आयड्ढिओ सियकिवाणो । दूरीहूओ सव्वोवि परियणो तं तहा दट्ठुं ॥१५२॥
तो हसिऊणं भणियं पयडीहोऊण तेण कुमरेण । रे रे ! अविज्जकुलहर ! विज्जाहर ! किं न लज्जेसि ॥
खग्गं उग्गीरंतो इत्थिवहत्थं हयासलोयाणं । पच्चक्खपिच्छिराणं तहत्तणो पंचभूयाणं ? ॥१५४॥
किञ्च ।
सुत्तुम्मत्तपमत्ते बाले महिलायणे य जो पुरिसो । पहरेइ मुक्कमज्जायसेहरो सो अदट्ठव्वो ॥१५५॥
तुज्झवि उवरिं खग्गं कड्ढंतो को न लज्जइ सयन्नो । इत्थियणमज्झयारे जो सुहडत्तं पयासेसि ?॥१५६॥
किंपुण जह तह दुट्ठाण निग्गहो खत्तिएहिं कायव्वो । ता न हवसि तुममिण्हिं भणिहिसि वत्ता न मे कहिया ॥
एवं भणिउं कुमरो कोसाओ कड्ढए तओ खग्गं । सोवि गहिउग्गखग्गो वलेइ तस्सुवरि कोवेण ॥१५८॥
आवडिओ संगामो कुमरेणं निहणिओ स दुट्ठप्पा । तो हिट्ठाओ ताओ तिन्निवि कन्नाओ तस्सरणं ॥
पत्ताओ भणंति तयं अम्हे एएण वयणबद्धाओ । मोयावियाउ तुमए, तो कुमरो भणइ कह तस्स ॥१६०॥
वयणच्छलम्मि पडिया, एगा तो कहइ नियपिउगिहम्मि । कुट्टिमतले लुलंती एएण हढा निया रन्ने ॥
उग्गीरिओ ममोवरि जमजीहादीहतरलकरवालो । मरणभयकंपिरा हं भणिया एएण पावेण ॥१६२॥
जइ मन्नसि मह वयणं तो जीयं तुज्झ इयरहा नेय । किं तं कहेहि भणिए तेण इमं साहियं मज्झ ॥१६३॥
जह पन्नत्ती विज्जा पारद्धा साहिउं मए तत्थ । जावम्मि कीरमाणे छम्मासे जाव पइदियहं ॥१६४॥
समवयसमवन्नसलक्खणाहिं तरुणीहिं रायकन्नाहिं । विहियव्वं पिच्छणयं पुरओ पन्नत्तिदेवीए ॥१६५॥

तं शरणं सरन्ती मरणं प्राप्नोषि त्वं महापापे ! । मम मण्डलाग्राग्निर्लगिष्यति तस्यापि शरीरे ॥१५१॥
एवं प्रभणता तेनाकृष्टः शितकृपाणः । दूरीभूतः सर्वोऽपि परिजनस्तं तथा दृष्ट्वा ॥१५२॥
ततो हसित्वा भणितं प्रकटीभूतेन तेन कुमारेण । रे रे ! अविद्याकुलगृह ! विद्याधर ! किं न लज्जसे ॥१५३॥
खड्गमुद्गिरन् स्त्रीवधार्थं हताशलोकेषु । प्रत्यक्षदर्शनशीलेषु तथात्मनः पञ्चभूतेषु ? ॥१५४॥
सुप्तोन्मत्तप्रमत्ते बाले महिलाजने च यः पुरुषः । प्रहरति मुक्तमर्यादशेखरः सोऽद्रष्टव्यः ॥१५५॥
तवाप्युपरि खड्गं कर्षन् को न लज्जते सकर्णः । स्त्रीजनमध्ये यः सुभटत्वं प्रकाशयसि ? ॥१५६॥
किन्तु यथा तथा दुष्टानां निग्रहः क्षत्त्रियैः कर्तव्यः । तस्मान्न भवसि त्वमदानीं, भणिष्यसि वार्ता न मे कथिता॥
एवं भणित्वा कुमारः कोषात् कर्षति ततः खड्गम् । सोऽपि गृहीतोग्रखड्गो वलते तस्योपरि कोपेन ॥१५८॥
आपतितः संग्रामः, कुमारेण निहतः स दुष्टात्मा । ततोऽधस्तस्तास्तिस्रोऽपि कन्यास्तच्छरणम् ॥१५९॥
प्राप्ता भणन्ति तं वयमेतेन वचनबद्धाः । मोचितास्त्वया ततः कुमारो भणति कथं तस्य ॥१६०॥
वचनच्छले पतिताः, एका ततः कथयति निजपितृगृहे । कुट्टिमतले लोठन्त्येतेन हठान्नीताऽरण्ये ॥१६१॥
उद्गीर्णो ममोपरि यमजिह्वादीर्घतरलकरवालः । मरणभयकम्पनशीलाहं भणितैतेन पापेन ॥१६२॥
यदि मन्यसे मम वचनं ततो जीवितं तवेतरथा नैव । किं तत् कथय भणिते तेनेदं कथितं मम ॥१६३॥
यथा प्रज्ञप्तिविद्या प्रारब्धा साधयितुं मया तत्र । जापे क्रियमाणे षण्मासान् यावत् प्रतिदिवसम् ॥१६४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता एक्का ताव तुमं पइदियहं एज्ज मह विमाणेण । तह पुरिससंगमोवि हु विहियव्वो मह अणुन्नाए ॥
कहियव्वं च न कस्सवि एयं इय कारिया य सवहसयं । सिक्खवियाहं वीणं अन्नाउवि तिन्नि कुमरीओ॥
मन्नावियाउ वयणं जहेव हं तह कलाउ सिक्खविया । भणियं च ताण समुहं जह तुम्हाणं विमाणाइं ॥
देवीअहिट्ठियाइं जत्थ व तत्थ व निसाए एहिंति । आरुहिय ताइं सिग्घं पन्नत्तीदेविभवणम्मि ॥१६९॥
आगंतव्वं तत्थ य पिच्छणयछणो खणं विहेयव्वो। इत्तियदिणाइं सिरसा पडिच्छिया तस्स इय आणा ॥
किंतु न सीलब्भंसो तेण कओ अम्ह इय गुणो तस्स । तुम्ह पसाएणिण्हिं संजायं सुत्थमम्हाणं ॥१७१॥
तो कुमरेणं भणियं जुत्तं तुम्हाण संपयं गंतुं । नियनियजणयगिहेसु जम्हा भयणीउ मह तुम्हे ॥१७२॥
ताउ भणंति कह तत्थ वच्चिमो तव्विमाणरहियाओ ? । तो कुमरसुमरणेण विज्जासिद्धो लहुं पत्तो ॥१७३॥
आरोविउं विमाणे ताओ सो नेइ नियनियगिहेसु । तह कणगवइचेडीसहियं कुमरंपि तग्गेहे ॥१७४॥
तो विज्जाहरमरणाइवइयरं साहिऊण दासीए। भणियं निब्भयहियया सम्मं अणुवत्तहि कुमारं ॥१७५॥
तो कणगवई जंपइ दुब्बलहिययाए इत्तियदिणाणि । तुम्हं परिचरणाए नाह ! मए वंचिओ अप्पा ॥
तह अत्थि तस्स बंधू अइप्पयंडोत्ति कंपइ मणं मे । मा भाहि भणइ कुमरो बंधुदसं सोवि लहुं लहिही ॥
तो नेहसारसरिसं खणं गमेउं तहिं चिय पसुत्तो । कणगवईए सहिओ उक्खित्तो गयणमग्गम्मि ॥१७८॥
तच्छुल्लभाउणा सो खित्तो जलहिम्मि दिव्वजोएण । संपत्तफलहखंडो उत्तिन्नो सत्तरं तेण ॥१७९॥

समवयःसमवर्णसलक्षणाभिस्तरुणीभी राजकन्याभिः । विधातव्यं प्रेक्षणकं पुरतः प्रज्ञप्तिदव्याः ॥१६५॥
तस्मादेका तावत्त्वं प्रतिदिवसमेया मम विमानेन । तथा पुरुषसंगमोऽपि खलु विधातव्यो ममानुज्ञया॥१६६॥
कथयितव्यं च न कस्याप्येतादिति कारिता च शपथशतम् । शिक्षिताऽहं वीणामन्या अपि तिस्रः कुमार्यः ॥
मानिता वचनं यथैवाहं तथा कलाश्च शिक्षिताः । भणितं च तासां संमुखं यथा युष्माकं विमानानि॥१६८॥
देव्याधिष्ठितानि यत्र वा तत्र वा निशि एष्यन्ति । आरुह्य तानि शीघ्रं प्रज्ञप्तिदेवीभवने ॥१६९॥
आगन्तव्यं तत्र च प्रेक्षणकक्षणः क्षणं विधातव्यः । इयद्दिनानि शिरसा प्रतीष्टा तस्येयमाज्ञा ॥१७०॥
किन्तु न शीलभ्रंशस्तेन कृतोऽस्माकमिति गुणस्तस्य । युष्माकं प्रसादेनेदानीं संजातं सौस्थ्यमस्माकम् ॥
ततः कुमारेण भणितं युक्तं युष्माकं सांप्रतं गन्तुम् । निजनिजजनकगृहेषु यस्माद्भगिन्यो मम यूयम् ॥१७२॥
ता भणन्ति कथं तत्र व्रजामस्तद्विमानरहिताः ? । ततः कुमारस्मरणेन विद्यासिद्धो लघु प्राप्तः ॥१७३॥
आरोप्य विमाने ताः स नयति निजनिजगृहेषु । तथा कनकवतीचेटीसहितं कुमारमपि तद्गेहे ॥१७४॥
ततो विद्याधरमरणादिव्यतिकरं कथयित्वा दास्या । भणितं निर्भयहृदया सम्यगनुवर्तस्व कुमारम् ॥१७५॥
ततः कनकवती जल्पति दुर्बलहृदययेयद्दिनानि । तव परिचरणायां नाथ ! मया वञ्चित आत्मा ॥१७६॥
तथाऽस्ति तस्य बन्धुरतिप्रचण्ड इति कम्पते मनो मे। मा भैषीर्भणति कुमारो बन्धुदशां सोऽपि लघु लप्स्यसे॥
ततः स्नेहसारसदृशं क्षणं गमयित्वा तत्रैव प्रसुप्तः । कनकवत्या सहित उत्क्षिप्तो गगनमार्गे ॥१७८॥

---

१ ग. तुम्हेहिं ताइं रहिउं प° ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जलनिहितडम्मि तत्तो तावसकुमरेण आसमपयम्मि । नीओ तत्थ य दिट्ठा कणगवई तो कुमारेण॥१८०॥
पुट्ठा य कहिं खित्ता तेणं, सा कहइ पव्वए, तत्तो । पमुइयचित्तो पत्तो कुलवइणो पायमूलम्मि॥१८१॥
कुमरो वंदणपुव्वं आलावं किंचि तेण सह काउं । उवविट्ठो तो भणिओ कुलवइणा तुम्ह भज्जेसा ?॥१८२॥
तो भणियं कुमरेणं आमं, तो कुलवई कहइ एवं । जलनिहितडम्मि दिट्ठा उब्बंधंती इहप्पाणं ॥१८३॥
पडिसिद्धा अम्हेहिं कहियं च इमीए वल्लहो तुज्झ । मिलिही इहेव तइए दिणम्मि, जायं च तं सव्वं॥१८४॥
भयवं ! अणुग्गहो मे विहिओ तुम्हेहिं परहियरएहिं । इच्चाइ जंपिऊणं पत्तो कुमरो पियापासे ॥१८५॥
भणियं य तेण सुंदरि ! विहिणो सच्छंदचारिणो चरियं । एयं तं जं सत्थे निसुणिज्जइ पुव्वमुणिकहियं।
विहडइ संघडियंपि हु पुणोवि संघडइ विहडियं संतं । संघडणविहडणावावडेण विहिणा जणो नडिओ।
पुव्वभवोवज्जियगरुयदुक्कयवसवत्तिणो जए जीवा । तं नत्थि किंपि दुक्खं संसारे जं न पाविंति॥१८८॥
सुन्नारन्नाइं समासयंति चइऊणमिह कलत्ताइं । एएण कारणेणं सुंदरि ! मुणिणो महाभागा ॥१८९॥
भोगामिसम्मि गिद्धा लुद्धा गिहवासधणकलत्तेसु । अम्हारिसा अहन्ना किं सुंदरि ! जं न पावंति?॥१९०॥
इच्चाइ जंपिऊणं कणगवइं गहिय गिरिनइं पत्तो । तो मज्जिउं जहिच्छं भुंजंति फलाइं, अह दोवि॥१९१॥
तत्थेव पसुत्ताइं रयणीए अवहियाइं तेणेव । खित्ताइं पुणो रयणायरम्मि पुणरवि य मिलियाइं ॥१९२॥
किं अज्जउत्त ! एयं, कुमरो पभणेइ सुंदरि ! न किंपि । विहिविलसियं विमोत्तुं एसा तो भणइ किं एवं ?॥

तत्क्षुद्रभ्रात्रा स क्षिप्तो जलधौ दैवयोगेन । संप्राप्तफलकखण्ड उत्तीर्णः सत्वरं तेन ॥१७९॥
जलनिधितटे ततस्तापसकुमारेणाश्रमपदे । नीतस्तत्र च दृष्टा कनकवती ततः कुमारेण ॥१८०॥
पृष्टा च क्व क्षिप्ता तेन, सा कथयति पर्वते, ततः । प्रमुदितचित्तः प्राप्तः कुलपतेः पादमूले ॥१८१॥
कुमारो वन्दनपूर्वमालापं किञ्चित् तेन सह कृत्वा । उपविष्टस्ततो भणितः कुलपतिना तव भार्यैषा? ॥१८२॥
ततो भणितं कुमारेणाम, ततः कुलपतिः कथयत्येवम् । जलनिधितटे दृष्टोद्बध्नन्तीहात्मानम् ॥१८३॥
प्रतिषिद्धाऽस्माभिः कथितं चास्यै वल्लभस्तव । मेलिष्यतीहैव तृतीये दिने, जातं च तत् सर्वम् ॥१८४॥
भगवन् ! अनुग्रहो मे विहितो युष्माभिः परहितरतैः । इत्यादि जल्पित्वा प्राप्तः कुमारः प्रियापार्श्वे ॥१८५॥
भणितं च तेन सुन्दरि ! विधेः स्वच्छन्दचारिणश्चरितम् । एतत्तद् यच्छास्त्रे श्रूयते पूर्वमुनिकथितम्॥१८६।
विघटते संघटितमपि खलु पुनरपि संघटते विघटितं सत् । संघटनविघटनव्यापृतेन विधिना जनो नटितः॥१८७।
पूर्वभवोपार्जितगुरुदुष्कृतवशवर्तिनो जगति जीवाः । तन्नास्ति किमपि दुःखं संसारे यन्न प्राप्नुवन्ति ॥१८८॥
शून्यारण्यानि समाश्रयन्ति त्यक्त्वेह कलत्राणि । एतेन कारणेन सुन्दरि ! मुनयो महाभागाः ॥१८९॥
भोगामिषे गृद्धा लुब्धा गृहवासधनकलत्रेषु । अस्मादृशा अधन्याः किं सुन्दरि ! यन्न प्राप्नुवन्ति ? ॥१९०।
इत्यादि जल्पित्वा कनकवतीं गृहीत्वा गिरिणदीं प्राप्तः । ततो मज्जित्वा यथेच्छं भुञ्जाते फलानि, अथ द्वावपि।
तत्रैव प्रसुप्तौ रजन्यामपहृतौ तेनैव । क्षिप्तौ पुना रत्नाकरे पुनरपि च मिलितौ ॥१९२॥
किमार्यपुत्र ! एतत्, कुमारः प्रभणति सुन्दरि ! न किमपि । विधिविलसितं विमुच्यैषा ततो भणति किमेवम्?।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जओ।

दिव्वस्स मत्थए पाडिऊण सव्वं सहंति काउरिसा। दिव्वोवि ताण संकइ जाणं तेओ परिप्फुरइ॥१९४॥
ता मा मुयसु महायस! उच्छाहं भुवणपसरियपयाव!। इय मज्झत्थो तं जाव ताव अन्नो परिप्फुरइ॥
तं कत्थ गयं तुह नाह! पोरिसं गरुयसत्तुनिट्ठवणं। इयरेणेव सहिज्जइ जमियं दुक्खाण रिंछोली?॥
आयन्निऊण वयणं कणगवईए तओ भणइ कुमरो। दिव्वस्सव अदिट्ठस्स अरिणो इह करउ किं पुरिसो?॥
इय भणिउं रयणीए अपमत्तो जाव चिट्ठए ताव। सो पत्तो तो धरिउं पाएसुं भामिउं गयणे॥१९८॥
अप्फालिस्सइ धरणीए जाव ता तेण विरसमारसियं। रक्खसु कुमार! रक्खसु खमसु इमे मज्झ अवराहे॥
न पुणो एवं काहं तुज्झाहं किंकरो तओ तेण। मुक्को दयाए खयरो दीणेसु न दारुणा गरुया॥२००॥
आसमपयम्मि पुणरवि पत्ताइं दोवि कुलवइसमीवं। कइवयदिणाइं तत्थवि तावसनेहेण ठायंति॥२०१॥
कणगवईवि हु सह तावसीहिं कीलेइ विविहकीलाहिं। कुमरो कुलवइपासे निसुणेइ य धम्मसत्थाइं॥
अह कुलवइमन्नदिणे कुमरो विन्नवइ मज्झ वसणमिणं। पहु! परमूसवभावेण परिणयं तुम्ह दंसणओ॥
कत्थन्नह विट्ठाहारसूयरो कत्थ सालिदहिभत्तं। कहमेस विसयगिद्धो जणो कहि तुम्ह पयसेवा?॥२०४॥
किंतु करिस्सइ अधिइं ताओ ता लहउ तुह पसायाओ। समयंतरम्मि तुहवयणअमयपाणं जणो एसो॥
तो भणइ कुलवई विणयवित्तिकुलभवण! जीवसु चिरं तं। आसंसेमो अन्नं किं तुह गुणलच्छिकमलस्स?॥

यतः।

दैवस्य मस्तके पातयित्वा सर्वं सहन्ते कापुरुषाः। दैवमपि तेभ्यः शङ्कते येषां तेजः परिस्फुरति॥१९४॥
तस्माद् मा मुञ्च महायशः! उत्साहं भुवनप्रसृतप्रताप!। इति मध्यस्थस्त्वं यावत्तावदन्यः परिस्फुरति॥१९५॥
तत् कुत्र गतं तव नाथ! पौरुषं गुरुशत्रुनिष्ठापनम्। इतरेणेव सह्यते किमियं दुःखानां पङ्क्तिः?॥१९६॥
आकर्ण्य वचनं कनकवत्यास्ततो भणति कुमारः। दैवस्येवादृष्टस्यारेरिह करोतु किं पुरुषः?॥१९७॥
इति भणित्वा रजन्यामप्रमत्तो यावत् तिष्ठति तावत्। स प्राप्तस्ततो धृत्वा पादयोर्भ्रमयित्वा गगने॥१९८॥
आस्फालयिष्यति धरण्यां यावत्तावत्तेन विरसमारसितम्। रक्ष कुमार! रक्ष क्षमस्वेमान् ममापराधान्॥१९९॥
न पुनरेवं करिष्ये तवाहं किङ्करस्ततस्तेन। मुक्तो दयया खचरो दीनेषु न दारुणा गुरवः॥२००॥
आश्रमपदे पुनरपि प्राप्तौ द्वौ कुलपतिसमीपम्। कतिपयादिनानि तत्रापि तापसस्नेहेन तिष्ठतः॥२०१॥
कनकवत्यपि खलु सह तापसीभिः क्रीडति विविधक्रीडाभिः। कुमारः कुलपतिपार्श्वे शृणोति च धर्मशास्त्राणि॥
अथ कुलपतिमन्यदिने कुमारो विज्ञपयति मम व्यसनमिदम्। प्रभो! परमोत्सवभावेन परिणतं तव दर्शनतः॥
क्वान्यथा विष्ठाहारसूकरः क्व शालिदधिभक्तम्। कथमेष विषयगृद्धो जनः क्व युष्माकं पादसेवा?॥२०४॥
अहह! असंबद्धप्रलपितुर्बटुकस्य पश्य मम पुरतः। जिह्वायाश्चञ्चलत्वं ततो मन्त्री भणति प्रसद्य॥५८॥
एष एव पृच्छ्यतां देवाकुशलस्य कारणं किमपि। किमेभी रोषैर्विकल्पबहुलैर्भणितैः ?॥५९॥
ततो भणति नृपो भण भद्र! कारणमकुशले पुरजनस्य। जल्पति देव! श्रूयतां मनः प्रसन्नं कृत्वा॥६०॥
नरवर! वरोऽपि दैवं दैवज्ञः शक्नोति न रक्षितुम्। यद्भावि शुभमशुभं तदेव स कथयत्यविकल्पम्॥६१॥
तस्माद् मा रुष्य मम यथादृष्टं भावि परिकथयतः। इति भणित्वा दैवज्ञो निर्भयचित्तः कथयत्येवम्॥६२॥
मुसलप्रमाणघनधाराधोरण्या धरायां तथा कथमपि। धाराधरः प्रवृष्टिं करिष्यति धीराणां धूनितशिराः॥६३॥
अकलितगुरुस्थलगर्तोरुशालदेवकुलमालाधवलगृहम्। एकजलमेव भविष्यति नगरं गुरुनीरनिधिसदृशम्॥६४॥
इति तस्मिन् कथयत्यपि परिवृत्त्योत्तरः स्थितः पवनः। चषकमुखमात्रं समुन्नतं मेघखण्डं च॥६५॥
ततो भणति ब्राह्मणो भो उत्तरतः पश्यताभ्रकं लोकाः!। प्रच्छादयिष्यत्येतत्समग्रगगनाङ्गणं क्रमशः॥६६॥
तत आस्थानस्थो लोकः सर्वोऽपि तिष्ठत्यूर्ध्वमुखः। उत्पतितुमिव गगने तद्वचन इव भयभीतः॥६७॥
यथा यथा पवनः प्रसरति तथा तथा प्रसरति मेघखण्डमपि। गगनाङ्गणपरिष्वष्कणमहमहमिकयेव कुर्वन्ति॥
भृतगिरिकन्दरोदरधराविवरो झटिति स्तनितशब्दोऽपि। स्फोटयन् ब्रह्माण्डं दिक्करटिरव इव विस्तृतः॥६९॥

Jain Education International   For Private & Personal Use Only   www.jainelibrary.org

किञ्च ।

तडिदंडाडंबरनिब्भरंबरं तक्खणे जयं जायं । पलयानलजडिलविलोलजालमालाकवलियंव ॥७१॥
इय नरवइपमुहजणो जणियच्छरिओ खणं निरिक्खंतो । जा चिट्ठइ ता लग्गो वरिसेउं मुसलधाराहिं ॥
तो तक्खणेण तह कहवि पसरिओ पउरनीरपूरोवि । जह वोलिउं पयट्टो पलए जलहिव्व नरलोयं॥७३॥
तो जाओ पुरखोहो खुहिओ ता नरवईवि चिंतेइ । किमकाले संजाओ अहह अहो! पलयकालोऽयं ? ॥
एवं चिंततस्सवि अत्थाणसहाएवि पावियं सलिलं । उट्ठेउं तो चडिओ सत्तमभूमीए महिनाहो ॥७५॥
मइसायरेण सहिओ वडुएण य ताव तत्थ पुरलोयं । अक्कंदभरक्कंतं विलवंतं निसुणए एवं ॥७६॥
हा वच्छ वच्छ! गच्छसु पाणे गहिउं गुरुम्मि देवउले । मा मं पडिक्ख नीरं उपसरइ पलयजलहिव्व ॥
अन्ना य भणइ नारी वच्छ ! तुमं सरसु जिणनमुक्कारं । आहारं पच्चक्खसु सागारं अणसणं काउं॥७८॥
इय करुणं विलवंतं जणं सुणेऊण दुक्खिओ राया । जा चिट्ठइ ता नीरं सत्तमभूमीए संपत्तं ॥७९॥
तं पिच्छिउं नरिंदो पभणइ मंतिस्स संमुहं एयं । अम्हाण अकयधम्माण आगयं संपयं मरणं ॥८०॥
सुकयं न कयं परिहीणमाउयं आवइं पलोएउं । पासायसिंगसंठियद्धउव्व मह धुव्वए हिययं ॥८१॥
विसयासत्तेण मए इत्तियकालो मुहाइ गमिओ जं । न कओ जिणिंदधम्मो सावयकुलसंभवेणावि ॥८२॥
एमेव गओ जम्मो असारसंसारकारणरयस्स । पच्चासन्ने मरणे अहमिण्हिं किं करिस्सामि ? ॥८३॥
हा हा ! हओ म्हि इण्हिं विहलमणुयत्तणं गमंतेण । नियपुव्वपुरिसमेरा भग्गा भग्गासएण मए ॥८४॥

प्रसरत्तटतटारावभृतभुवनान्तरस्तडिद्दण्डः । सुरकुम्भिकुम्भोपरिशातकुम्भाभरणकिरण इव ॥७०॥
तडिद्दण्डाडम्बरनिर्भराम्बरं तत्क्षणे जगज्जातम् । प्रलयानलजटिलविलोलज्वालामालाकवलितमिव ॥७१॥
इति नरपतिप्रमुखजनो जनिताश्चर्यः क्षणं निरीक्षमाणः । यावत्तिष्ठति तावल्लग्नो वर्षितुं मुसलधाराभिः॥७२॥
ततस्तत्क्षणेन तथा कथमपि प्रसृतः प्रचुरनीरपूरोऽपि । यथाऽतिक्रमितुं प्रवृत्तः प्रलये जलधिरिव नरलोकम् ॥
ततो जातः पुरक्षोभः क्षुभितस्तस्मान्नरपतिरपि चिन्तयति । किमकाले संजातोऽहह अहो! प्रलयकालोऽयम् ? ॥
एवं चिन्तयतोऽप्यास्थानसभायामपि प्राप्तं सलिलम् । उत्थाय ततश्चटितः सप्तमभूम्यां महीनाथः ॥७५॥
मतिसागरेण सहितो बटुकेन च तावत्तत्र पुरलोकम् । आक्रन्दभराक्रान्तं विलपन्तं शृणोत्येवम् ॥७६॥
हा वत्स वत्स! गच्छ प्राणान् गृहीत्वा गुरौ देवकुले । मा मां प्रतीक्षस्व नीरमुपसरति प्रलयजलधिरिव ॥७७॥
अन्या च भणति नारी वत्स ! त्वं स्मर जिननमस्कारम् । आहारं प्रत्याख्याहि साकारमनशनं कृत्वा ॥७८॥
इति करुणं विलपन्तं जनं श्रुत्वा दुःखितो राजा । यावत्तिष्ठति तावन्नीरं सप्तमभूमौ संप्राप्तम् ॥७९॥
तद् दृष्ट्वा नरेन्द्रः प्रभणति मन्त्रिणः संमुखमेतत् । अस्माकमकृतधर्मणामागतं सांप्रतं मरणम् ॥८०॥
सुकृतं न कृतं परिहीणमायुरापदं प्रलोक्य । प्रासादशृङ्गसंस्थितध्वज इव मम धूयते हृदयम् ॥८१॥
विषयासक्तेन मयैतावत्कालो मुधा गमितो यत् । न कृतो जिनेन्द्रधर्मः श्रावककुलसंभवेनापि ॥८२॥
एवमेव गतं जन्मासारसंसारकारणरतस्य । प्रत्यासन्ने मरणेऽहमिदानीं किं करिष्यामि ? ॥८३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सावज्जरज्जकज्जे अणज्जमज्जायमायरंतेण । हा ! सव्वसंगचाओ न कओ विसएसु गिद्धेण ॥८५॥
कोडी वराडीयाए वेरुलीयमणी य कायखंडेण । चिंतामणी उवलेणं कप्पतरू थोहरेणंव ॥८६॥
हा ! हारिओ मए जं दुक्खसरूवाण दुक्खहेऊण । विसयाणं सेवाए गमिओ जम्मो अकयधम्मो॥८७॥
किं कुणिमो किं सरिमो किं भणिमो संकडम्मि आवडिए ? । इअ पभणंतस्स तहिं नीरं पत्तं सुवेगेण ॥
ता जा नमोकारं मणम्मि चिंतेइ ताव बोहित्थं । अभिमुहमिंतं पिच्छइ उम्मिट्ठगयंव अमणुंस्सं ॥८९॥
सत्तमभूमीए वरंडियाए वेगेण तं समावडियं । मइसागरेण तत्तो भणियं आरुहउ इह देवो ॥९०॥
जं देवमिमाउ आवईउ नित्थारिउं सुरो कोवि । एयं ढोयइ पुन्नोदएण परिपेरिओ तुम्ह ॥९१॥
इय सुणिउं नरनाहो आरुहणत्थं महत्थबोहित्थे । जा उक्खिवेइ चरणं वरंडियाठवियवामपओ ॥९२॥
ताव न जलं न मेहो नय बोहित्थं न विज्जुगज्जीओ । सुत्थावत्थं तु परं पासइ पमुइयमणं लोयं॥९३॥
कत्थवि संगीयरवं कत्थवि पारद्धविविहकलहट्टं । कत्थवि पयडियनट्टं तो राया विम्हिओ भणइ ॥९४॥
किं अणणुभूयपुव्वं एयं अच्चब्भुयं गणयपवर !। सो भणइ अहं निव ! इंदजालिओ न उण जोइसिओ ॥
तत्तो विम्हयपरवसहियओ राया सुवन्नकोडिदुगं । वत्थाई अन्नंपि हु दाविय बडुयं विसज्जेइ ॥९६॥
मइसागरपमुहजणं अवरोहसमन्नियं भवविरत्तो । भणइ नरिंदो दिट्ठं वियंभियं इंदयालस्स ? ॥९७॥
दिट्ठं सव्वंपि इमं तुम्ह पसाएण तेवि जंपंति । अइअच्चब्भुयमेयं केणवि न कयावि दिट्ठंति ॥९८॥

हा हा ! हतोऽस्मीदानीं विफलमनुजत्वं गमयता । निजपूर्वपुरुषमर्यादा भग्ना भग्नाशयेन मया ॥८४॥
सावद्यराज्यकार्येऽनार्यमर्यादामाचरता । हा ! सर्वसङ्गत्यागो न कृतो विषयेषु गृद्धेन ॥८५॥
कोटिर्वराटिकया वैडूर्यमणिश्च काचखण्डेन । चिन्तामणिरुपलेन कल्पतरुः स्नुह्येव ॥७६॥
हा ! हारितो मया यद् दुःखस्वरूपाणां दुःखहेतूनाम् । विषयाणां सेवायां गमितं जन्माकृतधर्म ॥८७॥
किं कुर्मः किं सरामः किं भणामः संकटे आपतिते । इति प्रभणतस्तत्र नीरं प्राप्तं सुवेगेन ॥८८॥
तदा यावन्नमस्कारं मनसि चिन्तयति तावद् यानपात्रम् । अभिमुखमायत् पश्यत्युन्मृष्टगजमिवामनुष्यम्॥८९॥
सप्तमभूमेर्वरण्डिकायां वेगेन तत् समापतितम् । मतिसागरेण ततो भणितमारोहत्विह देवः ॥९०॥
यद् देवमस्या आपदो निस्तारयितुं सुरः कोऽपि । एतड्ढौकते पुण्योदयेन परिप्रेरितो युष्माकम् ॥९१॥
इति श्रुत्वा नरनाथ आरोहणार्थं महार्थयानपात्रे । यावदुत्क्षिपति चरणं वरण्डिकास्थापितवामपादः ॥९२॥
तावन्न जलं न मेघो नच यानपात्रं न विद्युद्गर्जयः । सुस्थावस्थं तु परं पश्यति प्रमुदितमनसं लोकम् ॥९३॥
क्वापि संगीतरवं क्वापि प्रारब्धविविधकलहट्टम् । क्वापि प्रकटितनाट्यं ततो राजा विस्मितो भणति ॥९४॥
किमननुभूतपूर्वमेतदत्यद्भुतं गणकप्रवर ! । स भणत्यहं नृप ! इन्द्रजालिको न पुनर्ज्यौतिषिकः ॥९५॥
ततो विस्मयपरवशहृदयो राजा सुवर्णकोटिद्विकम् । वस्त्राद्यन्यदपि च दापयित्वा बटुकं विसृजति ॥९६॥
मतिसागरप्रमुखजनमवरोधसमन्वितं भवविरक्तः । भणति नरेन्द्रो दृष्टं विजृम्भितमिन्द्रजालस्य ? ॥९७॥
दृष्टं सर्वमपीदं तव प्रसादेन तेऽपि जल्पन्ति । अत्यद्भुतमेतत्केनापि न कदापि दृष्टमिति ॥९८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो भणइ नरवरिंदो जारिसमिममिंदजालविप्फुरियं । तारिसमिह संसारे सव्वं बहुदुक्खभंडारे ॥९९॥
रूवं थामं पेमं तारुन्नं संपया य आउं च । पवणपहल्लिरदब्भग्गलग्गजलबिंदुतरलतरं ॥१००॥
तथाहि;—
कुट्ठाइवाहिविहुरियनासानहपमुहअंगुवंगाण । पज्जुन्नसमाणवि रूवसंपया होइ बीभच्छा ॥१०१॥
वाहिपिवासाछुहसुसियरुहिरमंसाइधाउसंताणा । मारुअतुल्लबलावि हु कट्ठेणुट्ठंति ठाणाओ ॥१०२॥
पेमाणवि भज्जाकट्ठसिट्ठिरहुतिलयसीयपभिईण । को न मुणइ दारुणपरिणईण सोऊण वित्तंते ॥१०३॥
तारुन्नारन्नंपि हु विविहविलासुल्लसंतसालिल्लं । डज्झइ जरदवजालावलीए विहलं अहन्नाणं ॥१०४॥
किसलयदलग्गसंलग्गजललवुल्लासविलसिरसिरीए । को वीससइ सिरीए असईएव दोसपउराए ? ॥१०५॥
अणवरयकमलसंवरणलग्गनालग्गकंटयव्व सिरी । कत्थइ पयं निवेसइ न निब्भरं अज्जवि खणंपि ।१०६।
संपन्नमूलदढदंडकोसमंडलवियासपउरंपि । दिवसवसाणे कमलंव मुयइ मणुएसरं लच्छी ॥१०७॥
इय दिणयरमुत्तीइव बहुविहसंकंतिलद्धपसराए । एयाए को न तविओ जयम्मि लच्छीए सच्छंदं ?।१०८।
पइसमयगलंते आउयम्मि निरुवक्कमेवि थिरबुद्धी । जेसिं तेसिं विज्जूए दुकरा नो थिरत्तासा ॥१०९॥
इय मुणिऊण असारं सव्वं संसारविलसियमियाणिं । विसयसुहाभासे चंचलम्मि को हंत ! पडिबंधो ? ॥
ता इत्तियकालं मे मुहाइ गमिया नराइसामग्गी । पुव्वपुरिसाणुचिन्ने संपइ मग्गम्मि लग्गिस्सं ॥१११॥
इय भणिउं हरिविक्कमकुमरं रज्जे ठवेवि सुहलग्गे । दाऊण धणं धम्मे जाओ समणो स एस अहं॥११२॥

ततो भणति नरवरेन्द्रो यादृशमिदमिन्द्रजालविस्फुरितम् । तादृशमिह संसारे सर्वं बहुदुःखभाण्डागारे ॥९९॥
रूपं स्थाम प्रेम तारुण्यं संपच्चायुश्च । पवनप्रचलद्दर्भाग्रलग्नजलबिन्दुतरलतरम् ॥१००॥
कुष्ठादिव्याधिविधुरितनासानखप्रमुखाङ्गोपाङ्गानाम् । प्रद्युम्नसमानामपि रूपसंपद् भवति बीभत्सा ॥१०१॥
व्याधिपिपासाक्षुच्छुष्करुधिरमांसादिधातुसंताना । मारुततुल्यबला अपि खलु कष्टेनोत्तिष्ठन्ति स्थानात् ॥१०२॥
प्रेम्णामपि भार्याकाष्ठश्रेष्ठिरघुतिलकसीताप्रभृतीनाम् । को न जानाति दारुणपरिणतीनां श्रुत्वा वृत्तान्तान् ? ॥
तारुण्यारण्यमपि खलु विविधविलासोल्लसच्छालकम् । दह्यते जरादवज्वालावल्या विफलमधन्यानाम् ॥१०४॥
किशलयदलाग्रसंलग्नजललवोल्लासविलसितृश्रियम् । को विश्वसिति श्रियमसतीमिव दोषप्रचुराम् ? ॥१०५॥
अनवरतकमलसंवरणलग्ननालाग्रकण्टकेव श्रीः । क्वचित्पदं निवेशते न निर्भरमद्यापि क्षणमपि ॥१०६॥
संपन्नमूलदृढदण्डकोशमण्डलाविकासप्रचुरमपि । दिवसावसाने कमलमिव मुञ्चति मनुजेश्वरं लक्ष्मीः ॥१०७॥
इति दिनकरमूर्त्येव बहुविधसंक्रान्तिलब्धप्रसरया । एतया को न तापितो जगति लक्ष्म्या स्वच्छन्दम् ? १०८
प्रतिसमयगलत्यायुषि निरुपक्रमेऽपि स्थिरबुद्धिः । येषां तेषां विद्युतो दुष्करा नो स्थिरत्वाशा ॥१०९॥
इति ज्ञात्वाऽसारं सर्वं संसारविलसितमिदानीम् । विषयसुखाभासे चञ्चले को हन्त ! प्रतिबन्धः ? ॥११०॥
तस्मादेतावत्कालं मया मुधा गमिता नरादिसामग्री । पूर्वपुरुषानुचीर्णे संप्रति मार्गे लगिष्यामि ॥१११॥

---

१ ख. विरसत्तं ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

नियअणुहूयं जइवि हु साहिज्जंतं जणेइ लहुयत्तं। तुम्हारिसेसु नरवर! तं चिय गुणकारणं होइ ॥११३॥
तो कम्मिंधणअनलेणिमिणा चरिएण नलनरिंदस्स। उज्जोइयाउ झीणं मणाउ अन्नाणसंतमसं ॥११४॥
तो भणइ महासत्ताण नाह! तुम्हारिसाण तुट्टंति। निवलच्छिबंधसंबंधबंधणाणीह जइ तहवि ॥११५॥
घणकम्मनिविडबंधणबद्धाणं विगयसुद्धसद्धाणं। अम्हारिसमुद्धाणं दूरे सद्धम्मबुद्धीवि ॥११६॥
दूरतरेणं सुगुरूण संगमो किंतु नाह! अइगरुयं। मन्ने समज्जियं चिय पुन्नं पावंपि पुव्वभवे ॥११७॥
तेग तुह पायकमलं कमलसरं पिव मरुम्मि पणएण। लद्धं मिगसाहिज्जा सक्केमि न सेविउं कीवो ॥११८॥
उक्तं च;—

"महद्भिः पापात्मा विरलमपि सङ्गं न लभते, वियोगं प्राप्नोति क्षणमपि न तैः पुण्यसहितः।
अतः किञ्चित् पापं सुकृतमपि शङ्के स्वविषये, भवद्भिः संसर्गः कथमथ कथं चैष विरहः? ॥"

एवं च ठिए धम्मस्स जस्स मह अत्थि जोग्गया सामि!। तव्विसए आएसो मह दिज्जउ तो मुणी आह ॥
अरहंतो च्चिय देवो जीवाइपयत्थसत्थसद्दहणं। अहिगयतत्तो य गुरू इइ सम्मत्तं पयत्तेण ॥१२०॥
जावज्जीवं संकाकंखापामुक्खदोसपरिमुक्कं। भो नरवर! परिपालसु जइ सिवसोक्खं लहु महसु ॥१२१॥
तो मंतिणा समं चिय पडिवन्नं तं विहीए नरवइणा। पुणरवि सविसेसं चिय पन्नविए तस्सरूवम्मि ॥१२२॥
भणइ निवो मह कल्लाणकुलहरं को इमो मिगो नाह!। कहइ गुरू तुह मित्तं पुव्वभवे माहणो आसि ॥
सो मरिऊणं जक्खो अन्नाणतवेणिमो समुप्पन्नो। पुव्वभवब्भासाओ पीई तुह दंसणे जाया ॥१२४॥
भद्दगभावो जाओ इमस्स मह दंसणाओ इह निच्चं। काऊण हरिणरूवं तो इमिणा ववसियं एयं ॥१२५॥

इति भणित्वा हरिविक्रमकुमारं राज्ये स्थापयित्वा शुभलग्ने। दत्त्वा धनं धर्मे जातः श्रमणः स एषोऽहम् ॥
निजानुभूतं यद्यपि खलु कथ्यमानं जनयति लघुत्वम्। युष्मादृशेषु नरवर! तदेव गुणकारणं भवति ॥११३॥
ततः कर्मेन्धनानलेनानेन चरितेन नलनरेन्द्रस्य। उद्द्योतितात् क्षीणं मनसोऽज्ञानसंतमसम् ॥११४॥
ततो भणति महासत्त्वानां नाथ! युष्मादृशानां त्रुट्यन्ति। नृपलक्ष्मीबन्धसंबन्धबन्धनानीह यदि तथापि ११५
घनकर्मनिबिडबन्धनबद्धानां विगतशुद्धश्रद्धानाम्। अस्मादृशमुग्धानां दूरे सद्धर्मबुद्धिरपि ॥११६॥
दूरतरं सुगुरूणां संगमः किन्तु नाथ! अतिगुरु। मन्ये समर्जितमेव पुण्यं पापमपि पूर्वभवे ॥११७॥
तेन तव पादकमलं कमलसर इव मरौ प्रणयेन। लब्धं मृगसाहाय्याच्छक्नोमि न सेवितुं क्लीबः ॥११८॥
एवं च स्थिते धर्मस्य यस्य ममास्ति योग्यता स्वामिन्!। तद्विषय आदेशो मम दीयतां ततो मुनिराह ॥
अर्हन्नेव देवो जीवादिपदार्थसार्थश्रद्धानम्। अधिगततत्त्वश्च गुरुरिति सम्यक्त्वं प्रयत्नेन ॥१२०॥
यावज्जीवं शङ्काकाङ्क्षाप्रमुखदोषपरिमुक्तम्। भो नरवर! परिपालय यदि शिवसौख्यं लघु काङ्क्षेः ॥१२१॥
ततो मन्त्रिणा सममेव प्रतिपन्नं तद् विधिना नरपतिना। पुनरपि सविशेषमेव प्रज्ञापिते तत्स्वरूपे ॥१२२॥
भणति नृपो मम कल्याणकुलगृहं कोऽयं मृगो नाथ!। कथयति गुरुस्तव मित्त्रं पूर्वभवे ब्राह्मण आसीत् ॥
स मृत्वा यक्षोऽज्ञानतपसाऽयं समुत्पन्नः। पूर्वभवाभ्यासात् प्रीतिस्तव दर्शने जाता ॥१२४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो जक्खो पच्चक्खो होऊणं भणइ मुणिवरं एवं । पडिवन्नं सम्मत्तं मएवि तुह पायमूलम्मि ॥१२६॥
अन्नंपि धम्मविसयं सिक्खं संपाविउं मुणिसयासे । नमिऊण नियट्ठाणे वच्चइ जक्खो नलनिवोवि॥१२७॥
अह राया जिणपडिमं कारेउं पूयए तिकालंपि। जिणपवयणम्मि उच्छप्पणाउ कारेइ विविहाओ ॥१२८॥
सक्कारइ सम्माणइ साहुजणं कुणइ तह य तव्वयणं । तह साहम्मियलोयं मन्नइ बंधुंव पुत्तंव ॥१२९॥
मंतीवि मंतितिलओ एवं चिय कुणइ जिणमयं धम्मं । नलनरवइणा सययं मन्निज्जंतो गमइ कालं ॥१३०॥
अह मंतितिलयमंती कयाइ बहुवाहिविहुरियसरीरो । पच्चक्खाओ विज्जेहिं उज्जओ धम्ममग्गम्मि १३१
परिवायगवेसधरेणिक्केणं तह कहंपि पडियरिओ । जह जाओ नीरोगो वहइ तओ पक्खवायं से ॥१३२॥
भोयणवत्थाईहिं उवयरइ य सो य कहइ नियधम्मं । अप्पडिकूलंतो धुत्ताए जिणदेसियं मग्गं ॥१३३॥
अह वड्ढंते पणए नेइ समं अप्पणा नरवइस्स । तं अत्थाणे पुच्छइ तओ नरिंदो किमेयंति ? ॥१३४॥
सो भणइ एरिसो तारिसो इमो गरुयगुणगणग्घविओ । भणइ नरिंदो एयप्पसंसणे मलयसे सम्मं ॥
तहवि हु न पक्खवायं सो मुयइ पयंपए तहा एयं । संतगुणकित्तणाओ सम्मत्ते मयलणा कह णु ? ॥
इय एवं वट्टंते पुहइठाणाओ आगओ लेहो । नरनाहचारपुरिसेहिं पेसिओ रायपासम्मि ॥१३७॥
इह नाह ! इओ पुरिसो परिवायगवेसधारओ एगो । वन्नेण सामवन्नो वएण पणतीसवच्छरिओ ॥१३८॥
विज्जो तह वायालो पट्ठविओ तुहघायणनिमित्तं । नीलेण राइणा, तग्गहम्मि जत्तो विहेयव्वो ॥१३९॥

भद्रकभावो जातोऽस्य मम दर्शनादिह नित्यम् । कृत्वा हरिणरूपं ततोऽनेन व्यवसितमेतत् ॥१२५॥
ततो यक्षः प्रत्यक्षो भूत्वा भणति मुनिवरमेवम् । प्रतिपन्नं सम्यक्त्वं मयापि तव पादमूले ॥१२६॥
अन्यामपि धर्मविषयां शिक्षां संप्राप्य मुनिसकाशे । नत्वा निजस्थाने व्रजति यक्षो नलनृपोऽपि ॥१२७॥
अथ राजा जिनप्रतिमां कारयित्वा पूजयति त्रिकालमपि । जिनप्रवचने उत्सर्पणाः कारयति विविधाः ॥१२८॥
सत्कारयति सम्मानयति साधुजनं करोति तथा च तद्वचनम् । तथा साधर्मिकलोकं मन्यते बन्धुमिव पुत्रमिव॥
मन्त्र्यपि मन्त्रितिलक एवमेव करोति जिनमतं धर्मम् । नलनरपतिना सततं मान्यमानो गमयति कालम् ॥
अथ मन्त्रितिलकमन्त्री कदाचिद् बहुव्याधिविधुरितशरीरः । प्रत्याख्यातो वैद्यैरुद्यतो धर्ममार्गे ॥१३१॥
परिव्राजकवेषधरेणैकेन तथा कथमपि प्रतिकृतः । यथा जातो नीरोगो वहति ततः पक्षपातं तस्य ॥१३२॥
भोजनवस्त्रादिभिरुपचरति च स च कथयति निजधर्मम् । अप्रतिकूलयन् धूर्त्ततया जिनदेशितं मार्गम् ॥१३३॥
अथ वर्धमाने प्रणये नयति सममात्मना नरपतिम् । तमास्थाने पृच्छति ततो नरेन्द्रः किमेतदिति ? ॥१३४॥
स भणतीदृशस्तादृशोऽयं गुरुगुणगणपूर्णः । भणति नरेन्द्र एतत्प्रशंसने मलिनयसि सम्यक्त्वम् ॥१३५॥
तथापि खलु न पक्षपातं स मुञ्चति प्रजल्पति तथैतत् । सद्गुणकीर्तनात् सम्यक्त्वे मलिनता कथं नु ? ॥१३६॥
इत्येवं वर्तमाने पृथिवीस्थानादागतो लेखः । नरनाथचारपुरुषैः प्रेषितो राजपार्श्वे ॥१३७॥
इह नाथ ! इतः पुरुषः परिव्राजकवेषधारक एकः । वर्णेन श्यामवर्णो वयसा पञ्चत्रिंशद्वत्सरिकः ॥१३८॥
वैद्यस्तथा वाचालः प्रस्थापितस्त्वद्घातननिमित्तम् । नीलेन राज्ञा, तद्ग्रहे यत्नो विधातव्यः ॥१३९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो एगंते राया लेहायरियअप्पियं तयं लेहं। वाएऊणं सम्मं फाडेउं कुणइ खंडाइं ॥१४०॥
अह रायाएसेणं अत्थाणाओ स जाव मल्लेहिं। वाहाओ वालिऊणं आढत्तो चारयं नेउं ॥१४१॥
ता कंकलोहमयकत्तिया तओ निवडिया धरणिवट्टे। दिट्ठा जणेण रायस्स अप्पिया झत्ति मल्लेहिं ॥
तो भणइ नरवरिंदो किं रे! एयं, भणेइ सो तत्तो। जं किंपि मुणइ देवो भणइ अमच्चं तओ राया ॥
मह अत्थाणे आणसि पयडसि तुल्लं गुणेहिं साहूणं। जिणवयणभावियाणं एवं एयं दुरायारं? ॥१४४॥
किञ्च।
परपासंडिपसंसं जिणपडिकुट्ठं तए कुणंतेण। नियसम्मत्तं मह जीवियं च इह दोवि गमियाइं ॥१४५॥
इय बहुयं तं निब्भच्छिऊण सिक्खाकए य एयस्स। ठावइ अन्नं लेइ य सव्वस्सं किंपि मोत्तूण ॥१४६॥
तो चिंतिउं अमच्चो पडिकूलंतस्स मज्झ जिणवयणं। थेवमिणं, मुणिपासे तो पडिवज्जिज्जु पच्छित्तं ॥
पडिवज्जइ गिहिधम्मं पालइ सम्मं दुवालसविहंपि। तं नाउमप्पइ निवो खमाविउं तस्स सव्वस्सं ॥१४८॥
इत्तोवि घायगोवि हु नलरायं भणइ भावओ इण्हिं। पडिवन्नो जिणदिक्खं जं जुत्तं होइ तं कुणसु ॥
भणइ नरिंदो मल्ले बाहुजुयं सज्जिउं मुयह एयं। भणइ मरंतो एवं एसो मुक्को मए तहवि ॥१५०॥
अह चिंतइ नरनाहो सिक्खवियव्वो स ताव नीलनिवो। जायइ बहुजीववहो सयं च तं विग्गहंताणं ॥
पुव्विं कयमिगरूवं तो तं जक्खं मणे करेऊण। पोसहसालाए करेइ अट्ठमं सो तओ जक्खो ॥१५२॥
तदभिप्पायं नाउं नीलनिवं तस्स दंसए बद्धं। भणइ य एस स नीलो जो अहिमरपेसओ तुज्झ १५३

तत एकान्ते राजा लेखाचार्यार्पितं तं लेखम्। वाचयित्वा सम्यक् स्फाटयित्वा करोति खण्डानि ॥१४०॥
अथ राजादेशेनास्थानात् स यावन्मल्लैः। बाहू वालयित्वाऽऽरब्धश्चारकं नेतुम् ॥१४१॥
तावत्कङ्कलोहमयकर्तरी ततो निपतिता धरणिपट्टे। दृष्टा जनेन राज्ञोऽर्पिता झटिति मल्लैः ॥१४२॥
ततो भणति नरवरेन्द्रः किं रे! एतत्, भणति स ततः। यत्किमपि जानाति देवो भणत्यमर्त्यं ततो राजा ॥
ममास्थाने आनयसि प्रकटयसि तुल्यं गुणैः साधूनाम्। जिनवचनभावितानामेवमेष दुराचारः? ॥१४४॥
परपाखण्डिप्रशंसां जिनप्रतिकूलां त्वया कुर्वता। निजसम्यक्त्वं मम जीवितं चेह द्वे अपि गमिते ॥१४५॥
इति बहु तं निर्भर्त्स्य शिक्षाकृते चैतस्य। स्थापयत्यन्यं लाति च सर्वस्वं किमपि मुक्त्वा ॥१४६॥
ततश्चिन्तयित्वाऽमर्त्यः प्रतिकूलयतो मम जिनवचनम्। स्तोकमिदम्, मुनिपार्श्वे ततः प्रतिपद्य प्रायश्चित्तम् ॥
प्रतिपद्यते गृहिधर्मं पालयति सम्यग्द्वादशविधमपि। तज्ज्ञात्वाऽर्पयति नृपः क्षमयित्वा तस्य सर्वस्वम् ॥१४८॥
इतोऽपि घातकोऽपि खलु नलराजं भणति भावत इदानीम्। प्रतिपन्नो जिनदीक्षां यद् युक्तं भवति तत्कुरु ॥
भणति नरेन्द्रो मल्लान् बाहुयुगं सज्जयित्वा मुञ्चतैतम्। भणति म्रियमाण एवमेष मुक्तो मया तथापि ॥१५०॥
अथ चिन्तयति नरनाथः शिक्षयितव्यः स तावन्नीलनृपः। जायते बहुजीववधः स्वयं च तं विगृह्णताम् ॥१५१॥
पूर्वं कृतमृगरूपं ततस्तं यक्षं मनसि कृत्वा। पौषधशालायां करोत्यष्टमं स ततो यक्षः ॥१५२॥
तदभिप्रायं ज्ञात्वा नीलनृपं तस्मै दर्शयति बद्धम्। भणति चैष स नीलो योऽभिमरप्रेषकस्तव ॥१५३॥

तो भणइ तं नरिंदो संपइ किं तुज्झ होउ, सो भणइ । दिट्ठम्मि तुज्झ पयपंकयम्मि जं होइ तं होउ ॥
तो छोडेउं बंधे सम्माणेऊण भणिय तं जक्खं । सट्ठाणे संपत्तं सुहेण कारइ खणद्धेण ॥१५५॥
अह निक्कंटयमेयं रज्जं पालंतयस्स नरवइणो । साहम्मियसम्माणणपरस्स जिणधम्मनिरयस्स ॥१५६॥
जोगत्तं संपत्तं पुत्तं रज्जम्मि ठविउकामस्स । दिक्खाभिमुहस्सुज्जाणपालओ विन्नवइ एवं ॥१५७॥
गुणरयणायरसूरी समोसढो देव ! नंदणुज्जाणे । कयसज्जणमणहरिसो पुन्नक्करिसोव्व देवस्स ॥१५८॥
तस्स कयपीईदाणोऽणुगम्ममाणो नरिंदविंदेहिं । गंतुं वंदइ विहिणा राया सूरिं सपरिवारं ॥१५९॥
किं सोच्चिय सच्चपइन्नसेहरो एस इइ विचिंततो । आलत्तो सूरीहिं किं परियाणसि महाराय !? ॥१६०॥
तो निस्संसयहियओ सिरकयकरकमलसंपुडो भणइ । जणणी सच्चिय धन्ना जीइ पसूओ तुमं सामि ! ॥
लद्धपसरंपि तहा भुवणत्तयसुहडविनडणसहंपि । हेलाइच्चिय भग्गं जेण तए नाह ! मोहबलं ॥१६२॥
अह महया सद्देणं सूरी परिकहइ तीए परिसाए । सामग्गीइ इमाए निबंधणं अम्ह एस निवो ॥१६३॥
निवनीलपेसिओ घायगोत्ति कलिऊण गाहिओ रन्ना । पडिया य कत्तिया मह पासाओ तो मए भणियं ॥
भावपडिवन्नजिणमयदिक्खो हं तं सुयं नरिंदेण । जाणंतेणवि एयं पलावमित्तं विमुक्को हं ॥१६५॥
भुवणच्छेरयसुचरियरंजिअहियएण तं तहेव मए । सुगुरुपयंते विहियं हियं च तं एवमावन्नं ॥१६६॥
इय सोउं अच्चब्भुयवेरग्गरसाउलाए परिसाए । सूरीहिं परिकहिओ अणेगभंगीहिं जिणधम्मो ॥१६७॥
वासियचीरेसुव माणसेसु रंगो तहा कहवि लग्गो । जह पव्वज्जाभिमुहो पायं जाओ जणो सव्वो॥१६८॥

ततो भणति तं नरेन्द्रः संप्रति किं तव भवतु, स भणति । दृष्टे तव पादपङ्कजे यद्भवति तद्भवतु ॥१५४॥
ततो मोचयित्वा बन्धान् संमान्य भणित्वा तं यक्षम् । स्वस्थाने संप्राप्तं सुखेन कारयति क्षणार्धेन ॥१५५॥
अथ निष्कण्टकमेतद्राज्यं पालयतो नरपतेः । साधर्मिकसम्माननपरस्य जिनधर्मनिरतस्य ॥१५६॥
योग्यत्वं संप्राप्तं पुत्रं राज्ये स्थापयितुकामस्य । दीक्षाभिमुखस्योद्यानपालको विज्ञपयत्येवम् ॥१५७॥
गुणरत्नाकरसूरिः समवसृतो देव ! नन्दनोद्याने । कृतसज्जनमनोहर्षः पुण्योत्कर्ष इव देवस्य ॥१५८॥
तस्मै कृतप्रीतिदानोऽनुगम्यमानो नरेन्द्रवृन्दैः । गत्वा वन्दते विधिना राजा सूरिं सपरिवारम् ॥१५९॥
किं स एव सत्यप्रतिज्ञशेखर एष इति विचिन्तयन् । आलप्तः सूरिभिः किं परिजानासि महाराज!? ॥१६०॥
ततो निःसंशयहृदयः शिरःकृतकरकमलसंपुटो भणति । जननी सैव धन्या यया प्रसूतस्त्वं स्वामिन्! ॥१६१॥
लब्धप्रसरमपि तथा भुवनत्रयसुभटविनटनसहमपि । हेलयैव भग्नं येन त्वया नाथ ! मोहबलम् ॥१६२॥
अथ महता शब्देन सूरिः परिकथयति तस्यां परिषदि । सामग्र्या अस्या निबन्धनमस्माकमेष नृपः ॥१६३॥
नृपनीलप्रेषितो घातक इति कलयित्वा ग्राहितो राज्ञा । पतिता च कर्तरी मम पार्श्वात्ततो मया भणितम् ॥१६४॥
भावप्रतिपन्नजिनमतदीक्षोऽहं तत् श्रुतं नरेन्द्रेण । जानताप्येतत् प्रलापमात्रं विमुक्तोऽहम् ॥१६५॥
भुवनाश्चर्यसुचरितरञ्जितहृदयेन तत्तथैव मया । सुगुरुपादान्ते विहितं हितं च तदेवमापन्नम् ॥१६६॥
इति श्रुत्वाऽत्यद्भुतवैराग्यरसाकुलायां पर्षदि । सूरिभिः परिकथितोऽनेकभङ्गिभिर्जिनधर्मः ॥१६७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विन्नवइ जहा सुगुरु ! इय तुह चरिएण देसणाए य । सज्जो घित्तुमणाणवि पव्वज्जं अत्थि पडिबंधो॥
वुड्ढाइं पियराइं कस्सवि अन्नस्स लहुयवच्चाइं । अन्नस्स विहवभइणी अवच्चचिंतारिणी अन्नो ॥१७०॥
इय सोउं भणइ निवो धणेण संवहइ जित्तिएणं जो । तम्मत्तं तस्स अहं देमि तओ सो जणो भणइ ॥
बाढं अणुग्गहो एस अम्ह, विन्नवइ सूरिमह राया । जइ दिक्खाजोग्गो हं भवामि पउणो लहुंपि तओ ॥
सूरी पभणइ दिक्खामणोरहं सुयबलेण तुह नाउं । अहमित्थ आगओ ता सिज्झउ मणवंछियं तुम्ह ॥
तो वंदिऊण सूरिं राया पत्तो नियम्मि भवणम्मि । ठावइ रज्जे जोग्गं कुमरं अमरं अकामंपि ॥१७४॥
पव्वइउमणं च जणं पडहयउग्घोसणाए वाहरिउं । दाऊण किमवि दविणं अन्नं अहिणवनरिंदाओ ॥
अंगीकारेऊणं तप्परिपालणरिहाण सविसेसं । परिपालणमखिलंपि हु तं दिक्खाए कुणइ पउणं॥१७६॥
तेहिं समं तह अंतेउरेण अन्नेहिं पवरपुरिसेहिं । पडिवन्नो पव्वज्जं पालेउं तं च अणवज्जं ॥१७७॥
परिवज्जिय भत्ताइं सट्ठिं समहिट्ठिओ समाहीए । सव्वट्ठे संपत्तो इहेव भरहम्मि सिज्झिहइ ॥१७८॥
मंतितिलओवि मंती समं नरिंदेण गहियपव्वज्जो । उप्पन्नो सोहम्मे सिज्झिस्सइ पंचमम्मि भवे ॥१७९॥

॥ इति पाखण्डिप्रशंसायां मन्त्रितिलककथानकं समाप्तम् ॥

वासितचीवरेष्विव मानसेषु रङ्गस्तथा कथमपि लग्नः । यथा प्रव्रज्याभिमुखः प्रायो जातो जनः सर्वः ॥
विज्ञपयति यथा सुगुरो ! इति तव चरितेन देशनया च । सद्यो ग्रहीतुमनसामपि प्रव्रज्यामस्ति प्रतिबन्धः ॥
वृद्धौ पितरौ कस्याप्यन्यस्य लघ्वपत्यानि । अन्यस्य विधवभगिनी अपत्यचिन्तर्णी अन्यः ॥१७०॥
इति श्रुत्वा भणति नृपो धनेन संवहति यावता यः । तन्मात्रं तस्मा अहं ददामि ततः स जनो भणति ॥
बाढमनुग्रह एषोऽस्मासु, विज्ञपयति सूरिमथ राजा। यदि दीक्षायोग्योऽहं भवामि प्रगुणो लघ्वपि ततः ॥१७२॥
सूरिः प्रभणति दीक्षामनोरथं श्रुतबलेन तव ज्ञात्वा । अहमत्रागतस्तस्मात् सिध्यतु मनोवाञ्छितं तव॥१७३॥
ततो वन्दित्वा सूरिं राजा प्राप्तो निजे भवने । स्थापयति राज्ये योग्यं कुमारममरमकाममपि ॥१७४॥
प्रव्रजितुमनसं च जनं पटहोद्धोषणयाऽऽहूय । दत्त्वा किमपि द्रविणमन्यदभिनवनरेन्द्रात् ॥१७५॥
अङ्गीकार्य तत्परिपालनार्हाणां सविशेषम् । परिपालनमखिलमपि खलु तं दीक्षायां करोति प्रगुणम् ॥१७६॥
तैः समं तथाऽन्तःपुरेणान्यैः प्रवरपुरुषैः । प्रतिपन्नः प्रव्रज्यां पालयित्वा तां चानवद्यम् ॥१७७॥
परिवर्ज्य भक्तानि षष्टिं समधिष्ठितः समाधिना । सर्वार्थे संप्राप्त इहैव भरते सेत्स्यति ॥१७८॥
मन्त्रितिलकोऽपि मन्त्री समं नरेन्द्रेण गृहीतप्रव्रज्यः । उत्पन्नः सौधर्मे सेत्स्यति पञ्चमे भवे ॥१७९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चिंतामणी मणीणं कप्पतरू तरुवराण जह पवरो। तह सम्मत्तं वुत्तं पवरं सव्वाणवि गुणाण ॥१॥
पक्खीण पक्खिराओ सुराण इंदो गहाण जह चंदो। तह सम्मत्तं पवरं भणियं सव्वाणवि गुणाण ॥२॥
अमयं जहा रसाणं नराण चक्की मुणीण गणनाहो। तह दंसणं पसत्थं जाणह सव्वाणवि गुणाण ॥३॥
जं सम्मत्तविउत्ता निरवज्जं पालिऊण जइकिरियं। गेविज्जंपि हु पत्ता पुणोवि भमिरा भवमपारं ॥४॥
नरयाइसु दुक्खाइं सहंति अइदूसहाइं इह जीवा। न य तेसिं सिवगमणं मोत्तुं सम्मत्तसंपत्तिं ॥५॥
सम्मत्तं पुण पत्ता अंतमुहुत्तंपि जंति मोक्खम्मि। आसायणबहुलावि हु अवड्ढपरियट्टमज्झम्मि ॥६॥
तो अइयारविमुक्कं धन्ना पालंति केइ सम्मत्तं। धन्नाणमवि धन्नयरा जे तं जणयंति अन्नेसिं ॥७॥

॥ समाप्तं सातिचारं सम्यक्त्वद्वारम् ॥

चिन्तामणिर्मणीनां कल्पतरुस्तरुवराणां यथा प्रवरः। तथा सम्यत्वमुक्तं प्रवरं सर्वेषामपि गुणानाम्॥१॥
पक्षिणां पक्षिराजः सुराणामिन्द्रो ग्रहाणां यथा चन्द्रः। तथा सम्यक्त्वं प्रवरं भणितं सर्वेषामपि गुणानाम् ॥२॥
अमृतं यथा रसानां नराणां चक्री मुनीनां गणनाथः। तथा दर्शनं प्रशस्तं जानीत सर्वेषामपि गुणानाम् ॥३॥
यत्सम्यक्त्ववियुक्ता निरवद्यं पालयित्वा यतिक्रियाम्। ग्रैवेयकमपि हि प्राप्ताः पुनरपि भ्रमिणो भवेऽपारे ॥४॥
नरकादिषु दुःखानि सहन्तेऽतिदुस्सहानीह जीवाः। न च तेषां शिवगमनं मुक्त्वा सम्यक्त्वसंप्राप्तिम् ॥५॥
सम्यक्त्वं पुनः प्राप्ता अन्तर्मुहूर्तमपि यान्ति मोक्षे। आशातनबहुला अपि ह्यपार्धपरिवर्तमध्ये ॥६॥
[१]ततोऽतिचारविमुक्तं धन्याः पालयन्ति केचित्सम्यक्त्वम। धन्यानामपि धन्यतरा ये तज्जनयन्त्यन्येषाम् ॥७॥

---

१ ग. इति सम्यक्त्वतत्परे गाथासप्तकम्। स०

अधुनाऽणुव्रतादिपरिपालनातीचारगुणदोषान् सदृष्टान्तान् स्पष्टं निष्टङ्कयन्नाह;—

जावज्जीवं जीवं थूलं संकप्पओ निरवराहं । मणवइकाएहिं सया न हणेई नो हणावेइ ॥१॥

जो आरंभं मोत्तुं, सो इहइं विजयचंदकुमरोव्व । अइविउलं रज्जसिरिं लहिउं सिवसंपयमुवेइ ॥२॥

तथाहि;—

अत्थि इह भरहवासे नयरं नामेण मंगलपुरंति । धरणिविलयाए तिलयं मंगलनिलयं नहयलंव ॥३॥

तत्थत्थि निवो रिउकरडिकरडतडपाडणिक्कसोंडीरो । सीहो इव जयसीहो चाईण सया फुसियलीहो ॥४॥

तस्सत्थि पवरभज्जा रूवेण रइव्व धरियगुणलज्जा । सीलेण जणियचोज्जा पीइमई नाम मयवज्जा ॥५॥

नियपहुपयडियभत्ती विसालकित्ती विसुद्धमणवित्ती । मइनिज्जियसुरमंती तस्स य मइसायरो मंती॥६॥

पीइमईपमुहाहिं भज्जाहिं समन्निओ विसयसोक्खं । अणुहवइ सुरवई इव अच्छरसाहिं सह सयावि ॥७॥

अह अन्नया कयाई अत्थाणगयस्स तस्स नरनइणो । मत्थयकयसिद्धत्थो पुत्थियहत्थो सुवीसत्थो ॥८॥

गयणाओ अवयरिओ सियवसणधरो सरोयदलनयणो । पुरिसो ससिसमवयणो पुरो ठिओ नं सयं मयणो॥

तो रन्ना उट्ठेउं आसणदाणाइविणयपडिवत्तिं । काऊणं परिपुट्ठो कुसलपउत्तिं भणइ सोवि ॥१०॥

कुसलमलं मम नरवर ! पसत्थतित्थाण वंदणरयस्स । संपइ जिणिंदबिंबे सम्मेए वंदिउं चलिओ ॥११॥

ओइन्नो तं दट्ठुं साहम्मियपीइपरवसो एत्थ । पभणइ साहसु कज्जं सज्जो साहेमि जेण तयं ॥१२॥

नरपतिरुवाच;—

सुयणाण दंसणं चिय कल्लाणं जं इहोयरंतेण । तं साहियमेव तए पओअणेणं किमन्नेणं ? ॥१३॥

यावज्जीवं जीवं स्थूलं संकल्पतो निरपराधम् । मनोवचःकायैः सदा न हन्ति नो घातयति ॥१॥

य आरम्भं मुक्त्वा, स इह विजयचन्द्रकुमार इव । अतिविपुलां राज्यश्रियं लब्ध्वा शिवसंपदमुपैति ॥२॥

अस्तीह भरतवर्षे नगरं नाम्ना मङ्गलपुरमिति । धरणिवनितायास्तिलकं मङ्गलनिलयं नभस्तलमिव ॥३॥

तत्रास्ति नृपो रिपुकरटिकरटतटपाटनैकशौण्डीरः । सिंह इव जयसिंहस्त्यागिनां सदा मृष्टरेखः ॥४॥

तस्यास्ति प्रवरभार्या रूपेण रतिरिव धृतगुणलज्जा । शीलेन जनिताश्चर्या प्रीतिमती नाम मदवर्जा ॥५॥

निजप्रभुप्रकटितभक्तिर्विशालकीर्तिर्विशुद्धमनोवृत्तिः । मतिनिर्जितसुरमन्त्री तस्य च मतिसागरो मन्त्री ॥६॥

प्रीतिमतीप्रमुखाभिर्भार्याभिः समन्वितो विषयसौख्यम् । अनुभवति सुरपतिरिवाप्सरोभिः सह सदापि ॥७॥

अथान्यदा कदाचिदास्थानगतस्य तस्य नरपतेः । मस्तककृतसिद्धार्थः पुस्तिकाहस्तः सुविश्वस्तः ॥८॥

गगनादवतीर्णः सितवसनधरः सरोजदलनयनः । पुरुषः शशिसमवदनः पुरः स्थितो नु स्वयं मदनः ॥९॥

ततो राज्ञोत्थायासनदानादिविनयप्रतिपत्तिम् । कृत्वा परिपृष्टः कुशलप्रवृत्तिं भणति सोऽपि ॥१०॥

कुशलमलं मम नरवर ! प्रशस्ततीर्थानां वन्दनरतस्य । संप्रति जिनेन्द्रबिम्बानि सम्मेते वन्दितुं चलितः ॥

अवतीर्णस्त्वां दृष्ट्वा साधर्मिकप्रीतिपरवशोऽत्र । प्रभणति कथय कार्यं सद्यः साधयामि येन तत् ॥१२॥

सुजनानां दर्शनमेव कल्याणं यदिहावतरता । तत्साधितमेव त्वया प्रयोजनेन किमन्येन ? ॥१३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इत्थंतरम्मि मइसागरेण गुरुविणयपुव्वयं भणियं । जइ कुलकुमुयाणंदो नरवइणो नंदणो होइ ॥१४॥
तो लट्ठं संजायइ सहलं तुह दंसणंपि अम्हाणं । तो भणियं सिद्धेणं सिज्झंतु मणोरहा तुम्ह ॥१५॥
अभिमंतिऊण तेणं पूयफलं अप्पिऊण भणियं च । पीइमईए दिज्जसु जह पुत्तो होइ लहु तीए ॥१६॥
इच्चाइ जंपिऊणं उप्पइओ नहयलम्मि सो सिद्धो । देवीए फलं असियं जाओ पुत्तोवि समयम्मि ॥१७॥
वद्धावणयं बहुवित्थरेण काऊण विजयचंदोत्ति । मासम्मि गए नामं पइट्ठियं रायभइणीहिं ॥१८॥
सियपक्खससहरो इव कलासु देहे य उवचयं लहइ । तो सयलकलाकुसलो जाओ [1]थेवेहिवि दिणेहिं ॥
अह अन्नया तुरंगमवाहणहेउं गएण कुमरेण । दिट्ठो मुणी निविट्ठो तवतणुयंगो जियाणंगो ॥२०॥
नामेणं मुणिचंदो चउनाणी भवियकुमुयवणचंदो । नमिऊणं सो जंपइ लद्धासीसो विसेसेण ॥२१॥
देवगुरुधम्मतत्तं कहेसु मह नाह! बहुयपुन्नेहिं । पत्तो तमिह महायस! मरुपहिएणेव कमलसरं ॥२२॥
हिमहारहसियसियदसणकिरणरिंछोलिविच्छुरियवयणो । अह पभणइ सो साहू रायसुयं सुणसु उवउत्तो.॥
तद्यथा;—
दुट्ठट्ठारसदोसपसरु जसु वयणि ण विज्जइ, कामिणिलडहकडक्खतिक्खसत्थिहिं जु न भिज्जइ ।
जु न कहिंपि करि करइ किंपि पहरणु रणरंगिउ, जिणि दिट्ठेणवि गलइ पाउ भवसय[2]संवग्गिउ ॥२४॥
सो तुम्ह देवु जिणवरु सरणु भवभयदुत्थगलत्थियहं, आजम्मु जम्मजरवज्जियउ वीयराउ सिवपत्थियहं ।
जसु न घरणि मणहरणि सरणि निरु निरयनिवासह, जसु न खित्तु हलमुसलसत्थु चिंतवि घरवासह ॥

'अत्रान्तरे मतिसागरेण गुरुविनयपूर्वकं भणितम् । यदि कुलकुमुदानन्दो नरपतेर्नन्दनो भवति ॥१४॥
ततः सुन्दरं संजायते सफलं तव दर्शनमप्यस्माकम् । ततो भणितं सिद्धेन सिध्यन्तु मनोरथा युष्माकम् ॥
अभिमन्त्र्य तेन पूगफलमर्पयित्वा भाणितं च । प्रीतिमत्यै दीयतां यथा पुत्रो भवति लघु तस्याः ॥१६॥
इत्यादि जल्पित्वोत्पतितो नभस्तले स सिद्धः । देव्या फलमशितं जातः पुत्रोऽपि समये ॥१७॥
वर्धनकं बहुविस्तरेण कृत्वा विजयचन्द्र इति । मासे गते नाम प्रतिष्ठितं राजभगिनीभिः ॥१८॥
सितपक्षशशधर इव कलासु देहे चोपचयं लभते । ततः सकलकलाकुशलो जातः स्तोकैरपि दिनैः ॥१९॥
अथान्यदा तुरङ्गमवाहनहेतोर्गतेन कुमारेण । दृष्टो मुनिर्निविष्टस्तपस्तन्वङ्गो जितानङ्गः ॥२०॥
नाम्ना मुनिचन्द्रश्चतुर्ज्ञानो भविककुमुदवनचन्द्रः । नत्वा स जल्पति लब्धाशीर्विशेषेण ॥२१॥
देवगुरुधर्मतत्त्वं कथय मम नाथ! बहुपुण्यैः । प्राप्तस्त्वमिह महायशः! मरुपथिकेनेव कमलसरः ॥२२॥
हिमहारहसितासितदशनकिरणपङ्क्तिविच्छुरितवदनः । अथ प्रभणाति स साधू राजसुतं शृणूपयुक्तः ॥२३॥
दुष्टाष्टादशदोषप्रसरो यस्य वचने न विद्यते, कामिनीरम्यकटाक्षतीक्ष्णशस्त्रैर्यो न भिद्यते ।
यो न क्वापि करे करोति किमपि प्रहरणं रणरङ्गितः, येन दृष्टेनापि गलति पापं भवशतसंवर्गितम् ॥२४॥
स युष्माकं देवो जिनवरः शरणं भवभयदौःस्थ्यनाशार्थिनामाजन्म जन्मजरावर्जितो वीतरागः शिवप्रस्थितानाम् ।
यस्य न गृहिणी मनोहरणी सरणिर्निश्चितं निरयानिवासस्य, यस्य न क्षेत्रं हलमुसलशस्त्रं चिन्तापि गृहवासस्य ॥

१ ग. °वेण कालेण । २ ग. संसग्गि° ।

जसु न दविणधणकणसमिद्धिसंबंधु समुद्धुरु, जु नवि जीवदयपमुहपवरु वउ खंडइ दुद्धरु ।
समसत्तुमित्तु छज्जीवहिउ भवसायरदुत्तरतरणु, सइ विहिविहारकरणुज्जमिउ होउ सुगुरु तुम्हह सरणु ॥
जहिं सचराचरजीवरक्ख अणवरय विहिज्जइ, अलियकलिउ जहिं कहिवि नवि य वयणुवि जंपिज्जइ ॥
जहिं परकीउ अदिन्नु तिणुवि मणसा न लिज्जइ, जत्थ परत्थीसत्थु रयणिभोयणुवि चइज्जइ ॥२७॥
सो धम्मु रम्मु भवभयहरणु सरणु असरणह होउ तुहु ।
जिणनाहकहिउ जयजीवहिउ सासयसिरिवि जु देइ सुहु ॥२८॥
इय एवमाइ मुणिणा धम्मो कहिओ सवित्थरो तत्थ । कुमरेण पडिवन्नं सम्मत्तं तह इमे नियमा ॥२९॥
अवराहवज्जियाणं संकप्पेणं तसाण पाणवहं । जावज्जीवं मंसं पंचुंबरिमाइ वज्जेमि ॥३०॥
इय अंगीकयनियमो नियगिहपत्तो करेइ जिणधम्मं । अह अन्नयावहरिओ हएण विवरीयसिक्खेण॥३१॥
वियडाडवीए पडिओ नडिओ तण्हाए कंठगयपाणो । परिसंततुरयवयणाओ झत्ति अवणेइ जा कवियं ॥
तो सहसा सो मुक्को पाणेहिं दुज्जणोत्ति कलिऊण । मुच्छानिमीलयच्छो पडिओ कुमरोवि धरणीए ॥
जा चिट्ठइ ता दिट्ठो पुलिंदमिहुणेण किंचिसच्चिट्ठो । सीयपवणेण जाओ सलिलं सन्नाए पत्थिंतो॥३४॥
तत्तो य पुलिंदीए कुओवि हिमसिसिरनीरमाणेउं । सित्तो उट्ठेऊणं पियइ जलं तमलममयंव ॥३५॥
तत्तो य महुं मंसं उवणीयं तेहिं भोयणनिमित्तं । न य भक्खइ कहवि तयं कुमरो पडिवन्ननियमधुरो ॥
महुं मंसं मोत्तूणं फलकंदाइं न विज्जए इत्थ । इय कहिएवि न असइ तो ताइं गयाइं तं मोत्तुं ॥३७॥

यस्य न द्रविणधनकणसमृद्धिसंबन्धः समुद्धुरः, यो नापि जीवदयाप्रमुखप्रवरं व्रतं खण्डयति दुर्धरम् ।
समशत्रुमित्रः षड्जीवहितो दुस्तरभवसागरतरणः, सदा विधिविहारकरणोद्यतो भवतु सुगुरुर्युष्माकं शरणम्॥
यत्र सचराचरजीवरक्षाऽनवरतं विधीयते, अलीककलितं यत्र क्वापि नापि च वचनमपि जल्प्यते ।
यत्र परकीयमदत्तं तृणमपि मनसा न लायते, यत्र परस्त्रीसार्थो रजनिभोजनमपि त्यज्यते ॥२७॥
स धर्मो रम्यो भवभयहरणः शरणमशरणानां भवतु युष्माकम् ।
जिननाथकथितो जगज्जीवहितः शाश्वतश्रियमपि यो ददाति सुखम् ॥२८॥
इत्येवमादिर्मुनिना धर्मः कथितः सविस्तरस्तत्र । कुमारेण प्रतिपन्नं सम्यक्त्वं तथेमे नियमाः ॥२९॥
अपराधवर्जितानां संकल्पेन त्रसानां प्राणवधम् । यावज्जीवं मांसं पञ्चोदुम्बरादि वर्जयामि ॥३०॥
इत्यङ्गीकृतनियमो निजगृहप्राप्तः करोति जिनधर्मम् । अथान्यदाऽपहृतो हयेन विपरीतशिक्षेण ॥३१॥
विकटाटव्यां पतितो नटितस्तृष्णया कण्ठगतप्राणः । परिश्रान्ततुरगवदनाज्झटित्यपनयाति यावत्कविकाम् ॥
ततः सहसा स मुक्तः प्राणैर्दुर्जन इति कलयित्वा । मूर्च्छानिर्मीलिताक्षः पतितः कुमरोऽपि धरण्याम् ॥३३॥
यावत्तिष्ठति तावद् दृष्टः पुलिन्दमिथुनेन किञ्चित्सचेष्टः । शीतपवनेन जातः सलिलं संज्ञया प्रार्थयमानः ॥
ततश्च पुलिन्द्या कुतोऽपि हिमशिशिरनीरमानीय । सिक्त उत्थाय पिबति जलं तदलममृतमिव ॥३५॥
ततश्च मधु मांसमुपनीतं ताभ्यां भोजननिमित्तम् । न च भक्षयति कथमपि तत्कुमारः प्रतिपन्ननियमधुर्यः ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेसिं अवत्तियंतो छुहाए परिपीडिओ अरन्नम्मि । सो भमइ नेय पावइ तहाविहं मूलकंदाइं ॥३८॥
जह तह कहवि मयाणं मंसाइं मिगाइयाण सुलहाइं । लब्भंति महूणि य किंतु तेसु न मणंपि सो कुणइ ॥
जा ता नवमदिवसे मिगयागयगयपुरेसनरवइणो । सिन्नं पसरियमित्तो कुमरं पिच्छेइ सो राया ॥४०॥
तरुछायाए निविट्ठं सुसिउट्ठं, सोवि तं निवं नाउं । अब्भुट्ठिय पणमेई रन्ना नाओ जहा'तिसिओ॥४१॥
पालिकरवाउ नीरं पाएउं पुच्छिओ कओ एत्थ । कुमरोवि कहइ सव्वं राया तो अप्पए तुरयं ॥४२॥
नियआसवारसहियं पेसइ जत्थच्छए नियावासो । कयमज्जणो य भुंजइ रायनिओगेण सो तत्थ ॥४३॥
तो बीयदिणे राया कुमरं आहेडयत्थमडवीए । तुरयारूढं आउहपाणिं सह अप्पणो नेइ ॥४४॥
चउदिसिपसरियनियआसवारवारेण खेडिउं खुडिए । मियससयसूयराई गरुयरगत्ताए खिविऊण ॥४५॥
एक्कदिसाए राया कुमरो बीयाए ठाविओ तेण । नीहरमाणे जीवे विंधइ बाणेहिं नरनाहो ॥४६॥
अह कुमरदिसाहुत्तं पसुणो वच्चंतए निएऊण । राया भणइ कुमारं हणसु इमे मा उवेहेहि ॥४७॥
तो भणइ विजयचंदो नाहं जीवे हणामि गयदोसे । तुम्हंपि न जुत्तमिणं नयसारपहुत्तजुत्ताण ॥४८॥
तो चिंतइ नरनाहो कावि अपुव्वा इमस्सिमा भणिई । तो तं पभणइ किं तं न होसि नणु खत्तियकुमारो? ॥
सो भणइ नरवरेसर! हणंति जीवे विणावराहं जे । ते सोयरियपमुहा खत्तियपुत्तत्ति तुम्ह मया ॥५०॥
तो तस्स वयणविणयाइएहिं हिययम्मि रंजिओ राया । तच्चित्तपरिक्खत्थं विसेसओ कुणइ एवंति ॥५१॥

मधु मांसं मुक्त्वा फलकन्दादि न विद्यतेऽत्र । इति कथितेऽपि नाश्नाति ततस्तौ गतौ तं मुक्त्वा ॥३७॥
तयोरसंघटितः क्षुधा परिपीडितोऽरण्ये । स भ्रमति नैव प्राप्नोति तथाविधं मूलकन्दादि ॥३८॥
यथा तथा कथमपि मृतानां मांसानि मृगादिकानां सुलभानि । लभ्यन्ते मधूनि च किन्तु तेषु न मनोऽपि स करोति॥
यावत् तावद् नवमदिवसे मृगयागतगजपुरेशनरपतेः । सैन्यं प्रसृतमितः कुमारं पश्यति स राजा ॥४०॥
तरुच्छायायां निविष्टं शुष्कौष्ठं, सोऽपि तं नृपं ज्ञात्वा । अभ्युत्थाय प्रणमति राज्ञा ज्ञातो यथा तृषितः ॥४१॥
पालिकरवाद् नीरं पाययित्वा पृष्टः कुतोऽत्र । कुमारोऽपि कथयति सर्वं राजा ततोऽर्पयति तुरगम् ॥४२॥
निजाश्ववारसहितं प्रेषयति यत्रास्ते निजावासः । कृतमज्जनश्च भुङ्क्ते राजनियोगेन स तत्र ॥४३॥
ततो द्वितीयदिने राजा कुमारमाखेटकार्थमटव्याम् । तुरगारूढमायुधपाणिं सहात्मना नयति ॥४४॥
चतुर्दिक्प्रसृतनिजाश्ववारवारेण खेटयित्वा त्रुडितान् । मृगशशशूकरादीन् गुरुतरगर्ते क्षिप्त्वा ॥४५॥
एकदिशि राजा कुमारो द्वितीयस्यां स्थापितस्तेन । निःसरतो जीवान् विध्यति बाणैर्नरनाथः ॥४६॥
अथ कुमारदिगभिमुखं पशून् व्रजतो दृष्ट्वा । राजा भणति कुमारं जहीमान् मोपेक्षस्व ॥४७॥
ततो भणति विजयचन्द्रो नाहं हन्मि गतदोषान् । युष्माकमपि न युक्तमिदं नयसारप्रभुत्वयुक्तानाम् ॥४८।
ततश्चिन्तयति नरनाथः काप्यपूर्वाऽस्येयं भणितिः । ततस्तं प्रभणति किं त्वं न भवसि ननु क्षत्त्रियकुमारः? ।
स भणति नरवरेश्वर! घ्नन्ति जीवान् विनापराधं ये । ते शौकरिकप्रमुखाः क्षात्त्रियपुत्रा इति युष्माकं मताः ॥
ततस्तस्य वचनविनयादिकैर्हृदये रञ्जितो राजा । तच्चित्तपरीक्षार्थं विशेषतः करोत्येवामिति ॥५१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तस्सग्गे मिगमेगं धरिउं पभणेइ हणह रे ! एयं। अन्नह तुह सिरमसिणा निएण हत्थेण छिंदिस्सं ॥५२॥
तो निववयणं सोउं चिंतइ कुमरो अहो ! इमो मूढो। जीवंतस्सवि सीहस्स केसरे लुणिउमीहेइ ॥५३॥
अकयवराहं हरिणाइपसुगणं जइ अहं न मारेमि। तो किं इमस्स जुत्तं वोत्तुं एवंविहं, किंतु ॥५४॥
उवयारी मज्झ इमो असमंजसचिट्ठिओवि दयठाणं। पिच्छामि ताव एयं चिंतिउं पडिभणइ तं एवं ॥५५॥
जं तुह जुत्तं तं कुणसु ताव नाहं हणेमि मिगमेयं। मणवायाकाएहिं अवराहविवज्जियं दीणं ॥५६॥
तंपि करेमि महायस ! जइ किर मरणं न होइ कइयावि। इयरावि हु मरियव्वे को नियमधुरं परिच्चयइ ? ॥
अनिलंदोलिरकमलिणिकमलदललग्गजललवचलाण। पाणाण कए तुज्झवि परपाणविणासणमजुत्तं ॥५८॥
यतः,—
किं एत्तो लज्जणयं उत्तमपुरिसाण जीवलोगम्मि। जं पहरिज्जइ दीणे पलायमाणे पमत्ते वा ? ॥५९॥
लज्जंति महासत्ता पहरणमुग्गीरिऊण ईसिंपि। पिच्छंता पुरओ वेरियंपि मुक्काउहं दीणं ॥६०॥
सुट्ठुवि कयावराहे पहरंति न उत्तमा अपहरंते। मन्नंति कलंकं नियकुलस्स अग्गप्पहारित्तं ॥६१॥
जं पुण सोमसहावेसु निरवराहेसु नस्समाणेसु। तणमित्ताहारजिएसु पहरणं तं महापावं ॥६२॥

एहु धम्मुपरमत्थु कहिज्जइ, जं परपीडि होइ तं न किज्जइ।
जो परपीड करइ निच्चिंतउ, सो भवि भमइ दुक्खसंतत्तउ ॥६३॥

सव्वेवि दुक्खभीरू सव्वेवि सुक्खाहिलासिणो सत्ता। सव्वेवि जीवणपिया सव्वे मरणाउ बीहंति ॥

तस्याग्रे मृगमेकं धृत्वा प्रभणति जहि रे ! एतम्। अन्यथा तव शिरोऽसिना निजेन हस्तेन छेत्स्यामि ॥५२॥
ततो नृपवचनं श्रुत्वा चिन्तयति कुमारोऽहो ! अयं मूढः। जीवतोऽपि सिंहस्य केसरांल्लवितुमीहते ॥५३॥
अकृतापराधं हरिणादिपशुगणं यद्यहं न मारयामि। ततः किमस्य युक्तं वक्तुमेवंविधं, किन्तु ॥५४॥
उपकारी ममायमसमञ्जसचेष्टितोऽपि दयास्थानम्। पश्यामि तावदेतच्चिन्तयित्वा प्रतिभणति तमेवम् ॥५५॥
यत्तव युक्तं तत्कुरुष्व तावन्नाहं हन्मि मृगमेतम्। मनोवाक्कायैरपराधविवर्जितं दीनम् ॥५६॥
तदपि करोमि महायशः ! यदि किल मरणं न भवेत्कदापि। इतरथापि खलु मर्तव्ये को नियमधुरां परित्यजेत् ?॥
अनिलान्दोलनशीलकमलिनीकमलदललग्नजललवचलानाम्। प्राणानां कृते तवापि परप्राणविनाशनमयुक्तम्॥
किमितो लज्जाजनकमुत्तमपुरुषाणां जीवलोके। यत्प्रहियते दीने पलायमाने प्रमत्ते वा ? ॥५९॥
लज्जन्ते महासत्त्वाः प्रहरणमुद्गीर्येषदपि। पश्यन्तः पुरतो वैरिणमपि मुक्तायुधं दीनम् ॥६०॥
सुष्ठ्वपि कृतापराधे प्रहरन्ति नोत्तमा अप्रहरति। मन्यन्ते कलङ्कं निजकुलस्याग्रप्रहारित्वम् ॥६१॥
यत्पुनः सोमस्वभावेषु निरपराधेषु नश्यत्सु। तृणमात्राहारजीवितेषु प्रहरणं तद् महापापम् ॥६२॥

अयमेव धर्मपरमार्थः कथ्यते, यत् परपीडा भवेत् तन्न क्रियते।
यः परपीडां करोति निश्चिन्तः, स भवे भ्रमति दुःखसंतप्तः ॥६३॥

सर्वेऽपि दुःखभीरवः सर्वेऽपि सौख्याभिलाषिणः सत्त्वाः। सर्वेऽपि जीवनप्रियाः सर्वे मरणाद् बिभ्यति ॥६४॥

Jain Education International　For Private & Personal Use Only　www.jainelibrary.org

अत्थु असारउ अथिरु बंधु तणु रोगि किलंतउ, आवइ जररक्खसि दुरंत जम्मु एइ तुरंतउ ।
नत्थि सुक्खु संसारि किंपि दयधम्मि पयट्टहि, पंचह दिवसह रेसि राय ! मं मारि पयट्टहि ॥६५॥
इयएवमाइअमओवमएहिं वयणेहिं करुणसारेहिं । अवणेउं मोहविसं निवोवि विहिओ दयाहारो ॥६६॥
सद्धम्मवयणविणयाइतोसिओ नरवई विजयचंदं । नियतणयं पिव खामेउमप्पणा देइ सप्पणयं ॥६७॥
नियपणइणीए पुत्तं पउमिणिनामाए पट्टदेवीए । सव्वाणं पच्चक्खं जुवरायपयम्मि संठवइ ॥६८॥
भणई पारद्धीए पावसमिद्धीइ होउ मह नियमो । तुह कुमर! धम्मबंधव! पभावओ परमकारुणिय ! ॥
नियनयरं संपत्तो कुमारलंभेण हरिसिओ राया । कारावइ कारामोयणाइ वद्धावणयमपुव्वं ॥७०॥
पिहुपासायवडंसगमेगं तह तुरयरहवराईयं । राया देइ कुमारस्स सोवि लिहिऊण विन्नत्तिं ॥७१॥
पेसइ नियसव्वसरूवगोयरं तुरियपुरिसपासम्मि । नियविरहदुत्थियाणं सुत्थत्थं जणणिजणयाणं ॥७२॥
अह अन्नया कयावि हु पासम्मि परिट्ठिए कुमारम्मि । रयणीए अद्धरत्ते राया निद्दाए विगमम्मि ॥७३॥
निसुणइ करुणयरसरं नयरबहिं इत्थियाए, तो भणइ । सुद्धिं लहाविऊणं कुमार! मह कहसु लहु तत्तो॥
आएसोत्ति भणित्ता खग्गसहाओ विनिग्गओ बाहिं । लंघित्ता पायारं विज्जुक्खित्तेण करणेण ॥७५॥
ता जाव मसाणंते सराणुसारेण वच्चई कुमरो । पज्जलियजलणकुंडे खिवमाणं मंसखंडाइं ॥७६॥
जोइयमेगं पेच्छइ सलक्खणित्थीए ऊरुमंसाइं । उक्कत्तंतं सियकत्तियाए विरसं रसंतीए ॥७७॥

अर्थोऽसारोऽस्थिरो बन्धुस्तनू रोगेण क्लान्ता, आयाति जराराक्षसी दुरन्ता जन्मैति त्वरमाणम् ।
नास्ति सौख्यं संसारे किमपि दयाधर्मे प्रवर्तस्व, पञ्च दिवसानि तिष्ठसि राजन् ! मा मारिं प्रवर्तय ॥६५॥
इत्येवमाद्यमृतोपमैर्वचनैः करुणासारैः । अपनीय मोहविषं नृपोऽपि विहितो दयाधारः ॥६६॥
सद्धर्मवचनविनयादितोषितो नरपतिर्विजयचन्द्रम् । निजतनयमिव क्षमयित्वाऽऽत्मना ददाति सप्रणयम् ॥६७॥
निजप्रणयिन्यै पुत्रं पद्मिनीनामायै पट्टदेव्यै । सर्वेषां प्रत्यक्षं युवराजपदे संस्थापयति ॥६८॥
भणाति पापर्द्धेः पापसमृद्धेर्भवतु मम नियमः । तव कुमार ! धर्मबान्धव ! प्रभावतः परमकारुणिक ! ॥६९॥
निजनगरं संप्राप्तः कुमारलाभेन हर्षितो राजा । कारयति कारामोचनादि वर्धनकमपूर्वम् ॥७०॥
पृथुप्रासादावतंसकमेकं तथा तुरगरथवरादिकम् । राजा ददाति कुमाराय सोऽपि लिखित्वा विज्ञप्तिम् ॥७१॥
प्रेषयति निजसर्वस्वरूपगोचरां त्वरितपुरुषपार्श्वे । निजविरहदुःस्थितयोः सौस्थ्यार्थं जननीजनकयोः ॥७२॥
अथान्यदा कदापि खलु पार्श्वे परिस्थिते कुमारे । रजन्यामर्धरात्रे राजा निद्राया विगमे ॥७३॥
शृणोति करुणतरस्वरं नगराद्बहिः स्त्रियाः, ततो भणाति । शुद्धिं लम्भयित्वा कुमार ! मम कथय लघु ततः ॥
आदेश इति भणित्वा खड्गसहायो विनिर्गतो बहिः । लङ्घित्वा प्राकारं विद्योत्क्षिप्तेन करणेन ॥७५॥
ततो यावत् श्मशानान्ते स्वरानुसारेण व्रजति कुमारः । प्रज्वलितज्वलनकुण्डे क्षिपन्तं मांसखण्डानि ॥७६॥
योगिनमेकं पश्यति सलक्षणास्त्रिया ऊरुमांसानि । उत्कृतन्तं शितकर्तर्या विरसं रसन्त्याः ॥७७॥

---

१ क. °ओ दयाओ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो करुणारसरसिओ कुमरो पभणेइ रे किमारद्धो। चंडालाणविणुचिओ रमणिवहो लिंगिएणावि?॥७८॥
अह भीओवि हु पभणइ मा विग्घं कुणसु सुणसु मह वयणं । वरलक्खणधर नारीनराण ऊरूण मंसाण॥७९॥
अट्ठोत्तरखंडसएहिं मंतपूएहिं हुयवहे हुणिए । सिज्झेइ चेडयवरो सिद्धप्पाओ मह स इन्हि ॥८०॥
जइ पुण जायइ विग्घं तो मं मारेइ एस निब्भंतं । भणइ कुमारो तहवि हु वराइयं मुंच लहु एयं ॥८१॥
नियऊरूणं कप्पिय जेण समप्पेमि मंसखंडाइं । तो सो तोसवसगओभणइ इमं साहु साहसिय ! ॥८२॥
तुह सरिसाण अलंभे निग्घिणमेयं मए समायरियं । ता मुक्कचिय एसा कुणसु लहुं जं तएभणियं ॥८३॥
अह साहसिक्करसिओ कुमरो ऊरूण मंसखंडाइं । करकेलियकत्ति उक्कत्तिऊण जोगिस्स अप्पेइ ॥८४॥
ता जाव तस्स सिद्धो चेडयराया भणेइ तो कुमरं । तुह साहिज्जेणं चिय एयस्स वसं अहं पत्तो ॥८५॥
ता तुज्झ एस चेडो अहं तु तुह चेडयस्स चेडोत्ति । सुमरेयव्वो कज्जे साहसधणधणिय ! इय वोत्तुं ॥८६॥
जाओ सो अद्दिस्सो जोईवि हु तव्वणेऽवणेऊण । संरोहणीए गारुडमंतं दाउं च तस्स गओ ॥८७॥
कुमरोवि बालकलिओ अखलियललिओ तओ समुच्चलिओ । पत्तो निवस्स पासे दंसइ कन्नं, तओ रन्ना ॥
पुट्ठा कह कुमरेणं आणीया, कहइ सा जहादिट्ठं । तो कुमरं आरोविय अंकम्मि सगग्गयं भणइ ॥८९॥
माणिक्केहिं उवलं कह एयं खिल्लियं तए वच्छ ! । 'सुद्धिं लहाविऊणं कहसु'त्ति पयंपिएवि मए ? ॥९०॥
तं चेव मज्झ पाणा तं सरणमिमस्स मज्झ लोयस्स । नयरं रट्ठं च इमं तुह कुसले कुसलमुव्वहइ ॥९१॥

ततः करुणारसरसितः कुमारः प्रभणति रे किमारब्धः । चाण्डालानामप्यनुचितो रमणीवधो लैङ्गिकेनापि ? ॥
अथ भीतोऽपि खलु प्रभणति मा विघ्नं कुरु शृणु मम वचनम् । वरलक्षणवरनारीनराणामूरूणां मांसानाम् ॥
अष्टोत्तरशतखण्डैर्मन्त्रपूतैर्हुतवहे हुते । सिध्यति चेटकवरः सिद्धप्रायो मम स इदानीम् ॥८०॥
यदि पुनर्जायते विघ्नस्ततो मां मारयत्येष निर्भ्रान्तम् । भणति कुमारस्तथापि हि वराकीं मुञ्च लघ्वेताम्॥८१॥
निजोर्वोः क्लृप्त्वा येन समर्पयामि मांसखण्डानि । ततः स तोषवशगतो भणतीदं साधु साहसिक ! ॥८२॥
तव सदृशानामलाभे निर्घृणमेतन्मया समाचरितम् । तस्मान्मुक्तैवैषा कुरु लघु यत्त्वया भणितम् ॥८३॥
अथ साहसैकरसिकः कुमार ऊर्वोर्मांसखण्डानि । करकलितकर्तरीक उत्कृत्य योगिनेऽर्पयति ॥८४॥
तावद्यावत्तस्य सिद्धश्चेटकराजो भणति ततः कुमारम् । तव साहाय्येनैवैतस्य वशमहं प्राप्तः ॥८५॥
तस्मात्तवैष चेटोऽहं तु तव चेटस्य चेट इति । स्मर्तव्यः कार्ये साहसधनधनिक ! इत्युक्त्वा ॥८६॥
जातः सोऽदृश्योयोग्यपि खलु तद्व्रणानपनीय । संरोहण्या गारुडमन्त्रं दत्त्वा च तस्मै गतः ॥८७॥
कुमारोऽपि बालाकलितोऽस्खलितललितस्ततः समुच्चलितः । प्राप्तो नृपस्य पार्श्वे दर्शयति कन्यां, ततो राज्ञा ॥
पृष्टा कथं कुमारेणानीता, कथयति सा यथादृष्टम् । ततः कुमारमारोप्याङ्के सगद्गदं भणति ॥८९॥
माणिक्यैरुपलः कथमेष क्रीतस्त्वया वत्स ! । 'शुद्धिं लम्भयित्वा कथय' इति प्रजल्पितेऽपि मया ? ॥९०॥
त्वमेव मम प्राणास्त्वं शरणमस्य मम लोकस्य । नगरं राष्ट्रं चेदं तव कुशले कुशलमुद्वहति ॥९१॥

---

१ क. ख. करक्करत्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

न य अंगंगीभावेण परिणएऽनन्नसरिसजिणधम्मे । जुत्तं मणुयत्तं सिवसुहक्खमं संसए खिविउं ॥९२॥
अहवा जुत्ताजुत्तं जाणइ वच्छो तहावि नो तुमए । इय कायव्वं मह पत्थणाए कइयावि, तो कुमरो ॥९३॥
काऊण अंजलिं मत्थयम्मि जंपइ पमाणमाएसो । अह भणइ निवो कन्ने का सि तुमं कहव वसणमिमं ?॥९४॥
सा नमिउं भणइ इहं कमलायरसेट्ठिणो अहं धूया । कमलसिरी नामेणं रममाणी उववणस्संतो ॥९५॥
दिट्ठा तेण तओ मं करे गहेऊण गयणमुप्पइओ । पत्तो मसाणमज्झं विन्नत्तमिओ परं पुव्विं ॥९६॥
तुहदुसहविरहहुयवहजालोलिपलीवियाइं हिययाइं । पावंतु निव्वुइं सिट्ठिसयणवग्गस्स इय भणिउं ॥९७॥
निब्भिचभिच्चसहिया विणिवेसियमाणसा कुमारम्मि । तणुमित्तेणं कन्ना पट्ठविया पिउगिहे रन्ना ॥९८॥
तं दट्ठूणं सहसा राहुविमुक्कं व इंदुणो बिंबं । सिट्ठिमुहं विप्फुरियं सायरमवगूहिउं तत्तो ॥९९॥
सविसेसं सम्माणिय ते निवभिच्चे विसज्जए सिट्ठी । जणणीपमुहजणेणवि हरिसेणालिंगिउं भणिया ॥१००॥
वच्छे ! तुहविरहानलसंतत्तमणेहिं दीणवयणेहिं । चउजामावि हु रयणी जामसहस्सोवमा गमिया ॥१०१॥
रोमंचंचियगत्ता पयडंती कुमरगुणगणुक्करिसं । सव्वं तं वित्तंतं परिपुट्ठा सिट्ठिणो कहइ ॥१०२॥
तो अवगयतच्चित्तो तं सिट्ठी भणइ तेण तुह वच्छे !। सकुडुंबपरियणस्सवि मह जीवियनिव्विसेसाए ॥
रक्खंतेणं पाणे जं विहियं तस्स नत्थि पडियारो । तो दायव्वाऽवस्सं तस्स तुमं होउ इय ताव ॥१०४॥
रयणपडिपुण्णथालं पभायसमयम्मि ढोइउं तत्तो । सिट्ठी कयप्पणामो संथुणइ नरेसरं एवं ॥१०५॥
धन्नो सो एस जणो सुपुन्नपुंजोव्व नाह ! जस्स तुमं । दुरियावहरणसंपयसंपायणजग्गिरो सययं ॥१०६॥

न चाङ्गाङ्गीभावेन परिणतेऽनन्यसदृशजिनधर्मे । युक्तं मनुजत्वं शिवसुखक्षमं संशये क्षेप्तुम् ॥९२॥
अथवा युक्तायुक्तं जानाति वत्सस्तथापि नो त्वया । इति कर्तव्यं मम प्रार्थनया कदापि ततः कुमारः॥९३॥
कृत्वाऽञ्जलिं मस्तके जल्पति प्रमाणमादेशः । अथ भणति नृपः कन्यां काऽसि त्वं कथं वा व्यसनमिदम् ? ॥९४॥
सा नत्वा भणतीह कमलाकरश्रेष्ठिनोऽहं दुहिता । कमलश्रीर्नाम्ना रममाणोपवनस्यान्तः ॥९५॥
दृष्टा तेन ततो मां करे गृहीत्वा गगनमुत्पतितः । प्राप्तः श्मशानमध्यं विज्ञपितमितः परं पूर्वम् ॥९६॥
त्वद्दुःसहविरहहुतवहज्वालालीप्रदीपितानि हृदयानि । प्राप्नुवन्तु निर्वृतिं श्रेष्ठिस्वजनवर्गस्येति भणित्वा ॥
निर्भृत्यभृत्यसहिता विनिवेशितमानसा कुमारे । तनुमात्रेण कन्या प्रस्थापिता पितृगृहे राज्ञा ॥९८॥
तां दृष्ट्वा सहसा राहुविमुक्तमिवेन्दोर्बिम्बम् । श्रेष्ठिमुखं विस्फुरितं सादरमवगुह्य ततः ॥९९॥
सविशेषं सम्मान्य तान् नृपभृत्यान् विसृजति श्रेष्ठी । जननीप्रमुखजनेनापि हर्षेणालिङ्ग्य भणिता ॥१००॥
वत्से ! त्वद्विरहानलसंतप्तमनोभिर्दीनवदनैः । चतुर्यामापि खलु रजनिर्यामसहस्रोपमा गमिता ॥१०१॥
रोमाञ्चाञ्चितगात्रा प्रकटयन्ती कुमारगुणगणोत्कर्षम् । सर्वं तं वृत्तान्तं परिपृष्टा श्रेष्ठिनं कथयति ॥१०२॥
ततोऽवगततच्चित्तस्तां श्रेष्ठी भणति तेन तव वत्से !। सकुटुम्बपरिजनस्यापि मम जीवितनिर्विशेषायाः ॥१०३॥
रक्षता प्राणान् यद्विहितं तस्य नास्ति प्रतिकारः । ततो दातव्याऽवश्यं तस्मै त्वं भवत्विति तावत्॥१०४॥
रत्नपरिपूर्णस्थालं प्रभातसमये ढौकित्वा ततः । श्रेष्ठी कृतप्रणामः संस्तौति नरेश्वरमेवम् ॥१०५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धन्नाणवि धन्नतमो पहु ! त एएण पुत्तरयणेण । देवाण य मणुयाणं च चित्तचमक्कारचरिएण ॥१०७॥
विन्नवियव्वं तु इमं तुमए नियदिट्ठिगोयरं पत्ता । मज्झ दयाए धूया मह गेहे पवेसिया झत्ति ॥१०८॥
सा य कुमारं काऊण माणसे तत्थ नाह ! संपत्ता । इय विप्पलंभियाए विसए को तीइ आएसो ? ॥
तो हसिउं भणइ निवो एसा कुमरावरोहगेहम्मि । जावज्जीवं निवसउ समप्पिया सुथिरलग्गम्मि ॥११०॥
भणिउं महापसायं कयसम्माणो समुट्ठिओ सिट्ठी । अह अन्नया कुमारो तुरए वाहिंतओ बाहिं ॥१११॥
निसुणइ अक्कंदरवं बहुनरनारीण तूररवमुहलं । पिच्छइ य सुमुल्लदुगुल्लमल्लयसंछाइयं इंतं ॥११२॥
जंपाणं, तो जंपइ नाऊणं तूरसरविसेसेण । अहिदट्ठा कन्नेसा, किं जीवंतिं डहिस्संति ॥११३॥
तो नियपुरिसं संपेसिऊण कुमरो कहावए ताण । मा मडयं डहह इमं जा पउंजामि मंतमहं ॥११४॥
तो अमयवुट्ठितुल्लं एयं सुणिऊण विम्हिया जाव । चिट्ठंति ताव कुमरो तुरियं तस्संतियं पत्तो ॥११५॥
तत्तो गारुडमंतेण सलिलमभिमंतिऊण जहविहिणा । सत्तचुलुएहिं पहया सा उट्ठइ अमयसित्तव्व ॥११६॥
दट्ठुं पुरओ कुमरं रूवेण सुरंव मयणसरविद्धा । को एसो कस्स सुओ किंच इमं पुच्छिओ तीए॥११७॥
तं चेव पलोयंती जा चिट्ठइ अणिमिसा तओ मंती । नयसारो तीए पिया कुमरं पइ जंपए एवं ॥११८॥
धन्ना सा पुण्णुक्करिसनिम्मिया तिहुयणेवि तुह जणणी । जीइ पसूओ सि तुमं दीणुद्धरणिक्कदुल्ललिओ॥
धन्नयरा कमलसिरी जीसेऽवत्थं इमं पवन्नाए । पाणपरित्ताणकए सरणं तं चेव संजाओ ॥१२०॥

धन्यः स एष जनैः सुपुण्यपुञ्ज इव नाथ ! यस्य त्वम् । दुरितापहरणसंपत्संपादनजागरिता सततम् ॥१०६॥
धन्यानामपि धन्यतमः प्रभो ! त्वमेतेन पुत्ररत्नेन । देवानां च मनुजानां च चित्तचमत्कारचरितेन ॥१०७॥
विज्ञपयितव्यं त्विदं त्वया निजदृष्टिगोचरं प्राप्ता । मयि दयया दुहिता मम गेहे प्रवेशिता झटिति ॥१०८॥
सा च कुमारं कृत्वा मानसे तत्र नाथ ! संप्राप्ता । इति विप्रलम्भितायाः विषये कस्तस्या आदेशः? ॥१०९॥
ततो हसित्वा भणाति नृप एषा कुमारावरोधगेहे । यावज्जीवं निवसतु समर्पिता सुस्थिरलग्ने ॥११०॥
भणित्वा महाप्रसादं कृतसम्मानः समुत्थितः श्रेष्ठी । अथान्दा कुमारस्तुरगान् वाहयन् बहिः ॥१११॥
शृणोत्याक्रन्दरवं बहुनरनारीणां तूररवमुखरम् । पश्यति च सुमूल्यदुकूलमल्लकसंछादितमायत् ॥११२॥
शवयानं, ततो जल्पति ज्ञात्वा तूरस्वरविशेषेण । अहिदष्टा कन्यैषा, किं जीवन्तीं धक्ष्यन्ति ? ॥११३॥
ततो निजपुरुषं संप्रेष्य कुमारः कथापयति तान् । मा मृतकं दहतेदं यावत्प्रयुञ्जे मन्त्रमहम् ॥११४॥
ततोऽमृतवृष्टितुल्यमेतत् श्रुत्वा विस्मिता यावत् । तिष्ठन्ति तावत्कुमारस्त्वरितं तस्यान्तिकं प्राप्तः ॥११५॥
ततो गारुडमन्त्रेण सलिलमभिमन्त्र्य यथाविधि । सप्तचुलुकैः प्रहता सोत्तिष्ठत्यमृतसिक्तेव ॥११६॥
दृष्ट्वा पुरतः कुमारं रूपेण सुरमिव मदनशरविद्धा । क एष कस्य सुतः किञ्चेदं पृष्टस्तया ॥११७॥
तमेव प्रलोकमाना यावत्तिष्ठत्यनिमिषा ततो मन्त्री । नयसारस्तस्याः पिता कुमारं प्रति जल्पत्येवम् ॥११८॥
धन्या सा पुण्योत्कर्षनिर्मिता त्रिभुवनेऽपि तव जननी । यया प्रसूतोऽसि त्वं दीनोद्धरणैकदुर्ललितः ॥११९॥
धन्यतरा कमलश्रीर्यस्या अवस्थामिमां प्रपन्नायाः । प्राणपरित्राणकृते शरणं त्वमेव संजातः ॥१२०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो लज्जोणयवयणो मंतिं आपुच्छिउं गओ कुमरो । तेहिं चिय तूरेहिं वद्धावणयम्मि वज्जंते ॥१२१॥
तेहिं चिय वयणेहिं उवगिज्जंतेसु मंगलसएसु । वद्धावितेसु पइक्कमं तु अन्नन्नलोएसु ॥१२२॥
सव्वाइवि सामग्गीइ तीए धूयाए तह य संजुत्तो । संपत्तो नरवइमंदिरम्मि नयसारमंतिवरो ॥१२३॥
राया तं तह दट्ठुं जाव वियक्केइ किं किमेयंति । पडिहारसूइओ तो पणमइ मंती निवपयाइं ॥१२४॥
उचियासणे निविट्ठो आभट्ठो नरवरेण अह भणइ । रोमंचकंचुइज्जंतसव्वगत्तो पुणो नमिउं ॥१२५॥
मरणसमा जं किर नत्थि आवई तंपि तुह सुपुत्तेण । कयमन्नहा नरेसर ! वयणं अइसयनिहाणेण ॥
इय उक्खिविउं सव्वं वित्तंतं वित्थरेण तं कहिउं । विन्नवइ मज्झ धूया संपइ कुमाराउ दूरम्मि ॥१२७॥
अहिलसइ नेय ठाउं असरीरसरप्पहारभयभीया । जह तीए भयं न हवइ कुणसु पसायं तहा सामी ! ॥
राया तं पडिवज्जिय सोहणलग्गम्मि गुरुविभूईए । कमलाविमलसिरीणं पाणी गाहावए कुमरं ॥१२९॥
विसयसुहमणुभवंतो तो ताहिं समं गमेइ दियहाइं । जिणधम्मं कुव्वंतो थुव्वंतो बंदिवंदेहिं ॥१३०॥
अह अन्नया नरिंदो आयंककंतविग्गहो सहसा । तं अहिसिंचइ रज्जे सयं च सव्वन्नुभणिएण ॥१३१॥
तेणं उवइट्ठेणं पंचनमोक्कारसुमरणापुव्विं । समभावभावियप्पा विहिणा पाणे परिच्चयइ ॥१३२॥
अह पउरा अन्नदिणे सीहदुवारम्मि उच्चसद्देहिं । साहुलिहत्था पुक्कारयंति मुसियम्ह मुसियम्ह ॥१३३॥
तो नरवइणा सोउं हक्कारेऊण कारणं पुट्ठा । साहंति अदिट्ठो कोवि तक्करो मुसइ जग्गंते ॥१३४॥
तो तज्जइ नयरारक्खियं निवो सोवि भणइ पहु ! चोरो । दिट्ठीए गोयरे कोवि नेइ किमहं करेमि तओ ? ।

ततो लज्जावनतवदनो मन्त्रिणमभिपृच्छय गतः कुमारः । तैरव तूरैर्वर्धनके वाद्यमाने ॥१२१॥
तैरेव वदनैरुपगीयमानेषु मङ्गलशतेषु । वर्धयत्सु प्रतिक्रमं त्वन्यान्यलोकेषु ॥१२२॥
सर्वयापि सामग्र्या तया दुहित्रा तथा च संयुक्तः । संप्राप्तो नरपतिमन्दिरे नयसारमन्त्रिवरः ॥१२३॥
राजा तं तथा दृष्ट्वा यावद् वितर्कयति किं किमेतदिति । प्रतिहारसूचितस्ततः प्रणमति मन्त्री नृपपादौ॥१२४॥
उचितासने निविष्ट आभाषितो नरवरेणाथ भणाति । रोमाञ्चकञ्चुकायमानसर्वगात्रः पुनर्नत्वा ॥१२५॥
मरणसमा यत्किल नास्त्यापत् तदपि तव सुपुत्रेण । कृतमन्यथा नरेश्वर ! वचनमतिशयनिधानेन ॥१२६॥
इत्युत्क्षिप्य सर्वं वृत्तान्तं विस्तरेण तं कथयित्वा । विज्ञपयति मम दुहिता संप्रति कुमाराद् दूरे ॥१२७॥
अभिलषति नैव स्थातुमशरीरशरप्रहारभयभीता । यथा तस्या भयं न भवति कुरुष्व प्रसादं तथा स्वामिन् ! ॥
राजा तत् प्रतिपद्य शोभनलग्ने गुरुविभूत्या । कमलाविमलाश्रियोः पाणी ग्राहयति कुमारम् ॥१२९॥
विषयसुखमनुभवंस्ततस्ताभ्यां समं गमयति दिवसानि । जिनधर्मं कुर्वन् स्तूयमानो बन्दिवृन्दैः ॥१३०॥
अथान्यदा नरेन्द्र आतङ्काक्रान्तविग्रहः सहसा । तमभिषिञ्चति राज्ये स्वयं सर्वज्ञभणितेन ॥१३१॥
तेनोपदिष्टेन पञ्चनमस्कारस्मरणपूर्वम् । समभावभावितात्मा विधिना प्राणान् परित्यजति ॥१३२॥
अथ पौरा अन्यदिने सिंहद्वारे उच्चशब्दैः । वस्त्रहस्ताः पूत्कारयन्ति मुषिताः स्मो मुषिताः स्मः ॥१३३॥
ततो नरपतिना श्रुत्वा हक्कारयित्वा कारणं पृष्टाः । कथयन्त्यदृष्टः कोऽपि तस्करो मुष्णाति जाग्रतः॥१३४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सो कोवि उवाओ नत्थि देव! गहणे न तस्स जो विहिओ। भणइ निवो संपयमवि इत्थेव अहं तमाणेमि ॥
तो चेडयाओ तक्खणमाणावेऊण पत्थओ बाहं। बद्धं दंसइ तेसिं तं चोरं पुच्छइ तहेयं ॥१३७॥
कह न मुसंतो दीससि स भणइ ओसोयणीए विज्जाए। सोवाविऊण लोयं मुसेमि सिच्छाए घरसारं ॥
राया जंपइ मोसं एसिं अप्पेसु, भणइ सो देव!। जेण अहं आणीओ मोसं सव्वंपि तेणेव ॥१३९॥
जं आसि मए हरियं भंडायारम्मि तुम्ह तं ठवियं। आणेऊण मए च्चिय सद्धिं, तत्तो य आगंतु॥१४०॥
भांडारिओ पयंपइ सुवन्नवत्थाइवत्थुसंघाओ। भंडागारं तप्पंगणं च सव्वंपि पूरंतो ॥१४१॥
सहसा दीसइ, देवो तत्थ पमाणं, तओ निवो भणइ। वणियाण अप्पह इमं तो भणिया तेवि नियनिययं॥
गहिउं भणंति तिहुयणअच्छेरयचरियहरियजयदुरिय!। अम्हं पुन्नोदयजीविएण तं जीव चिरकालं ॥
अह पंचंगपणामं काऊणं निग्गएसु पउरेसु। जंपइ सो विज्जासिद्धतक्करो जोडिउं हत्थे ॥१४४॥
तुह पहु! पसरियउब्भडपयावपवणेण अक्कतूलंव। उक्खिविय इहाणीओ विवसो सुहकम्मजोएण॥१४५॥
दिट्ठं च सयलकल्लाणकुलहरं तुम्ह चरणकमलजुयं। इत्तो जं मह जोग्गं तेण पसायं कुणउ देवो ॥१४६॥
रायावि भणइ कल्लाणकुलहरं होसु एस आएसो। सव्वन्नुभासियाइं सुणिऊणं अणुट्ठिऊणं च ॥१४७॥
भणइ मह दिससु ताइं राया तो कहइ दुविहजिणधम्मं। अह सुयपुव्वं एयं मज्झ पुरा इय विचिंतंतो ॥
संजायजाइसरणो पुव्वभवब्भत्थसरियसुत्तत्थो। पडिवज्जइ पव्वज्जं देवयउवणीयमुणिलिंगो ॥१४९॥

ततस्तर्जयति नगरारक्षिकं नृपः सोऽपि भणति प्रभो! चौरः। दृष्टेर्गोचरे कोऽपि नैति किमहं करोमि ततः?॥
स कोऽप्युपायो नास्ति देव! ग्रहणे न तस्य यो विहितः। भणति नृपः सांप्रतमप्यत्रैवाहं तमानयामि॥१३६॥
ततश्चेटकात् तत्क्षणमानाय्य प्रस्थतो बाहौ। बद्धं दर्शयति तेभ्यस्तं चौरं पृच्छति तथैतत् ॥१३७॥
कथं न मुष्णन् दृश्यसे, स भणत्यवस्वापन्या विद्यया। स्वापयित्वा लोकं मुष्णामि स्वेच्छया गृहसारम्॥१३८॥
राजा जल्पति मोषमेभ्योऽर्पय, भणति स देव!। येनाहमानीतो मोषः सर्वोऽपि तेनैव ॥१३९॥
य आसीन्मया हृतो भाण्डागारे तव स स्थापितः। आनीय मयैव सार्धं, ततश्चागत्य ॥१४०॥
भाण्डागारिकः प्रजल्पति सुवर्णवस्त्रादिवस्तुसंघातः। भाण्डागारं तत्प्राङ्गणं च सर्वमपि पूरयन् ॥१४१॥
सहसा दृश्यते, देवस्तत्र प्रमाणम्, ततो नृपो भणति। वणिग्भ्योऽर्पयेमं ततो भणितास्तेऽपि निजनिजम् ॥
गृहीत्वा भणन्ति त्रिभुवनाश्चर्यचरितहृतजगद्दुरित!। अस्माकं पुण्योदयजीवितेन त्वं जीव चिरकालम् ॥
अथ पञ्चाङ्गप्रणामं कृत्वा निर्गतेषु पौरेषु। जल्पति स विद्यासिद्धतस्करो योजयित्वा हस्तौ ॥१४४॥
तव प्रभो! प्रसृतोद्भटप्रतापपवनेनार्कतूलमिव। उत्क्षिप्येहानीतो विवशः शुभकर्मयोगेण ॥१४५॥
दृष्टं च सकलकल्याणकुलगृहं तव चरणकमलयुगम्। इतो यद् मम योग्यं तेन प्रसादं करोतु देवः ॥१४६॥
राजापि भणति कल्याणकुलगृहं भवैष आदेशः। सर्वज्ञभाषितानि श्रुत्वाऽनुष्ठाय च ॥१४७॥
भणति मे दिश तानि राजा ततः कथयति द्विविधजिनधर्मम्। अथ श्रुतपूर्वमेतन्मया पुरेति विचिन्तयन् ॥
संजातजातिस्मरणः पूर्वभवाभ्यस्तस्मृतसूत्रार्थः। प्रतिपद्यते प्रव्रज्यां देवतोपनीतमुनिलिङ्गः ॥१४९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह राया रोमंचियगत्तो सिंहासणाउ उट्ठेउं । ति पयाहिणीकरेउं पणमिय परमाए भत्तीए ॥१५०॥
उचियासणे निवेसिय पुच्छइ कह नाह! तिहुयणच्छरियं । इय पहुणा आयरियं, जाईसरणाउ तो कहइ ॥
आपुच्छिय नरनाहं विहरिय अब्भुज्जओ गओ मोक्खं। राया य तत्थ देसे पभावए जिणमयं धम्मं॥१५२॥
तथा;—
जणसंमद्देण विणा होउ वसे मह सचक्कपरचक्कं। इय परिभाविय आइसइ चेडयं रायवाडीए ॥१५३॥
डिंडीरपिंडपंडुरपुंडरीयं तं धरेसु मज्झुवरिं । गयणट्ठियदिव्वरूवो तेणावि कए जहादिट्ठे ॥१५४॥
तो चोरवइयरे तह इमम्मि कहियम्मि चारपुरिसेहिं । सीमाला नरवइणो सव्वे ते सेवमावन्ना ॥१५५॥
इत्थं सव्वत्थ समत्थपत्थिवा मत्थएण तस्साणं । सोऊण तप्पभावं धरंति धीरावि विणएण ॥१५६॥
पसरियपयावदुसहो अवसारियदरियसत्तुतमविसरो। वित्थरियकमलकोसो हयदोसो सहइ सो सूरो ॥१५७॥
मंगलउरनयराओ समागओ चउरवयणअभिहाणो । जयसीहरायपेसियदूओ अह अन्नया तस्स॥१५८॥
अत्थाणसभाए संठियस्स सिरिविजयचंदरायस्स । दंसइ रायाएसं पडिहारपवेसिओ सोवि ॥१५९॥
उट्ठेऊणं राया दोहिवि हत्थेहिं गिण्हिऊण तयं । आरोविऊण सीसे ठाविय सिंहासणे तत्तो ॥१६०॥
विम्हियहियएण समं अत्थाणगएण सव्वलोएण । पंचंगं पणिवायं काउं घित्तूण वाएइ ॥१६१॥
तद्यथा;—
सिरिमंगलउरनयराओ जयसीहनराहिवो सुविक्खाओ । सिरिहत्थिणउरनयरे पयावअक्कंतनिवचक्कं ॥
सिरिविजयचंदनिवइं सायरमवगूहिउं पणयसारं । हिययगयं सब्भावं सगग्गयं किंपि पयडेइ ॥१६३॥

अथ राजा रोमाञ्चितगात्रः सिंहासनादुत्थाय । त्रिः प्रदक्षिणीकृत्य प्रणम्य परमया भक्त्या ॥१५०॥
उचितासने निवेश्य पृच्छति कथं नाथ ! त्रिभुवनाश्चर्यम् । इति प्रभुणाचरितं, जातिस्मरणात्ततः कथयति ॥
आपृच्छ्य नरनाथं विहृत्याभ्युद्यतो गतो मोक्षम् । राजा च तत्र देशे प्रभावयति जिनमतं धर्मम् ॥१५२॥
जनसंमर्देन विना भवतु वशं मम स्वचक्रपरचक्रम् । इति परिभाव्यादिशति चेटकं राजवाट्याम् ॥१५४॥
डिण्डीरपिण्डपाण्डुरपुण्डरीकं त्वं धर ममोपरि । गगनस्थितादिव्यरूपस्तेनापि कृते यथादिष्टे ॥१५४॥
ततश्चौरव्यतिकरे तथाऽस्मिन्कथिते चारपुरुषैः । सीमस्था नरपतयः सर्वे ते सेवामापन्नाः ॥१५५॥
इत्थं सर्वत्र समर्थपार्थिवा मस्तकेन तस्याज्ञाम् । श्रुत्वा तत्प्रभावं धरन्ति धीरा अपि विनयेन ॥१५६॥
प्रसृतप्रतापदुस्सहोऽपसारितदृप्तशत्रुतमोविसरः । विस्तृतकमला(ल)कोशो हतदोषो राजति स शू(सू)रः ॥१५७॥
मङ्गलपुरनगरात् समागतश्चतुरवचनाभिधानः । जयसिंहराजप्रेषितदूतोऽथान्यदा तस्य ॥१५८॥
आस्थानसभायां संस्थितस्य श्रीविजयचन्द्रराजस्य । दर्शयति राजादेशं प्रतिहारप्रवेशितः सोऽपि ॥१५९॥
उत्थाय राजा द्वाभ्यामपि हस्ताभ्यां गृहीत्वा तम् । आरोप्य शीर्षे स्थापयित्वा सिंहासने ततः ॥१६०॥
विस्मितहृदयेन सममास्थानगतेन सर्वलोकेन । पञ्चाङ्गं प्रणिपातं कृत्वा गृहीत्वा वाचयति ॥१६१॥
श्रीमङ्गलपुरनगराज्जयसिंहनराधिपः सुविख्यातः । श्रीहस्तिनापुरनगरे प्रतापाक्रान्तनृपचक्रम् ॥१६२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जायंति आवयं पाविउंपि गरुया विसालरिद्धिल्ला। खीणोवि होइ जलही महल्लहल्लंतकल्लोलो ॥१६४॥
आवइगयावि गरुया हासट्ठाणं न होंति लोयस्स। बंधपवन्नावि गया सिरिं गया रायभवणेसु ॥१६५॥
विसमावत्थगएणवि वच्छ! तए किंकरीकयसुरेण। सच्चवियमिमं सव्वं रज्जसिरिं अणुहवंतेण ॥१६६॥
किंतु सुणंतस्सवि तुज्झ रायसिरधरियसासणसमिद्धिं। ईसाइव सवणाणं नयणाइं नडंति मह हिययं॥१६७॥
किञ्च।
तुरयावहारपुव्वं सव्वत्थ गवेसिओवि नो दिट्ठो। तो तुहविरहहुयासो पज्जलिओ मह मणुज्जाणे॥१६८॥
दड्ढं तेण तओ तं सुहपल्लवियं घणासकुसुमिल्लं। निम्मलपुन्नफलड्ढं विवेयवरभूरुहसमिद्धं ॥१६९॥
किञ्च।
तुज्झ विओए निव! निवइपुरजणो जणवओ जणणिवग्गो। जं कहिउंपि न तीरइ दुहमणुहवइ अज्जवि य ॥
तुहविरहकायराए जणणीए नयणवारिपूरेण। पलयजलओ अयंडे वरिसविओ दुक्खतवियाए ॥१७१॥
संपइ पुण आहीए वाही तह आहिआ मह सरीरे। जह तं चयंति पाणा ता लहु दंसेहि अप्पाणं॥१७२॥
इय लेहं वायंतो सगग्गयं लोयणंसुकुसुमेहिं। जणयनियहत्थलिहियक्खरेसु पूयंव निम्मवइ ॥१७३॥
भणइ य किर जणयाइं जाएहिं सुएहिं हुंति सुहियाइं। तं विवरीयं जायं मइ जाए मज्झ जणयाण ॥
तो नयसारप्पमुहं मंतिजणं पुच्छिऊण सुमुहुत्ते। विमलसिरीए पुत्तं सुलोयणं ठाविउं रज्जे ॥१७५॥
रज्जस्स वाहगं तह नयसारं ठाविउं महामंतिं। संझाए पत्थाणे ठिओ बहिं सोहणमुहुत्ते ॥१७६॥

श्रीविजयचन्द्रनृपतिं सादरमवगुह्य प्रणयसारम्। हृदयगतं सद्भावं सगद्गदं किमपि प्रकटयति ॥१६३॥
जायन्त आपदं प्राप्यापि गुरवो विशालर्द्धयः। क्षीणोऽपि भवति जलधिश्चलन्महाकल्लोलः ॥१६४॥
आपद्गता अपि गुरवो हास्यस्थानं न भवन्ति लोकस्य। बन्धप्रपन्ना अपि गजाः श्रियं गता राजभवनेषु ॥
विषमावस्थागतेनापि वत्स! त्वया किङ्करीकृतसुरेण। सत्यापितमिदं सर्वं राज्यश्रियमनुभवता ॥१६६॥
किन्तु शृण्वतोऽपि तव राजशिरोधृतशासनसमृद्धिम्। ईर्ष्ययेव श्रवणयोर्नयने नाटयतो मम हृदयम् ॥१६७॥
तुरगापहारपूर्वं सर्वत्र गवेषितोऽपि नो दृष्टः। ततस्त्वद्विरहहुताशः प्रज्वलितो मम मनउद्याने ॥१६८॥
दग्धं तेन ततस्तत् सुखपल्लवितं घनाशाकुसुमकम्। निर्मलपुण्यफलाढ्यं विवेकवरभूरुहसमृद्धम् ॥१६९॥
तव वियोगे नृप! नृपतिपुरजनो जनपदो जननीवर्गः। यत्कथयितुमपि न शक्यते दुःखमनुभवत्यद्यापि च ॥
त्वद्विरहकातरया जनन्या नयनवारिपूरेण। प्रलयजलदोऽकाण्डे वर्षितो दुःखतप्तया ॥१७१॥
संप्रति पुनराधिना व्याधिस्तथाहितो मम शरीरे। यथा तत्त्यजन्ति प्राणास्तस्माल्लघु दर्शयात्मानम् ॥१७२॥
इति लेखं वाचयन् सगद्गदं लोचनाश्रुकुसुमैः। जनकनिजहस्तलिखिताक्षरेषु पूजामिव निर्मापयति ॥१७३॥
भणति च किल जनकानि जातैः सुतैर्भवन्ति सुखितानि। तद्विपरीतं जातं मयि जाते मम जनकयोः ॥१७४॥
ततो नयसारप्रमुखं मन्त्रिजनं पृष्ट्वा सुमुहूर्ते। विमलश्रियाः पुत्रं सुलोचनं स्थापयित्वा राज्ये ॥१७५॥
राज्यस्य वाहकं तथा नयसारं स्थापयित्वा महामन्त्रिणम्। संध्यायां प्रस्थाने स्थितो बहिः शोभनमुहूर्ते ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अंतेउरेण सहिओ कइवयरहतुरयकरिसहस्सेहिं । संचलिओ चालंतो सल्लसहस्साइं लोयस्स ॥१७७॥
नियपत्थाणयवइयरमाइट्ठो नरवरेण परिकहइ । तव्वेलं चिय जयसीहनिवइणो चेडओ गंतुं ॥१७८॥
तं सोउं सो सहसा मुक्को रोगेहिं अमयसित्तोव्व । माइ न अंगे जणणीवि परियणो जणवयजणो•य ॥
संमाणिऊण तेण विसज्जिओ विजयचंदनरवइणो । तं सो साहइ तत्तो य ऊसुयत्तं परिच्चइउं ॥१८०॥
चेडयपयडियमग्गो गामागरनगरपरिमंडियं वसुहं । बोलंतो सो वच्चइ ठाणे ठाणे पडिच्छंतो ॥१८१॥
रायाईणमुवायणमणेगगणरायरायबिंबाइं । ठावंतो भंजंतो दप्पमणेगाण सुहडाण ॥१८२॥
पइनगरं पइगामं पायं जिणमंदिराइं पूयंतो । जिन्नाइं उद्धरंतो सम्माणंतो समणधम्मे ॥१८३॥
निग्रपिउचउरंगचमूसंचारपवित्तभूमिभागाए । संपत्तो सीमाए कमेण देसस्स सो तत्तो ॥१८४॥
चेडयमुहेण एयं जयसिंहनराहिवं भणावेइ । जह काऊण पसायं मह पच्चोणी न कायव्वा ॥१८५॥
अइकिसदेहत्ताओ मग्गसमेणं पुणोवि पभविसु । रोगत्ति तओ तेणवि तं पडिवज्जित्तु नयरम्मि ॥१८६॥
हट्टसोहानिरोवो दिन्नो सचिवाउ नायरजणाणं । तेहिंवि नियसत्तीए पारद्धो सो सवित्थरओ ॥१८७॥
तथाहि;—
ठाणट्ठाणनिवेसियसियचामरवत्थकुसुमरमणीयं । रमणीयरयणमालाविरइयवरवंदुरामालं ॥१८८॥
मालट्टालयगुरुसालमंचआरूढपोढरमणिजणं । जणसंकुलरत्थामुहपुरसुंदरिविहियवरगेयं ॥१८९॥
गेयाणुमग्गलग्गुग्गसुभगनच्चंतनच्चणीओहं । ओहावियसुरसुंदरिसुंदरिपारद्धकलहट्टं ॥१९०॥

अन्तःपुरेण सहितः कतिपयरथतुरगकरिसहस्रैः । संचलितश्चालयन् शल्यसहस्राणि लोकस्य ॥१७७॥
निजप्रस्थानव्यतिकरमादिष्टो नरवरेण परिकथयति । तद्वेलमेव जयसिंहनृपतये चेटको गत्वा ॥१७८॥
तत् श्रुत्वा स सहसा मुक्तो रोगैरमृतसिक्त इव । माति नाङ्गे जनन्यपि परिजनो जनपदजनश्च ॥१७९॥
सम्मान्य तेन विसृष्टो विजयचन्द्रनरपतये । तत् स कथयति ततश्चोत्सुकत्वं परित्यज्य ॥१८०॥
चेटकप्रकटितमार्गो ग्रामाकरनगरपरिमण्डितां वसुधाम् । अतिक्रामन् स व्रजति स्थाने स्थाने प्रतीच्छन् ॥
राजादीनामुपायनमनेकगणराजराजबिम्बानि । स्थापयन् भञ्जन् दर्पमनेकेषां सुभटानाम् ॥१८२॥
प्रतिनगरं प्रतिग्रामं प्रायो जिनमन्दिराणि पूजयन् । जीर्णान्युद्धरन् सम्मानयन् श्रमणधर्मिणः ॥१८३॥
निजपितृचतुरङ्गचमूसंचारपवित्रभूमिभागायाम् । संप्राप्तः सीम्नि क्रमेण देशस्य स ततः ॥१८४॥
चेटकमुखेनैतज्जयसिंहनराधिपं भाणयति । यथा कृत्वा प्रसादं ममाभिगमनं न कर्तव्यम् ॥१८५॥
अतिकृशदेहत्वाद् मार्गश्रमेण पुनरपि प्रभविष्णुः । रोग इति ततस्तेनापि तत्प्रतिपद्य नगरे ॥१८६॥
हट्टशोभादेशो दत्तः सचिवाद् नागरजनानाम् । तैरपि निजशक्त्या प्रारब्धः स सविस्तरम् ॥१८७॥
स्थानस्थाननिवेशितसितचामरवस्त्रकुसुमरमणीयम् । रमणीयरत्नमालाविरचितवरवन्दनमालम् ॥१८८॥
मालाट्टालकगुरुशालमञ्चारूढप्रौढरमणीजनम् । जनसंकुलरथ्यामुखपुरसुन्दरीविहितवरगेयम् ॥१८९॥
गेयानुमार्गलग्नोग्रसुभगनृत्यन्नर्तन्योघम् । अपस्कृतसुरसुन्दरीकसुन्दरीप्रारब्धकलहासम् ॥१९०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हट्टघरदारविरइयमुत्ताहलरणुसत्थियपबंधं। बंधवहसुंकपरिमुक्कलोयआसीसरवमुहलं ॥१९१॥
इय परमूसवभूयं पविसिय नयरं निवो विजयचंदो। जहसीहमहारायं पणमइ जणणिंपि सकलत्तो॥१९२॥
नियविरहतवियदेहं हरिसंसुजलेण निव्ववंतोव्व। आलिंगिय निवसंतं धराए सिंहासणे ठवइ ॥१९३॥
अन्नोन्नममंदाणंदमंदिरा जाव ठंति खणमेगं। रोमंचंचियगत्ता ता समयनिवेयओ पढइ ॥१९४॥
अवगाहिऊण जलहिं लहिउं उदयायलम्मि अब्भुदयं। वियसावियकमलवणो सव्वुवरिठिओ रवी जयइ ॥
समयाणुगयं वयणं सरिसं निवविजयचंदचरियस्स। पढियंति कणयलक्खं दावइ बंदिस्स नरनाहो ॥
एत्तो य सावएहिं विन्नत्तं जिणहरेसु सव्वेसु। ण्हवणबलिपूयपभिइं निप्पन्नं जं जहा इट्ठं ॥१९७॥
आसन्ने जिणभवणे देवे वंदंति दोवि नरनाहा। भंडारियं भणंति य अट्ठवि अट्ठाहियादिवसे ॥१९८॥
मग्गंति सावया जं दव्वं घणसारघुसिणमाईयं। दावंति य जं किंचिवि तत्थ विलंबो न कायव्वो॥१९९॥
समयमहोयहिसूरीण पायकमलं नमंसिउं इंति। नियभवणे भुंजंति य सपरियणा परमपीईए ॥२००॥
अह पत्थावे कहिओ सुयवुत्तंतो निवस्स पुट्ठेण। मइधणसचिवेण तओ जयसिंहनिवो भणइ तणयं॥२०१॥
तइ वच्छ ! पुहइपालणभरधरणधुरंधरम्मि निच्चिंतो। पुव्वपुरिसाणुचिन्नं संपइ मग्गं पवज्जामि ॥२०२॥
तो विजयचंदराया उट्ठेउं जणयपायवीढम्मि। विणिवेसिउत्तिमंगो सगग्गयं भणइ पसिऊण ॥२०३॥
वरिसाइं कइवि नियपायकमलरेणूए मज्झ भालयलं। ताय ! पवित्तीकाऊं उचियंपि इमं विहेयव्वं ॥२०४॥
एवमसग्गहपरमवि पुत्तं संबोहिऊण जुत्तीहिं। पीइमईए सहिओ कइवयसामंतमंतिजुओ ॥२०५॥

हट्टगृहद्वारविरचितमुक्ताफलरेणुस्वस्तिकप्रबन्धम्। बन्धवधशुल्कपरिमुक्तलोकाशीरवमुखरम् ॥१९१॥
इति परमोत्सवभूतं प्रविश्य नगरं नृपो विजयचन्द्रः। जयसिंहमहाराजं प्रणमति जननीमपि सकलत्रः ॥१९२॥
निजविरहतप्तदेहं हर्षाश्रुजलेन निर्वापयन्निव। आलिङ्ग्य निवसन्तं धरायां सिंहासने स्थापयति ॥१९३॥
अन्योन्यममन्दानन्दमन्दिराणि यावत्तिष्ठन्ति क्षणमेकम्। रोमाञ्चाञ्चितगात्रास्तावत्समयनिवेदकः पठति॥१९४॥
अवगाह्य जलधिं लब्ध्वोदयाचलेऽभ्युदयम्। विकासितकमल(ला)वनः सर्वस्योपरिस्थितो रविर्जयति ॥१९५॥
समयानुगतं वचनं सदृशं नृपविजयचन्द्रचरितस्य। पठितमिति कनकलक्षं दापयति बन्दिने नरनाथः ॥१९६॥
इतश्च श्रावकैर्विज्ञपितं जिनगृहेषु सर्वेषु। स्नपनबलिपूजाप्रभृति निष्पन्नं यद् यथेष्टम् ॥१९७॥
आसन्ने जिनभवने देवान् वन्देते द्वावपि नरनाथौ। भाण्डागारिकं भणतश्च अष्टाप्यष्टाह्निकादिवसान् ॥१९८॥
मार्गयन्ति श्रावका यद् द्रव्यं घनसारघुसृणादिकम्। दापयन्ति च यत् किञ्चिदपि तत्र विलम्बो न कर्तव्यः ॥
समयमहोदधिसूरीणां पादकमलं नमस्यित्वैतः। निजभवने भुञ्जाते च सपरिजनौ परमप्रीत्या ॥२००॥
अथ प्रस्तावे कथितः सुतवृत्तान्तो नृपाय पृष्टेन। मतिधनसचिवेन ततो जयसिंहनृपो भणति तनयम्॥२०१॥
त्वयि वत्स ! पृथिवीपालनभरधरणधुरन्धरे निश्चिन्तः। पूर्वपुरुषानुचीर्णं संप्रति मार्गं प्रपद्ये ॥२०२॥
ततो विजयचन्द्रराज उत्थाय जनकपादपीठे। विनिवेशितोत्तमाङ्गः सगद्गदं भणति प्रसद्य ॥२०३॥
वर्षाणि कत्यपि निजपादकमलरेण्वा मम भालतलम्। तात ! पवित्रीकृत्योचितमपीदं विधातव्यम् ॥२०४॥

उच्छप्पणापुरस्सरमणवज्जायरियपायमूलम्मि । गिण्हवि दिक्खं विहिणा नरनाहो मोक्खमणुपत्तो ॥२०६॥
सिरिविजयचंदराया पयाउ पालेइ परमनीईए। जिणभवणभूसियं विसयमप्पणो कुणइ सव्वंपि ॥२०७॥
नेय मंदेणं मरई कोइ तिरिओ अहव मणुओ वा। सारीण चेव मारो दंडो छत्ताण तव्विसए ॥२०८॥
अट्ठमि चउद्दसीए अमावसाए य पुन्निमाएवि । गिण्हेइ पोसहं सो परमं वेरग्गमावन्नो ॥२०९॥
तह कहवि करं गिण्हइ जह तं दिन्नं मुणंति न पयाओ। सावयजणं तु सव्वं अकरं चिय सव्वहा कुणइ ॥
कल्लाणाइदिणेसुं सव्वत्थवि सावएहिं जिणभवणे। जिणमज्जणाइ कारइ सयंपि समयम्मि जाइ तहिं ॥
इय वच्चंते काले कमलसिरी पसवए पुत्तं । नामेण विजयसेणं कलापगिट्ठं सुधम्मिट्ठं ॥२१२॥
अह अन्नया नरिंदो पासायसिरम्मि कमलसिरिसहिओ। जा अच्छइ ता पेच्छइ पच्चासन्नम्मि पासाए ॥
वुड्ढनरमिहुणमेगं रइकलहपरव्वसं पडियदसणं । अच्चंतं जंपंतं निल्लज्जं सज्जियाणंगं ॥२१४॥
कंपंतसव्वगत्तं तणुसिरभूपलियरोमचिहुरचयं । अवनमियपिट्ठदेसं घुलंतमुहलालदुप्पिच्छं ॥२१५॥
तं दंसिय भणइ पियं विसयपिवासा न जाव अम्हेवि । एवं विनडइ सुंदरि ! ता मुच्चउ रुच्चउ तुहेयं ॥
देवी पभणइ विसयासेवाए जरा किमेसिमाणीया। जं देवो इय जंपइ, कंपइ एएण मह हिययं ॥२१७॥
कयसुकयदुकयाणं एयं चिय अंतरं मणुस्साणं । विसयाणं संपत्ती एगेसिं नेय अन्नेसि ॥२१८॥
किञ्च ।

एवमसद्ग्रहपरमपि पुत्रं संबोध्य युक्तिभिः । प्रीतिमत्या सहितः कतिपयसामन्तमन्त्रियुतः ॥२०५॥
उत्सर्पणापुरस्सरमनवद्याचार्यपादमूले । गृहीत्वा दीक्षां विधिना नरनाथो मोक्षमनुप्राप्तः ॥२०६॥
श्रीविजयचन्द्रराजः प्रजाः पालयति परमनीत्या । जिनभवनभूषितं विषयमात्मनः करोति सर्वमपि ॥२०७॥
न च मान्द्येन म्रियते कोऽपि तिर्यगथवा मनुजो वा । शारीणामेव मारो दण्डश्छत्राणां तद्विषये ॥२०८॥
अष्टम्यां चतुर्दश्याममावास्यां च पूर्णिमायामपि । गृह्णाति पोषधं स परमं वैराग्यमापन्नः ॥२०९॥
तथा कथमपि करं गृह्णाति यथा तं दत्तं जानन्ति न प्रजाः । श्रावकजनं तु सर्वमकरमेव सर्वथा करोति ॥
कल्याणादिदिनेषु सर्वत्रापि श्रावकैर्जिनभवने । जिनमज्जनादि कारयति स्वयमपि समये याति तत्र ॥२११॥
इति व्रजति काले कमलश्रीः प्रसूते पुत्रम् । नाम्ना विजयसेनं कलाप्रकृष्टं सुधर्मिष्ठम् ॥२१२॥
अथान्यदा नरेन्द्रः प्रासादशिरसि कमलश्रीसहितः । यावदास्ते तावत् पश्यति प्रत्यासन्ने प्रासादे ॥२१३॥
वृद्धनरमिथुनमेकं रतिकलहपरवशं पतितदशनम् । अत्यन्तं जल्पन्निर्लज्जं सज्जितानङ्गम् ॥२१४॥
कम्पमानसर्वगात्रं तनुःशिरोभ्रूपलितरोमचिहुरचयम् । अवनतपृष्ठदेशं घूर्णमानमुखलालादुर्दर्शम् ॥२१५॥
तद्दर्शयित्वा भणति प्रियां विषयपिपासा न यावदस्मानपि । एवं विनाटयति सुन्दरि ! तावन्मुच्यतां रुच्यतां तवैव्रत॥
देवी प्रभणति विषयासेवया जरा किमनयोरानीता । यद्देव इति जल्पति, कम्पत एतेन मम हृदयम् ॥२१७॥
कृतसुकृतदुष्कृतानामेतदेवान्तरं मनुष्याणाम् । विषयाणां संप्राप्तिरेकेषां नैवान्येषाम् ॥२१८॥

---

१ क. ख. नियमंदेणं चिय म० ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सव्वेवि दुक्खभीरू सव्वेवि सुहेसिणो फुडं जीवा । ता एयावत्थगयं मिहुणमिणं इय पयट्टंतं॥२१९॥
विसयासेवाए सुहं साहइ पयडं तहावि नाहस्स । कह दट्टुमिमं जाया विसएसु परम्मुहा बुद्धी? ॥२२०॥
नरपतिरुवाच;—
दंसणनाणमणंतं विरियमणंतं तहा सुहमणंतं । परमत्थेण सरूवं जीवाण इमं, तहावि इमे ॥२२१॥
विसयपिवासापामाकयत्थिया इह भवे अणाइम्मि । संपायणत्थमेसिं विसयाण सहंति दुक्खाइं ॥२२२॥
जायंति पुण तहाविहकम्माउ इमे कयावि कस्सावि । दालिद्ददुहट्टाणं अन्नेसिं जाइ पुण जम्मो ॥२२३॥
तो तेसिं परिभोगे कंडूकंडूयणेव्व सुहलेसं । भुंजंतो बहु मन्नइ विसयपिवासं पयट्टंतिं ॥ २२४ ॥
अह कहवि धणाभावे पणइणिविरहेण हुंति नो विसया । तो तच्चिंतासल्लियहियओ दुक्खं गमइ कालं॥
उक्तं च;—
"अप्राप्ताः संकल्पैः प्राप्ता दर्पेण चिन्तया विरहे । त्वरयन्ति ज्वरयन्ति कृशयन्ति प्राणिनं विषयाः॥"
नय समइ विसयतण्हा चिरंपि संसेविएसु विसएसु । अइसयमणोहरेसुवि विसेसओ वड्ढए गिद्धी ॥२२६॥
उक्तं च;—
" न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥ "
विसयपिवासा य इमा रागो अणुकूलएसु विसएसु । पडिकूलेसुं दोसो जीवाणं मोहवसयाणं ॥२२७॥
रागद्दोसा य पुणो कम्मस्स निबंधणं धुवं हुंति । कम्मोदएण जीवो पावइ दुक्खं भवे घोरं ॥२२८॥
एवं विसयपिवासा इहपरलोउब्भवाण दुक्खाण । परमं कारणमेसा य जोव्वणे मंदसत्तेहिं ॥२२९॥
नो निज्जेउं सक्का, इमं तु वुड्ढंपि मिहुणमेयाए। एवं वियारबहुलं विहियं तो तेणिमं भणियं ॥२३०॥

सर्वेऽपि दुःखभीरवः सर्वेऽपि सुखैषिणः स्फुटं जीवाः । तस्मादेतदवस्थागतं मिथुनमिदमिति प्रवर्तमानम्॥२१९॥
विषयासेवायां सुखं कथयति प्रकटं तथापि नाथस्य। कथं दृष्ट्वेदं जाता विषयेषु पराङ्मुखा बुद्धिः ?॥२२०॥
दर्शनज्ञानमनन्तं वीर्यमनन्तं तथा सुखमनन्तम् । परमार्थेन स्वरूपं जीवानामिदम्, तथापीमे ॥२२१॥
विषयपिपासापामाकदर्थिता इह भवेऽनादौ । संपादनार्थमेषां विषयाणां सहन्ते दुःखानि ॥२२२॥
जायन्ते पुनस्तथाविधकर्मण इमे कदापि कस्यापि । दारिद्र्यदुःखार्तानामन्येषां याति पुनर्जन्म ॥२२३॥
ततस्तेषां परिभोगे कण्डूकण्डूयन इव सुखलेशम् । भुञ्जानो बहु मन्यते विषयपिपासां प्रवर्तमानाम्॥२२४॥
अथ कथमपि धनाभावे प्रणयिनीविरहेण भवन्ति नो विषयाः। ततस्तच्चिन्ताशल्यितहृदयो दुःखं गमयति कालम् ॥
नच शाम्यति विषयतृष्णा चिरमपि संसेवितेषु विषयेषु। अतिशयमनोहरेष्वपि विशेषतो वर्धते गृद्धिः ॥२२६॥
विषयपिपासा चेयं रागोऽनुकूलेषु विषयेषु । प्रतिकूलेषु द्वेषो जीवानां मोहवशगानाम् ॥२२७॥
रागद्वेषौ च पुनः कर्मणो निबन्धनं ध्रुवं भवतः । कर्मोदयेन जीवः प्राप्नोति दुःखं भवे घोरम् ॥२२८॥
एवं विषयपिपासेहपरलोकोद्भवानां दुःखानाम् । परमं कारणमेषा च यौवने मन्दसत्त्वैः ॥ २२९ ॥
नो निर्जेतुं शक्येदं तु वृद्धमपि मिथुनमेतया । एवं विकारबहुलं विहितं ततस्तेनेदं भणितम् ॥२३०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जिणवयणगब्भियं विजयचंदपिययमपयंपियं एयं । सोऊणं कमलसिरी सप्पणयं भणइ वयणमिणं ॥
जं मुहरयाए पिययम ! पयंपियं अप्पियं मए तुम्ह । तं पसिऊण खमिज्जउ कुणिमो धम्मुज्जमं परमं ॥
तो विजयचन्दराया जेट्ठसुयं विजयरायनामाणं । ठविउं रज्जे गिण्हइ विहीए दिक्खं सुगुरुमूले ॥२३३॥
कमलसिरीपभिईहिं अंतेउरियाहिं तह य मंतीहिं । सामंतेहिवि केहिचि सहिओ अइमहविभूईए ॥२३४॥
गहिऊण दुविहसिक्खं वरिसंते केवलीवि होऊण । सासयसोक्खं पत्तो सम्मेए पव्वयवरम्मि ॥२३५॥

॥ इति स्थूलप्राणातिपातनिरतिचारप्रथमाणुव्रतफलदृष्टान्ते विजयचन्द्रनरेश्वरकथानकं समाप्तम् ॥

जिनवचनगर्भितं विजयचन्द्रप्रियतमप्रजल्पितमेतत् । श्रुत्वा कमलश्रीः सप्रणयं भणति वचनमिदम् ॥२३१॥
यद् मुखरतया प्रियतम ! प्रजल्पितमप्रियं मया युष्माभिः। तत्प्रसद्य क्षम्यतां कुर्मो धर्मोद्यमं परमम् ॥२३२॥
ततो विजयचन्द्रराजो ज्येष्ठसुतं विजयराजनामानम् । स्थापयित्वा राज्ये गृह्णाति विधिना दीक्षां सुगुरुमूले॥
कमलश्रीप्रभृतिभिरान्तःपुरिकीभिस्तथा च मन्त्रिभिः । सामन्तैरपि कैश्चित्सहितोऽतिमहाविभूत्या ॥२३४॥
गृहीत्वा द्विविधशिक्षां वर्षान्ते केवल्यपि भूत्वा । शाश्वतसौख्यं प्राप्तः सम्मेते पर्वतवरे ॥ २३५ ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निरवेक्खो दुट्ठमणो तिरियाईणं करेइ जो बंधं । सो पावइ बंधवहं जह पत्तं बंधुराएण ॥१॥
तथाहि;–
अत्थि पुरं पोराणं पउमिणिसंडंव पउमिणीसंडं । सुविचित्तपत्तकलियं पउमावासं सुवाणिययं ॥२॥
तत्थत्थि अत्थिजणवंछियत्थसंपाडणिक्कदुल्ललिओ । धणउव्व धणो सेट्ठी भज्जा तस्सत्थि बंधुमई ॥३॥
ताणं च परोप्परनेहनिब्भरं विसयसोक्खनिरयाणं । वच्चइ कालो अकलियदुहाण धणधन्नकलियाण ॥
केवलमवच्चदुक्खं सल्लइ हियए परोप्परं ताणं । किं विहवेणम्हाणं कुलकेउसुपुत्तरहियाणं ? ॥ ५ ॥
इय चिंताजुत्ताणं ताणं वच्चंति वासरा विरसा । अह अन्नया कयाई बन्धुमई नियघरदुवारे ॥ ६ ॥
जा चिट्ठइ ता पेच्छइ कस्सइ गाहावइस्स गहवइणी । धूलिधुरुंडियपुत्तेहिं परिगया चिंतए तत्तो ॥७॥
धन्ना एसा महिला जा एवं अत्तए रमावेइ । अइमंजुमम्मणुल्लाविरीए वाणीए सुहयाए ॥ ८ ॥
एक्कं धरइ कडीए बीयं हत्थंगुलीए संलग्गं । तइयाओ य चउत्थं रुट्ठं संभासए एवं ॥ ९ ॥
आगच्छ वच्छ ! अंबा जं जंपइ तं करेह किं बहुणा ? । गिण्हसु अंबयजंबुयफलाइं जणणीए दिंतीए ॥
इय बहुडिंभजुयाए चरियं दट्ठूण तीए महिलाए । अप्पाणं निंदंती पत्ता गेहस्स मज्झम्मि ॥११॥
चिंतेइ अहं जणिया एक्कच्चिय मंदभाइणी विहिणा । एक्कंपि पुत्तभंडं जीए पसूयं न पावाए ॥१२॥
जम्मो निरत्थउ तीए जीए महिलाए मम्मणुल्लविरो । रमिऊण धूलिधवलो पुत्तो नारुहइ अंकम्मि ॥१३॥
अन्नन्नकज्जवइयररविकिरणकयत्थियं हिययकुमुयं । ऊसरइ नवरि मणुयाण तणयमुहयंदसच्चवणे ॥१४॥

निरपेक्षो दुष्टमनास्तिर्यगादीनां करोति यो बन्धम् । स प्राप्नोति बन्धवधं यथा प्राप्तं बन्धुराजेन ॥१॥
अस्ति पुरं पुराणं पद्मिनीषण्डमिव पद्मिनीषण्डम् । सुविचित्रप(प)त्रकलितं पद्मावासं सुवाणिज(पानीय)कम् ॥
तत्रास्त्यर्थिजनवाञ्छितार्थसंपादनैकदुर्ललितः । धनद इव धनः श्रेष्ठी भार्या तस्यास्ति बन्धुमती ॥ ३ ॥
तयोश्च परस्परस्नेहनिर्भरं विषयसौख्यनिरतयोः । व्रजति कालोऽकलितदुःखयोर्धनधान्यकलितयोः ॥ ४ ॥
केवलमपत्यदुःखं शल्यति हृदये परस्परं तयोः । किं विभवेनावयोः कुलकेतुसुपुत्ररहितयोः ? ॥ ५ ॥
इति चिन्तायुक्तयोस्तयोर्व्रजन्ति वासरा विरसाः । अथान्यदा कदाचिद् बन्धुमती निजगृहद्वारे ॥ ६ ॥
यावत्तिष्ठति तावत्पश्यति कस्यापि गाथापतेर्गृहपत्नीम् । धूलिधूसरितपुत्रैः परिगतां चिन्तयति ततः॥ ७ ॥
धन्यैषा महिला यैवमात्मजान् रमयति । अतिमञ्जुमन्मनोल्लापनशीलया वाण्या सुखदया ॥ ८ ॥
एकं धरति कट्यां द्वितीयं हस्ताङ्गुलौ संलग्नम् । तृतीयाच्च चतुर्थं रुष्टं संभाषत एवम् ॥ ९ ॥
आगच्छ वत्स ! अम्बा यज्जल्पति तत्कुरु किं बहुना । गृहाणाम्रजाम्बवफलानि जनन्या ददत्या॥१०॥
इति बहुडिम्भयुक्तायाश्चरितं दृष्ट्वा तस्या महिलायाः । आत्मानं निन्दन्ती प्राप्ता गेहस्य मध्ये ॥११॥
चिन्तयत्यहं जनितैकैव मन्दभागिनी विधिना । एकमपि पुत्रभाण्डं यया प्रसूतं न पापया ॥ १२ ॥
जन्म निरर्थकं तस्या यस्या महिलाया मन्मनोल्लपिता । रन्त्वा धूलिधवलः पुत्रो नारोहत्यङ्के ॥ १३ ॥
अन्यान्यकार्यव्यतिकररविकिरणकदर्थितं हृदयकुमुदम् । उल्लसति केवलं मनुजानां तनयमुखचन्द्रदर्शने ॥१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोगच्चंपि न नज्जइ न गणिज्जइ आवईवि अइगरुई । हिययस्स निव्वुइकरो जाण सुआ गुणगणाहारो ॥
इय तणयाभावसमुब्भवेण असुहेण दूमिया संती । दिट्ठा सिट्ठिधणेणं परम्मुहा सयलकज्जेसु ॥१६॥
हिमदड्ढकमलिणी इव दीससि किं सुयणु ! पुच्छिए तेण । सा कहइ तस्स पुत्ताभावदुहं तो धणो भणइ ॥
मा होसु ऊसुयमणा धणियं भत्तीए धणयजक्खमहं । आराहिऊण विहिणा तुह पुत्तं दाविइस्सामि ॥१८॥
सत्तदिणब्भिंतरओ ता मा पमयच्छि ! खेयमुव्वहसु । इय वुत्तुं संझाए धणसिट्ठी पूइउं जक्खं ॥१९॥
परिमुक्कसयलकज्जो तब्भवणे ठाइ निरसणो ताव । जा सत्तमिया रयणी ता जक्खो भणइ पच्चक्खं॥२०॥
होही तुह लहु पुत्तो, महापसाउत्ति भणिय नमिऊण। जक्खस्स पायकमलं संपत्तो नियगिहे सिट्ठी ॥२१॥
जक्खाएसं सव्वं कहेइ भज्जाए सा य संतुट्ठा । बंधइ गंठिं भणइ य एवं चिय होउ एयंति ॥२२॥
तो पच्छिमम्मि जामे बंधुमई पासए सुमिणयम्मि । नियवयणे पविसंतं नारंगं जणियगुरुरंगं ॥२३॥
उट्ठेउं सा साहइ पइणो तत्तो विमंसिउं सम्मं । तेणवि तणओ होहित्ति साहियं सा य परितुट्ठा ॥२४॥
तद्दिवसजायगब्भा पसवइ समए मणोरमं पुत्तं । पत्तम्मि बारसाहे दिन्नं नामं इमं तस्स ॥२५॥
जणएहिं बंधुराओत्ति लच्छिवित्थरओ तओ कमसो । अहिगयकलाकलावो संपत्तो जोव्वणं सोवि ॥
अह केणवि कज्जेणं धणसेट्ठी बंधुरायपरिकलिओ । संपत्तो उज्जाणे जणमणआणंदणभिहाणे ॥२७॥
तो पेच्छइ तत्थ मुणिं देसंतं सुगइपच्चलं धम्मं । भव्वाण हियट्ठाए उवविट्ठो सोवि निसुणेइ ॥२८॥
तद्यथा;—

दौर्गत्यमपि न ज्ञायते न गण्यत आपदप्यतिगुर्वी । हृदयस्य निर्वृतिकरो येषां सुतो गुणगणाधारः ॥ १५ ॥
इति तनयाभावसमुद्भवेनासुखेन दाविता सन्ती । दृष्टा श्रेष्ठिधनेन पराङ्मुखा सकलकार्येषु ॥ १६ ॥
हिमदग्धकमलिनीव दृश्यसे किं सुतनु ! पृष्टे तेन । सा कथयति तस्मै पुत्राभावदुःखं ततो धनो भणति ॥१७॥
मा भवोत्सुकमना बाढं भक्त्या धनदयक्षमहम् । आराध्य विधिना तुभ्यं पुत्रं दापयिष्यामि ॥ १८ ॥
सप्तदिनाभ्यन्तरं तस्मान्मा प्रमदाक्षि ! खेदमुद्वह । इत्युक्त्वा संध्यायां धनश्रेष्ठी पूजयितुं यक्षम् ॥ १९ ॥
परिमुक्तसकलकार्यस्तद्भवने तिष्ठति निरशनस्तावत् । यावत्सप्तमी रजनिस्तदा यक्षो भणति प्रत्यक्षम् ॥२०॥
भविष्यति तव लघु पुत्रो महाप्रसाद इति भणित्वा नत्वा । यक्षस्य पादकमलं संप्राप्तो निजगृहे श्रेष्ठी ॥२१॥
यक्षादेशं सर्वं कथयति भार्यायाः सा च संतुष्टा । बध्नाति ग्रन्थिं भणति चैवमेव भवत्वेतदिति ॥२२॥
ततः पश्चिमे यामे बन्धुमती पश्यति स्वप्ने । निजवदने प्रविशद् नारङ्गं जनितगुरुरङ्गम् ॥२३॥
उत्थाय सा कथयति पत्ये ततो विमृश्य सम्यक् । तेनापि तनयो भविष्यतीति कथितं सा च परितुष्टा॥२४॥
तद्दिवसजातगर्भा प्रसूते समये मनोरमं पुत्रम् । प्राप्ते द्वादशाहे दत्तं नामेदं तस्य ॥२५॥
जनकाभ्यां बन्धुराज इति लक्ष्मीविस्तरतस्ततः क्रमशः । अधिगतकलाकलापः संप्राप्तो यौवनं सोऽपि ॥२६॥
अथ केनापि कार्येण धनश्रेष्ठी बन्धुराजपरिकलितः । संप्राप्त उद्याने जनमनआनन्दनाभिधाने ॥२७॥
ततः पश्यति तत्र मुनिं दिशन्तं सुगतिप्रत्यलं धर्मम् । भव्यानां हितार्थमुपविष्टः सोऽपि शृणोति ॥२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

बाहत्तरिकलकुसलवि ते नर मुक्खगणि, सयलकलहं सुपवित्त न दयकल जाहं मणि।
संजमकल तह तवकल वरविन्नाणकल, जे इय कला हु न याणहिं ते नर नणु विगल ॥२९॥
छद्दंसण छन्नवइ पासंडइं, अन्नरुप्परुवि न मच्छरु छड्डइं।
ताहं न दूसइ कोइ अहिंसा, तो तमणुट्ठह म कुणह हिंसा ॥३०॥
जो सद्धम्मासाए गहेइ कुहम्मु नरु, पच्छत्तावदवेण सु डज्झइ जेम्व तरु।
जो वेरुलिउ किरविणु गिन्हइ कायमणि, सो जाणग जाणाविउ बहु तप्पेइ मणि ॥३१॥
न जडकलावु न वक्कलचीरइं, न मंडणु न खालणु नीरइं।
एयाइं सोहि करंति न पावहं, जह दय थावरजंगमजीवहं ॥३२॥
इच्चाइदयागुणगणमायन्नेउं मुणिंदपासम्मि। विहिणा तसवहविरई पडिवन्ना बंधुराएण ॥३३॥
जो एयं पडिवज्जइ वज्जइ सो बंधपमुहअइयारे। इय कहिए मुणिवयणा पडिवज्जइ तेवि तह चेव ॥३४॥
धणसेट्ठिणा पवन्नो सावयधम्मो दुवालसविहोवि। पणमेउं मुनिनाहं सट्ठाणं जंति ते दोवि ॥३५॥
जीवदयं कुव्वंतो सविसेसं बंधुरायवणिपवरो। पंचहिं भज्जाहिं समं कीलइ दोगुंदुगसुरोव्व ॥३६॥
अह अन्नया कयाई केणई मित्तेण साहियं तस्स। जह अज्ज जोगनंदी उज्जाणे जोगिओ पत्तो ॥३७॥
जो नियगुणगणधवलो बहुमुल्लमहल्लमोत्तियसरीए। कंठगयाए रेहइ हिमवंतगिरिव्व गंगाए ॥३८॥
ता दट्ठव्वो एसो अणेगअच्छेरयाण कुलभवणं। दट्ठव्वदंसणं चिय नयणाण फलं बुहा बिंति ॥३९॥

द्वासप्ततिकलाकुशला अपि ते नरा मूर्खगणे, सकलकलासु सुपवित्रा न दयाकला येषां मनसि।
संयमकला तथा तपःकला वरविज्ञानकला, ये इति कलाः खलु न जानन्ति ते नरा ननु विकलाः ॥२९॥
षड् दर्शनानि षण्णवतिः पाखण्डानि, परस्परमपि न मत्सरं मुञ्चन्ति।
तेषां न दूषयति कोऽप्यहिंसां, ततस्तामनुतिष्ठत मा कुरुत हिंसाम् ॥३०॥
यः सद्धर्माशया गृह्णाति कुधर्मं नरः, पश्चात्तापदवेन स दह्यते यथा तरुः।
यो वैडूर्यं विक्रीय गृह्णाति काचमणिं, स ज्ञायको ज्ञापयिता बहु तपति मनसि ॥३१॥
न जटाकलापो न वल्कलचीवराणि, न मण्डनं न क्षालनं नीरेण।
एतानि शुद्धिं कुर्वन्ति न पापानां, यथा दया स्थावरजङ्गमजीवानाम् ॥३२॥
इत्यादिदयागुणगणमाकर्ण्य मुनीन्द्रपार्श्वे। विधिना त्रसवधविरतिः प्रतिपन्ना बन्धुराजेन ॥३३॥
य एतां प्रतिपद्येत वर्जयेत् स बन्धप्रमुखातिचारान्। इति कथिते मुनिवचनात्परिवर्जयति तानपि तथैव ॥
धनश्रेष्ठिना प्रपन्नः श्रावकधर्मो द्वादशविधोऽपि। प्रणम्य मुनिनाथं स्वस्थानं यातस्तौ द्वावपि ॥३५॥
जीवदयां कुर्वन् सविशेषं बन्धुराजवणिक्प्रवरः। पञ्चभिर्भार्याभिः समं क्रीडति दोगुन्दुकसुर इव ॥३६॥
अथान्यदा कदाचित्केनचिद् मित्त्रेण कथितं तस्मै। यथाऽद्य योगनन्द्युद्याने योगी प्राप्तः ॥३७॥
यो निजगुणगणधवलो बहुमूल्यमहामौक्तिकमालया। कण्ठगतया राजति हिमवद्गिरिरिव गङ्गया ॥३८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता काऊण पसायं वल्लह ! तस्संतियम्मि वच्चामो । पेच्छामो अच्छरियं किंचिवि आगिट्ठिपाईयं ॥४०॥
एवं होउत्ति तओ आरुहिय रहम्मि ते गया तत्थ । कप्पूरप्पभिईहिं काउं से गरुयमुवयारं ॥४१॥
उवविट्ठा नमिऊणं बहुओ कोलाहलेण पुरलोओ । मिलिओ सोवि हु दक्खइ बहुकोउयमंततंताइं ॥४२॥
नियनियठाणम्मि गए लोए तह चेव पज्जुवासेइ । सेट्ठिसुयबंधुराओ तव्विणयावज्जिओ जोई ॥४३॥
पुव्वपसाहियचेडयमज्झाओ भणइ चेडयं एगं । जं भणइ बंधुराओ सया तए तं विहेयव्वं ॥४४॥
पभणेइ बंधुरायं एसो अट्ठमिचउद्दसीसु तए । तप्पेयव्वो मज्जेण इय पवज्जित्तु से वयणं ॥४५॥
नमिऊण बंधुराओ तं पुच्छिय नियगिहम्मि संपत्तो । कुणइ मुणिकहियधम्मं जोगियवयणं च तो सोवि ॥
जोवि न वट्टइ वयणे जो नवि दिन्नंपि पत्थिओ देइ । जोवि हु करेइ गव्वं दुव्वयणं न वि भासेइ ॥४७॥
तं तंपि हु बंधावइ चेडयचरडाउ गाढबंधेहिं । अदिट्ठबंधणेहिं तो लोओ तस्स भयभीओ ॥४८॥
चिट्ठइ सयावि एवं च वइयरं जाणिउं भणइ जणओ । तुह पुव्वएहिं बद्धावि मोइया कोवि नवि बद्धो ॥
पढमवयस्सइयारो पढमो एसो गुरूहिं तुह कहिओ । ता तं सयमंगीकयमेवं कह वच्छ ! मइलेसि ? ॥
बद्धविमुक्को कोवि हु वेरवसा केणविप्पयारेण। अवयरिइ तुह सरीरे इय अधीइ दहइ मह हिययं ॥५१॥
तथा ।
जइ मन्नसि मह वयणं जइ मन्नसि गुरुवयणं जिणमयं च । ता वच्छ ! तुच्छचरियं वज्जसु जीवाण बंधदुहं ॥
भुवणगुरुणोवइट्ठं जीवदयानिम्मलं वयं गहिउं । भंजंति जंतुसंतावणेण जे मंदबुद्धीया ॥५३॥

तस्माद् द्रष्टव्य एषोऽनेकाश्चर्याणां कुलभवनम् । द्रष्टव्यदर्शनमेव नयनयोः फलं बुधा ब्रुवन्ति ॥३९॥
तस्मात् कृत्वा प्रसादं वल्लभ ! तस्यान्तिके व्रजावः । पश्याव आश्चर्यं किञ्चिदप्याकृष्टयादिकम् ॥४०॥
एवं भवत्विति तत आरुह्य रथे तौ गतौ तत्र । कर्पूरप्रभृतिभिः कृत्वा तस्य गुरुमुपचारम् ॥४१॥
उपविष्टौ नत्वा बहुः कोलाहलेन पुरलोकः । मिलितः सोऽपि खलु दर्शयति बहुकौतुकमन्त्रतन्त्रादि ॥४२॥
निजनिजस्थाने गते लोके तथैव पर्युपास्ते । श्रेष्ठिसुतबन्धुराजस्तद्विनयावर्जितो योगी ॥४३॥
पूर्वप्रसाधितचेटकमध्याद् भणति चेटकमेकम् । यद् भणति बन्धुराजः सदा त्वया तद्विधातव्यम् ॥४४॥
प्रभणाति बन्धुराजमेषोऽष्टमीचतुर्दश्योस्त्वया । तर्पितव्यो मद्येनेति प्रपद्य तस्य वचनम् ॥४५॥
नत्वा बन्धुराजस्तं पृष्ट्वा निजगृहे संप्राप्तः । करोति मुनिकथितधर्मं योगिवचनं च ततः सोऽपि ॥४६॥
योऽपि न वर्तते वचने यो नापि दत्तमपि प्रार्थितो ददाति । योऽपि खलु करोति गर्वं दुर्वचनं वापि भाषते ॥
तं तमपि खलु बन्धयति चेटकचरटेन गाढबन्धैः । अदृष्टबन्धनैस्ततो लोकस्तस्य भयभीतः ॥४८॥
तिष्ठति सदाप्येवं च व्यतिकरं ज्ञात्वा भणति जनकः। तव पूर्वजैर्बद्धा अपि मोचिताः कोऽपि न तु बद्धः॥४९॥
प्रथमव्रतस्यातिचारः प्रथम एष गुरुभिस्त्वां कथितः । तस्मात्त्वं स्वयमङ्गीकृतमेवं कथं वत्स ! मलिनयसि ? ॥
बद्धविमुक्तः कोऽपि खलु वैरवशात्केनापि प्रकारेण । अवतरेत् तव शरीर इत्यधृतिर्दहति मम हृदयम् ॥५१॥
यदि मन्यसे मम वचनं यदि मन्यसे गुरुवचनं जिनमतं च । तदा वत्स ! तुच्छचरितं वर्जय जीवानां बन्धदुःखम्।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भमिहंति भवं घोरं ते वहबंधाइदुक्खपरतंता । थेवोवि हु वयभंगो जणेइ गरुयाइं दुक्खाइं ॥५४॥
इय पिउणा भन्नंतो मन्नंतो सो तिणंव तव्वयणं । तह चेव पयट्टंतो ओहट्टंतो न मणयंपि ॥५५॥
रायामच्चाईहिं नाऊण सुपाडिहेरपरिकलियं । सामेणं भणिओवि हु न कुणइ कन्नेवि तव्वयणं ॥५६॥
अह निववेलाइत्तो लब्भधणव्वइयरम्मि कलहंतो । गहिओ बंधाविय चेडगाओ लब्भं धणं किंपि॥५७॥
दायव्वमत्थि अन्नंपि किंपि सो भणइ तुम्ह जं एत्थ । तस्स य सट्टे खग्गं गिन्हह एयंति सो भणिउं ॥
कोसाओ आयड्ढिय खग्गं दंसणमिसेण सहसत्ति । एक्केणं घाएणं दो खंडइ बंधुरायं सो ॥ ५९ ॥
नियभिच्चसहाओ सो तासेउं बन्धुरायभिच्चजणं । निययावासम्मि गओ तत्थ सरूवे तलारेण॥६०॥
विन्नत्ते नरवइणा भणियं जइ एत्तियस्स सो जोग्गो । अन्नायपरो तम्हा गवेसणा इह न कायव्वा ॥६१॥
तत्तो पंचत्तगओ गमिही कुगईसु बहुपयारासु । विसहंतो घणदुक्खं बंधणवहमारणाईयं ॥६२॥
धणसिट्ठीवि हु विहवं सत्तसु खित्तेसु पक्खिवेऊण । सुगुरूण पायमूले गिण्हइ दिक्खं सभज्जोवि॥६३॥
गहिऊण दुविहसिक्खं अंते संलेहणं विहेऊण । संपत्तो सोहम्मे कमेण मोक्खंपि गच्छिहिही ॥ ६४ ॥

॥ इति प्राणातिपातविरतिप्रथमातिचारविपाके बन्धुराजकथानकं समाप्तम् ॥

भुवनगुरुणोपदिष्टं जीवदयानिर्मलं व्रतं गृहीत्वा । भञ्जन्ति जन्तुसंतापनेन ये मन्दबुद्धयः ॥५३॥
भ्रमिष्यन्ति भवं घोरं ते वधबन्धादिदुःखपरतन्त्राः । स्तोकोऽपि खलु व्रतभङ्गो जनयति गुरूणि दुःखानि ॥
इति पित्रा भण्यमानो मन्यमानः स तृणमिव तद्वचनम् । तथैव प्रवर्तमानोऽपसर्पन् न मनागपि ॥५५॥
राजामत्यादिभिर्ज्ञात्वा सुप्रातिहार्यपरिकलितम् । साम्ना भणितोऽपि खलु न करोति कर्णेऽपि तद्वचनम् ॥५६॥
अथ नृपवेलाऽऽयुक्तो लभ्यधनव्यतिकरे कलहयन् । गृहीतो बन्धयित्वा चेटकाद् लभ्यं धनं किमपि ॥५७॥
दातव्यमस्त्यन्यदपि किमपि स भणति तुभ्यं यदत्र । तस्य च सट्टे खड्गं गृहाणैतमिति स भणित्वा ॥५८॥
कोशादाकृष्य खड्गं दर्शनमिषेण सहसेति । एकेन घातेन द्विधा खण्डयति बन्धुराजं सः ॥ ५९ ॥
निजभृत्यसहायः स त्रासयित्वा बन्धुराजभृत्यजनम् । निजावासे गतस्तत्र स्वरूपे पुररक्षेण ॥ ६० ॥
विज्ञापिते नरपतिना भणितं यथैतावतः स योग्यः । अन्यायपरस्तस्माद् गवेषणेह न कर्तव्या ॥ ६१ ॥
ततः पञ्चत्वगतो गमिष्यति कुगतिषु बहुप्रकारासु । विषहमानो घनदुःखं बन्धनवधमारणादिकम् ॥६२॥
धनश्रेष्ठ्यपि खलु विभवं सप्तसु क्षेत्रेषु प्रक्षिप्य । सुगुरूणां पादमूले गृह्णाति दीक्षां सभार्योऽपि ॥६३॥
गृहीत्वा द्विविधशिक्षामन्ते संलेखनां विधाय । संप्राप्तः सौधर्मे क्रमेण मोक्षमपि गमिष्यति ॥६४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जो लिट्ठुलउडदंडाइएहिं जीवाण ताडणं कुणइ । निस्संको कुद्धमणो दिओव्व सो भमइ भीमभवे ॥
तथाहि;—
अत्थि भरहम्मि वासे कुसुमपुरं पुरमणंगसारिच्छं । सिरिनंदणं समयरं अविग्गहं खाइसालिल्लं ॥२॥
तम्मि निवो निवतिलओ मलओ दारिद्दावतवियाणं । रइसुंदरी कलत्तं सुकलत्तं तस्स सुकलत्तं ॥३॥
तह मंती मइजलही तस्सत्थि पुरोहिओ य सिरिकंठो । से भज्जा य जसोया पुत्तो ताणत्थि सिरिवच्छो॥
सो अन्नया कयाई पिउणा अवमाणिओ जडप्पगई । कंचणपुरम्मि पत्तो कणवित्तिं कुणइ पढई य ॥५॥
विज्जामढम्मि तहवि हु न किंचि आगच्छई पढंतस्स । तो निव्विन्नो बाढं पाढं मोत्तुं दढसरीरो ॥६॥
ओलग्गिउं पवत्तो भोयणवित्तीए सूरगिहवइणो । तस्स सुएणं सद्धिं कम्मिवि गामम्मि संचलिओ ॥७॥
पिच्छंति य ते मग्गे मुणीण जुयलं पहे परिस्संतं । नग्गोहरुक्खहिट्ठा उवविट्ठं फासुयपएसे ॥८॥
तं च नमिऊण दोवि हु उवविट्ठा अह भणेइ भत्तीए। तयभिमुहं सूरसुओ पहु ! धम्मो किंफलो होइ?॥
तो सजलजलहरुद्दामगहिरसद्देण ताण तं कहइ । तम्मज्झे जिट्ठमुणी तच्चित्तणुकूलणत्थं जं ॥१०॥
तथाहि;—
मोक्खफलो दुहदलणो आवइकालेवि दिन्नसाहिज्जो । हियइच्छियकज्जकरो हवइ सुमित्तोव्व जिणधम्मो॥
सारीरमाणसाणं दुक्खाणं मोयगो मणाणंदो । भवजलहिजाणवत्तं सव्वत्थ जयावहो धम्मो ॥१२॥
दालिद्दवाहिपरमोसहंव सोहग्गकंडयं परमं । मणचिंतियत्थसंपाडणम्मि चिंतामणी धम्मो ॥१३॥
विन्नाणनाणजणओ बंधू नीसेसजंतुवग्गस्स । वीसासकरणपडुओ परमपयट्ठावओ धम्मो ॥१४॥

यो लेष्टुलकुटदण्डादिकैर्जीवानां ताडनं करोति । निःशङ्कः क्रुद्धमना द्विज इव स भ्रमति भीमभवे ॥१॥
अस्ति भरते वर्षे कुसुमपुरं पुरमनङ्गसदृशम् । श्रीनन्दनं स-म-करमविग्रहं खाति(दि)शालि ॥२॥
तस्मिन् नृपो नृपतिलको मलयो दारिद्र्यदावतप्तानाम् । रतिसुन्दरी कलत्रं सुकलत्वं तस्य शुकलत्नम् ॥३॥
तथा मन्त्री मतिजलधिस्तस्यास्ति पुरोहितश्चः श्रीकण्ठः । तस्य भार्या च यशोदा पुत्रस्तयोरस्ति श्रीवत्सः॥४॥
सोऽन्यदा कदाचित्पित्राऽपमानितो जडप्रकृतिः । काञ्चनपुरे प्राप्तः कणवृत्तिं करोति पठति च ॥५॥
विद्यामठे तथापि खलु न किञ्चिदागच्छति पठतः । ततो निर्विण्णो बाढं पाठं मुक्त्वा दृढशरीरः ॥६॥
अवलगितुं प्रवृत्तो भोजनवृत्त्या सूरगृहपतेः । तस्य सुतेन सार्धं कस्मिन्नपि ग्रामे संचलितः ॥७॥
पश्यतश्च तौ मार्गे मुनीनां युगलं पथि परिश्रान्तम् । न्यग्रोधवृक्षस्याध उपविष्टं प्रासुकप्रदेशे ॥८॥
तच्च नत्वा द्वावप्युपविष्टावथ भणति भक्त्या । तदभिमुखं सूरसुतः प्रभो ! धर्मः किंफलो भवति ? ॥९॥
ततः सजलजलधरोद्दामगभीरशब्देन तयोस्तं कथयति । तन्मध्ये ज्येष्ठमुनिस्तच्चित्तानुकूलनार्थं यत् ॥१०॥
मोक्षफलो दुःखदलन आपत्कालेऽपि दत्तसाहाय्यः । हृदयेप्सितकार्यकरो भवति सुमित्रमिव जिनधर्मः ॥११॥
शारीरमानसयोर्दुःखयोर्मोचको मनआनन्दः । भवजलधियानपात्रं सर्वत्र जयावहो धर्मः ॥१२॥
दारिद्र्यव्याधिपरमौषधमिव सौभाग्यकाण्डः परमः । मनश्चिन्तितार्थसंपादने चिन्तामणिर्धर्मः ॥१३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दोसायरणनिवित्ती सुकुलुप्पत्ती सुहाण संपत्ती । सत्तुबलस्स विवत्ती जायइ परमेण धम्मेण ॥१५॥
सयलजणपत्थणिज्जा सुहया सच्छंदगामिणी विउला । वियरइ समुज्जलंगी कित्ती धम्मेण वेसव्व ॥१६॥
इय कहिउं धम्मफलं भणिया ते दोवि साहुणा भो भो ! । जिणवरभणियं धम्मं कुणह पयत्तेण पइदियहं ॥
सिरिवच्छेणं भणियं सो धम्मो केरिसो, मुणी कहइ । जिणभणियसद्दहाणं जीवदयाए अणुट्ठाणं ॥१८॥
अह जिणनाहसरूवं सुगुरुसरूवं जियाइतत्ताइं । कहिऊणं जीवदयामूलत्तं कहइ धम्मस्स ॥१९॥
तद्यथा;—
" पठितं श्रुतं च शास्त्रं गुरुपरिचरणं च गुरुतपश्चरणम् । घनगर्जितमिव विजलं विफलं सकलं दयाविकलम् ॥"
इच्चाइंसप्पपंचं जइधम्मं कहिय कहइ गिहिधम्मं । तो सिरिवच्छो जंपइ आयन्नह मज्झ विन्नत्ति ॥२०॥
न हणेमि निरवराहे जीवे संकप्पओ अहं थूले । जावज्जीवं ता मह कुणह पसायं वएणिमिणा ॥२१॥
तो मुणिणा से कहिया बंधाई पंच इत्थ अइयारा । एएवि न कायव्वा पढमवयं रक्खमाणेण ॥२२॥
आमंति तेण भणिए सूरसुएणवि तहेव पडिवन्ने । विहिणा पढममणुव्वयमारोवइ ताण मुणिनाहो ॥२३॥
तो वंदिऊण मुणिणो चलिया ते दोवि जत्थ गंतव्वं । मुणिणोवि जहाभिमयं पगया पगएण कज्जेण ॥
करिऊणं तं जत्तं पत्ता ते पुणवि कंचणपुरम्मि । किसिकम्ममाइयाइं करिंति कम्माइं विविहाइं ॥२५॥
अह सूरेण विवाहो पारद्धो नियसुयाए वित्थरओ । सह ईसरेण केणवि तीए आहरणहेउं च ॥२६॥
सुत्तइ बहुं सुवन्नं माणिक्काइं च मोत्तियाइं च । अह लहुबंधू सूरस्स केसवो चिंतए एवं ॥२७॥

विज्ञानज्ञानजनको बन्धुर्निःशेषजन्तुवर्गस्य । विश्वासकरणपटुः परमपदस्थापको धर्मः ॥१४॥
दोषाचरणनिवृत्तिः सुकुलोत्पत्तिः सुखानां संपत्तिः । शत्रुबलस्य विपत्तिर्जायते परमेण धर्मेण ॥१५॥
सकलजनप्रार्थनीया सुभगा स्वच्छन्दगामिनी विपुला । विचरति समुज्ज्वलाङ्गी कीर्तिर्धर्मेण वेश्येव ॥१६॥
इति कथयित्वा धर्मफलं भणितौ तौ द्वावपि साधुना भो भोः ! । जिनवरभणितं धर्मं कुरुत प्रयत्नेन प्रतिदिवसम् ॥
श्रीवत्सेन भणितं स धर्मः कीदृशो, मुनिः कथयति । जिनभणितश्रद्धानं जीवदयाया अनुष्ठानम् ॥१८॥
अथ जिननाथस्वरूपं सुगुरुस्वरूपं जीवादितत्त्वानि । कथयित्वा जीवदयामूलत्वं कथयति धर्मस्य ॥१९॥
इत्यादिसप्रपञ्चं यतिधर्मं कथयित्वा कथयति गृहिधर्मम् । ततः श्रीवत्सो जल्पत्याकर्णयत मम विज्ञप्तिम् ॥२०॥
न हन्मि निरपराधान् जीवान् संकल्पतोऽहं स्थूलान् । यावज्जीवं तस्मान्मम कुरुत प्रसादं व्रतेनानेन ॥२१॥
ततो मुनिना तस्य कथिता बन्धादयः पञ्चात्रातिचाराः । एतेऽपि न कर्तव्याः प्रथमव्रतं रक्षता ॥२२॥
आमेति तेन भणिते सूरसुतेनापि तथैव प्रतिपन्ने । विधिना प्रथममणुव्रतमारोपयति तयोर्मुनिनाथः ॥२३॥
ततो वन्दित्वा मुनी चलितौ तौ द्वावपि यत्र गन्तव्यम् । मुनी अपि यथाभिमतं प्रगतौ प्रकृतेन कार्येण ॥२४॥
कृत्वा तां यात्रां प्राप्तौ तौ पुनरपि काञ्चनपुरे । कृषिकर्मादिकानि कुरुतः कर्माणि विविधानि ॥२५॥
अथ सूरेण विवाहः प्रारब्धो निजसुताया विस्तरतः । सहेश्वरेण केनापि तस्या आभरणहेतोश्च ॥२६॥
सूत्रयति बहु सुवर्णं माणिक्यानि च मौक्तिकानि च । अथ लघुबन्धुः सूरस्य केशवश्चिन्तयत्येवम् ॥२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जं एस इह वइस्सइ तं सव्वं मज्झ जाइ विहवाओ । तम्हा होमि विभिन्नो पढमंपि विवाहकालाओ ॥२८॥
तो सूरं सो पभणइ बंधव ! जं किंपि एइ मह भागे । तं देह, भणइ सूरो किं एवं वुच्चए वच्छ !॥२९।
कस्स य पुन्नेहिं सिरी वट्टइ मिलियाण नज्जइ न इत्थ । होज्ज पुढीभूयाणं सा कस्सवि कहवि दालिद्दं।
तो तस्सवि आभारो कड्ढेयव्वोऽवरेण सव्वोवि । सुयणत्तसंठिएणं एवं चिय वहउ ता वच्छ ! ॥३१॥
तो भणइ केसवो मह दालिद्दं होहिई विउत्तस्स । जइ, तोवि न पत्थिस्सं किंपि अहं देहि मह भागं ॥
इय काउं निब्बंधं बंधुसयासाउ लेइ विहवद्धं । सिरिवच्छंपि हु लोभविय नेइ सो अप्पणो पासे ॥३३।
पइदिवसं चिय वड्ढइ विहवो सूरस्स, केसवस्स पुणो । तह खीणो जह भोयणमित्तं किच्छेण संपडइ ॥
दिंतस्सवि नो गिण्हइ सूरस्स इमो धणाइ थेवंपि । इय तम्मि खीणविहवम्मि आगओ पाउसो कमसो ॥
तथाहि;—
गज्जंतगहिरघणगरुयगयघडाडोवपयडियपयावो । उत्थरइ गिम्हनिहणिक्कविक्कमो पाउसो राया ॥३६॥
बहलघणकसिणजलहरअंधारियसयलगयणदिसिचक्के । नय नज्जइ कत्थ गओ वियंभिए पाउसे गिम्हो।
इय पाउसेण कणियारिऊण वरिसंतमेघधाराहिं । निव्ववियं भुवणयलं मोत्तूणं विरहिहिययाइं ॥३८।
तो सूरहालिएसुं घित्तूण हलाइं खित्तचलिएसु । हलउत्तयकरणत्थं सिरिवच्छं केसवो भणइ ॥३९॥
अम्हेवि हु जुत्तेमो हलाइं, सो भणइ अज्ज भद्दाए । एए करिंति, अम्हं जाणंताणं न तं जुत्तं ॥४०॥
अह सूरहालियाणं अच्चब्भुयनच्चिरिं नडिं मग्गे । दट्ठुं अक्खित्ताणं भद्दाए वोलिओ पहरो ॥४१॥

यदेष इह व्येष्यति तत्सर्वं मम याति विभवात् । तस्माद् भवामि विभिन्नः प्रथममेव विवाहकालात् ॥२८॥
ततः सूरं स प्रभणति बान्धव ! यत्किमप्येति मम भागे । तद् देहि, भणति सूरः किमेवमुच्यते वत्स ! ॥
कस्य च पुण्यैः श्रीर्वर्तते मिलितानां ज्ञायते नात्र । भवेत्पृथग्भूतानां सा कस्यापि कथमपि दारिद्र्यम् ॥३०॥
ततस्तस्याप्याभारः कर्षितव्योऽपरेण सर्वोऽपि । सुजनत्वसंस्थितेनैवमेव वहतु तस्माद् वत्स ! ॥३१॥
ततो भणति केशवो मम दारिद्र्यं भविष्यति वियुक्तस्य । यदि,ततोऽपि न प्रार्थयिष्ये किमप्यहं देहि मम भागम् ।
इति कृत्वा निर्बन्धं बन्धुसकाशाल्लाति विभवार्धम् । श्रीवत्समपि खलु लोभयित्वा नयति स आत्मनः पार्श्वे॥३३।
प्रतिदिवसमेव वर्धते विभवः सूरस्य, केशवस्य पुनः । तथा क्षीणो यथा भोजनमात्रं कृच्छ्रेण संपद्यते ॥३४॥
ददतोऽपि नो गृह्णाति सूरस्यायं धनादि स्तोकमपि । इति तस्मिन् क्षीणविभव आगता प्रावृट् क्रमशः॥३५॥
गर्जद्गभीरघनगुरुगजघटाटोपप्रकटितप्रतापः । उच्छलति ग्रीष्मनिधनैकविक्रमः प्रावृड्राजः ॥३६॥
बहलघनकृष्णजलधरान्धकारितसकलगगनदिक्चक्रायाम् । नच ज्ञायते क्व गतो विजृम्भितायां प्रावृषि ग्रीष्मः ॥
इति प्रावृषा कर्णिकारयित्वा वर्षन्मेघधाराभिः । निर्वापितं भुवनतलं मुक्त्वा विरहिहृदयानि ॥३८॥
ततः सूरहालिकेषु गृहीत्वा हलानि क्षेत्रचलितेषु । हलयोक्त्रककरणार्थं श्रीवत्सं केशवो भणति ॥३९॥
वयमपि खलु योजयामो हलानि, स भणत्यद्य भद्रायाम् । एते कुर्वन्ति, अस्माकं जानतां न तद्युक्तम् ॥
अथ सूरहालिकानामत्यद्भुतनर्तनीं नटीं मार्गे । द्रष्टुमाक्षिप्तानां भद्राया अतिक्रान्तः प्रहरः ॥४१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

जो आसि तत्थ दुट्ठो, पयट्टमणुकूलबहुगुणं लग्गं । तम्मि समयम्मि खित्ते तेहिं कओ खंडणारंभो॥४२॥
केसवसिरिवच्छेहिं अन्नदिणे सोहणे मुहुत्तम्मि । हलउत्तयकरणत्थं जुत्तेसु दोसुवि हलेसु ॥४३॥
सिरिवच्छो गोणेणं तहाहओ पट्ठुयाए हिययम्मि । मुच्छानिमीलियच्छो जह पडिओ धरणिवट्टम्मि ॥
गेहे च्चिय तं मुत्तुं हलमिक्कं चेव केसवो घित्तुं । चलिओ खित्ताभिमुहं ता करभरुयं निसामेउं ॥४५॥
रासिं जुत्तं चिय तोडिऊण गोणे गए कहवि गहिउं । असुभे समयम्मि कओ तेणं हलउत्तओ खित्ते ॥
अह विन्नायावसरो दुण्हवि हलउत्तयाण सिरिवच्छो । पभणइ केसव ! पेच्छह दिव्वस्स गईए कुडिलत्तं ॥
सूरस्स पुन्नवसओ पमायओ हालियाण दुमुहुत्तं । टलियं सुहे मुहुत्ते जाओ हलउत्तओ ताव ॥४८॥
अम्हं पुण विवरीयं जाणंताणंपि उज्जयाणंपि । संजायं इय सुणिउं कीरइ किं केसवो भणइ ॥४९॥
अह अन्नया य दुन्निवि हलाइं खेडंति अप्पणच्चेव । सिरिवच्छहले गलिओ बलिओवि हु थक्कए पडिओ॥
तो तोत्तेणं हणई आराहिं य विंधए पुणो बहुयं । तुत्तम्मि कहवि भग्गे हणेइ पण्हिप्पहारेहिं ॥५१॥
सूरसुएणं कज्जागएण दट्ठूण पभणिओ भाया ! । पाणाइवायविरइं घित्तुं आयरसि किं एवं ? ॥५२॥
सो भणइ परवसो हं भणइ य तह केसवोवि सूरसुयं । किं खलियारसि एयं किं तुह तत्तीए एयाए ?॥
तो सो मोणं काउं गओ तओ सो तहेव सिरिवच्छो । थक्कं थक्कं गोणं बहुप्पयारं कयत्थेइ ॥५४॥
दंतगिरिडिं पबंधइ पुच्छं मोडेइ खाइ दसणेहिं । चंडालोव्व पयंपइ अजंपियव्वाइं अइकुद्धो ॥५५॥
इत्तो य कविलमूसयकत्तरबहुझारितिड्डपभिईहिं । केसवकिसी विणट्ठा ववहरएहिं तओ धरिओ ॥५६॥

य आसीत्तत्र दुष्टः, प्रवृत्तमनुकूलबहुगुणं लग्नम् । तस्मिन् समये क्षेत्रे तैः कृतः कर्षणारम्भः ॥४२॥
केशवश्रीवत्साभ्यामन्यदिने शोभने मुहूर्त्ते । हलयोक्त्रककरणार्थं युक्तयोरपि द्वयोर्हलयोः ॥४३॥
श्रीवत्सो गवा तथा हतः पादेन हृदये । मूर्च्छानिमीलिताक्षो यथा पतितो धरणीपट्टे ॥४४॥
गेह एव तं मुक्त्वा हलमेकमेव केशवो गृहीत्वा । चलितः क्षेत्राभिमुखं तदा करभरुतं निशम्य ॥४५॥
राशिं योक्त्रं च त्रोटयित्वा गवि गते कथमपि गृहीत्वा । अशुभे समये कृतं तेन हलयोक्त्रकं क्षेत्रे ॥४६॥
अथ विज्ञातावसरा द्वयोरपि हलयोक्त्रयोः श्रीवत्सः । प्रभणति केशव ! पश्य दैवस्य गतेः कुटिलत्वम् ॥४७॥
सूरस्य पुण्यवशतः प्रमादतो हालिकानां दुर्मुहूर्तम् । अपगतं शुभे मुहूर्ते जातं हलयोक्त्रकं तावत् ॥४८॥
अस्माकं पुनर्विपरीतं जानतामप्युद्यतानामपि । संजातमिति श्रुत्वा क्रियते किं केशवो भणति ॥४९॥
अथान्यदा च द्वावपि हले कर्षत आत्मनैव । श्रीवत्सहले गलिर्बल्यपि खलु तिष्ठति पतितः ॥५०॥
ततस्तोत्रेण हन्त्याराभिश्च विध्यति पुनर्बहु । तोत्रे कथमपि भग्ने हन्ति पृष्णिप्रहारैः ॥५१॥
सूरसुतेन कार्यागतेन दृष्ट्वा प्रभणितो भ्रातः ! । प्राणातिपातविरतिं गृहीत्वाऽऽचरसि किमेवम् ? ॥५२॥
स भणाति परवशोऽहं भणाति च तथा केशवोऽपि सूरसुतम् । किं स्खलयस्येतं किं तव चिन्तयैतया ? ॥५३॥
ततः स मौनं कृत्वा गतस्ततः स तथैव श्रीवत्सः । स्थितं स्थितं गां बहुप्रकारं कदर्थयति ॥५४॥
दन्तपिष्टिं प्रबध्नाति पुच्छं मोटयति खादति दशनैः । चाण्डाल इव प्रजल्पत्यजल्पितव्यान्यतिक्रुद्धः ॥५५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दो सारबलिद्दावि हु तेहिं उद्दालिया तओ सगडं । वाहेइ भाडएणं सिरिवच्छो अवरगोणेहिं ॥५७॥
अह अन्नदिणे जुत्तो सो गलिओ गड्डयम्मि भरियम्मि । घणधूलीखोणीए खुरेवि उक्खणइ न कहंपि ॥५८॥
सगडाओ उत्तरिउं तो सो आराहिं विंधए हणइ । तोत्तयलउडयडंगालिट्ठुवलाईहिं निक्करुणं ॥५९॥
अह मोडेउं लग्गो पुच्छं जा तेण गलिबलद्देण । लत्ताए हओ गाढं मम्मम्मि मओ गओ नरयं ॥६०॥
तो सूरसुओ चिंतइ हद्धी एसो पमायवसवत्ती । वयमयलणाउ नूणं भमिही एसो भवारन्ने ॥६१॥
मज्झवि अलद्धपुव्वं लद्धुं एयं सुधम्मसामग्गिं । कुगईए निवडंतो अप्पा नोविक्खिउं जुत्तो ॥६२॥
सुगई पुण मुत्तिच्चिय सा पुण संपुन्नचरणओ चेव । तं पुण सुगुरूण समागमेण, गविस्सामि ता एए ॥
एवं सो ववसंतो मुक्को पाणेहिं आउपज्जंते । अखंडियपढमवओ पत्तो ईसाणकप्पम्मि ॥६४॥
सिरिवच्छनारओवि हु परमाहम्मियमुहाउ निसुणेउं । सुमरेऊणं च तहा पढमाणुव्वयअइक्कमणं ॥६५॥
पसरियपच्छायावो परिचिंतइ हा ! मए अणज्जेण । अमयलवम्मि निहित्तो कह मुट्ठी कालकूडस्स ? ॥
लद्धूण सव्वसंजमसामग्गिमणुव्वयं मए पढमं । एक्कं चिय पडिवन्नं तंपि हु जाणंतएणेव ॥६७॥
भग्गं अइक्कमंतेण पवरअमरत्तकारणं परमं । सिवसुहसंपत्तिफलं कमेण इन्हि तु पावो हं ॥६८॥
एयमवत्थं पत्तो करेमि किं दुक्खसायरनिबुड्डो । ता सच्चमिणं भणियं केहिवि विबुहेहिं पुरिसेहिं ॥६९॥

"इहैव नरकव्याधेश्चिकित्सां न करोति यः । गतो निरौषधं स्थानं स रुजः किं करिष्यति ? ॥"

एवं सो अप्पाणं निंदंतो जिणवरप्पणीयं च । धम्मं बहु मन्नंतो वाससहस्साइं दस गमिउं ॥७०॥

इतश्च कपिलमूषककचरबहुझिल्लीशलभप्रभृतिभिः । केशवकृषिर्विनष्टा व्यवहारकैस्ततो धृतः ॥५६॥
द्वौ सारबलीवर्दावपि खलु तैर्गृहीतौ ततः शकटम् । वाहयति भाटकेन श्रीवत्सोऽपरगवाभ्याम् ॥५७॥
अथान्यदिने युक्तः स गलिः शकटे भृते । घनधूलिक्षोण्यां खुरानप्युत्खनाति न कथमपि ॥५८॥
शकटादुत्तीर्य ततः स आराभिर्विध्याति हन्ति । तोत्रलकुटयष्टिलेष्टूपलादिभिर्निष्करुणम् ॥५९॥
अथ मोटयितुं लग्नः पुच्छं यावत्तेन गलिबलीवर्देन । पादेन हतो गाढं मर्माणि मृतो गतो नरकम् ॥६०॥
ततः सूरसुतश्चिन्तयति हा धिगेष प्रमादवशवर्ती । व्रतमलिनीकरणान्नूनं भ्रमिष्यत्येष भवारण्ये ॥६१॥
ममाप्यलब्धपूर्वां लब्ध्वैतां सुधर्मसामग्रीम् । कुगतौ निपतन्नात्मा नोपेक्षितुं युक्तः ॥६२॥
सुगतिः पुनर्मुक्तिरेव सा पुनः संपूर्णचारित्रत एव । तत्पुनः सुगुरूणां समागमेन, गवेषयिष्यामि तस्मादेतान् ॥
एवं स व्यवस्यन् मुक्तः प्राणैरायुःपर्यन्ते । अखण्डितप्रथमव्रतः प्राप्त ईशानकल्पे ॥६४॥
श्रीवत्सनारकोऽपि खलु परमाधार्मिकमुखात् श्रुत्वा । स्मृत्वा च तथा प्रथमाणुव्रतातिक्रमणम् ॥६५॥
प्रसृतपश्चात्तापः परिचिन्तयति हा ! मयाऽनार्येण । अमृतलवे निहितः कथं मुष्टिः कालकूटस्य ? ॥६६॥
लब्ध्वा सर्वसंयमसामग्रीकमणुव्रतं मया प्रथमम् । एकमेव प्रतिपन्नं तदपि खलु जानतैव ॥६७॥
भग्नमतिक्रामता प्रवरामरत्वकारणं परमम् । शिवसुखसंपत्तिफलं क्रमेणेदानीं तु पापोऽहम् ॥६८॥
एतामवस्थां प्राप्तः करोमि किं दुःखसागरनिमग्नः । तस्मात्सत्यमिदं भणितं कैरपि विबुधैः पुरुषैः ॥६९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उव्वट्टिय निरयाओ इह भरहे मलयपुरपुरे रम्मे। विक्कमरायस्स सुओ हरिविक्कमनामओ होउं ॥७१॥
संजायजाइसरणो संविग्गो पालिऊण जिणदिक्खं। संपत्तो सोहम्मे तओ चुया निव्वुया दोवि ॥७२॥

॥ इति प्रथमाणुव्रते द्वितीयकातीचारे वधदृष्टान्ते विप्रश्रीवत्सकथानकं समाप्तम् ॥

एवं स आत्मानं निन्दन् जिनवरप्रणीतं च। धर्मं बहु मन्यमानो वर्षसहस्राणि दश गमयित्वा ॥७०॥
उद्वृत्य निरयादिह भरते मलयपुरपुरे रम्ये। विक्रमराजस्य सुतो हरिविक्रमनामतो भूत्वा ॥७१॥
संजातजातिस्मरणः संविग्नः पालयित्वा जिनदीक्षाम्। संप्राप्तः सौधर्मे ततश्च्युतौ निर्वृतौ द्वावपि ॥७२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

गलकंबलकन्नाईण कप्पणं जो करेइ जीवाणं । सो राहडोव्व पावइ भवभमणदुहाइं भीमाइं ॥१॥
तथाहि;---
महिमहिलामुहतिलयंव लच्छिनिलयं पुरं इह पसिद्धं। विजियविपक्खनरिंदो राया तत्थत्थि कुरुचंदो॥२॥
तस्सत्थि पिया गोरीव संभुणो सीलसालिणी लीला । राहडनामा मंती सुरज्जकज्जे सया सज्जो ॥३॥
अह अन्नया नरिंदो राहडमंडलियमाइलोएण । परिवारिओ समंता अत्थाणसहाए उवविट्ठो ॥४॥
जा चिट्ठइ ता दिट्ठो एगो विज्जाहरो नहयलाओ । आगच्छंतो करकलियखग्गफलओ सभज्जो य॥५॥
संपत्तो अत्थाणे पभणइ नरनाहपणयपयकमलं। कुरुचंदराय ! निसुणसु विन्नत्तिं मज्झ पसिऊण ॥६॥
खणमेगं मज्झ पिया रक्खेयव्वा तए पयत्तेण । जाव अहं संगामं करेमि गंतूण सह रिउणा ॥७॥
अन्नत्थ कत्थवि अहं एयं मोत्तुं चएमि नहु तेण । तुह पासम्मि मुएमि परनारिसहोयर ! नरिंद!॥८॥
परकज्जकरणरसिया दीसंति महीए पविरलनरिंदा ।तुम्हारिसा महायस! पुरिसोत्तमगुणगणोवेया ॥९॥
सव्वस्सं मह एसा पाणपिया पणइणी इमा तम्हा । रक्खेयव्वा तुमए इय भणिउं तो गओ खयरो॥१०॥
दिन्नासणम्मि अह सा उवविट्ठा खयरपणइणी जाव । ता गयणाओ सहसा फरयसणाहा भुया पडिया ॥
ताहे उड्ढमुहाणं सव्वाण जणाण तम्मि अत्थाणे । दिढगहियमंडलग्गा दुइयभुया निवडिया झत्ति ॥१२॥
तत्तो खेवेण विणा पडियं गयणंगणाउ सिरकमलं । मणिमउडदिप्पमाणं मज्झण्हदिणिंदबिंबंव॥१३॥
गुरुकोवारुणदारुणपसारियच्छं अईव दुप्पिच्छं । तिवलीभंगुरभालं निट्ठुरदंतग्गदट्ठोट्ठं ॥१४॥

गलकम्बलकर्णादीनां छेदनं यः करोति जीवानाम् । स राहड इव प्राप्नोति भवभ्रमणदुःखानि भीमानि॥१॥
महीमहिलामुखतिलकमिव लक्ष्मीनिलयं पुरमिह प्रसिद्धम् । विजितविपक्षनरेन्द्रो राजा तत्रास्ति कुरुचन्द्रः ॥२॥
तस्यास्ति प्रिया गौरीव शम्भोः शीलशालिनी लीला । राहडनामा मन्त्री सुराज्यकार्ये सदा सज्जः ॥३॥
अथान्यदा नरेन्द्रो राहडमाण्डलिकादिलोकेन । परिवारितः समन्तादास्थानसभायामुपविष्टः ॥४॥
यावत्तिष्ठति तावद् दृष्ट एको विद्याधरो नभस्तलात् । आगच्छन् करकलितखड्गफलकः सभार्यश्च ॥५॥
संप्राप्त आस्थाने प्रभणति नरनाथप्रणतपादकमलम् । कुरुचन्द्रराजन् ! शृणु विज्ञप्तिं मम प्रसद्य ॥६॥
क्षणमेकं मम प्रिया रक्षितव्या त्वया प्रयत्नेन । यावदहं संग्रामं करोमि गत्वा सह रिपुणा ॥७॥
अन्यत्र क्वाप्यहमेतां मोक्तुं शक्नोमि नैव तेन । तव पार्श्वे मुञ्चामि परनारीसहोदर ! नरेन्द्र ! ॥८॥
परकार्यकरणरसिका दृश्यन्ते मह्यां प्रविरलनरेन्द्राः । युष्मादृशा महायशः ! पुरुषोत्तमगुणगणोपेताः ॥९॥
सर्वस्वं ममैषा प्राणप्रिया प्रणयिनीयं तस्मात् । रक्षितव्या युष्माभिरिति भणित्वा ततो गतः खचरः ॥१०॥
दत्तासनेऽथ सोपविष्टा खचरप्रणयिनी यावत् । तावद् गगनात् सहसा फरकसनाथा भुजा पतिता ॥११॥
तदोर्ध्वमुखेषु सर्वेषु जनेषु तस्मिन्नास्थाने । दृढगृहीतमण्डलाग्रा द्वितीयभुजा निपातिता झटिति ॥१२॥
ततः क्षेपेण विना पतितं गगनाङ्गणाच्छिरःकमलम् । मणिमुकुटदीप्यमानं मध्याह्नदिनेन्द्रबिम्बमिव ॥१३॥
गुरुकोपारुणदारुणप्रसारिताक्षमतीव दुर्दर्शम् । त्रिवलीभङ्गुरभालं निष्ठुरदन्ताग्रदष्टौष्ठम् ॥१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेण समं चिय पडियं पहारसयजज्जरं धडंपि तओ। तं तह दट्ठुं मउलियवयणा खयरी भणइ रायं ॥१५॥
एसो मह पाणपिओ रिउणा वावाइओ न संदेहो । ता तस्स विओए हं नो पाणे धारिउं सक्का ॥१६॥
ता काऊण पसायं सिग्घं मह देहि भाय ! दारूणि । पियविरहदहणदड्ढं दहेमि देहं पुणो जेण ॥१७॥
ताहे रन्ना भणियं भगिणी तं मज्झ ता इमं रज्जं । तुह संतियंति मुंचसु पाणपरिच्चायबुद्धिंपि ॥१८॥
तो पुण भणियं तीए एवं चिय इत्थ तुम्ह बंधुत्तं । जं इट्ठविरहदुक्खियमणाए मे देसि कट्ठाणि ॥१९॥
पुणरवि बहुप्पयारं भणिया रन्ना न जुत्तमिय काउं । अप्पाणम्मिवि पीडा विहिणा विहिया हवइ सुहया ॥
धरसु महव्वयभारं हारं सिवरमणिमणहरमुयारं । जिणसु कसाए सिद्धंतजावओ सुहनिहिपिसाए ॥२१॥
परिहर कुदिट्ठिसेवं देवं मन्नेसु विगयरागमलं । समतिणमणिणो मुणिणो गुरुणो, जीवाइतत्ताइं ॥२२॥
इय भणियावि न मन्नइ वयणं पुहईसरस्स सा खयरी । खयरगुणे उच्चरिउं पुणो पुणो रुयइ तो रन्ना ॥२३॥
दावाविआइं तीसे चंदणकट्ठाइं विरइऊण चियं । अह सा खयरी नियपइगत्ताइं झत्ति घित्तूणं ॥२४॥
हुयवहजालचियाए चियाए सा तीए जा किर पविट्ठा । तो कुरुचंदनराहिवपुरओ सो आगओ खयरो ॥
करकलियफरयखग्गो नरनाहं पणमिऊण विन्नवइ । पहु ! परनारिसहोयरमत्थयचूडामणि ! नरिंद ! ॥
तुज्झ पहावेण मए निहओ सत्तू गरिट्ठबलकलिओ । सरणागयजणवच्छल ! मह दइयं मे समप्पेसु ॥
संपइ नियनयरं पइ गच्छिस्सं जेण जणमणाणंद ! । आणानिद्देसकरो एस जणो तुज्झ सयकालं ॥२८॥
तो खुहिओ नरनाहो चिंतइ किं उत्तरं पयच्छेमि । तो पक्खित्ता दिट्ठी रन्ना मंतिस्स वयणम्मि ॥२९॥

तेन सममेव पतितं प्रहारशतजर्जरं कबन्धमपि ततः । तत्तथा दृष्ट्वा मुकुलितवदना खचरी भणति राजानम् ॥१५॥
एष मम प्राणप्रियो रिपुणा व्यापादितो न संदेहः । तस्मात्तस्य वियोगेऽहं नो प्राणान् धारयितुं शक्ता ॥१६॥
तस्मात् कृत्वा प्रसादं शीघ्रं मम देहि भ्रातः ! दारूणि । प्रियविरहदहनदग्धं दहामि देहं पुनर्येन ॥१७॥
तदा राज्ञा भणितं भगिनी त्वं मम तस्मादिदं राज्यम् । तव सत्कमिति मुञ्च प्राणपरित्यागबुद्धिमपि ॥१८॥
ततः पुनर्भणितं तयैवमेवात्र युष्माकं बन्धुत्वम् । यदिष्टविरहदुःखितमनसो मे ददासि कष्टानि ॥१९॥
पुनरपि बहुप्रकारं भणिता राज्ञा न युक्तमिति कर्तुम् । आत्मन्यपि पीडा विधिना विहिता भवति सुखदा ॥२०॥
धर महाव्रतभारं हारं शिवरमणीमनोहरमुदारम् । जय कषायान् सिद्धान्तजापतः सुखनिधिपिशाचान् ॥२१॥
परिहर कुदृष्टिसेवां देवं मन्यस्व विगतरागमलम् । समतृणमणीन् मुनीन् गुरून्, जीवादितत्त्वानि ॥२२॥
इति भणितापि न मन्यते वचनं पृथिवीश्वरस्य सा खचरी । खचरगुणानुच्चार्य पुनः पुना रोदिति ततो राज्ञा ॥२३॥
दापितानि तस्यै चन्दनकाष्ठानि विरचय्य चिताम् । अथ सा खचरी निजपतिगात्राणि झटिति गृहीत्वा ॥२४॥
हुतवहज्वालाचितायां चितायां सा तस्यां यावत्किल प्रविष्टा । ततः कुरुचन्द्रनराधिपपुरतः स आगतः खचरः ॥
करकलितफरकखड्गो नरनाथं प्रणम्य विज्ञपयति । प्रभो ! परनारीसहोदरमस्तकचूडामणे ! नरेन्द्र ! ॥२६॥
तव प्रभावेण मया निहतः शत्रुर्गरिष्ठबलकलितः । शरणागतजनवत्सल ! मम दयितां मे समर्पय ॥२७॥
संप्रति निजनगरं प्रति गमिष्यामि येन जनमनआनन्द ! । आज्ञानिर्देशकर एष जनस्तव सदाकालम् ॥२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो मंतिणा जहट्ठियवुत्तंते साहिए समग्गेवि । ता कसिणीकयवयणो खयरो विन्नवइ नरनाहं ॥३०॥
अमयंपि विसं जायं चंदोवि हु मुयइ जलणजालोलिं । मायंडोवि हु पयडइ अहह ! अकंडेवि तमपडलं ॥
तुम्हारिसावि जइ परिचयंति पागयजणव्व मज्जायं । ता नाह ! समुद्देहिवि नूणममुद्देहिं होयव्वं ॥३२॥
अहमेसो पच्चक्खो सा मह अंगाइं पणइणी घेत्तुं । चडिया चियाए, अलियंपि वुच्चए किंचि घडमाणं ॥
अंतेउरेण छुहिऊण मह पियं भणसि साहियं जलणं । जं वुच्चिज्जइ सि परनारिसोयरो आयरसि एयं ॥
ता नियजसपसरं तिहुयणंपि उज्जोयमाणमिममेवं । मा कुणसु कलंकेउं तुल्लं चंदेण जयनाह ! ॥३५॥
ता अप्पसु मह दइयं कुणसु दयं जा तुट्टइ महासा । अह तुट्टचिय आसा सहसेव गयंव पाणेहिं ॥३६॥
तं सच्चं मन्नंतो तद्दुक्खदुहाउलो नरवरिंदो । किंकायव्वविमूढो छूढोव्व जलंतजलणम्मि ॥३७॥
अइकसिणीकयवयणो अहोमुहो जा न किंपि पडिभणइ । ताव खयरो पयंपइ सच्चंचिय सा मया किंनु ? ॥
तहवि हु राया चिट्ठइ निरुत्तरो जाव खेयरो ताव । जंपइ मयावि एसा जीवउ तुज्झप्पहावेण ॥३९॥
पभणइ आगच्छ पिए ! परदुहदुहिओ सुहं लहउ सामी । इय भणिए जाव निवो ऊससिओ ईसि ता सहसा॥
उद्दाममद्दलालीकंसालियतिलिमकंसियहुडुक्का । डक्काबोक्काण रवो वियंभिओ रायपंगणए ॥४१॥
तम्मज्झठिया छंदाणुसारओ भावनिब्भरं खयरी । पुरओ पणच्चमाणी पणमइ नरनाहपयकमलं ॥४२॥
तुह कोउयत्थमित्थं विहियं मे खयरइंदियालेण । इय कहिउं नरवइणो पिच्छणयं तेण पारद्धं ॥४३॥

ततः क्षुभितो नरनाथश्चिन्तयति किमुत्तरं प्रयच्छामि । ततः प्रक्षिप्ता दृष्टी राज्ञा मन्त्रिणो वदने ॥२९॥
ततो मन्त्रिणा यथास्थितवृत्तान्ते कथिते समग्रेऽपि । ततः कृष्णीकृतवदनः खचरो विज्ञपयति नरनाथम् ॥३०॥

अमृतमपि विषं जातं चन्द्रोऽपि खलु मुञ्चति ज्वलनज्वालालीम् ।
मार्तण्डोऽपि खलु प्रकटयत्यहह ! अकाण्डेऽपि तमःपटलम् ॥३१॥

युष्मादृशा अपि यदि परित्यजन्ति प्राकृतजना इव मर्यादाम् । तदा नाथ ! समुद्रैरपि नूनममुद्रैर्भवितव्यम् ॥३२॥
अहमेष प्रत्यक्षः सा ममाङ्गानि प्रणयिनी गृहीत्वा । चटिता चितायाम्, अलीकमप्युच्यते किञ्चिद् घटमानम् ॥
अन्तःपुरे क्षिप्त्वा मम प्रियां भणसि साधितं ज्वलनम् । यदुच्यतेऽसि परनारीसहोदर आचरस्येतत् ॥३४॥
तस्मान्निजयशःप्रसरेण त्रिभुवनमप्युद्द्योतमानमिदमेवम् । मा कुरु कलङ्कयित्वा तुल्यं चन्द्रेण जगन्नाथ !॥३५॥
तस्मादर्पय मम दयितां कुरु दयां यावत् त्रुट्यति ममाशा । अथ त्रुटितैवाशा सहसैव गतमिव प्राणैः ॥३६॥
तत् सत्यं मन्यमानस्तद्दुःखदुःखाकुलो नरवरेन्द्रः । किंकर्तव्यविमूढः क्षिप्त इव ज्वलज्ज्वलने ॥३७॥
अतिकृष्णीकृतवदनोऽधोमुखो यावन्न किमपि प्रतिभणति । तावत्खचरः प्रजल्पति सत्यमेव सा मृता किंनु ? ॥
तथापि खलु राजा तिष्ठति निरुत्तरो यावत्खेचरस्तावत् । जल्पति मृताप्येषा जीवतु तव प्रभावेण ॥३९॥
प्रभणत्यागच्छ प्रिये ! परदुःखदुःखितः सुखं लभतां स्वामी । इति भणिते यावन्नृप उच्छ्वसित ईषत्तावत्सहसा ॥
उद्दाममर्दलालीकांसालिकतिलिमकांसिकहुडुक्कानाम् । डक्काबुक्कानां रवो विजृम्भितो राजप्राङ्गणके ॥४१॥
तन्मध्यस्थिता छन्दोऽनुसारतो भावनिर्भरं खचरी । पुरतः प्रनृत्यन्ती प्रणमति नरनाथपादकमलम् ॥४२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो राया पुरलोओ मंतियणो मंडलीयमाईया । विम्हियहियया जंपंति अहह ! अच्छरियमच्छरियं ॥४४॥
तो राया भणइ तयं किं खयर ! इमंति कहसु सब्भावं। न भवामि अहं खयरो नरपुंगव ! इंदियालीओ ॥
इय जंपंते तेसिं सपरियणो नरवईवि तोसेण । सव्वंगियमाभरणं कडगाइं देइ, इत्तो य ॥४६॥
पत्थावोत्ति मुणित्ता सहसा गयणंगणाओ अवयरिओ । चारणमुणी महप्पा चउनाणी ताण पुण्णेहिं ॥४७॥
सपरिग्गहो य राया अब्भुट्ठाणं करेइ पणमइ य । उवणमियं सीहासणमह तत्थ मुणिम्मि उवविट्ठे ॥४८॥
संवरियं पेच्छणयं मुणिणावि य देसणा समारद्धा । संवेयविवेयकरी सुणंति सव्वे तमुवउत्ता ॥४९॥
तथाहि;-
जह एस इंदियाली दंसइ खणनस्सराइं रूवाइं । तह कम्मसुत्तहारो सुत्तइ जीवाणवत्थाओ ॥५०॥
पढमं चिय बालत्तं तत्तो कुमरत्तजुव्वणत्ताइं । तत्तो य वुड्ढभावं कयाइ पंचत्तसंपत्ती ॥५१॥
देवंपि कुणइ तिरियं मणुयं वा, माणवंपि नेरइयं । देवं वा मणुयं वा तिरियं वा, तिरियमवि एवं॥५२॥
नेरइयंपि हु तिरियं नरं च, पंचिंदियंपि एगिंदी । इय घडणविहडणाहिं विणडइ भुवणं असेसंपि ॥५३॥
बालत्तणेवि किंपि हु करेइ कुट्ठिं जरिं खइं वावि । कुमरत्तेवि हु पत्ते घरा घरं भामइ भिक्खं ॥५४॥
जुव्वणवणम्मि पत्तं डंसावइ दुट्ठकामसप्पेण । जह अप्पमवेयंतो पडइ सो दुरियगत्ताए ॥५५॥
वलिपलियगलियसोहं कुणइ य वुड्ढत्तणस्स समयम्मि । वंकीकयकायलयं हासकरं तुच्छतरुणीण ॥५६॥
तो भो सव्वजणाणं सव्वावत्थासु नत्थि थेवंपि । सुहमसुहं पुण दीसइ पच्चक्खं चेव जीवाण ॥५७॥

तव कौतुकार्थमित्थं विहितं मया खचरेन्द्रजालेन । इति कथयित्वा नरपतिं प्रेक्षणकं तेन प्रारब्धम् ॥४३॥
ततो राजा पुरलोको मन्त्रिजनो मण्डलिकादिकाः । विस्मितहृदया जल्पन्ति अहह ! आश्चर्यमाश्चर्यम्॥४४॥
ततो राजा भणाति तं किं खचर ! इदमिति कथय सद्भावम् । न भवाम्यहं खचरो नरपुङ्गव ! ऐन्द्रजालिकः ॥
इति जल्पते तेषां सपरिजनो नरपतिरपि तोषेण । सर्वाङ्गीणमाभरणं कटकानि ददाति, इतश्च ॥४६॥
प्रस्ताव इति ज्ञात्वा सहसा गगनाङ्गणादवतीर्णः । चारणमुनिर्महात्मा चतुर्ज्ञानस्तेषां पुण्यैः ॥४७॥
सपरिग्रहश्च राजाऽभ्युत्थानं करोति प्रणमति च । उपनमितं सिंहासनमथ तत्र मुनावुपविष्टे ॥४८॥
संवृतं प्रेक्षणकं मुनिनापि च देशना समारब्धा । संवेगविवेककरी शृण्वन्ति सर्वे तामुपयुक्ताः ॥४९॥
यथैष इन्द्रजाली दर्शयाति क्षणनश्वराणि रूपाणि । तथा कर्मसूत्रधारः सूत्रयति जीवानामवस्थाः ॥५०॥
प्रथममेव बालत्वं ततः कुमारत्वयौवने । ततश्च वृद्धभावं कदाचित्पञ्चत्वसंपत्तिः ॥५१॥
देवमपि करोति तिर्यञ्चं मनुजं वा, मानवमपि नैरयिकम् । देवं वा मनुजं वा तिर्यञ्चं वा, तिर्यञ्चमप्येवम्॥
नैरयिकमपिच तिर्यञ्चं नरं च, पञ्चेन्द्रियमप्येकेन्द्रियम् । इति घटनविघटनाभ्यां विनटति भुवनमशेषमपि ॥
बालत्वेऽपि कमपि खलु करोति कुष्ठिनं ज्वरिणं क्षयिणं वापि । कुमारत्वेऽपि हि प्राप्ते गृहाद् गृहं भ्रमयति भिक्षाम्॥
यौवनवने प्राप्तं दंशयाति दुष्टकामसर्पेण । यथाऽऽत्मानमविदन् पतति स दुरितगर्ते ॥५५॥
वलिपलितगलितशोभं करोति च वृद्धत्वस्य समये । वक्रीकृतकायलतं हास्यकरं तुच्छतरुणीनाम् ॥५६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता कम्मक्खयहेउम्मि जयह जिणदेसियम्मि धम्मम्मि । जेण कयत्थणघणदुत्थवज्जियं लहह सिद्धत्तं ॥५८॥
सो पुण जीवदयच्चिय सेसा सच्चाइया वई तस्सा । तं सव्वओवि काउं असमत्थो कुणइ देसेण ॥५९॥
अह पणमिऊण विन्नवइ नरवरो राहडो तह अमच्चो । पुव्वपुरिसक्कमेणवि सम्मत्तं अम्ह पहु ! अत्थि ॥
पाणाइवायविरइंपि देसओ देह अम्ह पसिऊण । भणइ मुणी होउ इमं किंपुण एए इहइयारा ॥६१॥
बंधवहं छविच्छेयं अइभारं भत्तपाणवोच्छेयं । दुट्ठमणएहिं एए वज्जेयव्वा पयत्तेण ॥६२॥
तो विहिणा पडिवन्नं पढमवयं निवअमच्चसड्ढेहिं । अवरेहिवि अवराइं बीयवयाईणि गहियाणि ॥६३॥
तो मुणिवरेण भणियं गच्छामो पत्थुयम्मि कज्जम्मि । पडिवन्नवयविसेसे विसेसओ उज्जमेयव्वं ॥६४॥
इय भणिउं उप्पइओ तमालदलसामलम्मि गयणम्मि । रायावि कुणइ धम्मं रज्जधुरं राहडे ठविउं ॥६५॥
तो राहडोवि एक्के ठावेइ पयम्मि मंडलीयाण । अन्नाण पयब्भंसं करेइ निययाए इच्छाए ॥६६॥
एवं च वट्टमाणो दिणे दिणे चडइ गरुयअभिमाणे । थेवेवि हु अवराहे अइगरुयं कुणइ सो दंडं ॥६७॥
केसिंपि हु करचरणे अन्नेसिं पुण सउट्ठनासउडं । अन्नेसिं कप्पावइ निक्करुणो मूलओ कन्ने ॥६८॥
उप्पाडावइ नयणे दसणे पाडावए य अन्नेसिं । केसिं च सयासाओ गिण्हावइ उग्गदंडे सो ॥६९॥
वसणच्छेयं कारइ जिब्भं कप्पावए य अन्नेसिं । एवं च रसे चडिओ अवराहविवज्जियाणंपि ॥७०॥
आरोविउं अलीयं अवराहं नियधणं अदिंताण । अन्नेसिं भयहेउं कप्पावइ अंगुवंगाइं ॥७१॥

ततो मोः सर्वजनानां सर्वावस्थासु नास्ति स्तोकमपि । सुखमसुखं पुनर्दृश्यते प्रत्यक्षमेव जीवानाम् ॥५७॥
तस्मात् कर्मक्षयहेतौ यतध्वं जिनदेशिते धर्मे । येन कदर्थनघनदौःस्थ्यवर्जितं लभध्वं सिद्धत्वम् ॥५८॥
स पुनर्जीवदयैव शेषाः सत्यादिका विस्तरस्तस्याः । तां सर्वतोऽपि कर्तुमसमर्थः करोति देशेन ॥५९॥
अथ प्रणम्य विज्ञपयति नरवरो राहडस्तथाऽमत्यः । पूर्वपुरुषक्रमेणापि सम्यक्त्वमावयोः प्रभो ! अस्ति ॥६०॥
प्राणातिपातविरतिमपि देशतो देह्यावयोः प्रसद्य । भणति मुनिर्भवत्विदं किन्त्वेत इहातिचाराः ॥६१॥
बन्धवधं षड्विच्छेदोऽतिभारो भक्तपानव्युच्छेदम् । दुष्टमनोभिरेते वर्जयितव्याः प्रयत्नेन ॥६२॥
ततो विधिना प्रतिपन्नं प्रथमव्रतं नृपामत्यश्राद्धैः । अपरैरप्यपराणि द्वितीयव्रतादीनि गृहीतानि ॥६३॥
ततो मुनिवरेण भणितं गच्छामः प्रस्तुते कार्ये । प्रतिपन्नव्रतविशेषे विशेषत उद्यन्तव्यम् ॥६४॥
इति भणित्वोत्पतितस्तमालदलश्यामले गगने । राजापि करोति धर्मं राज्यधुरां राहडे स्थापयित्वा ॥६५॥
ततो राहडोऽप्येकान् स्थापयति पदे मण्डलिकानाम् । अन्येषां पदभ्रंशं करोति निजयेच्छया ॥६६॥
एवं च वर्तमानो दिने दिने चटति गुर्वभिमाने । स्तोकेऽपि खल्वपराधेऽतिगुरुं करोति स दण्डम् ॥६७॥
केषामपि खलु करचरणानन्येषां पुनः सौष्ठनासापुटम् । अन्येषां छेदयति निष्करुणो मूलतः कर्णान् ॥६८॥
उत्पाटयति नयनानि दशनान् पाटयति चान्येषाम् । केषां च सकाशाद् ग्राहयत्युग्रदण्डान् सः ॥६९॥
वसनच्छेदं कारयति जिह्वां छेदयति चान्येषाम् । एवं च रसे चटितोऽपराधविवर्जितानामपि ॥७०॥
आरोप्यालीकमपराधं निजधनमददताम् । अन्येषां भयहेतोश्छेदयत्यङ्गोपाङ्गानि ॥७१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एवं च कुणंतो सो लोयाणं जाणिऊण नरवइणा। भणिओ राहडमंती मा कुण इइ दारुणं पावं॥७२॥
जाणंताण अवस्सं वयस्स भंगो न एत्थ अइयारो। सो होइ अणाभोगाइकारणा तो तयं चयह ॥७३॥
हालाहलविसपियणं वरं खु छुरियाए हणणमुयरस्स। पव्वयसिहराउ वरं अप्पा मुक्को निरालंबो ॥७४॥
जालाजालकराले जलणम्मि वरं विसिज्ज निविसिज्जा। खग्गुग्गधारउवरिं न उण भंसिज्ज नियनियमं॥
किञ्च।
लब्भंति विविहमणिकणयरयणभवणोवभोयसंजुत्ता। रिद्धिविसेसा न उणो कहंपि धम्मो दयारूवो ॥७६॥
भणिऊणं आएसो पमाणमिय अग्गओ नरिंदस्स। कट्टावइ करचरणे तहेव निद्धंधसत्तेण ॥७७॥
माराविय तक्करबंधवेण अह अन्नया छलं लहिउं। निहओ छुरियाए मओ गओ य तच्चं नरयपुहविं॥७८॥
तत्तोवि हु उव्वट्टो भमिउं संसारसायरे घोरे। लद्धुं पुणोवि धम्मं अणंतसम्मं सिवं लहिही ॥७९॥
कुरुचंदोवि हु राया पज्जंते अणसणं विहेऊण। पावियसमाहिमरणो सोहम्मे सुरवरो जाओ ॥८०॥
तत्तो अवरविदेहे होऊण कयंगलाए नरनाहो। पत्तो निव्वाणसुहं पज्जंते लद्धजिणदिक्खो ॥८१॥
वयअइयारो दुक्खाण कारणं वज्जणं तु पुण तस्स। अविलंबेणं सिवसुहजणयं ता चयह एयंपि ॥८२॥

॥ इति प्राणातिपाततृतीयातिचारे राहडमन्त्रिकथानकं समाप्तम् ॥

एवं च कुर्वन् स लोकानां ज्ञात्वा नरपतिना। भणितो राहडमन्त्री मा कुर्विति दारुणं पापम् ॥७२॥
जानतामवश्यं व्रतस्य भङ्गो नात्रातिचारः। स भवत्यनाभोगादिकारणात् ततस्तं त्यज ॥७३॥
हालाहलविषपानं वरं खलु क्षुरिकया हननमुदरस्य। पर्वतशिखराद् वरमात्मा मुक्तो निरालम्बः ॥७४॥
ज्वालाजालकराले ज्वलने वरं विशेद् निर्विशेत। खड्गाग्रधारोपरि न पुनर्भ्रंशेत निजनियमम् ॥७५॥
लभ्यन्ते विविधमणिकनकरत्नभवनोपभोगसंयुक्ताः। ऋद्धिविशेषा न पुनः कथमपि धर्मो दयारूपः ॥७६॥
भणित्वाऽऽदेशः प्रमाणमित्यग्रतो नरेन्द्रस्य। छेदयति करचरणांस्तथैव निर्दयत्वेन ॥७७॥
मारयित्वा तस्करबान्धवेनाथान्यदा छलं लब्ध्वा। निहतः क्षुरिकया मृतो गतश्च तृतीयां नरकपृथिवीम् ॥७८॥
ततोऽपि खलूद्वृत्तो भ्रान्त्वा संसारसागरे घोरे। लब्ध्वा पुनरपि धर्ममनन्तशर्म शिवं लप्स्यते ॥७९॥
कुरुचन्द्रोऽपि खलु राजा पर्यन्तेऽनशनं विधाय। प्राप्तसमाधिमरणः सौधर्मे सुरवरो जातः ॥८०॥
ततोऽवरविदेहे भूत्वा कृतमङ्गलायां नरनाथः। प्राप्तो निर्वाणसुखं पर्यन्ते लब्धजिनदीक्षः ॥८१॥
व्रतातिचारो दुःखानां कारणं वर्जनं तु पुनस्तस्य। अविलम्बेन शिवसुखजनकं तस्मात्त्यजतैतम् ॥८२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निक्करुणो जो जीवे अइभारारोवणेण पीडेइ। सो इह पेच्चभवेसुवि सुलसो इव लहइ दुक्खाइं ॥१॥
तथाहि;—
निवभवणपवरनाहिं उयारपायारनेमिपरियरियं। भरहरहचक्कभूयं नयरं नामेण चक्कपुरं ॥२॥
तम्मि रणरंगमल्लो राया निच्चंपि चायदुल्ललिओ। [1]लीलाविलासकलिया ललिया नामेण तस्स पिया ॥
तत्थत्थि सुलससेट्ठी निवपुरदिट्ठी सया अहम्मिट्ठी। अइनिबिडमिच्छदिट्ठी गयतुट्ठी कमलदलदिट्ठी ॥४॥
सव्वेसुवि कज्जेसुं नरवइणो नियमणंव निब्भिच्चो। भिच्चो मित्तं मंती समगं चिय सुयइ भुंजइ य ॥५॥
अह अन्नया नरिंदो अत्थाणसहाए चिट्ठए जाव। ता पुरपवरो लोओ साहुलिहत्थो तहिं पत्तो ॥६॥
साहसिएणं केणवि आ छम्मासाउ पट्टणं एयं। जग्गंतंपि मुसिज्जइ सामिय! पाएण पइरयणिं ॥७॥
कस्सवि भज्जा वररूवसालिणी कन्नगा उ अन्नस्स। रयणकणयाइयाणं संखावि न तेण हरियाण ॥८॥
तो आरक्खियवयणं नियइ निवो भणइ पणमिउं सोवि। सव्वंचिय सच्चमिणं जं जंपइ पुरजणो देव!॥९॥
ता किं अगोयरो तुज्झ तक्करो नरवरेण इय भणिए। सो भणइ देव! एयं किमन्नहा अहमुविक्खेमि? ॥
गयणेणं आगंतु बहुजणउप्पाडणिज्जमवि वत्थुं। एगागीवि हु घेत्तुं गच्छइ सो झत्ति उप्पइउं ॥११॥
इय एवं पभणंतम्मि तम्मि केणावि भणियमज्जेव। तं गिण्हसु इय सोउं राया परिभावए एवं ॥१२॥
दिव्वा भासा एसा न अन्नहा होइ ता अहं नूणं। कयउज्जमो लहिस्सं अज्जं चिय तं महाचोरं ॥१३॥
भणइ य पुरप्पहाणे नियदुत्थं मज्झ परिकहंतेहिं। कायव्वं कयमित्तो मह चिंता इत्थ कज्जम्मि ॥१४॥

निष्करुणो यो जीवानतिभारारोपणेन पीडयति। स इह प्रेत्यभवेष्वपि सुलस इव लभते दुःखानि ॥१॥
नृपभवनप्रवरनाभि उदारप्राकारनेमिपरिकरितम्। भरतरथचक्रभूतं नगरं नाम्ना चक्रपुरम् ॥२॥
तस्मिन् रणरङ्गमल्लो राजा नित्यमपि त्यागदुर्ललितः। लीलाविलासकलिता ललिता नाम्ना तस्य प्रिया ॥३॥
तत्रास्ति सुलसश्रेष्ठी नृपपुरदृष्टिः सदाऽधर्मेष्टिः। अतिनिबिडमिथ्यादृष्टिर्गततुष्टिः कमलदलदृष्टिः ॥४॥
सर्वेष्वपि कार्येषु नरपतेर्निजमन इव निर्भृत्यः। भृत्यो मित्रं मन्त्री समकमेव स्वपिति भुङ्क्ते च ॥५॥
अथान्यदा नरेन्द्र आस्थानसभायां तिष्ठति यावत्। तावत्पुरप्रवरो लोको वस्त्रहस्तस्तत्र प्राप्तः ॥६॥
साहसिकेन केनाप्या षण्मासात् पत्तनमेतत्। जाग्रदपि मुष्यते स्वामिन्! प्रायेण प्रतिरजनि ॥७॥
कस्यापि भार्या वररूपशालिनी कन्यका त्वन्यस्य। रत्नकनकादिकानां संख्यापि न तेन हृतानाम् ॥८॥
तत आरक्षिकवदनं पश्यति नृपो भणति प्रणम्य सोऽपि। सर्वमेव सत्यमिदं यज्जल्पति पुरजनो देव! ॥९॥
तदा किमगोचरस्तव तस्करो नरवरेणेति भणिते। स भणति देव! एतं किमन्यथाऽहमुपेक्षे? ॥१०॥
गगनेनागत्य बहुजनोत्पाटनीयमपि वस्तु। एकाक्यपि खलु गृहीत्वा गच्छति स झटित्युत्पत्य ॥११॥
इत्येवं प्रभणति तस्मिन् केनापि भणितमद्यैव। तं गृहाणेति श्रुत्वा राजा परिभावयत्येवम् ॥१२॥
दिव्या भाषैषा नान्यथा भवति तस्मादहं नूनम्। कृतोद्यमो लप्स्येऽद्यैव तं महाचौरम् ॥१३॥

---

१ ख. ललियलीलाविलासा ल°।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय भणिउं सम्माणिय विसज्जए नरवरो नयरलोयं। चिंतइ य दिव्ववयणं 'अज्जं चिय गिण्हसु' तओ य ॥
पच्चासण्णे नूणं होयव्वं तस्स संनिवेसेणं। वंचिय परियणमित्तो निसि नीसरिओ असिसहाओ ॥१६॥
तो मणसीकयउत्तरदिसिस्स से झत्ति भइरवा वामा। किलकिलिया मग्गेणं तेणं चिय तो पयट्टो सो ॥१७॥
अह जा गाउयदुगं गंतु वडविडविणो ठिओ हिट्ठा। तो कत्थूरियघणसारपरिमलो तस्स नासाए ॥१८॥
तस्स पविट्ठो तो तयणुसारओ कोत्थरं पलोएइ। जा ताव तम्मि निसुणइ आलावे विविहभंगीहिं ॥१९॥
रमणीणं सुइसुहए, वच्चंतो तयणुसारओ तत्तो। पेच्छइ वरपासायं रयणुज्जोइयदिसावलयं ॥२०॥
तस्सं भवणस्स दारम्मि पविसमाणेण राइणा दिट्ठा। एगा पवरा तरुणी वियडनियंबा विसालच्छी ॥
आहरणमणिमऊहोहरंजिया जियअणंगपाणपिया। तीइवि दिट्ठो राया नयणाण महूसवं दिंतो ॥२२॥
निज्जियअणंगरूवं रायं दट्ठूण तत्थ सा जुवई। चित्तलिहियव्व निरु थंभियव्व थक्का खणं एक्कं॥२३॥
तो किच्छेणं कहकहवि तीए वयणाओ निग्गया वाया। हा रमणिलोयणाणंद! कत्थ तं आगओ इत्थ?॥
ता गच्छ गच्छ तुरियं जाव न अज्जवि स एइ पाविट्ठो। जस्स इमो पासाओ दिन्नविसाओ य अम्हाणं॥
रणरंगमल्लराया पुच्छइ तं बालियं इमं भवणं। कस्स तणयं स को वा चिट्ठइ कह संपयं कहसु? ॥२६॥
एयाओ कस्स व संतियाउ नवजोव्वणाउ रमणीओ। एक्काओ करुणसरं गायंति रुयंति अन्नाओ? ॥२७॥
भणियं तीए एयं पायालगिहं भणिज्जए सुहय!। एयस्स सामिओ पुण पिंगच्छो नाम चोरुत्ति॥२८॥

भणति च पुरप्रधानानि निजदौस्थ्यं मां परिकथयद्भिः। कर्तव्यं कृतमितो मम चिन्तात्र कार्ये ॥१४॥
इति भणित्वा संमान्य विसृजति नरवरो नगरलोकम्। चिन्तयति च दिव्यवचनं 'अद्यैव गृहाण' ततश्च ॥१५॥
प्रत्यासन्ने नूनं भवितव्यं तस्य संनिवेशेन। वञ्चयित्वा परिजनमितो निशि निःसृतोऽसिसहायः ॥१६॥
ततो मनसिकृतोत्तरदिशस्तस्य झटिति भैरवी वामा। किलकिलिता मार्गेण तेनैव ततः प्रवृत्तः सः ॥१७॥
अथ यावत्क्रोशद्विकं गत्वा वटविटपिनः स्थितोऽधः। ततः कस्तूरिकाघनसारपरिमलस्तस्य नासायाम् ॥१८॥
तस्य प्रविष्टस्ततस्तदनुसारतः कोटरं प्रलोकयति। यावत् तावत्तस्मिन् शृणोत्यालापान् विविधभङ्गिभिः ॥१९॥
रमणीनां श्रुतिसुखदान्, व्रजंस्तदनुसारतस्ततः। पश्यति वरप्रसादं रत्नोद्द्योतितदिग्वलयम् ॥२०॥
तस्य भवनस्य द्वारे प्रविशता राज्ञा दृष्टा। एका प्रवरा तरुणी विततनितम्बा विशालाक्षी ॥२१॥
आभरणमणिमयूखौघरञ्जिता जितानङ्गप्राणप्रिया। तयापि दृष्टो राजा नयनयोर्महोत्सवं ददत् ॥२२॥
निर्जितानङ्गरूपं राजानं दृष्ट्वा तत्र सा युवतिः। चित्रलिखितेव निश्चितं स्तम्भितेव स्थिता क्षणमेकम् ॥२३॥
ततः कृच्छ्रेण कथंकथमपि तस्या वदनाद् निर्गता वाक्। हा रमणीलोचनानन्द! क्व त्वमागतोऽत्र? ॥२४॥
तस्माद् गच्छ गच्छ त्वरितं यावन्नाद्यापि स एति पापिष्ठः। यस्यायं प्रासादो दत्तविषादश्चास्माकम् ॥२५॥
रणरङ्गमल्लराजः पृच्छति तां बालिकामिदं भवनम्। कस्य संबन्धि स को वा तिष्ठति कथं सांप्रतं कथय? ॥
एताः कस्य वा सत्का नवयौवना रमण्यः। एकाः करुणस्वरं गायन्ति रुदन्त्यन्याः? ॥२७॥
भणितं तयैतत् पातालगृहं भण्यते सुभग!। एतस्य स्वामी पुनः पिङ्गाक्षो नाम चौर इति ॥२८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोवि अईव पयंडो दुज्जेओ खेयरासुराणंपि । नियभुयबलेण मुसिऊण आणए पवरवत्थूणि ॥२९॥
तह जाउ जाउ रमयंति नियमणं ताउ ताउ रमणीओ । आणेऊणं मिल्लइ इहइं पायालभवणम्मि ॥३०॥
चिट्ठइ संतावितो जुवइजणं दिणमणिम्मि उइयम्मि । राईए पुण बाहिं नीहरिउं मुसइ परलोयं ॥३१॥
तम्मि य बाहिम्मि गए जइ कत्थइ जाइ काइ नीहरिउं । तं तत्थ गयं जाणइ तत्तो आणइ विडंबइ य ॥
तो चिंतइ पुहइवई एसो सो जेण पट्टणं मुसियं । महतणयं, ता इन्हि पिच्छामि इमस्स माहप्पं ॥३३॥
इय एवं चिंतंतस्स तस्स तत्थेव थेववेलाए । सो पिंगच्छो चोरो समागओ खग्गवग्गकरो ॥३४॥
रणरंगमल्लरायस्स अग्गमहिसिं महंतसद्देण । पुक्कारिंतं खग्गं उग्गीरिय भायमाणो य ॥३५॥
अह सहसा नरवइणा सो चोरो हक्किउं इमं भणिओ । रे पुरिसाहम ! खग्गं उग्गीरसि उवरि ईत्थीणं ? ॥
ता कत्थ जासि इन्हि रायविरुद्धाइं करिवि कम्माइं । मोत्तुं इमं पलायसु अह सज्जो होसु जुज्झम्मि ॥३७॥
इय तव्वयणं सोऊण चिंतियं तेण पुरिसचोरेण । एरिसअइगूढगिहे कहमित्थ समागओ एसो ? ॥३८॥
अह तेण निवो भणिओ पाव ! पविट्ठो ममावरोहम्मि । केणवि किं दुक्खेणं निविन्नो जीवियासाए ? ॥३९॥
मज्झ करवालधाराजलतित्थे निव्ववेसि अप्पाणं । किंव कुविओ कयंतो देइ चवेडं कवोलम्मि ? ॥४०॥
ता तुह अज्ज कयंतो कुविओ नहु इत्थ निग्गमोवाओ । सूयारसालपडिओ ससउव्व तुमं विणस्सिहसि॥
तो भणिओ सो रन्ना चोरो भणिऊण मज्झ तं वज्झो । तं विवरीयं जायं ससएहिंवि लउडया गहिया ॥

सोऽप्यतीव प्रचण्डो दुर्जेयः खेचरासुराणामपि । निजभुजबलेन मुषित्वाऽऽनयति प्रवरवस्तूनि ॥२९॥
तथा या या रमयन्ति निजमनस्तास्ता रमणीः । आनीय मुञ्चतीह पातालभवने ॥३०॥
तिष्ठति संतापयन् युवतिजनं दिनमणावुदिते । रात्रौ पुनर्बहिर्निःसृत्य मुष्णाति पुरलोकम् ॥३१॥
तस्मिंश्च बहिर्गते यदि क्वचिद्याति काचिन्निःसृत्य । तां तत्र गतां जानाति तत आनयति विडम्बयति च ॥३२॥
ततश्चिन्तयति पृथिवीपतिरेष स येन पत्तनं मुषितम् । मदीयं, तस्मादिदानीं पश्याम्यस्य माहात्म्यम् ॥३३॥
इत्येवं चिन्तयतस्तस्य तत्रैव स्तोकवेलया । स पिङ्गाक्षश्चौरः समागतः खड्गवर्गकरः ॥३४॥
रणरङ्गमल्लराजस्याग्रमहिषीं महाशब्देन । पूत्कुर्वन्तीं खड्गमुदीर्य भेषयंश्च ॥३५॥
अथ सहसा नरपतिना स चौरो हक्कयित्वेदं भणितः । रे पुरुषाधम! खड्गमुद्गृणास्युपरि स्त्रीणाम्? ॥
तस्मात् क्व यासीदानीं राजविरुद्धानि कृत्वा कर्माणि । मुक्त्वेमां पलायस्वाथ सज्जो भव युद्धे ॥३७॥
इति तद्वचनं श्रुत्वा चिन्तितं तेन पुरुषचौरेण । ईदृशातिगूढगृहे कथमत्र समागत एषः ? ॥३८॥
अथ तेन नृपो भणितः पाप! प्रविष्टो ममावरोधे । केनापि किं दुःखेन निर्विण्णो जीविताशायाम् ॥३९॥
मम करवालधाराजलतीर्थे निर्वापयस्यात्मानम् । किंवा कुपितः कृतान्तो ददाति चपेटां कपोले? ॥४०॥
तस्मात्तवाद्य कृतान्तः कुपितो नैवात्र निर्गमोपायः । सूदकारशालापतितः शशक इव त्वं विनङ्क्ष्यसि॥४१॥
ततो भणितः स राज्ञा चौरो भणित्वा मम त्वं वध्यः । तद्विपरीतं जातं शशकैरपि लकुटिका गृहीता ॥४२॥

---

१ ग. महिलाणं ।

तो तं रन्नो वयणं सोउं कोवानलेण पज्जलिओ। सो पिंगच्छो चोरो पहाविओ रायसंमुहओ ॥४३॥
अइरुट्ठेणं तेणवि घल्लिओ तिक्खखग्गगुरुघाओ। रायावि दक्खयाए तं वंचिय गहिय बाहाए ॥४४॥
उद्दालेउं खग्गं पायपहारेण पाडिवि धराए। तं पच्छामुहबाहं बंधइ तक्कणयसुत्तेण ॥४५॥
अह तं दट्ठुं चोरं बद्धं सव्वाउ ताउ रमणीओ। हरिसभरनिब्भरुब्भिन्नबहलपुलयाओ जायाओ ॥४६॥
दंसंति विविहभावे वियारबहुलाओ कामनडियाओ। गाढंपि हु धम्मिल्लं छोडेवि पुणोवि बंधंति ॥४७॥

तो सव्विवि कामिणि मणि हरिसिय, नं नियवल्लहमिलणुक्करिसिय।
पररमणीयणविहुणिय रायह, दंसहिं नेहरसोक्करु रायह ॥ ४८ ॥

अवहीरिऊण ताओ देविं आलवइ जाव किर राया। तो आयन्नइ हयहिंसियाइं गयगज्जियाइं च ॥४९॥
तं सोउं नरनाहो सविम्हओ ठाइ भणइ तो देवी। आणिज्जंतीए मए अणेगहा पलवियं मग्गे ॥५०॥
विक्खिरियाइं तह मुत्तियाइं मुद्दा य रयणरुइराओ। तो तेहिं चिंधेहिं मह अणुमग्गेण तुम्ह बलं ॥५१॥
आगयमेयं मन्ने तुहविरहदवानलेण डज्झंतं। निव्वाविज्जउ तुरियं नियसंगमअमयसेएण ॥५२॥
तो ताओ रमणीओ अग्गे काउं तहेव देविं च। तह गहियबद्धचोरो कमओ नीहरइ नरनाहो ॥५३॥
वडकुत्थरदारविणिग्गयाउ अह दट्ठुं ताओ रमणीओ। जंपंति मंतिपमुहा किमिमा पायालकन्नाओ?॥५४॥
किंवा सुरंगणाओ पायालं पासिऊण कयचोज्जा। निग्गच्छंति इमाओ, एवं जंपंति जा ताव ॥५५॥

ततस्तद्राज्ञो वचनं श्रुत्वा कोपानलेन प्रज्वलितः। स पिङ्गाक्षश्चौरः प्रधावितो राजसंमुखतः ॥४३॥
अतिरुष्टेन तेनापि घटितस्तीक्ष्णखड्गगुरुघातः। राजापि दक्षतया तं वञ्चयित्वा गृहीत्वा बाहौ ॥४४॥
उद्दाल्य खड्गं पादप्रहारेण पातयित्वा धरायाम्। तं पश्चान्मुखबाहुं बध्नाति तत्कनकसूत्रेण ॥४५॥
अथ तं दृष्ट्वा चौरं बद्धं सर्वास्ता रमण्यः। हर्षभरनिर्भरोद्भिन्नबहलपुलका जाताः ॥४६॥
दर्शयन्ति विविधभावान् विकारबहुलाः कामनटिताः। गाढमपि खलु धम्मिल्लं छोटयित्वा पुनरपि बध्नन्ति ॥

ततः सर्वा अपि कामिन्यो मनसि हर्षिताः, ननु निजवल्लभमेलनोत्कर्षिताः।
पररमणीजनविधुनितं राजानं, दर्शयन्त्यः स्नेहरसोत्करं राजन्ते ॥४८॥

अवधीर्य ता देवीमालपति यावत्किल राजा। तत आकर्णयति हयहेषितानि गजगर्जितानि च ॥४९॥
तत् श्रुत्वा नरनाथः सविस्मयस्तिष्ठति भणति ततो देवी। आनीयमानया मयाऽनेकधा प्रलपितं मार्गे ॥५०॥
विकीर्णानि तथा मौक्तिकानि मुद्राश्च रत्नरुचिराः। ततस्तैश्चिह्नैर्ममानुमार्गेण युष्माकं बलम् ॥५१॥
आगतमेतद् मन्ये त्वद्विरहदवानलेन दह्यमानम्। निर्वाप्यतां त्वरितं निजसंगमामृतसेकेन ॥५२॥
ततस्ता रमणीरग्रे कृत्वा तथैव देवीं च। तथा गृहीतबद्धचौरः क्रमतो निःसरति नरनाथः ॥५३॥
वटकोटरद्वारविनिर्गता अथ दृष्ट्वा ता रमणीः। जल्पन्ति मन्त्रिप्रमुखाः किमिमाः पातालकन्याः? ॥५४॥
किंवा सुराङ्गनाः पातालं दृष्ट्वा कृताश्चर्याः। निर्गच्छन्तीमाः, एवं जल्पन्ति यावत्तावत् ॥५५॥

---

१ ग. वेत्तु।

नीहरिओ नरनाहो हरिव्व गिरिकंदराओ दररहिओ । दट्ठूण हट्ठतुट्ठा ते तं पणमंति देविं च ॥५६॥
पभणंति नाह ! देवीहरणं नाऊण तुम्ह पयमूलं । जा अणुसरिमो ता नेय पिच्छिमो देवपाएवि ॥५७॥
देवीए अवहरणं वीसरियं तो अदंसणे तुम्ह । किंकायव्वविमूढा जा चिट्ठामो विगयचिट्ठा ॥५८॥
आरक्खिएण तत्तो आगंतुं साहियं जहुत्तरओ । केणवि गयणचरेणं निज्जइ देवी पलवमाणा ॥५९॥
तो तद्दंसियमग्गेण निग्गया मोत्तियाइवत्थूणि । उड्ढं कुट्टंकेहिं पेच्छंता आगया इत्थ ॥६०॥
पुरओ य अहिन्नाणं न पिच्छिमो दिणयरस्स उदएवि । थक्का इहेव वुन्ना तो दिट्ठं तुम्ह पयकमलं॥६१॥
देवीवि इत्थ दीसइ ता कह अच्चब्भुयं इमं जायं । को वा एसो पुरिसो दीसइ इह बद्धओ नाम ? ॥६२॥
तो तेसिं नरवइणा नियनिग्गमणाउ ताण मिलणंतं । कहिऊणं वुत्तंतं भणिओ सुलसो जहा तुम्हे ॥६३॥
जो जाणिज्जइ सामी जस्स, समप्पेह तस्स तं सव्वं । भूमिगिहट्ठियवत्थुं सेसं मिल्लेह भंडारे ॥६४॥
एयाओ बालियाओ नियनियगेहेसु जह पहुप्पंति । तह कुणह, तओ मंती तस्साएसं लहुं कुणइ ॥६५॥
करिखंधसमारूढो नयराभिमुहं तओ निवो चलिओ । चोरोवि अंगरक्खाण अप्पिउं चालिओ समगं ॥६६॥
मग्गे गच्छंतेणं जगनंदणकेवली कणयकमले । अइविउले उवविट्ठो दिट्ठो धम्मं पयासंतो ॥६७॥
हत्थीओ ओयरिउं पत्तो मुणिपायपंकयस्संते । ति पयक्खिणीकरेउं वंदइ रायावि वरविहिणा ॥६८॥
सामंताई लोओ सव्वोवि हु पणमिऊण उवविट्ठो । चोरोवि विन्नवइ नरनाहमहंपि मुणिनाहं ॥६९॥

निःसृतो नरनाथो हरिरिव गिरिकन्दरातो दररहितः । दृष्ट्वा हृष्टतुष्टास्ते तं प्रणमन्ति देवीं च ॥५६॥
प्रभणन्ति नाथ ! देवीहरणं ज्ञात्वा युष्माकं पादमूलम् । यावदनुसरामस्तावन्नैव पश्यामो देवपादानपि॥५७॥
देव्या अपहरणं विस्मृतं ततोऽदर्शने युष्माकम् । किंकर्तव्यविमूढा यावत्तिष्ठामो विगतचेष्टाः ॥५८॥
आरक्षिकेण तत आगत्य कथितं यथोत्तरतः । केनापि गगनचरेण नीयते देवी प्रलपन्ती ॥५९॥
ततस्तद्दर्शितमार्गेण निर्गता मौक्तिकादिवस्तूनि । ऊर्ध्वं कुट्टाङ्कैः पश्यन्त आगता अत्र ॥६०॥
पुरतश्चाभिज्ञानं न पश्यामो दिनकरस्योदयेऽपि । स्थिता इहैव विषण्णास्ततो दृष्टं युष्माकं पादकमलम् ॥६१॥
देव्यप्यत्र दृश्यते तस्मात् कथमत्यद्भुतमिदं जातम् । को वैष पुरुषो दृश्यत इह बद्धो नाम ? ॥६२॥
ततस्तेभ्यो नरपतिना निजनिर्गमनात्तेषां मेलनान्तम् । कथयित्वा वृत्तान्तं भणितः सुलसो यथा यूयम्॥६३॥
यो ज्ञायते स्वामी यस्य, समर्पयत तस्मै तत् सर्वम् । भूमिगृहस्थितवस्तु शेषं मुञ्चत भाण्डागारे ॥६४॥
एता बालिका निजनिजगृहेषु यथा प्रभवन्ति । तथा कुरुत, ततो मन्त्री तस्यादेशं लघु करोति ॥६५॥
करिस्कन्धसमारूढो नगराभिमुखं ततो नृपश्चलितः । चौरोऽप्यङ्गरक्षाणामर्पयित्वा चालितः समकम् ॥६६॥
मार्गे गच्छता जगन्नन्दनकेवली कनककमले । अतिविपुल उपविष्टो दृष्टो धर्मं प्रकाशयन् ॥६७॥
हस्तितोऽवतीर्य प्राप्तो मुनिपादपङ्कजस्यान्ते । त्रिः प्रदक्षिणीकृत्य वन्दते राजापि वरविधिना ॥६८॥
सामन्तादिर्लोकः सर्वोऽपि खलु प्रणम्योपविष्टः । चौरोऽपि विज्ञपयति नरनाथमहमपि मुनिनाथम् ॥६९॥

---

१ क. तुन्ना, ग. सुन्ना । २ क. पवरक° ग. कुवलयम्मि ! कणयमए उ° ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इच्छामि वंदिउं तो रन्ना आणाविओ पणमिऊण । मुणिवरमुवविट्टो सो सुलसोवि समागओ तत्थ ॥
तो मंदरमंथिज्जंतजलहिसद्दाणुगारिसद्देण । ससुरासुरपरिसाए मुणीवि सद्देसणं कुणइ ॥७१॥
तथाहि;—
अविरलपवणपहल्लिरकुवलयदललग्गजललवचलम्मि । जीवाण सरीरे जुव्वणे य जुवईजणे तह य ॥७२॥
मोहवसाउ अपुव्वो पडिबंधो कोइ जम्मि वट्टंता । सव्वंपि सरीराइं सासयबुद्धीए मन्नंति ॥७३॥
तो तदुवयारकरणेकलालसा सालसा सया धम्मे । पेरिज्जंतावि हु गुरुजणेण विरइंति अवहेरिं ॥७४॥
आलस्समोहवन्नाइकारणा गुरुयणस्स विसएवि । अन्ने न इंति न कयाइ जंति जिणमंदिरेसुंपि ॥७५॥
कारणवसेण केणइ कस्सवि उवरोहओवि जिणभवणे । कइयावि जंति जइ कहवि तहवि भवियव्वयावसओ ॥
रायकहाइसु निरया अन्नेसिंपि हु कुणंति ते विग्घं । जिणपूयणवंदणधम्मसवणपभिईसु दुम्मइणो ॥७७॥
ता ताण सव्वविरई दूरे निव्वाणकारणमवस्सं । देसविरईवि दुलहा सम्मत्तंपि हु न खलु सुलहं ॥७८॥
अहवा सम्मत्तमवंझकारणं उत्तरुत्तरगुणाणं । तं चिय दुलहं, तो भणइ नरवरो किंसरूवमिमं ? ॥७९॥
तो सम्मत्तसरूवे सवित्थरे वन्नियम्मि मुणिवइणा । भणइ निवो आरोवह सम्मत्तं मज्झ जाजीवं ॥८०॥
तो जंपइ मुणिनाहो सहलं न हवेइ भद्द ! एयंपि । रहियं जीवदयाए विसिट्ठफलसाहणाभावा ॥८१॥
यतः;—
पढउ बहुं कुणउ तवं सहउ दुहं वसउ वणनिगुंजेसु । जस्स न जीवेसु दया सव्वं चिय निष्फलं तस्स ॥
धरउ सिरे जडभारं करउ हुयासस्स तप्पणं हविसा । लुंचउ वा चिहुरचयं चएउ पाणेवि तित्थम्मि ॥

इच्छामि वन्दितुं ततो राज्ञाऽऽज्ञापित प्रणम्य । मुनिवरमुपविष्टः स सुलसोऽपि समागतस्तत्र ॥७०॥
ततो मन्दरमथ्यमानजलधिशब्दानुकारिशब्देन । ससुरासुरपर्षदि मुनिरपि सद्देशनां करोति ॥७१॥
अविरलपवनप्रचलितृकुवलयदललग्नजललवचले । जीवानां शरीरे यौवने च युवतिजने तथा च ॥७२॥
मोहवशादपूर्वः प्रतिबन्धः कोऽपि यस्मिन् वर्तमानाः । सर्वमपि शरीरादि शाश्वतबुध्या मन्यन्ते ॥७३॥
ततस्तदुपचारकरणैकलालसाः सालस्याः सदा धर्मे । प्रेर्यमाणा अपि खलु गुरुजनेन विरचयन्त्यवहेलाम् ॥७४॥
आलस्यमोहरक्तादिकारणाद् गुरुजनस्य विषयेऽपि । अन्ये न यान्ति न कदाचिद्यान्ति जिनमन्दिरेष्वपि ॥७५॥
कारणवशेन केनचित्कस्याप्युपरोधतोऽपि जिनभवने । कदापि यान्ति यदि कथमपि तथापि भवितव्यतावशतः ॥
रागकथादिषु निरता अन्येषामपि खलु कुर्वन्ति ते विघ्नम् । जिनपूजनवन्दनधर्मश्रवणप्रभृतिषु दुर्मतयः ॥७७॥
तस्मात् तेषां सर्वविरतिर्दूरे निर्वाणकारणमवश्यम् । देशविरतिरपि दुर्लभा सम्यक्त्वमपि च न खलु सुलभम् ॥
अथवा सम्यक्त्वमवन्ध्यकारणमुत्तरोत्तरगुणानाम् । तदेव दुर्लभं, ततो भणति नरवरः किंस्वरूपमिदम् ? ॥७९॥
ततः सम्यक्त्वस्वरूपे सविस्तरे वर्णिते मुनिपतिना । भणति नृप आरोपयत सम्यक्त्वं मयि यावज्जीवम् ॥८०॥
ततो जल्पति मुनिनाथः सफलं न भवति भद्र ! एतदपि । रहितं जीवदयया विशिष्टफलसाधनाभावात् ॥८१॥
पठतु बहु करोतु तपः सहतां दुःखं वसतु वननिकुञ्जेषु । यस्य न जीवेषु दया सर्वमेव निष्फलं तस्य ॥८२॥
धरतु शिरसि जटाभारं करोतु हुताशस्य तर्पणं हविषा । लुञ्चतु वा चिहुरचयं त्यजतु प्राणानपि तीर्थे ॥८३॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हवउ व वक्कलधारी निरहारी बंभचेरवयधारी । जइ जीवहणणकारी निरत्थयं तस्स ता सव्वं ॥८४॥
एयं धम्मरहस्सं एयं तत्तं तिलोयसारमिणं । जं जीवाण अहिंसा वहाइअइयारपरिमुक्का ॥८५॥
इइ देसणं सुणेउं राया सुलसेण सह वयं पढमं । गिण्हइ सम्मत्तजुयं असमत्थो सव्वविरईए ॥८६॥
चोरोवि सव्वविरइं पडिवज्जइ तह बहू जणो अन्नो । जिणभवणबिंबपूयं तत्थ य विगहाए परिहारं॥८७॥
कोवि अणुव्वयमेगं अन्ने सव्वाइं कोवि पव्वज्जं । पडिवज्जइ अह सव्वे नमिउं वच्चंति ठाणेसु ॥८८॥
रणरंगमल्लराया पडहयदाणेण नियवदेसम्मि । घोसावए अमारिं कारागाराइं सोहेइ ॥८९॥
रहजत्ताउ पवत्तइ सव्वत्थ पभावए तहा तित्थं । साहम्मियवच्छल्लं करेइ सारं सुगिहिधम्मे ॥९०॥
जो कोवि उभयसंझं पडिकमइ पढेइ गुणइ सुणई य । जिणसिद्धंतरहस्सं तह जिणभवणेसु निच्चंपि ॥९१॥
ण्हवणच्चणआरत्तियलेक्खयमाई करेइ जो विहिणा । सव्वस्सवि सकुडुंबस्स तस्स रणरंगमल्लनिवो॥९२॥
भोअणवत्थासणवाहणाइं संपाडए असेसंपि । धम्मव्वयस्स हेउं दव्वं दावावए पउरं ॥९३॥
पायं सावयलोओ न करइ न कारवेइ वणिज्जाइं । गुरुदेवाणं सेवं करेइ निच्चंपि निच्चिंतो ॥९४॥
जे भूरिविहवजुत्ता तेसिंपि सयावि कुणइ सम्माणं । पंचपरमिट्ठिमित्तेण सावया जेवि तेसिंपि ॥९५॥
हट्टघराणं न करो कयाणगं जं च एक्कगड्डीए । आणिंति निंति तस्स य सुंकं मुक्कं नरिंदेण ॥९६॥
अह सो मित्तो सुलसो चुक्को अंतेउरीए नरवइणो । सव्वस्सं वित्तूणं मुक्को तहवि हु नरिंदेण ॥९७॥
धिक्कारिज्जइ य जणेण तस्स दट्ठुं मुहंपि, सयलजणो । अन्नत्तो अवलोयइ सोवि हु वित्तीए विच्छेए ॥

भवतु वा वल्कलधारी निराहारी ब्रह्मचर्यव्रतधारी । यदि जीवहननकारी निरर्थकं तस्य तदा सर्वम् ॥८४॥
एतद् धर्मरहस्यमेतत् तत्त्वं त्रिलोकीसारमिदम् । यज्जीवानामहिंसा वधाद्यतिचारपरिमुक्ता ॥८५॥
इति देशनां श्रुत्वा राजा सुलसेन सह व्रतं प्रथमम् । गृह्णाति सम्यक्त्वयुतमसमर्थः सर्वविरतौ ॥८६॥
चौरोऽपि सर्वविरतिं प्रतिपद्यते तथा बहुर्जनोऽन्यः । जिनभवनबिम्बपूजां तत्र च विकथायाः परिहारम् ॥८७॥
कोऽप्यणुव्रतमेकमन्ये सर्वाणि कोऽपि प्रव्रज्याम् । प्रतिपद्यतेऽथ सर्वे नत्वा व्रजन्ति स्थानेषु ॥८८॥
रणरङ्गमल्लराजः पटहकदानेन निजदेशे । घोषयत्यमारिं कारागाराणि शोधयति ॥८९॥
रथयात्राः प्रवर्तयति सर्वत्र प्रभावयति तथा तीर्थम् । साधर्मिकवात्सल्यं करोति सारं सुगृहिधर्मे ॥९०॥
यः कोऽप्युभयसन्ध्यं प्रतिक्रामति पठति गुणयति शृणोति च । जिनसिद्धान्तरहस्यं तथा जिनभवनेषु नित्यमपि ॥
स्नपनार्चनारात्रिकलेख्यकादीन् करोति यो विधिना । सर्वस्यापि सकुटुम्बस्य तस्य रणरङ्गमल्लनृपः ॥९२॥
भोजनवस्त्रासनवाहनादि संपादयत्यशेषमपि । धर्मव्रतस्य हेतोर्द्रव्यं दापयति प्रचुरम् ॥९३॥
प्रायः श्रावकलोको न करोति न कारयति वाणिज्यादि । गुरुदेवयोः सेवां करोति नित्यमपि निश्चिन्तः ॥९४॥
ये भूरिविभवयुक्तास्तेषामपि सदापि करोति सम्मानम् । पञ्चपरमेष्ठिमात्रेण श्रावका येऽपि तेषामपि ॥९५॥
हट्टगृहाणां न करः क्रयाणकं यच्चैकशकट्या । आनयन्ति नयन्ति तस्य च शुल्कं मुक्तं नरेन्द्रेण ॥९६॥
अथ स मित्रं सुलसो भ्रष्टोऽन्तःपुरे नरपतेः । सर्वस्वं गृहीत्वा मुक्तस्तथापि खलु नरेन्द्रेण ॥९७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एक्केणं सगडेणं करेइ वाणिज्जयंपि सयमेव । तस्सवि न होइ सुंकं तो से आरोवए पउरं ॥९९॥
तत्थ कयाणगमेवं भारक्कंताणं सगडवसहाणं । जाणइ स नेयनिट्टं अइयारस्सवि न बीहेइ ॥१००॥
सत्त पहाणा गोणा अहन्नया तेण थलसमारुहणे । हक्किज्जंता चडिउं लग्गा तुट्टा तओ यचिरं ॥१०१॥
अणुभविऊण मया ते किणिउं अन्ने तहेव वाहेइ । तेसुवि मएसु अन्ने, एवं से वच्चए कालो ॥१०२॥
सुंकद्दविणस्स छुट्टइ बहुयस्स तहावि इमो न गोणाणं । मुल्लस्स कुणइ गन्नं नय अत्थि दयाए परिणामो॥
तो एवं गोणाणं बहुणा कालेण सो वरायाणं । बहुयाणं जणिऊणं घोरं पीडं विवत्तिं च ॥१०४॥
तत्तो अपडिक्कंतो रुद्दज्झाणट्ठिओ मरेऊण । तच्चाए पुढवीए परमाऊ नारओ जाओ ॥१०५॥
उव्वट्टिऊण तत्तो घोरं सहिउं चिरं भवे दुक्खं । पुव्वोवलद्धसम्मत्तभावओ जिणमयं लद्धुं ॥१०६॥
सुकुलम्मि कुंडनयरे खत्तियवंसम्मि जणपसिद्धम्मि । सम्मं च पालिऊणं मोक्खम्मि कमेण संपत्तो॥१०७॥
एवं अइभारारोवणेण वयमइयरंति जे पढमं । इय दुक्खभायणं ते हवंति तो जयह तच्चाए ॥१०८॥
रणरंगमल्लरायावि निक्कलंकं अणुव्वयं पढमं । पालेउं नियरज्जे ठविऊणं सुंदरकुमारं ॥१०९॥
रयणमयं जिणपडिमं सुइभूओ पूइऊण भत्तीए । वंदंतो परिचत्तो आउसमत्तीए पाणेहिं ॥११०॥
सहसारे इंदत्तं पत्तो तत्तो चुओ य इह भरहे । रहवीरपुरे पुत्तो होऊणं धम्मरायस्स ॥१११॥
पढमवए पव्वइओ अणवज्जं पालिऊण पव्वज्जं । विहुणियकम्मकलंको पत्तो ठाणं निराबाहं ॥११२॥

॥ इति प्राणातिपातप्रथमाणुव्रते चतुर्थातीचारेऽतिभारारोपणोदाहरणे सुलसश्रेष्ठिकथानकं समाप्तम् ॥

धिक्कार्यते च जनेन तस्य दृष्ट्वा मुखमपि, सकलजनः । अन्यतोऽवलोकते सोऽपि खलु वृत्तेर्विच्छेदे ॥९८॥
एकेन शकटेन करोति वाणिज्यकमपि स्वयमेव । तस्यापि न भवति शुल्कं ततस्तस्मिन्नारोपयति प्रचुरम् ॥९९॥
तत्र क्रयाणकमेवं भाराक्रान्तानां शकटवृषभानाम् । जानाति स नैवानिष्टमतिचारादपि न बिभेति ॥१००॥
सप्त प्रधानानि गावोऽथान्यदा तेन स्थलसमारोहणे । प्रेर्यमाणाश्चटितुं लग्नास्त्रुटितास्ततश्चाचिरम् ॥१०१॥
अनुभूय मृतास्ते क्रीत्वाऽन्यांस्तथैव वाहयति । तेष्वपि मृतेष्वन्यान्, एवं तस्य व्रजति कालः ॥१०२॥
शुल्कद्रविणस्य च्छुट्यते बहोस्तथाप्ययं न गवाम् । मूल्यस्य करोति गणनां न चास्ति दयायाः परिणामः ॥
तत एवं गवां बहुना कालेन स वराकाणाम् । बहूनां जनयित्वा घोरां पीडां विपत्तिं च ॥१०४॥
ततोऽप्रतिक्रान्तो रौद्रध्यानस्थितो मृत्वा । तृतीयस्यां पृथिव्यां परमायुर्नारको जातः ॥१०५॥
उद्वृत्य ततो घोरं सहित्वा चिरं भवे दुःखम् । पूर्वोपलब्धसम्यक्त्वभावतो जिनमतं लब्ध्वा ॥१०६॥
सुकुले कुण्डनगरे क्षत्रियवंशे जनप्रसिद्धे । सम्यक् च पालयित्वा मोक्षं क्रमेण संप्राप्तः ॥१०७॥
एवमतिभारारोपणेन व्रतमतिचरन्ति ये प्रथमम् । इति दुःखभाजनं ते भवन्ति ततो यतध्वं तत्त्यागे ॥१०८॥
रणरङ्गमल्लराजोऽपि निष्कलङ्कमणुव्रतं प्रथमम् । पालयित्वा निजराज्ये स्थापयित्वा सुन्दरकुमारम् ॥१०९॥
रत्नमयीं जिनप्रतिमां शुचिभूतो पूजयित्वा भक्त्या । वन्दमानः परित्यक्त आयुःसमाप्तौ प्राणैः ॥११०॥
सहस्रार इन्द्रत्वं प्राप्तस्ततश्च्युतश्चेह भरते । रथवीरपुरे पुत्रो भूत्वा धर्मराजस्य ॥१११॥
प्रथमवयसि प्रव्रजितोऽनवद्यां पालयित्वा प्रव्रज्याम् । विधुनितकर्मकलङ्कः प्राप्तः स्थानं निराबाधम् ॥११२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्थाणत्थसमुत्थं वुच्छेयं भत्तपाणगाईणं। कुव्वंतो जीवाणं सीहोव्व भमेइ भवगहणे ॥१॥
तथाहि;--
जलधिजलमेहलाए विलसिरसुरसरिपवाहहाराए। महिमहिलाए मुहं पिव कुसुमपुरं अत्थि वरनयरं ॥२॥
तत्थ नरिंदो पडिवक्खकामिणीवयणकमलहिमपसरो। नामेण हेमचंदो चंदो इव सुयणकुमुयाण ॥३॥
रूवविणिज्जियरंभा विहियारंभा सयावि सुकएसु। तस्सत्थि पिया रंभा रंभाथंभोरू गयदंभा ॥४॥
ताणत्थि सत्थसत्थोहपारगो धारगो गुणगणाण। तणओ बुहजणपणओ नामेणं भुवणमल्लोत्ति ॥५॥
सहपंसुकीलिओ कीलिउव्व हियएण सह कुमारस्स। सिरिसेहरमंतिसुओ सीहो नामेण से मित्तं ॥६॥
अह जुव्वणम्मि पत्तो कुमरो कइयावि रायपासम्मि। जा चिट्ठइ उवविट्ठो ता पडिहारो तहिं पत्तो ॥७॥
विन्नवइ देव! बाहिं पुरिसो एगो पहुस्स पयकमलं। दट्ठुं इच्छइ नय सो अप्पाणं कहइ कोवि अहं ॥८॥
भणइ नरिंदो मुंचसु मुक्को पत्तो नरिंददिट्ठिपहं। तो हसिउं भणइ निवो गोवसि किं करह! अप्पाणं? ॥९॥
तो सो दंडपणामं काउं पडिभणइ करहओ तुज्झ। अवयारणयं किज्जउ सामिय! सहिययसिरोमणिणो ॥
ओ पाणिग्गहणमहूसवम्मि सुगहीयनामधेयाए। महपहुगुरुभइणीए तइया रंभाए देवीए ॥११॥
सिरिसिरिसेणस्स नराहिवस्स दिट्ठो कुमारभावम्मि। धारयमाणो पाउआओ ओलक्खिओ एवं ॥१२॥
नामंपि न वीसरियं राया तो भणइ पाउया मज्झ। ठवियाओ कणयसयं वित्तूणं अप्पिया एवं ॥१३॥
उवयारी कह वीसरासि मज्झ इय भणिवि दाहिणो हत्थो। पायलग्गस्स दिन्नो पिट्ठीए, पुच्छिओ तह य ॥१४॥

अर्थानर्थसमुत्थं व्युच्छेदं भक्तपानकादीनाम्। कुर्वञ्जीवानां सिंह इव भ्रमति भवगहने ॥१॥
जलधिजलमेखलाया विलसितृसुरसरित्प्रवाहहारायाः। महीमहिलाया मुखमिव कुसुमपुरमस्ति वरनगरम् ॥२॥
तत्र नरेन्द्रः प्रतिपक्षकामिनीवदनकमलहिमप्रसरः। नाम्ना हेमचन्द्रश्चन्द्र इव सुजनकुमुदानाम् ॥३॥
रूपविनिर्जितरम्भा विहितारम्भा सदापि सुकृतेषु। तस्यास्ति प्रिया रम्भा रम्भास्तम्भोरूर्गतदम्भा ॥४॥
तयोरस्ति शास्त्रशस्त्रौघपारगो धारको गुणगणानाम्। तनयो बुधजनप्रणतो नाम्ना भुवनमल्ल इति ॥५॥
सहपांशुक्रीडितः कीलित इव हृदयेन सह कुमारस्य। श्रीशेखरमन्त्रिसुतः सिंहो नाम्ना तस्य मित्रम् ॥६॥
अथ यौवनं प्राप्तः कुमारः कदापि राजपार्श्वे। यावत् तिष्ठत्युपविष्टस्तावत्प्रतिहारस्तत्र प्राप्तः ॥७॥
विज्ञपयति देव! बहिः पुरुष एकः प्रभोः पादकमलम्। द्रष्टुमिच्छति न च स आत्मानं कथयति कोऽप्यहम् ॥८॥
भणति नरेन्द्रो मुञ्च मुक्तः प्राप्तो नरेन्द्रदृष्टिपथम्। ततो हसित्वा भणति नृपो गोपयसि किं करभ! आत्मानम्? ॥
ततः स दण्डप्रणामं कृत्वा प्रतिभणति करभतस्तव। अवतारणकं क्रियतां स्वामिन्! सहृदयशिरोमणेः ॥१०॥
आः पाणिग्रहणमहोत्सवे सुगृहीतनामधेयायाः। मत्प्रभुगुरुभगिन्यास्तदा रम्भाया देव्याः ॥११॥
श्रीषेणस्य नराधिपस्य दृष्टः कुमारभावे। धारयमाणः पादुका उपलक्षित एवम् ॥१२॥
नामापि न विस्मृतं राजा ततो भणति पादुके मम। स्थापिते कनकशतं गृहीत्वाऽर्पिते एवम् ॥१३॥
उपकारी कथं विस्मर्यसे ममेति भणित्वा दक्षिणो हस्तः। पादलग्नस्य दत्तः पृष्ठे, पृष्टस्तथा च ॥१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुसलं सिरिसेणनराहिवस्स सो भणइ कामिए तित्थे। पेमामयसंपन्ने तुम्ह वसंतस्स हिययम्मि ॥१५॥
कुसलं चिय पहुणो कारणं तु मह पेसणे इमं तत्थ। नामेण रयणमाला अत्थि सुया तस्स किं बहुणा?॥
रमणीयं रमणीयं विहिणो रमणीयणं घडंतस्स। आसंसारं मन्ने विन्नाणप्पगरिसो बाला ॥१७॥
सावि हु कयप्पइन्ना राहावेहं करेइ जो कोइ। सो चिय मह होइ वरो राया वा रायकुमरो वा ॥१८॥
राया पुण बहु मन्नइ तीइ वरं भुवणमल्लकुमरवरं। तहवि न कुमरीवयणं पडिकूलइ इय विचिंतंतो॥१९॥
कित्तियमित्तं राहावेहो कुमरस्स भुवणमल्लस्स। तो कुमरदंसणूसुयमणेण सिरिसेणनरवइणा ॥२०॥
पहु! तुह पायमूलम्मि पेसिओ निव्विलंबमह कुमरो। नियदंसणामएणं दिट्ठिं निव्ववउ सामिस्स॥२१॥
तो अवलोयइ राया गणयमुहं सो य भणइ कुमरस्स। अज्जं चिय संझाए जत्ता सव्वत्थसिद्धिकरा॥२२॥
तो राया परिचिंतइ कल्लाणपरंपरा कुमारस्स। एसा, जं आसन्नं लद्धं लग्गं समग्गगुणं ॥२३॥
यत उक्तम्;—

"लघूत्थानान्यविघ्नानि संभवात् साधनानि च। कथयन्ति गुरुं सिद्धिं कारणान्येव कर्मणाम् ॥"

अह सेणावइसामंतपमुहमाणवइ परियणं सारं। कुमरेण समं गमणे संवाहत्थं तु चंपाए ॥२४॥
इत्थंतरम्मि वारुणिआसापासायमाविसइ सूरो। कुमरेण समं गमणे संवाहत्थं तु चंपाए ॥२५॥
विप्फुरियकिरणरुइरो नक्खत्तगणो विहाइ गयणम्मि। कुमरसहचलियरयणीपरिहियलंकारभारुव्व ॥२६॥
अह कयमंगलकिच्चो कुलदेवयजणणिजणयपभिईणि। पुज्जाइं नमंसेउं जणयाओ पाविउं सिक्खं ॥२७॥
मणपवणसउणपरियणअणुकूलत्तेण लग्गसमयम्मि। चउरंगबलसमेओ कुमरो संचलइ नयराओ ॥२८॥

कुशलं श्रीषेणनराधिपस्य स भणति कामिते तीर्थे। प्रेमामृतसंपन्ने तव वसतो हृदये ॥१५॥
कुशलमेव प्रभोः कारणं तु मम प्रेषणे इदं तत्र। नाम्ना रत्नमालाऽस्ति सुता तस्य किं बहुना? ॥१६॥
रमणीयं रमणीयं विधे रमणीजनं घटयतः। आसंसारं मन्ये विज्ञानप्रकर्षो बाला ॥१७॥
सापि खलु कृतप्रतिज्ञा राधावेधं करोति यः कोऽपि। स एव मम भवति वरो राजा वा राजकुमारो वा॥१८॥
राजा पुनर्बहु मन्यते तस्या वरं भुवनमल्लकुमारवरम्। तथापि न कुमारीवचनं प्रतिकूलयतीति विचिन्तयन् ॥
कियन्मात्रं राधावेधः कुमारस्य भुवनमल्लस्य। ततः कुमारदर्शनोत्सुकमनसा श्रीषेणनरपतिना ॥२०॥
प्रभो! तव पादमूले प्रेषितो निर्विलम्बमथ कुमारः। निजदर्शनामृतेन दृष्टिं निर्वापयतु स्वामिनः ॥२१॥
ततोऽवलोकते राजा गणकमुखं स च भणति कुमारस्य। अद्यैव संध्यायां यात्रा सर्वार्थसिद्धिकरा ॥२२॥
ततो राजा परिचिन्तयति कल्याणपरम्परा कुमारस्य। एषा, यदासन्नं लब्धं लग्नं समग्रगुणम् ॥२३॥
अथ सेनापतिसामन्तप्रमुखमाज्ञपयति परिजनं सारम्। कुमारेण समं गमने संवाहार्थं तु चम्पायाम् ॥२४॥
अत्रान्तरे वारुण्याशाप्रासादमाविशति सूरः। कुमारेण समं गमने संवाहार्थं तु चम्पायाम् ॥२५॥
विस्फुरितकिरणरुचिरो नक्षत्रगणो विभाति गगने। कुमारसहचलितरजनिपरिहितालङ्कारभार इव ॥२६॥
अथ कृतमङ्गलकृत्यः कुलदेवताजननीजनकप्रभृतीनि। पूज्यानि नमस्यित्वा जनकात् प्राप्य शिक्षाम् ॥२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुरयखुरखणियधूलीमिसेण खोणी नहम्मि संलग्गा । कुमरगुणेसुवरत्ता पत्ता सिन्नस्स छत्तत्तं ॥२९॥
बहुगामागरनगनगरखेडकब्बडसमाउलं वसुहं । मग्गनराहिवबहुविहियसागओ लंघिउं कुमरो ॥३०॥
सिद्धत्थपुरासन्ने संपत्तो जाव ताव तप्पहुणा । पेसियवरपुरिसेहिं विन्नत्तो तुम्ह आवासो ॥३१॥
खीरसरस्सासन्ने तत्थागमणेण किज्जउ पसाओ । तो कयउच्चियालावो आवासइ तत्थ गंतूण ॥३२॥
जेण चिय तत्थ कज्जं सिद्धत्थपुराहिवेण तं सव्वं । अन्नंपि कुमरसिविरस्स अप्पियं, अह कुमारोवि ॥३३॥
रमणीयउववणाई सव्वत्तो विम्हएण जा नियइ । सिद्धत्थपुरदिसाओ ता पिच्छइ छन्नगयणाइं ॥३४॥
डिंडीरपिंडपरिपंडुराइं इंताइं पुंडरीयाइं । हयवट्टाइं च तहा करिणो करेणुयाई य ॥३५॥
तो सिद्धत्थपुराहिवपुरिसे पुच्छइ किमेयमेयंति ? । ते विन्नविंति सम्मं न मुणेमो किंतु सयमेव ॥३६॥
सिरिमूलदेवदेवो आगच्छइ इत्थ नत्थि संदेहो । जं कुमरागमवत्तायन्नणसमया मुहुत्तंपि ॥३७॥
मन्नइ देवो संवच्छरंव इय जाव ते पयंपंति । ता विलसिरपडिहारो पडिहारो विन्नवइ एवं ॥३८॥
सिद्धत्थपुरनरिंदो उत्तिन्नो करिवराउ चरणेहिं । इंतो इत्तो दीसइ आयन्नेऊण इय कुमरो ॥३९॥
सिंहासणं विमोत्तुं संमुहमह एइ जाव किर गंतुं । तो परिमियपरिवारो पत्तो सो झत्ति तत्थेव ॥४०॥
तो दट्ठूण कुमारं रूवेणं मुत्तिमंतमिव मयणं । मुच्छानिमीलियच्छो सहसत्ति महीयले पडिओ ॥४१॥
तो हाहारवमुहले अत्थाणजणे ससंभमं कुमरो । चंदणरससेयाईउवयारं करेइ कारइ य ॥४२॥

मनःपवनशकुनपरिजनानुकूलत्वेन लग्नसमये । चतुरङ्गबलसमेतः कुमारः संचलति नगरात् ॥२८॥
तुरगखुरखानितधूलीमिषेण क्षोणी नभसि संलग्ना । कुमारगुणेषूपरक्ता प्राप्ता सैन्यस्य च्छत्रत्वम् ॥२९॥
बहुग्रामाकरनगनगरखेटकर्बटसमाकुलां वसुधाम् । मार्गनराधिपबहुविहितस्वागतो लङ्घयित्वा कुमारः ॥३०॥
सिद्धार्थपुरासन्ने संप्राप्तो यावत् तावत् तत्प्रभुणा । प्रेषितवरपुरुषैर्विज्ञप्तो युष्माकमावासः ॥३१॥
क्षीरसरस आसन्ने तत्रागमनेन क्रियतां प्रसादः । ततः कृतोचितालाप आवसति तत्र गत्वा ॥३२॥
येनैव तत्र कार्यं सिद्धार्थपुराधिपेन तत् सर्वम् । अन्यदपि कुमारशिबिरस्यार्पितम्, अथ कुमारोऽपि ॥३३॥
रमणीयोपवनादीन् सर्वतो विस्मयेन यावत् पश्यति । सिद्धार्थपुरदिशस्तावत् पश्यति च्छन्नगगनानि ॥३४॥
डिण्डीरपिण्डपरिपाण्डुरान्यायन्ति पुण्डरीकाणि । हयवट्टानि च तथा करिणः करेण्वादींश्च ॥३५॥
ततः सिद्धार्थपुराधिपपुरुषान् पृच्छति किमेतदेतदिति । ते विज्ञपयन्ति सम्यग् न जानीमः किन्तु स्वयमेव ॥
श्रीमूलदेवदेव आगच्छत्यत्र नास्ति संदेहः । यत् कुमारागमवार्ताकर्णनसमयाद् मुहूर्तमपि ॥३७॥
मन्यते देवः संवत्सरमिवेति यावत् ते प्रजल्पन्ति । तावद् विलसितृप्रतिहारः प्रतिहारो विज्ञपयत्येवम् ॥३८॥
सिद्धार्थपुरनरेन्द्र उत्तीर्णः करिवराच्चरणाभ्याम् । आयन्नितो दृश्यत आकर्ण्येति कुमारः ॥३९॥
सिंहासनं विमुच्य संमुखमथैति यावत्किल गत्वा । ततः परिमितपरिवारः प्राप्तः स झटिति तत्रैव ॥४०॥
ततो दृष्ट्वा कुमारं रूपेण मूर्तिमन्तमिव मदनम् । मूर्च्छानिमीलिताक्षः सहसेति महीतले पतितः ॥४१॥

---

१ क. तहस्सा° । २ ग. आग° । ३ ग. °उ मह प° ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अह लद्धचेयणं तं खणेण भद्दासणे निवेसेउं । परिपुच्छेइ कुमारो किं बाहइ तुम्ह अंगम्मि ? ॥४३॥
अह उम्मीलियनयणो अवलोइय किंपि चलिरदिट्ठीए । कंडुअइ वामकन्नं नाहिपएसं परिमुसेइ ॥४४॥
लज्जं नाडइ नय देइ उत्तरं पुच्छिओवि कुमरेण । वामपयंगुट्ठेणं ओणयवयणो लिहइ धरणिं ॥४५॥
इय तस्स चिट्ठियं पासिऊण चिंतइ सविम्हयं कुमरो । समयणरमणिवियारा किं कारणमित्थ दीसंति ? ॥
एवं च वियक्कंतो सुणइ झुणी सजलघणसमुद्दामं । तो भणइ अमयवुट्ठीकल्लाणं कस्स वयणमिणं ? ॥४७॥
तो कहइ मंतिपुत्तो एस झुणी अभयसूरिअइसइणो ।.तो तेण निवेण समं कुमरो पत्तो तहिं तुरियं ॥४८॥
कंचणगिरिंव उन्नइसमन्नियं सयललोयमज्झत्थं । थिरयासंजुयमतुलं जच्चसुवन्नच्छविच्छायं ॥४९॥
वरपवहणंव भवजलहिपडियजंतूण तारणसमत्थं । हारंव सुगुणकलियं पणमंति कुमारनरवइणो ॥५०॥
मुणिनाहचरणकमलं मंती सीहोवि कुमरपाणपिओ । सामंताई य तहा उवविट्ठा उचियठाणेसु ॥५१॥
तो ताण हियट्ठाए धम्मं वागरइ अभयसूरीवि । जीवो अणाइनिहणो अणाइकयकम्मसंबंधो ॥५२॥
रागस्स व दोसस्स व वसगो पावाइं कुणइ विविहाइं । घाएइ पाणिनिवहं अलियं जंपेइ खुद्दमणो ॥५३॥
अवहरइ परस्स धणं लुद्धो संतेवि वरकलत्तम्मि । विलसइ परनारीहिं इहपरलोयाण निरविक्खो ॥५४॥
बहुजीवविघायकरे आरंभे कुणइ कारवेइ तहा । अणुमन्नइ अन्नकए तन्निउणजणं पसंसंतो ॥५५॥
मिच्छाभिमाणनडिओ करेइ एवं अणेगहा पावं । तस्सोदयम्मि अवसो विनडिज्जइ घोरनरएसु ॥५६॥

ततो हाहारवमुखर आस्थानजने ससंभ्रमं कुमारः । चन्दनरससेकाद्युपचारं करोति कारयति च ॥४२॥
अथ लब्धचेतनं तं क्षणेन भद्रासने निवेश्य । परिपृच्छति कुमारः किं बाधते युष्माकमङ्गे ? ॥४३॥
अथोन्मीलितनयनोऽवलोक्य किमपि चलितदृष्ट्या । कण्डूयति वामकर्णं नाभिप्रदेशं परिमुष्णाति ॥४४॥
लज्जां नटयति न च ददात्युत्तरं पृष्टोऽपि कुमारेण । वामपादाङ्गुष्ठेनावनतवदनो लिखति धरणिम् ॥४५॥
इति तस्य चेष्टितं दृष्ट्वा चिन्तयति सविस्मयं कुमारः । समदनरमणीविकाराः किं कारणमत्र दृश्यन्ते ? ॥४६॥
एवं च वितर्कयन् शृणोति ध्वनिं सजलघनसमुद्दामम् । ततो भणत्यमृतवृष्टिकल्याणं कस्य वचनमिदम् ? ॥४७॥
ततः कथयति मन्त्रिपुत्र एष ध्वनिरभयसूर्यतिशयिनः । ततस्तेन नृपेण समं कुमारः प्राप्तस्तत्र त्वरितम् ॥४८॥
काञ्चनगिरिमिवोन्नतिसमन्वितं सकललोकमध्यस्थम् । स्थिरतासंयुतमतुलं जात्यसुवर्णच्छविच्छायम् ॥४९॥
वरप्रवहणमिव भवजलधिपतितजन्तूनां तारणसमर्थम् । हारमिव सुगुणकलितं प्रणमतः कुमारनृपती ॥५०॥
मुनिनाथचरणकमलं मन्त्री सिंहोऽपि कुमारप्राणप्रियः । सामन्तादयश्च तथोपविष्टा उचितस्थानेषु ॥५१॥
ततस्तेषां हितार्थं धर्मं व्याकरोत्यभयसूरिरपि । जीवोऽनादिनिधनोऽनादिकृतकर्मसंबन्धः ॥५२॥
रागस्य वा द्वेषस्य वा वशगः पापानि करोति विविधानि । घातयति प्राणिनिवहमलीकं जल्पति क्षुद्रमनाः ॥
अपहरति परस्य धनं लुब्धः सत्यपि वरकलत्रे । विलसति परनारीभिरिहपरलोकयोर्निरपेक्षः ॥५४॥
बहुजीवविघातकरानाऽऽरम्भान् करोति कारयति तथा । अनुमन्यतेऽन्यकृतांस्तन्निपुणजनं प्रशंसन् ॥५५॥
मिथ्याभिमाननटितः करोत्येवमनेकधा पापम् । तस्योदयेऽवशो विनट्यते घोरनरकेषु ॥५६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

रागदोसवसट्टो तत्थवि संचिणिय पावमइघोरं । तिरिएसु सहइ दुक्खं पुणोवि नरएसु तिरिएसु ॥५७॥
एवं दुहरिंछोलिं विसहंतो दीणमाणसो अवसो । जुगसमिलानाएणं लहेइ कहकहवि मणुयत्तं ॥५८॥
तत्थवि पावइ जीवो पुव्वज्जियदुकयपरिणइवसेण । वहबंधणमरणाइं धणावहाराइवसणाइं ॥५९॥
दारिद्दरोगदोहग्गसोगबहुआवईहिं परिकलिओ । चिंतासंतावेणं दुकुलत्तेणं परिभूओ ॥६०॥
तो चिंतेइ नियमणे अन्नभवे किं मए कयं पावं । जेणेसो हं विहिओ विहिणा दुक्खाण गुरुखाणी?॥६१॥
तत्तो धम्ममईए काउमहम्मं पुणोवि कुगईसु । विनडिज्जइणेगविहं पावइ कोवि हु कुदेवत्तं ॥६२॥
तत्थ वि वंतरभावेवि किंकराणंपि किंकरो कोइ । होइ नडिज्जइ तत्थवि तेसिं आणाए अणवरयं ॥६३॥
दासावि माणुसत्ते सामीहिंतो लहंति भत्ताई । तो ते तेसिं आणं बहु मन्नंतावि हु कुणंति ॥६४॥
अभिओगियदेवा पुण लहंति न हु किंपि सामिपासाओ । आणाइक्कमणे उण ते ताडिज्जंति तेहिं तहा ॥
जह वेयणाभिभूया नारयवासाओ नारयव्व तओ । बहु मन्नंति भवंतरगमणं, अन्ने पुणो केइ ॥६६॥
अज्झवसायविसेसा इड्ढिसेसंपि किंपि संपत्ता । दट्ठुं महिड्ढिइड्ढिं ईसाकवलियमणा तह य ॥६७॥
रागदोसवसट्टा न लहंति रइं मइं च जिणधम्मे । रुद्दज्झाणोवगया चुया य पावंति तो कुगइं ॥६८॥
तो रागदोसाणं असेसदुक्खोहखाणिभूयाणं । उज्जमह निग्गहम्मी सो पुण जिणधम्मसेवाए ॥६९॥
धम्मोवि य दुविगप्पो जइधम्मो तह गिहत्थधम्मो य । जइधम्मो दसभेओ सावगधम्मो दुवालसहा॥७०॥

रागद्वेषवशार्तस्तत्रापि संचित्य पापमतिघोरम् । तिर्यक्षु सहते दुःखं पुनरपि नरकेषु तिर्यक्षु ॥५७॥
एवं दुःखपङ्क्तिं विषहमाणो दीनमानसोऽवशः । युगशम्यान्यायेन लभते कथंकथमपि मनुजत्वम् ॥५८॥
तत्रापि प्राप्नोति जीवः पूर्वोपार्जितदुष्कृतपरिणतिवशेन । वधबन्धनमरणानि धनापहारादिव्यसनानि ॥५९॥
दारिद्र्यरोगदौर्भाग्यशोकबह्वापद्भिः परिकलितः । चिन्तासंतापेन दुष्कुलत्वेन परिभूतः ॥६०॥
ततश्चिन्तयति निजमनस्यन्यभवे किं मया कृतं पापम् । येनैषोऽहं विहितो विधिना दुःखानां गुरुखानिः ? ॥
ततो धर्ममत्या कृत्वाऽधर्मं पुनरपि कुमतिषु । विनट्यतेऽनेकविधं प्राप्नोति कोऽपि खलु कुदेवत्वम् ॥६२॥
तत्र च व्यन्तरभावेऽपि किंकराणामपि किंकरः कोऽपि । भवति नट्यते तत्रापि तेषामाज्ञयाऽनवरतम् ॥६३॥
दासा अपि मनुष्यत्वे स्वामिभ्यो लभन्ते भक्तादीन् । ततस्ते तेषामाज्ञां बहु मन्यमाना अपि खलु कुर्वन्ति।६४
आभियोगिकदेवाः पुनर्लभन्ते न खलु किमपि स्वामिपार्श्वात् । आज्ञातिक्रमणे पुनस्ते ताड्यन्ते तैस्तथा ॥६५॥
यथा वेदनाभिभूता नारकवासाद् नारका इव ततः । बहु मन्यन्ते भवान्तरगमनम, अन्ये पुनः केचित् ॥६६॥
अध्यवसायविशेषादृद्धिविशेषमपि कमपि संप्राप्ताः । दृष्ट्वा महर्द्धिकऋद्धिमीर्ष्याकवलितमनसस्तथा च ॥६७॥
रागद्वेषवशार्ता न लभन्ते रतिं मतिं च जिनधर्मे । रौद्रध्यानोपगताश्च्युताश्च प्राप्नुवन्ति ततः कुगतिम् ॥६८॥
ततो रागद्वेषयोरशेषदुःखौघखानिभूतयोः । उद्यच्छत निग्रहे स पुनर्जिनधर्मसेवया ॥६९॥
धर्मोऽपि च द्विविकल्पो यतिधर्मस्तथा गृहस्थधर्मश्च । यतिधर्मो दशभेदः श्रावकधर्मो द्वादशधा ॥७०॥

---

१ ग. °सविस° । २ क. ग. दुकल । ३ क. वि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

असमत्थो जइधम्मे ता सम्मं कुणउ देसविरइंपि । तत्थवि असमत्थो तंपि देसओ कुणउ, तेणावि ॥७१॥
पत्तसुदेवत्तसुमाणुसत्तसम्मत्तसुद्धजइधम्मो । अब्भासवसाओ निहयरागदोसो अहक्खायं ॥७२॥
लद्धूण चरित्तं घाइकम्ममुम्मूलिऊण संपत्तो । केवलनाणं तत्तो पावइ ठाणं निराबाहं ॥७३॥
इय निसुणिऊण कुमरो सूरिं विन्नवइ मज्झ गिहिधम्मे । पढमवयं कहसु तहा तद्दोसे, सूरिणावि तओ ॥
वहबंधाइविसुद्धं कहियं वित्थारिऊण पढमवयं । पडिवन्नं कुमरेणं सचिवसुएणंपि सीहेण ॥७५॥
सम्मत्तेण समेयं समयविहाणेण परमसद्धाए । तो पुट्ठो कुमरेणं सूरी तन्नयरनिवचरियं ॥७६॥
कह एसो मं दट्ठुं मुच्छाए निवडिओ, कहं कुणइ । रमणीमयणवियारे पुरिसोवि, तो कहइ सूरी ॥७७॥
सिंहपुरे आसि तुमं पुव्वभवे नरवरो रयणसारो । भज्जा य मयणरेहा दढनेहा आसि तुज्झ पिया ॥
एमेव कहवि तीए तुमं विरत्तो, इमा तह च्चेव । तइ अणुरत्तावि दढं दट्ठुं अवमाणमइदुसहं ॥७९॥
उब्बंधेऊण मया सिद्धत्थपुरम्मि सुंदरनिवस्स । अज्झवसायविसेसा जाया धूयाऽणवच्चस्स ॥८०॥
मूले नक्खत्तम्मी नरनाहो तीइ जम्मसमयम्मि । भवियव्वयावसाओ सहसा पंचत्तमणुपत्तो ॥८१॥
एईए पुत्तत्तं सुमइअमच्चेण पायडंतेण । अहिसित्ता रज्जम्मी इत्थित्तं गोवियं च दढं ॥८२॥
मरिऊण रयणसारो उप्पन्नो तं समागओ एत्थ । पुव्वभवब्भासाओ तइ दिट्ठे पसरिए मोहे ॥८३॥
किं मह पीई एवं इमम्मि इय विमरिसप्पयरिसम्मि । जाए जाईसरणे तं जायं जं तए पुट्ठं ॥८४॥

असमर्थो यतिधर्मे तदा सम्यक् करोतु देशविरतिमपि । तत्राप्यसमर्थस्तामपि देशतः करोतु, तेनापि ॥७१॥
प्राप्तसुदेवत्वसुमनुष्यत्वसम्यक्त्वशुद्धयतिधर्मः । अभ्यासवशाद् निहतरागद्वेषो यथाख्यातम् ॥७२॥
लब्ध्वा चारित्रं घातिकर्मोन्मूल्य संप्राप्तः । केवलज्ञानं ततः प्राप्नोति स्थानं निराबाधम् ॥७३॥
इति श्रुत्वा कुमारः सूरिं विज्ञपयति मम गृहिधर्मे । प्रथमव्रतं कथय तथा तद्दोषान्, सूरिणापि ततः ॥७४॥
वधबन्धादिविशुद्धं कथितं विस्तार्य प्रथमव्रतम् । प्रतिपन्नं कुमारेण सचिवसुतेनापि सिंहेन ॥७५॥
सम्यक्त्वेन समेतं समयविधानेन परमश्रद्धया । ततः पृष्टः कुमारेण सूरिस्तन्नगरनृपचरितम् ॥७६॥
कथमेष मां दृष्ट्वा मूर्च्छया निपतितः, कथं करोति । रमणीमदनविकारान् पुरुषोऽपि, ततः कथयति सूरिः ॥
सिंहपुरे आसीस्त्वं पूर्वभवे नरवरो रत्नसारः । भार्या च मदनरेखा दृढस्नेहाऽऽसीत् तव प्रिया ॥७८॥
एवमेव कथमपि तस्यां त्वं विरक्तः, इयं तथैव । त्वय्यनुरक्तापि दृढं दृष्ट्वाऽपमानमतिदुःसहम् ॥७९॥
उद्बध्य मृता सिद्धार्थपुरे सुन्दरनृपस्य । अध्यवसायविशेषाज्जाता दुहिताऽनपत्यस्य ॥८०॥
मूले नक्षत्रे नरनाथस्तस्या जन्मसमये । भवितव्यतावशात् सहसा पञ्चत्वमनुप्राप्तः ॥८१॥
एतस्याः पुत्रत्वं सुमत्यमत्येन प्रकटयता । अभिषिक्ता राज्ये स्त्रीत्वं गोपितं च दृढम् ॥८२॥
मृत्वा रत्नसार उत्पन्नस्त्वं समागतोऽत्र । पूर्वभवाभ्यासात् त्वयि दृष्टे प्रसृते मोहे ॥८३॥
किं मम प्रीतिरेवमस्मिन्निति विमर्षप्रकर्षे । जाते जातिस्मरणे तज्जातं यत् त्वया पृष्टम् ॥८४॥

---

१ ग. गेहिधम्मंपि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो मुणिवइवयणाओ संजाए चरणमोहविरमम्मि । सा नियरज्जं कुमरे ठविऊणं लेइ पव्वज्जं ॥८५॥
सिद्धत्थपुरे गंतुं सचिवे सुमइम्मि ठविय रज्जभरं । कुमरो चलिओ पुरओ पंथे पत्तो य अडवीए ॥
जा भारहियकहा इव भीमज्जुणनउलसउणिसोहिल्ला । खित्तपुहइव्व भद्दयकरि-सयउवसोहिया रम्मा ॥
तित्थेसरवसही इव नाणाविहसावएहिं परिकलिया । सरसविसालसरोवरसिरीव घणपुंडरीइल्ला ॥८८॥
एवंविहाडवीए कुमरो गंतूण नियबलसमेओ । दसजोयणाण अंते आवासइ वरुणनइतीरे ॥८९॥
कइवयपुरिससमेओ पत्तो कोऊहलेण वणगहणं । अवलोयंतो पिच्छइ विज्जाहररइयजिणभवणं ॥९०॥
अइनिम्मलफलिहसिलाविणिम्मियं ससहरस्सव विमाणं । राहुस्स संभमाओ ओइन्नं वसुमईवीढे ॥९१॥
तत्थ य संकंताइं तडसंठियतरुवराण कुसुमाइं । परिचुंबंति य भमरा पीडियवयणा लहु वलंति ॥९२॥
तम्मि जिणेसरभवणे सविम्हयं जाव पविसइ कुमारो । कयउब्भडसिंगारं ता[1] पिच्छइ देविनिउरंबं ॥९३॥
काओवि तहिं पुंजयपुंछणछउमेण नियपावरयं । अवणिंतीओ इव सारविंति जिणमंदिरंगणयं ॥९४॥
अन्नाओ जिणधम्मे रायममायंतयंव हिययम्मि । कुंकुमच्छडयमिसेणं ठवंति जिणभवणपंगणए ॥९५॥
एक्का य तत्थ बाला अच्चंतसुयंधकुसुममालाहिं । नाणाविच्छित्तीहिं पूअइ गब्भहरजिणबिंबं ॥९६॥
एवंविहसुरविलयाउलम्मि भवणम्मि संठियं दिट्ठं । सोम्मं कंचणवन्नं बिंबं सिरिरिसहसामिस्स ॥९७॥
तं दट्ठूणं गुरुभत्तिपवरसमुप्पन्नबहलरोमंचो । मउलियकरकमलजुओ थुणिऊण जिणेसमुवविसइ ॥९८॥

ततो मुनिपतिवचनात् संजाते चरणमोहविरामे । सा निजराज्यं कुमारे स्थापयित्वा लाति प्रव्रज्याम् ॥८५॥
सिद्धार्थपुरे गत्वा सचिवे सुमतौ स्थापयित्वा राज्यभरम् । कुमारश्चलितः पुरतः पथि प्राप्तश्चाटव्याम् ॥८६॥
या भारतीयकथेव भीमार्जुननकुलशकुनिशोभावती । क्षेत्रपृथिवीव भद्रककरिशत(कर्षक)उपशोभिता रम्या ॥
तीर्थेश्वरवसतिरिव नानाविधश्वापदैः (श्रावकैः) परिकलिता । सरसविशालसरोवरश्रीरिव घनपुण्डरीका ॥८८॥
एवंविधाटव्यां कुमारो गत्वा निजबलसमेतः । दशयोजनानामन्ते आवासयति वरुणानदीतीरे ॥८९॥
कतिपयपुरुषसमेतः प्राप्तः कुतूहलेन वनगहनम् । अवलोकमानः पश्यति विद्याधररचितजिनभवनम् ॥९०॥
अतिनिर्मलस्फटिकशिलाविनिर्मितं शशधरस्येव विमानम् । राहोः संभ्रमादवतीर्णं वसुमतीपीठे ॥९१॥
तत्र च संक्रान्तानि तटसंस्थिततरुवराणां कुसुमानि । परिचुम्बन्ति च भ्रमराः पीडितवदना लघु वलन्ते॥९२॥
तस्मिञ्जिनेश्वरभवने सविस्मयं यावत्प्रविशति कुमारः । कृतोद्भटशृङ्गारं तावत्पश्यति देवीनिकुरम्बम् ॥९३॥
का अपि तत्र रजःप्रोञ्छनच्छद्मना निजपापरजः । अपनयन्त्य इव समारचयन्ति जिनमन्दिराङ्गणकम् ॥९४॥
अन्या जिनधर्मे रागममान्तामिव हृदये । कुङ्कुमच्छटामिषेण स्थापयन्ति जिनभवनप्राङ्गणके ॥९५॥
एका च तत्र बालाऽत्यन्तसुगन्धकुसुममालाभिः । नानाविच्छित्तिभिः पूजयति गर्भगृहजिनबिम्बम् ॥९६॥
एवंविधसुरवनिताकुले भवने संस्थितं दृष्टम् । सौम्यं काञ्चनवर्णं बिम्बं श्रीऋषभस्वामिनः ॥९७॥
तद् दृष्ट्वा गुरुभक्तिप्रवरसमुत्पन्नबहलरोमाञ्चः । मुकुलितकरकमलयुतः स्तुत्वा जिनेशमुपविशति ॥९८॥

---

१ ग. पिच्छइ ता ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताओ असुरवहूओ पइदिणकिच्चाइं तत्थ काऊण। पिच्छणयं आरत्तियमंगलदीवाइयं सव्वं ॥९९॥
नियनियठाणेसु गया कुमरोवि समुट्ठिऊण जिणभवणं। जा जोयइ सव्वत्तो ता पच्छिमदारबाहिम्मि ॥
पीणपयोहरसुहया नवकुवलयनयणपीवरसिरीया। वरहंसगया वावी दिट्ठा कुमरेण रमणिव्व ॥१०१॥
तं पिच्छिऊण कुमरो सीयलमहुरेण निम्मलजलेण। गुरुवयणेणव सोहइ अप्पाणं मग्गरयमलिणं ॥१०२॥
जलपाणं काऊणं उवविट्ठो जाव तीइ तडिदेसे। ता वानरीए सहिओ पवंगमो आगओ एगो ॥१०३॥
अहिणवहलिद्दवन्नो गुंजाहलहारभूसियसरीरो। सल्लइसाहाहत्थो तारासहिओव्व सुग्गीवो ॥१०४॥
कुमरसिरपवरमणिणो तत्तो कुमरस्स भुवणमल्लस्स। काऊणं पणिवायं पयंपए मणुयवाणीए ॥१०५॥
असरणसरण्ण दयगुणपवन्न अइ असमविहियदक्खिन्न। परउवयाररसन्नय सुणेहि मह कुमर! विन्नत्तिं ॥
इह अडवीए मज्झे कुमार! निवसामि सव्वकालंपि। एसा य वानरी पहु! मणइट्ठा भारिया मज्झ॥१०७॥
एसा मज्झ सरीरं एसावि धणं च जीवियं एसा। एयाए विरहिओ खलु खणंपि न खमो अहं ठाउं ॥
किंपुण इह अडवीए सयावि मह वानरेसु सामित्तं। तं पुण वणंतरे मह गयस्स कज्जंतरवसेण ॥१०९॥
दुट्ठेण वानरेणं अहिट्ठियं, तं च निग्गहेउमहं। जइवि समत्थो तहवि हु एसा अइकायरत्तेण ॥११०॥
मइ नेहनिब्भरा देइ जुज्झिउं नेय कहवि पिक्खंती। एगागिणिं च एयं मोत्तुं सक्केमि नेय अहं ॥१११॥
लोयणमहूसवकरो संपइ पुन्नोदयप्पगरिसेण। दिट्ठो तुमं महायस! मुत्तो धम्मोव्व पच्चक्खं ॥११२॥
तो तुह भुयछायाए निवसउ निरुवद्दवा इमा ताव। जा तस्स दुन्नयफलं अहमुवदंसेमि गंतूण॥११३॥

ता असुरवध्वः प्रतिदिनकृत्यानि तत्र कृत्वा। प्रेक्षणकमारात्रिकमङ्गलदीपादिकं सर्वम् ॥९९॥
निजनिजस्थानेषु गताः कुमारोऽपि समुत्थाय जिनभवनम्। यावत् पश्यति सर्वतस्तावत् पश्चिमद्वारबहिः ॥
पीनपयोभ(ध)रसुभगा नवकुवलयनयनपीवरश्रीका। वरहंसगता वापी दृष्टा कुमारेण रमणीव ॥१०१॥
तां दृष्ट्वा कुमारः शीतलमधुरेण निर्मलजलेन। गुरुवचनेनेव शोधयत्यात्मानं मार्गरजोमलिनम् ॥१०२॥
जलपानं कृत्वोपविष्टो यावत् तस्यास्तटीदेशे। तावद् वानर्या सहितः प्लवंगम आगत एकः ॥१०३॥
अभिनवहरिद्रावर्णो गुञ्जाफलहारभूषितशरीरः। सल्लकीशाखाहस्तस्तारासहित इव सुग्रीवः ॥१०४॥
कुमारशिरःप्रवरमणेस्ततः कुमारस्य भुवनमल्लस्य। कृत्वा प्रणिपातं प्रजल्पति मनुजवाण्या ॥१०५॥
अशरणशरण्य! दयागुणप्रपन्न! अयि! असमविहितदाक्षिण्य! परोपकाररसज्ञ! शृणु मम कुमार! विज्ञप्तिम् ॥
इहाटव्या मध्ये कुमार! निवसामि सर्वकालमपि। एषा च वानरी प्रभो! मनइष्टा भार्या मम ॥१०७॥
एषा मम शरीरमेषैव धनं च जीवितमेषा। एतया विरहितः खलु क्षणमपि न क्षमोऽहं स्थातुम् ॥१०८॥
किन्त्विहाटव्यां सदापि मम वानरेषु स्वामित्वम्। तत् पुनर्वनान्तरे मम गतस्य कार्यान्तरवशेन ॥१०९॥
दुष्टेन वानरेणाधिष्ठितं, तं च निग्रहीतुमहम्। यद्यपि समर्थस्तथापि खल्वेषाऽतिकातरत्वेन ॥११०॥
मयि स्नेहनिर्भरा ददाति योद्धुं नैव कथमपि प्रेक्षमाणा। एकाकिनीं चैतां मोक्तुं शक्नोमि नैवाहम् ॥१११॥
लोचनमहोत्सवकरः संप्रति पुण्योदयप्रकर्षेण। दृष्टस्त्वं महायशः! मूर्तो धर्म इव प्रत्यक्षम् ॥११२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय भणिऊण पवंगो विणिग्गओ तत्थ पिययमं मोत्तुं । तो कुमरो परिचिंतइ दीसइ अच्चब्भुयं एयं ११४
साहामिगोवि एसो माणुसभासाए जं पयंपेइ । मइपुव्विया य वित्ती कहवा पसुणोवि य इमस्स ? ।।११५।।
अह खणमेगं गमिउं भणिओ कुमरो पवंगमपियाए । अइबलिओ सो सत्तू मारिस्सइ मज्झ मणदइयं ११६
तो तस्स मरणवत्ता मह एइ न सवणगोयरं जाव । ता जीवियं चइस्सं इय भणिउं पडइ वावीए।।११७।।
तो कुमरो परिचिंतइ हा ! महसरणागयाए एईए । न हु मरणमुवक्खेउं जुत्तं इय तीइ पट्ठीए ।।११८।।
परियणअपरिन्नायाभिप्पाओ तरणसत्तिसंजुत्तो । तीए कड्ढणहेउं झंपं जा देइ कुमरोवि ।।११९।।
ताव न सा वानरिया नय वावी नेय पाणियं तत्थ । कोमलतूलिसणाहे अप्पाणं नियइ पल्लंके।।१२०।।
कुमरस्स भिच्चवग्गो अइदुहिओ तक्खणेण तट्ठाणं । किंकायव्वविमूढो संपत्तो नियसिबिरम्मि ।।१२१।।
साहइ सचिवाईणं, तेवि हु करितुरयरहवराईयं । पगुणंति बलमसेसं कारिंति य संतिकम्माइं ।।१२२।।
कुमरोवि तत्थ भवणं पिच्छइ वरफलिहभित्तिमणिजालं । जालगवक्खंतरनीहरंतवरधूवधूमसिहं ।।१२३।।
धूमसिहामयलीकिज्जमाणअइविउलविमलगयणयलं । गयणयलगरुयसंलग्गधयवडाडोयकमणीयं ।।१२४।।
कमणीयचलिरसुरवहुसंघउक्खुडियकडयमणिनियरं । मणिनियरजडियलंबंतदामकिरणोहदिप्पंतं ।।१२५।।
दिप्पंतकणयथंभोहघडियवरसालहंजियारम्मं । रम्ममहिवीढविरइयसुयंधसियपुप्फपयरोहं ।।१२६।।
पुप्फपयरोहमयरंदलुद्धगुंजंतभमिरभमरउलं । भमिरभमरउलअइमहुरसद्दबहिरियदिसाभोयं ।।१२७।।

ततस्तव भुजच्छायायां निवसतु निरुपद्रवेयं तावत् । यावत्तस्य दुर्नयफलमहमुपदर्शयामि गत्वा ।।११३।।
इति भणित्वा प्लवंगो विनिर्गतस्तत्र प्रियतमां मुक्त्वा । ततः कुमारः परिचिन्तयति दृश्यतेऽत्यद्भुतमेतत् ।।
शाखामृगोऽप्येष मनुष्यभाषया यत्प्रजल्पति । मतिपूर्विका च वृत्तिः कथं वा पशोरपि चास्य ? ।।११५।।
अथ क्षणमेकं गमयित्वा भणितः कुमारः प्लवंगमप्रियया । अतिबलितः स शत्रुर्मारयिष्यति मम मनोदयितम् ।।
ततस्तस्य मरणवार्ता ममैति न श्रवणगोचरं यावत् । तावज्जीवितं त्यक्ष्यामीति भणित्वा पतति वाप्याम् ।।
ततः कुमारः परिचिन्तयति हा ! मच्छरणागताया एतस्याः । न खलु मरणमुपेक्षितुं युक्तमिति तस्याः पृष्ठे ।।११८।।
परिजनापरिज्ञाताभिप्रायस्तरणशक्तिसंयुक्तः । तस्याः कर्षणहेतोर्झम्पां यावद्ददाति कुमारोऽपि ।।११९।।
तावन्न सा वानरी न च वापी नैव पानीयं तत्र । कोमलतूलीसनाथ आत्मानं पश्यति पल्यङ्के ।।१२०।।
कुमारस्य भृत्यवर्गोऽतिदुःखितस्तत्क्षणेन तत्स्थानम् । किंकर्तव्यविमूढः संप्राप्तो निजशिबिरे ।।१२१।।
कथयति सचिवादीनां, तेऽपि खलु करितुरगरथवरादिकम् । प्रगुणयन्ति बलमशेषं कारयन्ति च शान्तिकर्माणि ।।
कुमारोऽपि तत्र भवनं पश्यति वरस्फटिकभित्तिमणिजालम् । जालगवाक्षान्तरनिःसरद्वरधूपधूमशिखम् ।।१२३।।
धूमशिखामलिनीक्रियमाणातिविपुलविमलगगनतलम् । गगनतलगुरुसंलग्नध्वजपटाटोपकमनीयम् ।।१२४।।
कमनीयचलितृसुरवधूसंघत्रुडितकटकमणिनिकरम् । मणिनिकरजटितलम्बमानदामकिरणौघदीप्यमानम् ।।१२५।।
दीप्यमानकनकस्तम्भौघघटितवरशालभञ्जिकारम्यम् । रम्यमहीपीठविरचितसुगन्धसितपुष्पप्रकरौघम् ।।१२६।।
पुष्पप्रकरौघमकरन्दलुब्धगुञ्जद्भ्रमितृभ्रमरकुलम् । भ्रमितृभ्रमरकुलातिमधुरशब्दबधिरितदिगाभोगम् ।।१२७।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इय एरिसम्मि भवणे दिट्ठो कुमरेण कुंडलाहरणो। एगो देवो पुरओ आहरणपहाहिं चिंचइओ ॥१२८॥
सो देवो भणइ तओ मा अन्नं किंपि इह वियप्पेसु। कारणवसेण भो कुमर! आणीओ इह मए तं सि ॥१२९॥
तो तं पइ सो जंपइ को देसो एस को पहू एत्थ। को सि तुमं किमहं पुण इहाणिओ कहह मज्झ इमं? ॥
इय निसुणिऊण देवो पडिजंपइ कुमर! जं तए भणियं। तं निसुणह सविसेसं साहिप्पंतं इमं इण्हिं ॥१३१॥
एयं कीलाभवणं विउव्विउं नियपणइणीसहिओ। कीलामि अहं निच्चं अमियगई नाम असुरो हं ॥
एयस्स सामिसालो, अहन्नया रेवयम्मि संचलिओ। चारणमुणिकेवलिणो नमंसणत्थं विभूईए ॥१३३॥
नियदेवीए समेओ जाहे वच्चामि थेवभूभागं। ता पिच्छामि मसाणे उवविट्ठं जोगिअं एगं ॥१३४॥
रत्तंदणकयतिलयं परिहियमिगचम्मचेडयरउद्दं। सुविचित्तियमत्थयटोपिआइ पच्छाइयसिरग्गं ॥१३५॥
कसिणसरीसवतणुचम्मविहिअवरजोगपट्टिआबंधं। मिल्लंतं हुंकारं अइगरुअं दारुणं तत्थ ॥१३६॥
तस्स य पुरओ दिट्ठो सुट्ठु हुओ हुयवहो महाजालो। वामे पासम्मि पुणो चिट्ठइ वरबालिया एगा ॥१३७॥
अह तं पिच्छित्तु मए देवी भणिया पिए! पडिक्खेउं। खणमेक्कं पिक्खामो किं ववसइ एस पासंडी ॥१३८॥
एवं च कए कन्नं तं रुयमाणिं स पावपासंडी। संठावइ मंडलए चच्चइ रत्तंदणेण तओ ॥१३९॥
रत्तकणवीरमालं अवलंबिय तीए कंठदेसम्मि। किर अग्गीए खिविस्सइ तो सो मे तज्जिओ एवं ॥१४०॥
रे रे पाविट्ठ! तुमं एरिसमसमंजसं जणविरुद्धं। मम पुरओ काऊणं वच्चसि किर कत्थ तं मूढ! ॥१४१॥

इतीदृशे भवने दृष्टः कुमारेण कुण्डलाभरणः। एको देवः पुरत आभरणप्रभाभिर्मण्डितः ॥१२८॥
स देवो भणति ततो माऽन्यत्किमपीह विकल्पस्व। कारणवशेन भोः कुमार! आनीत इह मया त्वमसि ॥
ततस्तं प्रति स जल्पति को देश एष कः प्रभुरत्र। कोऽसि त्वं किमहं पुनरिहानीतः कथय ममेदम् ?॥१३०॥
इति श्रुत्वा देवः प्रतिजल्पति कुमार! यत्त्वया भणितम्। तच्छृणु सविशेषं कथ्यमानमिदमिदानीम् ॥१३१॥
एतत् क्रीडाभवनं विकृत्य निजप्रणयिनीसहितः। क्रीडाम्यहं नित्यममितगतिर्नामासुरोऽहम् ॥१३२॥
एतस्य स्वामिसारः, अथान्यदा रैवते संचलितः। चारणमुनिकेवलिनो नमस्यनार्थं विभूत्या ॥१३३॥
निजदेव्या समेतो यदा व्रजामि स्तोकं भूभागम्। तदा पश्यामि श्मशान उपविष्टं योगिनमेकम् ॥१३४॥
रक्तचन्दनकृततिलकं परिहितमृगचर्मचेटकरौद्रम्। सुविचित्रितमस्तकोष्णीषेन प्रच्छादितशिरोऽग्रम् ॥१३५॥
कृष्णसर्षपतनुचर्मविहितवरयोगपट्टिकाबन्धम्। मुञ्चन्तं हुङ्कारमतिगुरुं दारुणं तत्र ॥१३६॥
तस्य च पुरतो दृष्टः सुष्ठु हुतो हुतवहो महाज्वालः। वामे पार्श्वे पुनास्तिष्ठति वरबालिकैका ॥१३७॥
अथ तं दृष्ट्वा मया देवी भणिता प्रिये! प्रतीक्ष्य। क्षणमेकं प्रेक्षावहे किं व्यवस्यत्येष पाखण्डी ॥१३८॥
एवं च कृते कन्यां तां रुदतीं स पापपाखण्डी। संस्थापयाति मण्डलके चर्चति रक्तचन्दनेन ततः ॥१३९॥
रक्तकणवीरमालामवलम्ब्य तस्याः कण्ठदेशे। किलाग्नौ क्षेप्स्यति ततः स मया तर्जित एवम् ॥१४०॥
रे रे पापिष्ठ! त्वमीदृशमसमञ्जसं जनविरुद्धम्। मम पुरतः कृत्वा व्रजसि किल क्व त्वं मूढ़! ॥१४१॥

---

१ ग. बालं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निल्लज्ज ! किं न लज्जसि एयाणं निययपंचभूयाणं । इहपरलोयविरुद्धं जेणाकज्जं समायरसि ?॥१४२॥
इय मम वयणं सोउं तं बालं चयइ सो पलायंतो । करुणाए परिमुक्को, देवीए समप्पिया कन्ना ॥१४३॥
संपुन्नलक्खणं तं धारिंतिं रूवसंपयं दिव्वं । उच्छंगे काऊणं जंपइ देवी, अहं जाया ॥१४४॥
देवीवि हु सप्पसवा, भणियं च मए न एत्थ संदेहो । लावन्नामयसिंधू कहं इमा माणुसी होइ ? ॥१४५॥
इय जंपंतो पत्तो केवलिपासम्मि, तं च नमिऊण । उवविट्ठो हिययगयं संदेहं जाणिउं सोवि ॥१४६॥
हरिआऊरियवरपंचयन्नघोसोवमेण सद्देण । एयाए बालियाए चरियं कहिउं समाढत्तो ॥१४७॥
तथाहि;—

भरहे इहेव कयमंगलाए नयरीए आसि धणसिट्ठी । तस्सवि य बालविहवा तणया जयसुंदरी नाम॥
तीसे य बंधुणो पंच ते आणाए तीए वट्टंति । जिट्ठस्स पुणो घरणी न वट्टइ तीइ सह सम्मं ॥१४९॥
तं परिणावइ अन्नं कन्नं तह पुव्वभारियाइ कयं । जं वा तं वा दूसइ दुव्वयणेहि य दहइ देहं ॥१५०॥
अक्कोसइ भाउज्जाइयावि एवं च ताउ वट्टंति । वट्टंतीउ ज्झाणे समगं विज्जूए दड्ढाओ ॥१५१॥
वग्घित्तं पत्ताओ परोप्परं दिट्ठिगोयरगयाओ । पुव्ववेराणुबंधा जुज्झिय तइयं गया पुढविं ॥१५२॥
उव्वट्टिऊण तत्तो परिणामविसेसओ गयउरम्मि । भाउज्जाया जाया भज्जा सूरस्स नरवइणो ॥१५३॥
गब्भे तीए नणंदा धूयत्ताए इमा समावन्ना । उव्वट्टिय नरयाओ परिणामविसेसओ तह य ॥१५४॥
पुव्वभवब्भासाओ अप्पीइं कुणइ सावि गब्भम्मि । तह तप्पाडणहेउं सया उवाए कुणइणेगे ॥१५५॥

निर्लज्ज ! किं न लज्जसे एतेषां नियतपञ्चभूतानाम् । इहपरलोकविरुद्धं येनाकार्यं समाचरसि ? ॥१४२॥
इति मम वचनं श्रुत्वा तां बालां त्यजति स पलायमानः । करुणया परिमुक्तः, देव्यै समर्पिता कन्या॥१४३॥
संपूर्णलक्षणां तां धारयन्तीं रूपसंपदं दिव्याम् । उत्सङ्गे कृत्वा जल्पति देवी, अहं जाता ॥१४४॥
देव्यपि खलु सप्रसवा, भणितं च मया नात्र संदेहः । लावण्यामृतसिन्धुः कथमियं मानुषी भवेत् ? ॥१४५॥
इति जल्पन् प्राप्तः केवलिपार्श्वे, तं च नत्वा । उपविष्टो हृदयगतं संदेहं ज्ञात्वा सोऽपि ॥१४६॥
हर्यापूरितवरपाञ्चजन्यघोषोपमेन शब्देन । एतस्या बालिकायाश्चरितं कथयितुं समारब्धः ॥१४७॥

भरत इहैव कृतमङ्गलायां नगर्यामासीद् धनश्रेष्ठी । तस्यापि च बालविधवा तनया जयसुन्दरी नाम॥१४८॥
तस्याश्च बन्धवः पञ्च त आज्ञायां तस्या वर्तन्ते । ज्येष्ठस्य पुनर्गृहिणी न वर्तते तया सह सम्यक् ॥१४९॥
तं परिणाययत्यन्यां कन्यां तथा पूर्वभार्यया कृतम् । यद्वा तद्वा दूषयति दुर्वचनैश्च दहति देहम् ॥१५०॥
आक्रोशति भ्रातृजायाप्येवं च ते वर्तेते । वर्तमाने च ध्याने समकं विद्युता दग्धे ॥१५१॥
व्याघ्रीत्वं प्राप्ते परस्परं दृष्टिगोचरगते । पूर्ववैरानुबन्धाद् युद्ध्वा तृतीयां गते पृथिवीम् ॥१५२॥
उद्वृत्य ततः परिणामविशेषतो गजपुरे । भ्रातृजाया जाता भार्या शूरस्य नरपतेः ॥१५३॥
गर्भे तस्या ननान्दा दुहितृतयेयं समापन्ना । उद्वृत्य नरकात् परिणामविशेषतस्तथा च ॥१५४॥
पूर्वभवाभ्यासादप्रीतिं करोति सापि गर्भे । तथा तत्पाटनहेतोः सदोपायान् करोत्यनेकान् ॥१५५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पडिओ तहवि न गब्भो निरुवक्कमआउभावओ तत्तो। समए जाया दिट्ठा तो से सा माणसं दहइ ॥
सूईकम्मकरीए दविणं दाउं मडत्ति पयडेउं। छड्डावेई छन्नं, तीए निययाए धूयाए ॥१५७॥
तद्दिवसपसूयाए समप्पिया वड्ढिया य सा, इत्तो। दिट्ठा डिंभेहिं समं कीलंती जोगिएण तहिं ॥१५८॥
अइरुद्दविज्जसाहणहेउं मग्गंतएण वरकन्नं। तो लोभविउं नीया सहप्पणा पेयभूमीए ॥१५९॥
तेणं च खिप्पमाणी जलणे असुरेण मोइया इमिणा। ता थेवंपि न अप्पा अप्पेयव्वो कसायाणं ॥१६०॥
तेसिं च हुंति दूरे परिहरियपरिग्गहा गयारंभा। जं हेउम्मि समग्गे नूणं न नियत्तए कज्जं ॥१६१॥
जे सव्वहा असक्का परिहरिउं तेवि देसओ चइउं। परितणुयंति कसाए, गुरुकम्मा जे य एयंपि ॥१६२॥
काउं असमत्थच्चिय तेवि हु तच्चायकारएसु दढं। बहुमाणाओ पावंति जोग्गयं, इय मुणिंदम्मि ॥१६३॥
जंपंते कम्मखए जाइं सरिऊण बालिया भणइ। सव्वोवि हु वुत्तंतो जाओ मह नाह! पच्चक्खो॥१६४॥
ता इत्तो तुह पाया मह सरणं चत्तसव्वसंगाहं। जह होमि तह पसायं करेसु मह परमकारुणिय!॥१६५॥
तो जंपइ मुणिनाहो निरुवक्कममत्थि तुज्झ भोगफलं। अज्जवि कम्मं, गिहिधम्ममेव पडिवज्ज ता इन्हिं ॥
सा जंपइ सव्वन्नू जाणइ जुत्तं परं इमो मज्झ। कह सम्मं निव्वहिही अविरयअसुराण मज्झम्मि? ॥१६७॥
भणइ मुणी कालिंजरअडवीए रिसहनाहजिणभवणे। पिक्खिहिसि भुवणमल्लं रायसुयं, तस्स आयत्ता ॥
होउं सावयधम्मं सम्मं पालिय कमेण पव्वज्जं। पडिवज्जिय तेण समं लहिहिसि ठाणं निराबाहं॥१६९॥
सोऊण वइयरमिमं परिसाए तत्थ केवि पव्वज्जं। अन्ने सावयधम्मं सम्मत्तं सम्ममन्ने उ ॥१७०॥

पतितस्तथापि न गर्भो निरुपक्रमायुर्भावतस्ततः। समये जाता दृष्टा ततस्तस्याः सा मानसं दहति॥१५६॥
सूतिकर्मकर्यै द्रविणं दत्त्वा मृतेति प्रकटय्य। मोचयति च्छन्नं, तया निजायै दुहित्रे ॥१५७॥
तद्दिवसप्रसूतायै समर्पिता वर्धिता च सा, इतः। दृष्टा डिम्भैः समं क्रीडन्ती योगिना तत्र ॥१५८॥
अतिरुद्रविद्यासाधनहेतोर्मार्गयता वरकन्याम्। ततो लोभयित्वा नीता सहात्मना प्रेतभूमौ ॥१५९॥
तेन च क्षिप्यमाणा ज्वलनेऽसुरेण मोचिताऽनेन। तस्मात् स्तोकमपि नात्माऽर्पयितव्यः कषायेभ्यः ॥१६०॥
तेभ्यश्च भवन्ति दूरे परिहृतपरिग्रहा गतारम्भाः। यद्धेतौ समग्रे नूनं न निवर्तते कार्यम् ॥१६१॥
ये सर्वथाऽशक्ताः परिहर्तुं तेऽपि देशतस्त्यक्त्वा। परितनूयन्ति कषायान्, गुरुकर्माणो ये चैतदपि ॥१६२॥
कर्तुमसमर्था एव तेऽपि खलु तत्त्यागकारकेषु दृढम्। बहुमानात् प्राप्नुवन्ति योग्यताम्, इति मुनीन्द्रे॥१६३॥
जल्पति कर्मक्षये जातिं स्मृत्वा बालिका भणति। सर्वोऽपि खलु वृत्तान्तो जातो मम नाथ! प्रत्यक्षः॥१६४॥
तस्मादितस्तव पादा मम शरणं त्यक्तसर्वसङ्गाऽहम्। यथा भवामि तथा प्रसादं कुरुष्व मयि परमकारुणिक! ॥
ततो जल्पति मुनिनाथो निरुपक्रममस्ति तव भोगफलम्। अद्यापि कर्म, गृहिधर्ममेव प्रतिपद्यस्व तस्मादिदानीम्॥
सा जल्पति सर्वज्ञो जानाति युक्तं, परमयं मम। कथं सम्यग् निर्वक्ष्यत्यविरतासुराणां मध्ये? ॥१६७॥
भणति मुनिः कालिञ्जराटव्यामृषभनाथजिनभवने। प्रेक्षिष्यसे भुवनमल्लं राजसुतं, तस्यायत्ता ॥१६८॥
भूत्वा श्रावकधर्मं सम्यक् पालयित्वा क्रमेण प्रव्रज्याम्। प्रतिपद्य तेन समं लप्स्यसे स्थानं निराबाधम्॥१६९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पडिवज्जंति नरामरनारीअमरीउ, अहमवि मुणिंदं । नमिऊणं सट्ठाणं पत्तो घेत्तूण तं बालं ॥१७१॥
विजयपडायानामं तीसे विहियं मए, इमा अज्जं । केवलिपरिकहियदिणे जिणिंदभवणे गया जाव॥१७२॥
पूयइ जिणवरबिंबं, विजयपडायाए तत्थ तं दिट्ठो । कहियं च सहीए मह मणस्स सो एस पडिहाइ ॥१७३॥
जो कहिओ केवलिणा, सा जंपइ निच्छओ इमो, किंच । एसो तुहपिउपासे नेउं जुत्तोत्ति जंपेउं॥१७४॥
वावीपमुहपवंचं काउं तुब्भे इहाणिया तीए । ता संपइ जिणवरबिंबदंसणामयनिसेएण ॥१७५॥
पीणिज्जउ नियदिट्ठिं, जिणभवणे नेइ इय भणिऊण । सो देवो, वंदंतिं तं बालं नियइ तत्थ गओ ॥
महुमत्तमहुरकलयंठिकंठअइसरससरविसेसेण । जणयंतिं संवेयं गुरुकम्माणंपि जं नूणं ॥१७७॥
तं च सुणंतो कुमरो हरिणो जह गोयरिं निसुणमाणो । चित्तलिहिउव्व थक्को जा तीइ समत्थियं थोत्तं ॥
अह सो देवे वंदिवि जा विरओ ताव तीइ वंदणयं । मुल्लंव तस्स दिन्नं तत्तो हिययं किणंतीए॥१७९॥
तो अत्थाणसहाए दोन्निवि नीयाइं असुरनाहेणं । भणिओ य कुमारो कन्नयाए एयाए तं वच्छा ! ॥१८०॥
सव्वप्पणावि सरणं, पाणिग्गहणेण कीरउ इमाए । तो निव्विलंबमेवं च पत्थणा मज्झ तइ सहला ॥१८१॥
कुमरो भणइ पमाणं आएसो एत्थ ता मए सद्धिं । पेसिज्जउ मह सिविरे तत्तो जत्थेव लग्गम्मि ॥१८२॥
नियमाउलधूयमहं विवाहइस्सामि तम्मि एयाए ।हिययगहियाए तइया पाणिग्गहणंपि हु करिस्सं ॥१८३॥
इत्थ य खणमवि जुत्तो न विलंबो जेण परियणो मज्झ । मह कुसलमजाणंतो गमिही दुहिओ खणद्धपि ॥

श्रुत्वा व्यतिकरामिमं पर्षदि तत्र केऽपि प्रव्रज्याम् । अन्ये श्रावकधर्मं सम्यक्त्वं सम्यगन्ये तु ॥१७०॥
प्रतिपद्यन्ते नरामरनार्यमर्यः, अहमपि मुनीन्द्रम् । नत्वा स्वस्थानं प्राप्तो गृहीत्वा तां बालाम् ॥१७१॥
विजयपताकानाम तस्या विहितं मया, इयमद्य । केवलिपरिकथितादिने जिनेन्द्रभवने गता यावत् ॥१७२॥
पूजयति जिनवराबिम्बं, विजयपताकया तत्र त्वं दृष्टः । कथितं च सख्यै मम मनसः स एष प्रतिभाति॥१७३॥
यः कथितः केवलिना, सा जल्पति निश्चयोऽयं, किञ्च । एष त्वत्पितृपार्श्वे नेतुं युक्त इति जल्पित्वा ॥१७४॥
वापीप्रमुखप्रपञ्चं कृत्वा यूयमिहानीतास्तया । तस्मात्संप्रति जिनवरबिम्बदर्शनामृतनिषेकेण ॥१७५॥
प्रीणयतु निजदृष्टिं, जिनभवने नयतीति भणित्वा । स देवः, वन्दमानां तां बालां पश्यति तत्र गतः ॥१७६॥
मधुमत्तमधुरकलकण्ठीकण्ठातिसरसस्वरविशेषेण । जनयन्तीं संवेगं गुरुकर्मणामपि यन्नूनम् ॥१७७॥
तां च शृण्वन् कुमारो हरिणो यथा गोचरीं शृण्वन् । चित्रलिखित इव स्थितो यावत्तया समर्थितं स्तोत्रम् ॥
अथ स देवान् वन्दित्वा यावद्विरतस्तावत्तया वन्दनकम् । मूल्यमिव तस्य दत्तं ततो हृदयं क्रीणत्या ॥१७९॥
तत आस्थानसभायां द्वावपि नीतावसुरनाथेन । भणितश्च कुमारः कन्याया एतस्या त्वं वत्स ! ॥१८०॥
सर्वात्मनापि शरणं, पाणिग्रहणेन क्रियतामस्याः । ततो निर्विलम्बमेवं च प्रार्थना मम त्वयि सफला ॥१८१॥
कुमारो भणति प्रमाणमादेशोऽत्र तस्मान्मया सार्धम् । प्रेष्यतां मम शिबिरे ततो यत्रैव लग्ने ॥१८२॥
निजमातुलदुहितरमहं विवाहयिष्यामि तस्मिन्नेतस्याः । हृदयगृहीतायास्तदा पाणिग्रहणमपि खलु करिष्ये॥१८३॥
अत्र च क्षणमपि युक्तो न विलम्बो येन परिजनो मम । मम कुशलमजानन् गमिष्यति दुःखितः क्षणार्धमपि ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तो आभिओगिएहिं निम्माविययवरविमाणमारुहिउं। असुरो सह देवीए सामाणियआयरक्खेहिं ॥१८५॥
पवरेण परियणेण य अन्नेण य संजुओ तहा कुमरिं। कुमरं च दिव्ववत्थाहरणेहिं विहूसियं काउं॥१८६॥
तत्थारोविय तक्खणमेव य पत्तो कुमारसिविरम्मि। अह दसदिसिं विमाणं उज्जोयंतं पलोयंता॥१८७॥
सहसा पहाणपुरिसा भणंति तं नूणमेइ किंपि इमं। जेणं कुमरेण समं अम्ह विओगो कओ आसि॥१८८॥
ता सज्जा होह दढं अवलंबह पोरिसं चयह खोहं। देवा दइवं वा साहसस्स नय किंचिवि असज्झं ॥
जओ।
तावच्चिय दुल्लंघा गिरिणो ता जलहिणो दुरुत्तारा। आरंभंति न धीरा जावच्चिय साहसिक्कधणा॥१९०॥
इय ते साडोवा जाव हुंति निसुणंति ता पढिज्जंतं। असुरस्स अणुन्नाए चरियं कुमरस्स देवेहिं ॥१९१॥
निवहेमचंदकुलकुमुयचंद! सिरिभवणमल्लकुमरवर!। अवितहभिहाण! सत्तप्पहाण! वरनाण! जीव चिरं ॥
परउवयारपरायणपुरिसेसु लहइ तुज्झ को लीहं। पसुमित्तस्सवि कज्जे गणेसि पाणे तिणसमाणे?॥१९३॥
एवं च नियपहुणो कुलगुणउक्कित्तणं सुणंताण। विम्हियमणाण सहसा दिट्ठीए गोयरं पत्तो ॥१९४॥
तम्मि विमाणे कुमरो, तत्तो रोमंचकंचुइज्जंता। भूनिहियभालफलया उत्तिन्नेणं विमाणाओ ॥१९५॥
उट्ठाविय उट्ठाविय बाढं आलिंगिया कुमारेण। तस्साएसा तेहिं पणओ देवो सदेवीओ ॥१९६॥
उवविट्ठा य जहोचियमसुरेणं कुमरगरुयपुरिसाणं। कहिओ सो वुत्तंतो, वरमुत्ताजालरइयम्मि ॥१९७॥
उववेसिओ चउक्के कुमरो भरिया य तस्स देवीए। मुत्ताहलेहिं सेसा, असुरेणं कुमरकरकमले ॥१९८॥

तत आभियोगिकैर्निर्मापितवरविमानमारुह्य। असुरः सह देव्या सामानिकात्मरक्षैः ॥१८५॥
प्रवरेण परिजनेन चान्येन च संयुतस्तथा कुमारीम्। कुमारं च दिव्यवस्त्राभरणैर्विभूषितं कृत्वा ॥१८६॥
तत्रारोप्य तत्क्षणमेव च प्राप्तः कुमारशिबिरे। अथ दशदिशो विमानमुद्द्योतयत् प्रलोकमानाः ॥१८७॥
सहसा प्रधानपुरुषा भणन्ति तन्नूनमेति किमपीदम्। येन कुमारेण सममस्माकं वियोगः कृत आसीत् ॥१८८॥
तस्मात् सज्जा भवत दृढमवलम्बध्वं पौरुषं त्यजत क्षोभम्। देवा दैवं वा साहसस्य नच किञ्चिदप्यसाध्यम् ॥
यतः।
तावद्देव दुर्लङ्घा गिरयस्तावदेव जलधयो दुरुत्ताराः। आरम्भन्ते न धीरा यावदेव साहसैकधनाः ॥१९०॥
इति ते साटोपा यावद् भवन्ति शृण्वन्ति तावत्पठ्यमानम्। असुरस्यानुज्ञया चरितं कुमारस्य देवैः ॥१९१॥
नृपहेमचन्द्रकुलकुमुदचन्द्र! श्रीभुवनमल्लकुमारवर!। अवितथाभिधान! सत्त्वप्रधान! वरज्ञान! जीव चिरम्॥
परोपकारपरायणपुरुषेषु लभते तव को रेखाम्। पशुमात्रस्यापि कार्ये गणयसि प्राणांस्तृणसमानान्?॥१९३॥
एवं च निजप्रभोः कुलगुणोत्कीर्तनं शृण्वताम्। विस्मितमनसां सहसा दृष्टेर्गोचरं प्राप्तः ॥१९४॥
तस्मिन् विमाने कुमारः, ततो रोमाञ्चकञ्चुकायमानाः। भूनिहितभालफलका उत्तीर्णेन विमानात् ॥१९५॥
उत्थाप्योत्थाप्य बाढमालिङ्गिताः कुमारेण। तस्यादेशात् तैः प्रणतो देवः सदेवीकः ॥१९६॥
उपविष्टाश्च यथोचितमसुरेण कुमारगुरुपुरुषेभ्यः। कथितः स वृत्तान्तः, वरमुक्ताजालरचिते ॥१९७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वत्थाभरणाइं समप्पिऊण कुमरस्य परियणो सव्वो । सम्माणिओ जहोचियमंबाधाइं कुमारस्स ॥१९९॥
वत्थालंकारेहिं सम्माणेऊण तीइ उच्छंगे । अप्पिय विजयपडायं सप्पणयं भणइ तुह एसा ॥२००॥
इत्तो धूया, इयएवमाइ काऊण संपयाणविहिं । विजयपडायं पभणइ वच्छे! सुण मज्झ वयणमिणं॥२०१।
"निर्व्याजा दयिते ननान्दृषु नता श्वश्रूषु भक्ता भव, स्निग्धा बन्धुषु वत्सला परिजने स्मेरा सपत्नीष्वपि।
पत्युर्मित्त्रजने सनर्मवचना खिन्ना च तद्द्वेषिषु, स्त्रीणां संवननं नतभ्रु ! तदिदं वीतौषधं भर्तृषु ॥
अभ्युत्थानमुपागते गृहपतौ तद्भाषणे नम्रता, तत्पादार्पितदृष्टिरासनविधेस्तस्योपचर्या स्वयम् ।
सुप्ते तत्र शयीत तत्प्रथमतो जह्याच्च शय्यामिति, प्राच्यैः पुत्रि ! निवेदिताः कुलवधूसिद्धान्तधर्मा अमी ॥'
तत्तो विजयपडाया पाएसु पणमिउं भणइ एवं । सव्वंपि तं करिस्सं ताएणं जं समाइट्ठं ॥२०२॥
अह देवीणं पणगं तीए आएसकारयं मोत्तुं । दुहियाए अणुन्नाओ कुमरेण य विहियसम्माणो ॥२०३॥
सट्ठाणं संपत्तो अमिइगई दाविउं विजयढक्कं । कुमरोवि हु संचलिओ पत्तो य कमेण चंपाए ॥२०४॥
सिरिसेणनरिंदोवि हु पच्चोणीए समागओ दट्ठुं । विजयपडायाकुमरिं परियरियं ताहिं अमरीहिं॥२०५॥
कुमरागमणनिवेअगपुरिसं पुच्छइ सविम्हयं तत्तो । कुमरपट्ठीए काओ अमरीओ इह विमाणम्मि?॥२०६॥
तो तेसिं वुत्ततं सव्वं परिकहइ सोवि, तो राया । हरिसप्पयरिसपरिसप्पमाणहियओ विचिंतेइ ॥२०७॥
तम्मि कुले उप्पत्ती सो विणओ तं कलासु कोसल्लं । सो कोवि पुन्नपब्भारपगरिसो अत्थि एयस्स ॥
जेण [1]निवकुमरचक्कं अवगन्नेऊण नूण सयमेव । महकन्नारयणपणं अणवाहं विंधई राहं ॥२०९॥
ता अवरवरासंकासंभंतं मज्झ माणसं इन्हिं । निण्हुयवियप्पजालं अवलंबउ निव्वुइं परमं ॥२१०॥

उपवेशितश्चतुष्के कुमारो भृता च तस्य देव्या । मुक्ताफलैः शेषा, अक्षुरेण कुमारकरकमले ॥१९८॥
वस्त्राभरणानि समर्प्य कुमारस्य परिजनः सर्वः । सम्मानितो यथोचितमम्बाधात्रीं कुमारस्य ॥१९९॥
वस्त्रालङ्कारैः सम्मान्य तस्या उत्सङ्गे । अर्पयित्वा विजयपताकां सप्रणयं भणति तवैषा ॥२००॥
इतो दुहिता, इत्येवमादि कृत्वा संप्रदानविधिम् । विजयपताकां प्रभणति वत्स ! शृणु मम वचनमिदम् ॥
ततो विजयपताका पादयोः प्रणम्य भणत्येवम् । सर्वमपि तत्करिष्ये तातेन यत्समादिष्टम् ॥२०२॥
अथ देवीनां पञ्चकं तस्या आदेशकारकं मुक्त्वा । दुहित्राऽनुज्ञातः कुमारेण च विहितसम्मानः ॥२०३॥
स्वस्थानं संप्राप्तोऽमितगतिर्दापयित्वा विजयढक्काम् । कुमारोऽपि खलु संचलितः प्राप्तश्च क्रमेण चम्पायाम् ॥
श्रीषेणनरेन्द्रोऽपि खलु स्वागतसमारोहेण समागतो दृष्ट्वा । विजयपताकाकुमारीं परिकरितां ताभिरमरीभिः ॥
कुमारागमननिवेदकपुरुषं पृच्छति साविस्मयं ततः । कुमारपृष्ठे का अमर्य इह विमाने ? ॥२०६॥
ततस्तासां वृत्तान्तं सर्वं परिकथयति सोऽपि, ततो राजा । हर्षप्रकर्षपरिसर्पद्धृदयो विचिन्तयति ॥२०७॥
तस्मिन् कुल उत्पत्तिः स विनयस्तत् कलासु कौशलम् । स कोऽपि पुण्यप्राग्भारप्रकर्षोऽस्त्येतस्य ॥२०८॥
येन नृपकुमारचक्रमवगणय्य नूनं स्वयमेव । मत्कन्यारत्नपणमनाबाधं विध्येद् राधाम् ॥२०९॥

---

[1] ग. वररायच° ।

पइसमयपवट्टियपणयनिब्भरा दोवि कुमरनरवइणो । उचियपडिवत्तिपुव्वं पत्ता कुमरस्स अरिहम्मि ॥
आवासे कज्जोचियपयत्थपरिपूरियम्मि, अह राया । संपत्तो धवलहरे विजयपडायं समं नेउं ॥२१२॥
संठावइ कन्नंतेउरम्मि कारइ य तीइ उवयारं । राहामंडवमसमं सज्जावइ पुव्वनिम्मवियं ॥२१३॥
अह राहावेहदिणे कुमरो हक्कारिओ नरिंदेण । वरवत्थाहरणाई असुरविइन्नाई परिहेउं ॥२१४॥
करिवरखंधारूढो संचलिओ सयलनियबलसमेओ । पत्तो य तत्थ तत्तो करिवरखंधाओ ओयरिओ ॥
मंचोवरिसंठावियसिंहासणपरिनिविट्ठरायसुए । रायसुयमउडचूडामणिप्पहाजालजडिलिल्ले ॥२१६॥
नयणूसवभूए तत्थ मंडवे सुरसहाए सक्कोव्व । नियपहाओहामियनिवचक्को निविसए कुमरो ॥२१७॥
सिरिसेणरायपासट्ठिया य तं पिक्खिउं रयणमाला । विम्हियहियया कुमरं परियाणिय परियणमुहाओ॥
चिंतइ वरभावे अहिगयम्मि एयारिसे पुरिसरयणे । राहावेहपइन्नाबुद्धी हा दिव्व! कह दिन्ना?॥२१९॥
अहवा किं एवं सोइएण जइ कहवि विंधए राहं । अन्नो एयं मोत्तुं ता मह मरणं परं सरणं ॥२२०॥
इत्तो य मंडवे तम्मि ठाविओ गुरुदिढो कणयथंभो । तस्सोवरि संठविया अहोमुहा कणयपुत्तलिया ॥२२१॥
तीए अहो ठवियाइं रयपरिभमिराई अट्ठ चक्काइं । कोइंचि वामं भमिराइं दाहिणंगेण काइंपि ॥२२२॥
तेसिमहोभूमीए ठविया कुंडी य तेल्लपडिपुन्ना । तत्थ पडिबिंबियंतं राहारूवं निएऊण ॥२२३॥
विंधेयव्वा थिरमाणसेण वामच्छितारिया तीए । थेवंपि पमाएणवि अनियंतेण उवरिहुत्तं ॥२२४॥

तस्मादपरवराशङ्कासंभ्रान्तं मम मानसमिदानीम् । निह्नुतविकल्पजालमवलम्बतां निर्वृतिं परमाम् ॥२१०॥
प्रतिसमयप्रवर्तितप्रणयनिर्भरौ द्वावपि कुमारनरपती । उचितप्रतिपत्तिपूर्वं प्राप्तौ कुमारस्यार्हे ॥२११॥
आवासे कार्योचितपदार्थपरिपूरिते, अथ राजा । संप्राप्तो धवलगृहे विजयपताकां समं नीत्वा ॥२१२॥
संस्थापयति कन्यान्तःपुरे कारयति च तस्या उपचारम् । राधामण्डपमसमं सज्जयति पूर्वनिर्मापितम् ॥२१३॥
अथ राधावेधदिने कुमारो हक्कारितो नरेन्द्रेण । वरवस्त्राभरणान्यसुरवितीर्णानि परिधाय ॥२१४॥
करिवरस्कन्धारूढः संचलितः सकलनिजबलसमेतः । प्राप्तश्च तत्र ततः करिवरस्कन्धादवतीर्णः ॥२१५॥
मञ्चोपरिसंस्थापितसिंहासनपरिनिविष्टराजसुते । राजसुतमुकुटचूडामणिप्रभाजालजटिलिते ॥२१६॥
नयनोत्सवभूते तत्र मण्डपे सुरसभायां शक्र इव । निजप्रभातोलितनृपचक्रो निविशते कुमारः ॥२१७॥
श्रीषेणराजपार्श्वस्थिता च तं प्रेक्ष्य रत्नमाला । विस्मितहृदया कुमारं परिज्ञाय परिजनमुखात् ॥२१८॥
चिन्तयति वरभावेऽधिगत एतादृशे पुरुषरत्ने । राधावेधप्रतिज्ञाबुद्धिर्हा दैव ! कथं दत्ता ? ॥२१९॥
अथवा किमेवं शोचितेन यदि कथमपि विध्यति राधाम् । अन्य एतां मुक्त्वा तदा मम मरणं परं शरणम् ॥
इतश्च मण्डपे तस्मिन् स्थापितो गुरुदृढः कनकस्तम्भः । तस्योपरि संस्थापिताऽधोमुखा कनकपुत्रिका ॥२२१॥
तस्या अधः स्थापितानि रयपरिभ्रमितृण्यष्ट चक्राणि । कानिचिद् वामं भ्रमितॄणि दक्षिणाङ्गेन कान्यपि ॥
तेषामधोभूमौ स्थापिता कुण्डी च तैलपरिपूर्णा । तत्र च प्रतिबिम्ब्यमानं राधारूपं दृष्ट्वा ॥२२३॥

---

१ ग. काइं वामावत्ताइं दाहिणवत्तीणि काइं तु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताहे सिरिसेणेणं नरवइणा जंपियं जहा भो भो ! । जो राहमिणं विंधइ सो कन्नाए इमीए वरो ॥२२५॥
तथा ।
इत्थागयाण मुणिउं सव्वेसिं खत्तियाण नामाइं । भुज्जेसुं[1] लिहिऊणं मिम्मयगोलेसु खित्ताइं ॥२२६॥
कणयकलसे विसाले ठवियाइं संति ताइं कड्ढंते । अम्हं पुरोहियम्मी नीसरइ गोलओ जस्स ॥२२७॥
सो राहावेहम्मी ववसायं कुणउ जह इय ववत्था । तत्थ पुरोहियहत्थे पढमं चिय गोलए चडिए॥२२८॥
नामम्मि वाइए तत्थ तस्स पुत्तो अउज्झनिवपहुणो । मयरद्धयकुमरो उट्ठिऊण चावं करे करइ॥२२९॥
कुंडलियचावदंडेण तेण धणुवेयगव्वियमणेणं । पुव्वभणिएण विहिणा मुक्को बाणो दिढमणेण॥२३०॥
अरयम्मि सुवित्तासंजियम्मि मुणिमाणसेव्व उप्फिडिउं । सव्वत्थ लद्धपसरो भग्गो मयरद्धयस्स सरो ॥
राहावेहविहीए विहलारंभेहिं खत्तियवरेहिं । मयरद्धयव्व लक्खे भग्गे अन्नेहिंवि बहूहिं ॥२३२॥
कहियावसरम्मिं पुरोहिएण सिरिभुवणमल्लकुमरेण । सज्जीकयकोयंडे झत्ति समारोवियसरेण ॥२३३॥
आयड्ढियकोयंडेण पंडुनरनाहनंदणेणंव । उवरिट्ठियराहावामतारिया झत्ति परिविद्धा ॥२३४॥
अह जयतालामुहले जणम्मि उज्जीवियंव अप्पाणं । मन्नंती मालं खिवइ बालिया कुमरकंठम्मि ॥२३५॥
अत्रान्तरे पठितं भट्टेन;—
राहावेहवरप्पइन्नसायर बुड्डंतउं, कन्नारयणु तिलोयतरुणिवरगुणसंजुत्तउं ।
जसु उत्तारणि रायचक्कु सव्वुवि पडिभग्गउं, तं उत्तारिय जेण झत्ति, तसु पयउं लग्गउं ॥२३६॥

वेद्धव्या स्थिरमानसेन वामाक्षितारिका तस्याः । स्तोकमपि प्रमादेनाप्यपश्यतोपर्यभिमुखम् ॥२२४॥
तदा श्रीषेणेन नरपतिना जल्पितं यथा भो भोः ! । यो राधामिमां विध्यति स कन्याया अस्या वरः॥२२५॥
अत्रागतानां ज्ञात्वा सर्वेषां क्षत्रियाणां नामानि । भूर्जेषु लिखित्वा मृण्मयगोलकेषु क्षिप्तानि ॥२२६॥
कनककलशे विशाले स्थापितानि सन्ति तानि कर्षति । अस्माकं पुरोहिते निःसरति गोलको यस्य ॥२२७॥
स राधावेधे व्यवसायं करोतु यथेति व्यवस्था । तत्र पुरोहितहस्ते प्रथममेव गोलके चटिते ॥२२८॥
नामनि वाचिते तत्र तस्य पुत्रोऽयोध्यानृपप्रभोः । मकरध्वजकुमार उत्थाय चापं करे करोति ॥२२९॥
कुण्डलितचापदण्डेन तेन धनुर्वेदगर्वितमनसा । पूर्वभणितेन विधिना मुक्तो बाणो दृढमनसा ॥२३०॥
अरके सुवृत्तासञ्जिते मुनिमानस इवोद्भ्रश्य । सर्वत्र लब्धप्रसरो भग्नो मकरध्वजस्य शरः ॥२३१॥
राधावेधविधौ विफलारम्भैः क्षत्रियवरैः । मकरध्वजेनेव लक्ष्ये भग्नेऽन्यैरपि बहुभिः ॥२३२॥
कथितावसरे पुरोहितेन श्रीभुवनमल्लकुमारेण । सज्जीकृतकोदण्डेन झटिति समारोपितशरेण ॥२३३॥
आकर्षितकोदण्डेन पाण्डुनरनाथनन्दनेनेव । उपरिस्थितराधावामतारिका झटिति परिविद्धा ॥२३४॥
अथ जयतालामुखरे जन उज्जीवितमिवात्मानम् । मन्यमाना मालां क्षिपति बालिका कुमारकण्ठे ॥२३५॥
राधावेधवरप्रतिज्ञासागरे ब्रुडत्, कन्यारत्नं त्रिलोकीतरुणीवरगुणसंयुक्तम् ।
यस्योत्तारणे राजचक्रं सर्वमपि परिभग्नं, तदुत्तारितं येन झटिति, तस्य पादयोर्लगामि ॥ २३६॥

---

१ ग. भुज्जखंडेसु लिहिउं वि° ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विन्नाणु अगव्वु अतुच्छ मइ जसु परकज्जिसु धीरह। तसु पाय नमंसहु खत्तियहु भुवणमल्लवरवीरह ॥
रोमंचकंचुइज्जंतसव्वगत्तो नरिंदसिरिसेणो। मउडविवज्जाहरणं सव्वं से देइ भट्टस्स ॥२३८॥
अन्नोवि रायलोओ संतगुणुक्कित्तणं कुमारस्स। तह चेव कुणइ सव्वो, गुणेसु को मँच्छरं वहइ?॥२३९॥
सिरिसेणनरिंदेणं रायाणो तह य रायपुत्ता य। कयसम्माणा अन्ने नियनियठाणेसु संपत्ता ॥२४०॥
फग्गुणसियपंचमिगुरुदिणम्मि विहियं सुमंगलसएहिं। कुमरेण रयणमालाविजयपडायाण परिणयणं ॥
रन्ना कयपडिवत्ती कुमरो नीहरइ चंपनयरीओ। दोहिंवि भज्जाहिं समं आरूढो वरविमाणम्मि ॥२४२॥
लंघंतो बहुनगनगरारामवरखेडकब्बडाईणि। थोवदिणेहिं पत्तो कुसुमपुरासन्नगामम्मि ॥२४३॥
पच्चोणीए राया अंतेउरपरिगओ तहिं पत्तो। कुमरोवि सह वहूहिं ओयरिऊणं विमाणाओ ॥२४४॥
पयपंकयाइं पणमइ पिऊण संभासिउं पणइवग्गं। नयरम्मि तओ पविसइ ऊसवभूयम्मि सव्वत्तो ॥२४५॥
भुत्तुत्तरम्मि सव्वं कहियं सिंहेण कुमरमित्तेण। रन्नो जं जह वित्तं ता जाव इहागओ कुमरो ॥२४६॥
बीयदिणे तो राया कुमरं अहिसिंचिऊण रज्जम्मि। सिरिअभयसूरिपासे गिण्हइ पव्वज्जमणवज्जं ।२४७।
अह हेमचंदसाहू पढिएसु समग्गअंगुवंगेसु। ठविओ नियसूरिपए विहरइ वसुहाए विहिपुव्वं ॥२४८॥
जिणसासणउच्छप्पणदप्पणहत्थाए तवसिरिवहूए। परिकलिओवि हु जो बंभयारिचूडामणी भणिओ ॥
देसेइ सुगइमग्गं भव्वाण भयं च कुमयचारीणं। देसणपडहरवेणं अभयं जीवाण जो देइ ॥२५०॥

विज्ञानमगर्वमतुच्छा मतिर्यस्य परकार्येषु धीरस्य। तस्य पादौ नमस्यामि क्षत्रियस्य भुवनमल्लवरवीरस्य॥२३७॥
रोमाञ्चकञ्चुकायमानसर्वगात्रो नरेन्द्रश्रीषेणः। मुकुटविवर्जाभरणं सर्वं तस्मै ददाति भट्टाय ॥२३८॥
अन्योऽपि राजलोकः सद्गुणोत्कीर्तनं कुमारस्य। तथैव करोति सर्वः, गुणेषु को मत्सरं वहेत्? ॥२३९॥
श्रीषेणनरेन्द्रेण राजानस्तथा च राजपुत्राश्च। कृतसम्माना अन्ये निजनिजस्थानेषु संप्राप्ताः ॥२४०॥
फाल्गुनसितपञ्चमीगुरुदिने विहितं सुमङ्गलशतैः। कुमारेण रत्नमालाविजयपताकयोः परिणयनम् ॥२४१॥
राज्ञा कृतप्रतिपत्तिः कुमारो निस्सरति चम्पानगरीतः। द्वाभ्यामपि भार्याभ्यां सममारूढो वरविमाने ॥२४२॥
लङ्घमानो बहुनगनगरारामवरखेटकर्बटादीनि। स्तोकदिनैः प्राप्तः कुसुमपुरासन्नग्रामे ॥२४३॥
स्वागतोत्सवेन राजाऽन्तःपुरपरिगतस्तत्र प्राप्तः। कुमारोऽपि सह वधूभ्यामवतीर्य विमानात् ॥२४४॥
पादपङ्कजानि प्रणमति पित्रोः संभाष्य प्रणयिवर्गम्। नगरे ततः प्रविशत्युत्सवभूते सर्वतः ॥२४५॥
भुक्तोत्तरे सर्वं कथितं सिंहेन कुमारमित्रेण। राज्ञे यद् यथा वृत्तं तावद्यावदिहागतः कुमारः ॥२४६॥
द्वितीयदिने ततो राजा कुमारमभिषिच्य राज्ये। श्रीअभयसूरिपार्श्वे गृह्णाति प्रव्रज्यामनवद्याम् ॥२४७॥
अथ हेमचन्द्रसाधुः पठितेषु समग्राङ्गोपाङ्गेषु। स्थापितो निजसूरिपदे विहरति वसुधायां विधिपूर्वम्॥२४८॥
जिनशासनोत्सर्पणादर्पणहस्तया तपःश्रीवध्वा। परिकलितोऽपि खलु यो ब्रह्मचारिचूडामणी भणितः॥२४९॥
देशयति सुगतिमार्गं भव्यानां भयं च कुमतिचारिणाम्। देशनापटहरवेणाभयं जीवानां यो ददाति ॥२५०॥

---

१ छप्पया छंद। २ ग. °रगामव°।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वरकणयकलससदंडभासुरं सासणं जिणिंदस्स । सासणमित्तेण कुणंति जस्स पुहईसरा झत्ति ॥२५१॥
रहजत्तपत्तसोहं अट्ठाहियमहिमविहियखलखोहं । जिणसासणं समग्गं जायं तत्तो निरुवसग्गं ॥२५२॥
इय हेमचंदसूरी सूरो इव तवकरेहिं दिप्पंतो । विहुणंतो मोहतमं नरिंदमंडलियमाईणं ॥२५३॥
विहरइ वसुहाए, भुवणमल्लरायावि रज्जमणवरयं । तह पालइ जह सुयणा गयंपि कालं न याणंति ॥
चत्तो सो देसो दुज्जणेहिं भीएहिं जत्थ सो राया । गरुडाहिट्ठियठाणंव सप्पनियरेण दूरेण ॥२५५॥
अह अन्नया य सीहो नरवइणा ठाविओ अमच्चपए । जो इह सिंहसरूवो मणुयमिगाणं समग्गाणं ॥२५६॥
कारावइ कारामंदिराइं पउराइं सो अपुव्वाइं । पुव्वेसु अमायंते अणवरयधरिज्जमाणजणे ॥२५७॥
अवराहासंकाए धरिया जे तत्थ निरवराहावि । तेसिं वारइ भत्तं पाणं च वियारपरिमुक्को ॥२५८॥
तत्थ य पाणच्चाओ जायइ केसिंपि छुहकिलंताणं । तण्हाए फुडियनयणा अन्ने पुण जंति पंचत्तं ॥२५९॥
तं असमंजसचरियं नाऊणं नरवरो भणइ सिंहं । किं भवजलहितरंडं पढमवयमेवमइयरसि ? ॥२६०॥
ता कोवि न गुत्तीए धरियव्वो भो ! तए निरवराहो । थेवे अवराहेवि हु वारेयव्वं न भत्तजलं॥२६१॥
अह सो तं निववयणं सोउं भणिउं 'पमाणमाएसो' । जहपुव्विं वट्टंतो वट्टइ तह चेव निच्चंपि ॥२६२॥
तं च परियाणिऊणं भणिओ रन्ना कहं तहेव तुमं । वट्टसि, विरमसि नो वारिओवि, एवं उविक्खाए ॥
मज्झवि अइयरसि वयं, तो सो पडिभणइ जह न अइयरइ । तह किज्जउ अप्पिज्जउ मुद्दा अन्नस्स कस्सावि ॥
भणइ निवो तइ मुद्दं इमं मुयंतम्मि नत्थि मह असुहं । जं चयसि नियममुद्दं तं पुण बाढं दहइ हिययं ॥२६५॥

वरकनककलशसदण्डभासुरं शासनं जिनेन्द्रस्य । शासनमात्रेण कुर्वन्ति यस्य पृथिवीश्वरा झटिति ॥२५१॥
रथयात्राप्राप्तशोभमष्टाह्निकामहिमविहितखलक्षोभम् । जिनशासनं समग्रं जातं ततो निरुपसर्गम् ॥२५२॥
इति हेमचन्द्रसूरिः सूर इव तपःकरैर्दीप्यमानः । विधुनयन् मोहतमो नरेन्द्रमण्डलिकादीनाम् ॥२५३॥
विहरति वसुधायां, भुवनमल्लराजोऽपि राज्यमनवरतम् । तथा पालयति यथा सुजना गतमपि कालं न जानन्ति ॥
त्यक्तः स देशो दुर्जनैर्भीतैर्यत्र स राजा । गरुडाधिष्ठितस्थानमिव सर्पनिकरेण दूरेण ॥२५५॥
अथान्यदा च सिंहो नरपतिना स्थापितोऽमात्यपदे । य इह सिंहस्वरूपो मनुजमृगाणां समग्राणाम् ॥२५६॥
कारयति कारामन्दिराणि प्रचुराणि सोऽपूर्वाणि । पूर्वेष्वमात्यऽनवरतध्रियमाणजने ॥२५७॥
अपराधाशङ्कया धृता ये तत्र निरपराधा अपि । तेषां वारयति भक्तं पानं च विचारपरिमुक्तः ॥२५८॥
तत्र च प्राणत्यागो जायते केषामपि क्षुत्क्लान्तानाम् । तृष्णया स्फुटितनयना अन्ये पुनर्यान्ति पञ्चत्वम् ॥
तदसमञ्जसचरितं ज्ञात्वा नरवरो भणति सिंहम् । किं भवजलधितरण्डं प्रथमव्रतमेवमतिचरसि ? ॥२६०॥
तस्मात्कोऽपि न गुप्तौ धर्तव्यो भोः ! त्वया निरपराधः । स्तोकेऽपराधेऽपि खलु वारियतव्यं न भक्तजलम् ॥
अथ स तन्नृपवचनं श्रुत्वा भणित्वा 'प्रमाणमादेशः' । यथापूर्वं वर्तमानो वर्तते तथैव नित्यमपि ॥२६२॥
तच्च परिज्ञाय भणितो राज्ञा कथं तथैव त्वम् । वर्तसे, विरमसि नो वारितोऽपि, एवमुपेक्षया ॥२६३॥
ममाप्यतिचरसि व्रतं, ततः स प्रतिभणाति यथा नातिचरति । तथा क्रियतामर्प्यतां मुद्राऽन्यस्मै कस्मायपि॥२६४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ता जइ एयं मुद्दं मुंचसि ता मुंच नत्थि इह दोसो। सग्गापवग्गदाराइं तुब्भ जं मुद्दए एसा ॥२६६॥
वयमुद्दं तु चयंतो लहिहिसि संसारसायरे घोरे। दुहदंदोलिमणंतं कालं ता चयसु मा, एवं ॥२६७॥
अणुसासिज्जंतो सो मुद्दं मुत्तूण निवसमीवम्मि। नियगेहं संपत्तो अणणुन्नाओ नरिंदेण ॥२६८॥
अह सावयधम्मरयस्स सुमइणो सुमइनामसचिवस्स। तं मुद्दमप्पिऊणं रायावि हु कुणइ जिणधम्मं॥२६९॥
जिणसासणं पभावइ रहजत्ताईहिं विविहहेऊहिं। साहम्मियमप्पगुणंपि मन्नए अप्पणो तुल्लं ॥२७०॥
अह सीहेणं पुव्विं पट्टियगामम्मि तुट्टदव्वत्थं[1]। पट्टइलो नरवालो पुव्विं जो आसि गुत्तीए ॥२७१॥
खित्तो छुहाए नडिओ मरिऊणं वंतरो समुप्पन्नो। सो, सुमरियपुव्वभवेण तेणं सीहो नहे धरिउं॥२७२॥
उब्भावियं च वेरं पच्चक्खं पउरपउरलोयस्स। सो मारिओ रसंतो उप्पन्नो पढमपुढवीए ॥२७३॥
भमिही भवम्मि तत्तो किच्छेणं पाविउं पुणवि बोहिं। लहिही सिवंपि, तं पुण तब्भवसम्मत्तलाभफलं ॥
अह हेमचंदसूरी कमेण विहरंतओ तहिं पत्तो। तो भुवणमल्लराया वंदइ सकलत्तओ गंतुं ॥२७५॥
तद्देसणदावानलकम्मिंधणदहणलद्धवेरग्गो। पुत्तं रज्जे मयणं ठविऊणं रयणमालाए ॥२७६॥
पडिवज्जिय पव्वज्जं विजयपडायाए सह विभूईए। मुक्कगुरुकम्मकवओ संपत्तो सासयं ठाणं ॥२७७॥

॥ भक्तपानव्यवच्छेदे सिंहमन्त्रिदृष्टान्तः समाप्तः। तत्समाप्तौ समाप्तं सातिचारं प्रथममणुव्रतम् ॥

भणति नृपस्त्वयि मुद्रामिमां मुञ्चति नास्ति ममासुखम्। यत्त्यजसि नियममुद्रां तत्पुनर्बाढं दहति हृदयम् ॥
तस्माद्यद्येतां मुद्रां मुञ्चसि तदा मुञ्च नास्तीह दोषः। स्वर्गापवर्गद्वाराणि तव यन्मुद्रयत्येषा ॥२६६॥
व्रतमुद्रां तु त्यजल्लँप्स्यसे संसारसागरे घोरे। दुःखपङ्क्तिमनन्तं कालं तस्मान्मुञ्च मा, एवम् ॥२६७॥
अनुशिष्यमाणः स मुद्रां मुक्त्वा नृपसमीपे। निजगेहं संप्राप्तोऽननुज्ञातो नरेन्द्रेण ॥२६८॥
अथ श्रावकधर्मरताय सुमतये सुमतिनामसचिवाय। तां मुद्रामर्पयित्वा राजापि खलु करोति जिनधर्मम् ॥
जिनशासनं प्रभावयति रथयात्रादिभिर्विविधहेतुभिः। साधर्मिकमल्पगुणमपि मन्यत आत्मनस्तुल्यम्॥२७०॥
अथ सिंहेन पूर्वं पद्रग्रामे त्रुटितद्रव्यार्थम्। पद्रेशो नरपालः पूर्वं य आसीद् गुप्तौ ॥२७१॥
क्षिप्तः क्षुधा नटितो मृत्वा व्यन्तरः समुत्पन्नः। सः, स्मृतपूर्वभवेन तेन सिंहो नभसि धृत्वा ॥२७२॥
उद्भावितं च वैरं प्रत्यक्षं प्रचुरपौरलोकस्य। स मारितो रसन्नुत्पन्नः प्रथमपृथिव्याम् ॥२७३॥
भ्रमिष्यति भवे ततः कृच्छ्रेण प्राप्य पुनरपि बोधिम्। लप्स्यते शिवमपि तत्पुनस्तद्भवसम्यक्त्वलाभफलम् ॥
अथ हेमचन्द्रसूरिः क्रमेण विहरंस्तत्र प्राप्तः। ततो भुवनमल्लराजो वन्दते सकलत्रको गत्वा ॥२७५॥
तद्देशनादावानलकर्मेन्धनदहनरम्यवैराग्यः। पुत्रं राज्ये मदनं स्थापयित्वा रत्नमालायाः ॥२७६॥
प्रतिपद्य प्रव्रज्यां विजयपताकया सह विभूत्या। मुक्तगुरुकर्मकवचः संप्राप्तः शाश्वतं स्थानम् ॥२७७॥

---

१ ख. दविणत्थं।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अस्यां शास्त्रमालायां मुद्रिता ग्रन्थाः ।

[१] **सुरसुंदरीचरिअं** । प्राकृतभाषायां चतुःसहस्रगाथाबद्धोऽयं ग्रन्थः । अत्राधिकृतकथा सरलयाऽथ च सरसया भाषया प्रतिपादिता । विषमस्थलेषु संस्कृतपर्यायैष्टिप्पनकमप्यकारि । अनेकज्ञातव्यवृत्तान्तपरिपूर्णया संस्कृतभाषात्मिकया विस्तीर्णया प्रस्तावनया विभूषितम् । विद्वद्भिर्भूयः प्रशंसितम् । साधारणपत्रात्मकस्य मूल्यं २-०-० उच्चपत्रात्मकस्य मूल्यं ३-०-०

[२] **हरिभद्रसूरिचरित्रम्** । सुप्रसिद्धजैनग्रन्थकारस्य हरिभद्रसूरेरितिहासविषयमद्यावधि समुपलभ्यमानं समस्तमपि वृत्तं महता परिश्रमेण समासाद्यात्र संकलितम् । ऐतिहासिकदृष्ट्या लिखितमिदं पुस्तकं प्रस्तुतविषयेऽत्युपयुक्ततामद्वितीयतां च बिभर्ति । सुदृढपत्रेषु मुद्रितस्याप्यस्य मूल्यं ०—४—०

[३] **सप्तसंधानमहाकाव्यम्** । अत्र ऋषभनाथ-शान्तिनाथ-नेमिनाथ-पार्श्वनाथ-महावीरस्वामि-कृष्ण-रामचन्द्राणां सप्तानामपि महात्मनां विभिन्नघटनाशालीन्यपि चरित्राणि सदृशैरेव शब्दविन्यासैः प्रतिपादितानीति विदुषामत्याश्चर्यकरोऽदृष्टपूर्वश्चायं ग्रन्थो महता परिश्रमेणोपलभ्य संशोध्य च प्रकाशितः । विषमस्थलेषु टिप्पनेनाप्यलंकृतः । सुदृढपत्रेषु मुद्रितस्याप्यस्य मूल्यं ०—८—०

[४] First Principles of Jaina Philosophy (second Edition) A succint summary of Jaina Metaphysics and Logic, by H. L. Jhaveri. Price 0-10-0.

मुद्र्यमाणौ (In the Press)

[१] **सुपासनाहचरिअं** । द्वितीयो भागः ।

[२] **रयणसेहरकहा** । श्रीजिनहर्षगणिविरचिता प्राकृतगद्यपद्यमयी पर्वातिथिफलप्रतिपादनपरा लघीयसी अथच विचित्रघटनाङ्किता रससुधावर्षिणी कथा । संस्कृतच्छायया अलंकृता ।

मुद्रयिष्यमाणाः (Ander preparation)

[१] **श्रीशान्तिनाथचरित्रम्** । महोपाध्यायश्रीमेघविजयगणिविरचितम् । नैषधीयमहाकाव्यपादपूर्त्याऽत्र श्रीशान्तिनाथचरित्रं चित्ताकर्षकतया व्यावर्णितम् ।

[२] **प्राकृतसूक्तरत्नमाला** । प्राचीनानां सुभाषितानां विविधविषयपराणामत्र संग्रहः । संस्कृतच्छायया आङ्ग्लभाषानुवादेन च विभूषिता । by Baboo Puranchand Nahar M. A., B. L., High Court Vakil, Calcutta.

[३] **गाहारयणकोसो** । श्रीजिनेश्वरसूरिविरचितः । संस्कृतच्छायासहितः ।

[४] **महिवालचरिअं** । श्रीवीरदेवगणिविनिर्मितम् । संस्कृतच्छायाविभूषितम् ।

पत्रादिप्रेषणस्थानम्—

जैन विविध साहित्य शास्त्रमाला कार्यालय,

बनारस सिटी ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org